.. 14. Ashvamedhikaparva Kumbhaghonam Edition ..

॥ १४. आश्वमेधिकपर्व ॥

आश्वमेधिकपर्व - अध्याय ००१
॥ श्रीः ॥
१४.१. अध्यायः १

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
गङ्गायां भीष्मायोदकदानानन्तरं बन्धुशोकविषण्णं
युधिष्ठिरंप्रति धृतराष्ट्रेण समाश्वासनम् ॥ १ ॥
तथा विदुरवचनानादरेण स्वस्यैतादृशानर्थप्राप्तिकथनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

श्रीवेदव्यासाय नमः ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १४-१-१ (९२३६७)
वैशम्पायन उवाच। १४-१-२क्ष् (७७३०)
कृतोदकस्तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुरुत्तताराकुलेन्द्रियः ॥ १४-१-२ (९२३६८)
उत्तीर्य तु महाबाहुर्बाष्पव्याकुललोचनः ।
पपात तीरे गङ्गाया व्याधविद्ध इव द्विपः ॥ १४-१-३ (९२३६९)
तं सीदमानं जग्राह भीमः कृष्णेन चोदितः ।
मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः ॥ १४-१-४ (९२३७०)
तमार्तं पतितं भूमौ श्वसन्तं च पुनः पुनः ।
तदृशुः पार्थिवा राजन्धर्मपुत्रं युधिष्ठिरम् ॥ १४-१-५ (९२३७१)
त दृष्ट्वा दीनमनसं गतसत्वं नरेश्वरम् ।
भूयः शोकसमाविष्टाः पाण्डवाःक समुपाविशन् ॥ १४-१-६ (९२३७२)
राजा तु धृतराष्ट्रस्तं तथा दीनो महाभुजम् ।
वाक्यमाह महाबुद्धिः प्रज्ञाचक्षुर्नरेश्वरम् ॥ १४-१-७ (९२३७३)
उत्तिष्ठ कुरुशार्दूल कुरु कार्यमनन्तरम् ।
क्षत्रधर्मेण कौन्तेय जितेयमवनी त्वया ॥ १४-१-८ (९२३७४)

भुङ्क्ष सार्धं भ्रातृभिस्तां सुहृद्भिश्च जनेश्वर ।
शोचितव्यं न पश्यामि त्वया धर्मभृतांवर ॥१४-१-९ (९२३७५)
शोचितव्यं मया चैव गान्धार्या च महीपते ।
ययोः पुत्रशतं नष्टं स्वप्नलब्धं यथा धनम् ॥१४-१-१० (९२३७६)
अश्रुत्वा हितकामस्य विदुरस्य महात्मनः ।
वाक्यानि सुमहार्थानि परितप्यामि दुर्मतिः ॥१४-१-११ (९२३७७)
उक्तवान्विदुरो यन्मां धर्मात्मा दिव्यदर्शनः ।
दुर्योधनापराधेन कुलं ते विनशिष्यति ॥१४-१-१२ (९२३७८)
स्वस्ति चेदिच्छसे राजन्कुलस्य कुरु मे वचः ।
वध्यतामेष दुष्टात्मा मन्दो राजा सुयोधनः ॥१४-१-१३ (९२३७९)
कर्णश्च शकुनिश्चैव नैनं पश्यतु कर्हिचित् ।
द्यूतसङ्घातमप्येषामप्रमादेन वारय ॥१४-१-१४ (९२३८०)
अभिषेचय राजानं धर्मात्मानं युधिष्ठिरम् ।
स पालयिष्यति वशी धर्मेण पृथिवीमिमाम् ॥१४-१-१५ (९२३८१)
अथ नेच्छसि राजानं कुन्तीपुत्रं युधिष्ठिरम् ।
गविनाशमुपयास्तन्ति तव पुत्रा न संशयः।'
मेढीभूतः स्वयं राज्यं प्रतिगृह्णीष्व पार्थिव ॥ १४-१-१६ (९२३८२)
समं सर्वेषु भूतेषु वर्तमानं नराधिप ।
अनुजीवन्तु सर्वे त्वां ज्ञातयो ज्ञातिवर्धन ॥१४-१-१७ (९२३८३)
एवं ब्रुवति कौन्तेय विदुरे दीर्घदर्शिनि ।
दुर्योधनमहं पापमन्ववर्तं वृथामतिः ॥१४-१-१८ (९२३८४)
अश्रुत्वा तस्य धीरस्य वाक्यानि मधुराण्यहम् ।
फलं प्राप्य महद्दुःखं निमग्नः शोकसागरे ॥१४-१-१९ (९२३८५)
वृद्धौ हि तेऽद्य पितरौ पश्य नौ दुःखितौ नृप ।
न शोचितव्यं भवता पश्यामीह जनाधिप ॥ ॥१४-१-२० (९२३८६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
प्रथमोऽध्यायः ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१-१ कृतोदकं त्विति झ पाठः ॥
७-१-२ उत्ततार गङ्गात इति शेषः ॥

आश्वमेधिकपर्व - अध्याय ००२
॥ श्रीः ॥
१४.२. अध्यायः २

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

धृतराष्ट्रेण समाश्वासनेपि तूष्णीं तिष्ठन्तो युधिष्ठिरस्य कृष्णेन परिसान्त्वनम् ॥ १ ॥

पुनर्भीष्मद्रोणकर्णमारणानुस्मरण विषादेनारण्यगमनाय कृष्णानुज्ञानमाकाङ्क्षमाणस्य युधिष्ठिरस्य व्यासेनि परिसान्त्वनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवमुक्तस्तु राजाऽसौ धृतराष्ट्रेण धीमता ।
तूर्ष्णींबभूव मेधावी तमुवाचाथ केशवः ॥ १४-२-१ (९२३८७)
अतीव मनसा शोकः क्रियमाणो जनाधिप ।
सन्तपयति चैतस्य पूर्वप्रेतान्पितामहान् ॥ १४-२-२ (९२३८८)
यजस्व विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ।
देवांस्तर्पय सोमेन स्वधया च पितॄनपि ॥ १४-२-३ (९२३८९)
अतिथीनन्नपानेन कामैरन्यैरकिञ्चनान् ।
ग्त्वद्विधस्य महाबुद्धे नैतदद्योपपद्यते।'
विदितं वेदितव्यं ते कर्तव्यमपि ते कृतम् ॥ १४-२-४ (९२३९०)
श्रुताश्च राजधर्मास्ते भीष्माद्भागीरथीसुतात् ।
कृष्णद्वैपायनाच्चैव नारदाद्विदुरात्तथा ॥ १४-२-५ (९२३९१)
नेमामर्हसि मूढानां वृत्तिं त्वमनुवर्तितुम् ।
पितृपैतामहं वृत्तमास्थाय धुरमुद्वह ॥ १४-२-६ (९२३९२)
युक्तं हि यशसा क्षात्रं स्वर्गं प्राप्तुमसंशयम् ।
नहि कश्चिद्धि शूरणां निहतोऽत्र पराङ्मुखः ॥ १४-२-७ (९२३९३)
त्यज शोकं महाराज भवितव्यं हि तत्तथा ।
न शक्यास्ते पुनर्द्रष्टुं त्वया येऽस्मिन्रणे हताः ॥ १४-२-८ (९२३९४)
एतावदुक्त्वा गोविन्दो धर्मराजं युधिष्ठिरम् ।
विरराम महातेजास्तमुवाच युधिष्ठिरः ॥ १४-२-९ (९२३९५)
गोविन्द मयि या प्रीतिस्तव सा विदिता मम ।
सौहृदेन तथा प्रेम्णा सदा मय्यनुकम्पसे ॥ १४-२-१० (९२३९६)
प्रियं तु मे स्यात्सुमहत्कृतं चक्रगदाधर ।
श्रीमन्प्रीतेन मनसाक सर्वं यादवनन्दन ॥ १४-२-११ (९२३९७)
यदि मामनुजानीयाद्भवान्गन्तुं तपोवनम् ।

᠀कृतकृत्यो भविष्यामि इति मे निश्चिता मतिः'॥१४-२-१२ (९२३९८)
न हि शान्तिं प्रपश्यामि पातयित्वा पितामहम् ।
᠀नृशंसः पुरुषव्याघ्रं गुरुं वीर्यबलान्वितम्।'
कर्णं च पुरुषव्याघ्नं सङ्ग्रामेष्वपलायिनम् ॥ १४-२-१३ (९२३९९)
कर्मणा येन मुच्येयमस्मात्क्रूरादरिंदम ।
कर्मणा तद्विधत्स्वेह येन शुध्यति मे मनः ॥१४-२-१४ (९२४००)
तमेवंवादिनं पार्थं व्यासः प्रोवाच धर्मवित् ।
सान्त्वयन्सुमहातेजाः शुभं वचनमर्थवत् ॥१४-२-१५ (९२४०१)
सुकृता ते मतिस्तात पुनर्बाल्येन मुह्यसे ।
किमाकाशे वयं सर्वे प्रलपामो मुहुर्मुहुः ॥१४-२-१६ (९२४०२)
विदिताः क्षत्रधर्मास्ते येषां युद्धेन जीविका ।
तथा प्रवृत्तो नृपतिर्नाधिबन्धेन युज्यसे ॥१४-२-१७ (९२४०३)
मोक्षधर्माश्च निखिला याथातथ्येन ते श्रुताः ।
᠀यथा वै कामजां मायां परित्युक्तं त्वमर्हसि ॥' १४-२-१८ (९२४०४)
असकृच्चापि सन्देहाश्छिन्नास्ते कामजा मया ।
अश्रद्दधानो दुर्मेधा लुप्तस्मृतिरसि ध्रुवम् ॥१४-२-१९ (९२४०५)
मैवं भव न ते युक्तमिदमज्ञानमीदृशम् ॥ १४-२-२० (९२४०६)
प्रायश्चित्तानि सर्वाणि विदितानि च तेऽनघ ।
राजधर्माश्च ते सर्वे दानधर्माश्च ते श्रुताः ॥१४-२-२१ (९२४०७)
स कथं सर्वधर्मज्ञः सर्वागमविशारदः ।
परिमुह्यसि भूयस्त्वमज्ञानादिव भारत ॥ ॥१४-२-२२ (९२४०८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२-१६ पुनर्बाह्येन मुह्यसे इति क ट पाठः ॥
१६ ॥

आश्वमेधिकपर्व - अध्याय ००३
॥ श्रीः ॥
१४.३. अध्यायः ३

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

व्यासेन युधिष्ठिरंप्रति पुरुषकर्मणामीश्वरप्रेरणायत्ततया

दोषानापादकत्वकथनपूर्वकं तदभ्युपगमेनापि
पापापनोदायाश्वमेधादिविधानम् ॥ १ ॥
युधिष्ठिरेण स्वस्य तावदद्रव्याभावनिवेदने व्यासेन तंप्रति हिमवति
गिरौ विद्यमानमरुत्तयागावशिष्टद्रव्यानयनेनाश्वमेधकरणचोदना
॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

व्यास उवाच ।
युधिष्ठिर तव प्रज्ञा न सम्यगिति मे मतिः ।
न हि कश्चित्स्वयं मर्त्यः स्ववशः कुरुते क्रियाम् ॥ १४-३-१ (९२४०९)
ईश्वरेण च युक्तोऽयं साध्वसाधु च मानवः ।
करोत्यसुकरं कर्म तत्रका परिदेवना ॥ १४-३-२ (९२४१०)
आत्मानं मन्यसे चाथ पापकर्माणमन्ततः ।
शृणु तत्र यथा पापमपकृत्येत भारत ॥ १४-३-३ (९२४११)
तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिर ।
तरन्ति नित्यं पुरुषा ये स्म पापानि कुर्वते ॥ १४-३-४ (९२४१२)
यज्ञेन तपसा चैव दानेन च नराधिप ।
पूयन्ते नरशार्दूल नरा दुष्कृतकारिणः ॥ १४-३-५ (९२४१३)
असुराश्च सुराश्चैव पुण्यहेतोर्मखक्रियाम् ।
प्रवर्तन्ते महात्मानस्तस्माद्यज्ञः परायणम् ॥ १४-३-६ (९२४१४)
यज्ञैरेव महात्मानो बभूवुरधिकाः सुराः ।
ततो देवाः क्रियावन्तो दानवानभ्यधर्षयन् ॥ १४-३-७ (९२४१५)
राजसूयाश्वमेधौ च सर्वमेधं च भारत ।
नरमेधं च नृपते त्वमाहर युधिष्ठिर ॥ १४-३-८ (९२४१६)
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
बहुकामान्नवित्तेन रामो दाशरथिर्यथा ॥ १४-३-९ (९२४१७)
यथा च भरतो राजा दौष्यन्तिः पृथिवीपतिः ।
शाकुन्तलो महावीर्यस्तव पूर्वपितामहः ॥ १४-३-१० (९२४१८)
युधिष्ठिर उवाच। १४-३-११क्ष् (७७३१)
असंशयं वाजिमेधः पारयेत्पृथिवीमपि ।
अभिप्रायस्तु मे कश्चित्तं त्वं श्रोतुमिहार्हसि ॥ १४-३-११ (९२४१९)
इमं ज्ञातिवधं कृत्वा सुमहान्तं द्विजोत्तम ।
ऽअहमाराधयिष्यामि कथं शोकपरायणः।ऽ
दानमल्पं न शक्नोमि दातुं वित्तं च नास्ति मे ॥ १४-३-१२ (९२४२०)
न तु बालानिमान्दीनानुत्सहे वसु याचितुम् ।

तथैवाद्रविणान्कृच्छ्रे वर्तमानान्नृपात्मजान् ॥ १४-३-१३ (९२४२१)
स्वयं विनाश्य पृथिवीं यज्ञार्थं द्विजसत्तम ।
करमाहारयिष्यामि कथं शोकपरायणः ॥ १४-३-१४ (९२४२२)
दुर्योधनापराधेनि वसुधायां नराधिपाः ।
प्रनष्टा योजयित्वाऽस्मानकीर्त्या मुनिसत्तम ॥ १४-३-१५ (९२४२३)
दुर्योधनेन पृथिवी क्षपिता जयकारणात् ।
कोशश्चापि विशीर्णोसौ धार्तराष्ट्रस्य दुर्मतेः ॥ १४-३-१६ (९२४२४)
पृथिवी दक्षिणा चात्र वाजिमेधे महाक्रतौ ।
विद्वद्भिः परिदृष्टोऽयं शिष्टो विधिविपर्ययः ॥ १४-३-१७ (९२४२५)
न च प्रतिनिधिं कर्तुं चिकीर्षामि तपोधन ।
अत्र मे भगवन्सम्यक्साचिव्यं कर्तुमर्हसि ॥ १४-३-१८ (९२४२६)
एवमुक्तस्तु पार्थेन कृष्णद्वैपायनस्तदा ।
मुहूर्तमनुसञ्चिन्त्य धर्मराजानमब्रवीत् ॥ १४-३-१९ (९२४२७)
कोशश्चापि विशीर्णोऽयं परिपूर्णो भविष्यति ।
विद्यते द्रविणं पार्थ गिरौ हिमवति स्थितम् ॥ १४-३-२० (९२४२८)
उत्सृष्टं ब्राह्मणैर्यज्ञे मरुत्तस्य महीपते ।
तदानयस्व कौन्तेय पर्याप्तं तद्भविष्यति ॥ १४-३-२१ (९२४२९)
युधिष्ठिर उवाच। १४-३-२२क्ष् (७७३२)
कथं यज्ञे मरुत्तस्य द्रविणं तत्समाचितम् ।
कस्मिंश्च काले स नृपो बभूव ददतांवर ॥ १४-३-२२ (९२४३०)
व्यास उवाच। १४-३-२३क्ष् (७७३३)
यदि शुश्रूषसे पार्थ शृणु कारंधमं नृपम् ।
यस्मिन्काले महावीर्यः स राजाऽऽसीन्महाधनः ॥ ॥ १४-३-२३ (९२४३१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३-१८ प्रतिनिधिमनुकल्पम् ॥

आश्वमेधिकपर्व - अध्याय ००४
॥ श्रीः ॥
१४.४. अध्यायः ४

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics

व्यासेन युधिष्ठिरंप्रति संवर्तमरुत्तीयोपाख्यानकथनारम्भः ॥ १ ॥
मरुत्तेन राज्ञा हिमवदुत्तरपार्श्वे सौवर्णैरेव
कुण्डभाडाद्युपकरणैर्यज्ञारम्भः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
शुश्रूषे तस्य धर्मज्ञ राजर्षेः परिकीर्तनम् ।
द्वैपायन मरुत्तस्य कथां प्रब्रूहि मेऽनघ ॥ १४-४-१ (९२४३२)
व्यास उवाच । १४-४-२क्ष् (७७३४)
आसीत्कृतयुगे तात मनुर्दण्डिधरः प्रभुः ।
तस्य पुत्रो महोष्वासः प्रजातिरभवन्नृपः ॥ १४-४-२ (९२४३३)
प्रजातेरभवत्पुत्रः क्षुत इत्यभिविश्रुतः ।
क्षुतस्य पुत्र इक्ष्वाकुर्महीपालोऽभवत्प्रभुः ॥ १४-४-३ (९२४३४)
तस्य पुत्रशतं राजन्नासीत्परमधार्मिकम् ।
तांस्तु सर्वान्महीपालानिक्ष्वाकुरकरोत्प्रभुः ॥ १४-४-४ (९२४३५)
तेषां ज्येष्ठस्तु विंशोऽभूत्प्रतिमानं धनुष्मताम् ।
विंशस्य पुत्रः कल्याणो विविंशो नाम भारत ॥ १४-४-५ (९२४३६)
विविंशस्य सुता राजन्बभूवुर्दश पञ्च च ।
सर्वे धनुषि विक्रान्ता ब्रह्मण्याः सत्यवादिनः ॥ १४-४-६ (९२४३७)
दानधर्मरताः शान्ताः सततं प्रियवादिनः ।
तेषां ज्येष्ठः खनीनेत्रः स तान्सर्वानपीडयत् ॥ १४-४-७ (९२४३८)
खनीनेत्रस्तु विक्रान्तो जित्वा राज्यमकण्टकम् ।
नाशकद्रक्षितुं राज्यं नान्वरज्यन्त तं प्रजाः ॥ १४-४-८ (९२४३९)
तमपास्य च तद्राज्ये तस्य पुत्रं सुवर्चसम् ।
अभ्यषिञ्चन्त राजेन्द्र मुदिता ह्यभवंस्तदा ॥ १४-४-९ (९२४४०)
स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं च तत् ।
नियतो वर्तयामास प्रजाहितचिकीर्षया ॥ १४-४-१० (९२४४१)
ब्रह्मण्यः सत्यवादी च शुचिः शमदमान्वितः ।
प्रजास्तं चान्वरज्यन्त धर्मनित्यं मनस्विनम् ॥ १४-४-११ (९२४४२)
तस्य धर्मप्रवृत्तस्य व्यशीर्यत्कोशवाहनम् ।
तं क्षीणकोशं सामन्ताः समन्तात्पर्यपीडयन् ॥ १४-४-१२ (९२४४३)
स पीड्यमानो बहुभिः क्षीणकोशाश्ववाहनः ।
आर्तिमार्च्छत्परां राजा सह भृत्यैः पुरेण च ॥ १४-४-१३ (९२४४४)
न चैनमभिहन्तुं ते शक्नुवन्ति बलक्षये ।
सम्यग्वृत्तो हि राजा स धर्मनित्यो युधिष्ठिर ॥ १४-४-१४ (९२४४५)

यदा तु परमामार्तिं गतोऽसौ सपुरो नृपः ।
ततः प्रदध्मौ स करं प्रादुरासीत्ततो बलम् ॥ १४-४-१५ (९२४४६)
ततस्तानजयत्सर्वान्प्रातिसीमान्नराधिपान् ।
एतस्मात्कारणाद्राजन्विश्रुतः स करंधमः ॥ १४-४-१६ (९२४४७)
आवीक्षित्तस्य पुत्रोऽभूत्त्रेतायुगमुखे पुरा ।
इन्द्रादनवरः श्रीमान्देवैरपि सुदुर्जयः ॥ १४-४-१७ (९२४४८)
ग्कारंधम इति ख्यातो बभूव जगतीपतिः।'
तस्य सर्वे महीपाला वर्तन्ते स्म वशे तदा ।
स हि सम्राडभूत्तेषां वृत्तेन च बलेन च ॥ १४-४-१८ (९२४४९)
अविक्षिन्नाम धर्मात्मा शौर्येणेन्द्रसमोऽभवत् ।
यज्ञशीलो धर्मरतिर्धृतिमान्संयतेन्द्रियः ॥ १४-४-१९ (९२४५०)
तेजसाऽऽदित्यसदृशः क्षमया पृथिवीसमः ।
बृहस्पतिसमो बुद्ध्या हिमवानिव सुस्थिरः ॥ १४-४-२० (९२४५१)
कर्मणा मनसा वाचा दमेन प्रशमेन च ।
मनांस्याराधयामास प्रजानां स महीपतिः ॥ १४-४-२१ (९२४५२)
य ईजे हयमेधानां शतेन विधिवत्प्रभुः ।
याजयामास यं विद्वान्स्वयमेवाङ्गिराः प्रभुः ॥ १४-४-२२ (९२४५३)
तस्य पुत्रोऽतिचक्राम पितरं गुणवत्तया ।
मरुत्तो नाम धर्मज्ञश्चक्रवर्ती महायशाः ।
नागायुतसमप्राणः साक्षाद्विष्णुरिवापरः ॥ १४-४-२३ (९२४५४)
स यक्ष्यमाणो धर्मात्मा शातकुम्भमयान्युत ।
कारयामास शुभ्राणि भाजनानि सहस्रशः ॥ १४-४-२४ (९२४५५)
मेरुं पर्वतमासाद्य हिमवत्पार्श्व उत्तरे ।
काञ्चनः सुमहान्पादस्तत्र कर्म चकार सः ॥ १४-४-२५ (९२४५६)
ततः कुण्डानि पात्रीश्च पिठराण्यासंनानि च ।
चक्रुः सुवर्णकर्तारो येषां सङ्ख्या न विद्यते ॥ १४-४-२६ (९२४५७)
तस्यैव च समीपे तु यज्ञवाटो बभूव ह ।
ईजे तत्र स धर्मात्मा विदिवत्पृथिवीपतिः ।
मरुत्तः सहितैः सर्वैः प्रजापालैर्नराधिपः ॥ ॥ १४-४-२७ (९२४५८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४-१ शुश्रूषे श्रोतुमिच्छामि ॥
७-४-२१ पूर्वजानां महीपतिरिति क थ पाठः ॥

७-४-२५ देवं तत्र समासाद्येति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ००५
॥ श्रीः ॥
१४.५. अध्यायः ५

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
अङ्गीरसः पुत्रेण संवर्तेनाकारणवैरिणः स्वाग्रजन्मनो बृहस्पतेरुपद्रवासहनेन सर्वस्वत्यागपूर्वकमरण्यप्रवेशः ॥ १ ॥
इन्द्रेण स्वातिशायिनि मरुत्ते राजनि स्पर्धया बृहस्पतिसाचिव्येन ततोप्यतिशयलिप्सया मरुत्तपुरोहितस्य बृहस्पतेर्भेदोपायेन वशीकरणम् ॥ २ ॥
बृहस्पतिनेन्द्रंप्रति मरुत्तस्य स्वेनायाजनप्रतिज्ञानम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
पथंवीर्यः समभवत्स राजा ददतांवरः ।
कथं च जातरूपेण समयुज्यत वै नृपः ॥ १४-५-१ (९२४५९)
क्व च तत्सांप्रतं द्रव्यं भगवन्नवतिष्ठते ।
कथं च शक्यमस्माभिस्तदवाप्नुं तचपोधन ॥ १४-५-२ (९२४६०)
व्यास उवाच । १४-५-३क्ष् (७७३५)
असुराश्चैव देवाश्च दक्षस्यासन्प्रजापतेः ।
अपत्यं बहुलं तात तेऽस्पर्धन्त परस्परम् ॥ १४-५-३ (९२४६१)
तथैवाङ्गिरसः पुत्रौ पितृतुल्यौ बभूवतुः ।
बृहस्पतिर्बृहत्तेजाः संवर्तश्च तपोधनः ॥ १४-५-४ (९२४६२)
तावति स्पर्धिनौ राजन्पृथगास्तां परस्परम् ।
बृहस्पतिः स संवर्तं बाधते स्म पुनःपुनः ॥ १४-५-५ (९२४६३)
स बाध्यमानः सततं भ्रात्रा ज्येष्ठेन भारत ।
अर्थानुत्सृज्य दिग्वासा वने वासमरोचयत् ॥ १४-५-६ (९२४६४)
वासवोऽप्यसुरान्सर्वान्विजित्य च निपात्य च ।
इन्द्रत्वं प्राप्य लोकेषु ततो वव्रे पुरोहितम् ॥ १४-५-७ (९२४६५)
पुत्रमङ्गिरसो ज्येष्ठं विप्रज्येष्ठं बृहस्पतिम् ।
याज्यस्त्वङ्गिरसः पूर्वमासीद्राजा करंधमः ॥ १४-५-८ (९२४६६)

वीर्येणाप्रतिमो लोके वृत्तेन च बलेन च ।
शतक्रतुरिवौजस्वी धर्मात्मा संशितव्रतः। १४-५-९ (९२४६७)
वाहनं यस्य योधाश्च मित्राणि विविधानि च ।
शयनानि च मुख्यानि महार्हाणि च सर्वशः ॥१४-५-१० (९२४६८)
ध्यानादेवाभवद्राजन्मुखवातेन सर्वशः ।
स गुणैः पार्थिवान्सर्वान्वशे चक्रे नराधिपः ॥१४-५-११ (९२४६९)
संजीव्य कालमिष्टं च सशरीरो दिवं गतः ।
बभूव तस्य पुत्रस्तु ययातिरिव धर्मवित् ॥१४-५-१२ (९२४७०)
अविक्षिन्नाम शत्रुंजित्स वशे कृतवान्महीम् ।
विक्रमेण गुणैश्चैव पितेवासीत्स पार्थिवः ॥१४-५-१३ (९२४७१)
तस्य वासवतुल्योऽभून्मरुत्तो नाम वीर्यवान् ।
पुत्रस्तमनुरक्ताऽभूत्पृथिवी सागराम्बरा ॥१४-५-१४ (९२४७२)
स्पर्धते स स्म सततं देवराजेन नित्यदा ।
वासवोऽपि मरुत्तेनि स्पर्धते पाण्डुनन्दन ॥१४-५-१५ (९२४७३)
शुचिः स गुणवानासीन्मरुत्तः पृथिवीपतिः ।
यतमानोपि यं शक्रो न विशेषयति स्म ह ॥१४-५-१६ (९२४७४)
सोऽशक्नुवन्विशेषाय समाहूय बृहस्पतिम् ।
उवाचेदं वचो देवैः सहितो हरिवाहनः ॥१४-५-१७ (९२४७५)
बृहस्पते मरुत्तस्य मा स्म कार्षीः कथञ्चन ।
दैवं कर्माथ पित्र्यं वा कर्तासि मम चेत्प्रियम् ॥१४-५-१८ (९२४७६)
अहं हि त्रिषु लोकेषु सुराणां च बृहस्पते ।
इन्द्रत्वं प्राप्तवानेको मरुत्तस्तु महीपतिः ॥१४-५-१९ (९२४७७)
कथं ह्यमर्त्यं ब्रह्मंस्त्वं याजयित्वा सुराधिपम् ।
याजयेर्मृत्युसंयुक्तं मरुत्तमविशङ्कया ॥१४-५-२० (९२४७८)
मां वा वृणीष्व भद्रं ते मरुत्तं वा महीपतिम् ।
परित्यज्य मरुत्तं वा यथाजोषं भजस्व माम् ॥१४-५-२१ (९२४७९)
एवमुक्तः स करकव्य देवराज्ञा बृहस्पतिः ।
मुहूर्तमिव सञ्चिन्त्य देवराजानमब्रवीत् ॥१४-५-२२ (९२४८०)
त्वं भूतानामधिपतिस्त्वयि लोकाः प्रतिष्ठिताः ।
नमुचेर्विश्वरूपस्य निहन्ता त्वं बलस्य च ॥१४-५-२३ (९२४८१)
त्वमाजहर्थ् देवानामेको वीरश्रियं पराम् ।
त्वं बिभर्षि भुवं द्यां च सदैव बलसूदन ॥१४-५-२४ (९२४८२)
परोहित्यं कथं कृत्वा तव देवगणेश्वर ।
याजयेयमहं मर्त्यं मरुत्तं पाकशासन ॥१४-५-२५ (९२४८३)
समाश्वसिहि देवेन्द्र नाहं मर्त्यस्य कर्हिचित् ।
ग्रहीष्यामि स्रुवं यज्ञे शृणु चेदं वचो मम ॥१४-५-२६ (९२४८४)

हिरण्यरेता नोष्णः स्यात्परिवर्तेत मेदिनी ।
भासं तु न रविः कुर्यान्न तु सत्यं चलेन्मयि ॥ १४-५-२७ (९२४८५)
व्यास उवाच। १४-५-२८क्ष् (७७३६)
बृहस्पतिवचःक श्रुत्वा शक्रो विगतमत्सरः ।
प्रशस्यैनं विवेशाथ स्वमेव भवनं तदा ॥ ॥ १४-५-२८ (९२४८६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

आश्वमेधिकपर्व - अध्याय ००६
॥ श्रीः ॥
१४.६. अध्यायः ६

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
बृहस्पतिना इन्द्रे स्वेन मरुत्तस्यायाजनप्रतिज्ञानश्रवणामर्षिणा
मरुत्तेनि स्वयाजनप्रार्थेन तत्प्रत्याख्यानम् ॥ १ ॥
ततः प्रतिनिवृत्तस्य मरुत्तस्य मध्येमार्गं नारदसमागमः ॥ २ ॥
नारदचोदनया मरुत्तेन वाराणसीद्वारे स्वेन स्थापितकुणपावलोकनेन
प्रलायमानं संवर्तं प्रत्यनुगमनम् ॥ ३ ॥
संवर्तेन तत्प्रतिनिवर्तनाय पांसुकदमप्रक्षेपेप्यनिवर्तमानं
तमवलोक्यं विजने न्यग्रोधमूले समुपवेशः ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

व्यास उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतेश्च संवादं मरुत्तस्य च धीमतः ॥ १४-६-१ (९२४८७)
देवराजस्य समयं कृतमाङ्गिरसेन ह ।
श्रुत्वा मरुत्तो नृपतिर्मन्युमाहारयत्परम् ॥ १४-६-२ (९२४८८)
सङ्कल्प्य मनसा यज्ञं करंधमसुतात्मजः ।
बृहस्पतिमुपागम्य वाग्मी वचनमब्रवीत् ॥ १४-६-३ (९२४८९)
भगवन्यन्मया पूर्वमभिगम्य तपोधन ।
कृतोऽभिसन्धिर्यज्ञस्य भवतो वचनाद्गुरो ॥ १४-६-४ (९२४९०)
तमहं यष्टुमिच्छामि सम्भाराः सम्भृताश्च मे ।
याज्योस्मि भवतः साधो तत्प्राप्नुहि विधत्स्व च ॥ १४-६-५ (९२४९१)

बृहस्पतिरुवाच। १४-६-६क्ष् (७७३७)
न कामये याजयितुं त्वामहं पृथिवीपते ।
वृतोस्मि देवराजेन प्रतिज्ञातं च तस्य मे ॥ १४-६-६ (९२४९२)
मरुत्त उवाच। १४-६-७क्ष् (७७३८)
पित्र्यमस्मि तव क्षेत्रं बहुमन्ये च ते भृशम् ।
तवास्मि याज्यातां प्राप्तो भजमानं भजस्व माम् ॥ १४-६-७ (९२४९३)
बृहस्पतिरुवाच। १४-६-८क्ष् (७७३९)
अमर्त्यं याजयित्वाऽहं याजयिष्ये कथं नरम् ।
मरुत्त गच्छ वा मा वा निवृत्तोस्म्यद्य याजनात् ॥ १४-६-८ (९२४९४)
न त्वां याजयितास्म्यद्य वृणु यं त्वमिहेच्छसि ।
उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति ॥ १४-६-९ (९२४९५)
व्यास उवाच। १४-६-१०क्ष् (७७४०)
एवमुक्तस्तु नृपतिर्मरुत्तो व्रीडितोऽभवत् ।
प्रत्यागच्छन्सुसंविग्नो ददर्श पथि नारदम् ॥ १४-६-१० (९२४९६)
देवर्षिणा समागम्य नारदेनि स पार्थिवः ।
विधिवत्प्राञ्जलिस्तस्थावथैनं नारदोऽब्रवीत् ॥ १४-६-११ (९२४९७)
राजर्षे नातिहृष्टोसि कच्चित्क्षेमं तवानघ ।
क्व गतोसि कुतश्चेदमप्रीतिस्थानमागतम् ॥ १४-६-१२ (९२४९८)
श्रोतव्यं चेन्मया राजन्ब्रूहि मे पार्थिवर्षभ ।
व्यपनेष्यामि ते मन्युं सर्वयत्नैर्नराधिप ॥ १४-६-१३ (९२४९९)
एवमुक्तो मरुत्तः स नारदेन महर्षिणा ।
विप्रलम्भमुपाध्यायात्सर्वज्ञे तं न्यवेदयत् ॥ १४-६-१४ (९२५००)
मरुत्त उवाच। १४-६-१५क्ष् (७७४१)
गतोस्म्यङ्गिरसः पुत्रं देवाचार्यं बृहस्पतिम् ।
यज्ञार्थमृत्विजं प्रष्टुं स च मां नाभ्यनन्दत ॥ १४-६-१५ (९२५०१)
प्रत्याख्यातश्च तेनाहं जीवितुं नाद्य कामये ।
परित्यक्तश्च गुरुणा दूषितश्चास्मि नारद ॥ १४-६-१६ (९२५०२)
व्यास उवाच। १४-६-१७क्ष् (७७४२)
एवमुक्तस्तु राज्ञा स नारदः प्रत्युवाच ह ।
आविक्षितं महाराज वाचा संजीवयन्निव ॥ १४-६-१७ (९२५०३)
राजन्नङ्गिरसः पुत्रः संवर्तो नाम धार्मिकः ।
चङ्क्रमीति दिशः सर्वा दिग्वासा मोहयन्प्रजाः ॥ १४-६-१८ (९२५०४)
तं गच्च यदि याज्यं त्वां न वाञ्छति बृहस्पतिः ।
प्रसन्नस्त्वां महातेजाः संवर्तो याजयिष्यति ॥ १४-६-१९ (९२५०५)
मरुत्त उवाच। १४-६-२०क्ष् (७७४३)
संजीवितोऽहं भवता वाक्येनानेन नारद ।

पश्येयं क्व नु संवर्तं शंस मे वदतांवर ॥१४-६-२० (९२५०६)
कथं च तस्मै वर्तेयं कथं मां न परित्यजेत् ।
प्रत्याख्यातश्च तेनापि नाहं जीवितुमुत्सहे ॥१४-६-२१ (९२५०७)
नारद उवाच।१४-६-२२क्ष् (७७४४)
उन्मत्तवेषं बिभ्रत्स चङ्क्रमीति यथासुखम् ।
वाराणसीं तु नगरीमभीक्ष्णमुपसेवते ॥१४-६-२२ (९२५०८)
तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित् ।
तं दृष्ट्वा यो निवर्तेत संवर्तः स महीपते ॥१४-६-२३ (९२५०९)
तं पृष्ठतोऽनुगच्छेथा यत्र गच्छेत्स वीर्यवान् ।
तमेकान्ते समासाद्य प्राञ्जलिः शरणं व्रजेः ॥१४-६-२४ (९२५१०)
पृच्छेत्त्वां यदि केनाहं तवाख्यात इति स्म ह ।
ब्रूयास्त्वं नारदेनेति स कुत्र इति शत्रुहन् ॥१४-६-२५ (९२५११)
स चेत्त्वामनुयुञ्जीत ममानुगमनेप्सया ।
शंसेथा वह्निमारूढं मामपि त्वमशङ्कया ॥१४-६-२६ (९२५१२)
व्यास उवाच।१४-६-२७क्ष् (७७४५)
स तथेति प्रतिश्रुत्य पूजयित्वा च नारदम् ।
अभ्यनुज्ञाय राजर्षिर्ययौ वाराणसीं पुरीम् ॥१४-६-२७ (९२५१३)
तत्र गत्वा यथोक्तं स पुर्या द्वारे महायशाः ।
कुणपं स्थापयामास नारदस्य वचः स्मरन् ॥१४-६-२८ (९२५१४)
यौगपद्येनि विप्रश्च पुरीद्वारमथाविशत् ।
ततः स कुणपं दृष्ट्वा सहसा संन्यवर्तत ॥१४-६-२९ (९२५१५)
स तं निवृत्तमालक्ष्य प्राञ्जलिः पृष्ठतोऽन्वगात् ।
आविक्षितो महीपालः संवर्तमुपशिक्षितुम् ॥१४-६-३० (९२५१६)
स च तं विजने दृष्ट्वा पांसुभिः कर्दमेन च ।
श्लेष्मणा चैव राजानं ष्ठीवनैश्च समाकिरत् ॥१४-६-३१ (९२५१७)
स तथा बाध्यमानो वै संवर्तेन महीपतिः ।
अन्वगादेव तमृषिं प्राञ्जलिः सम्प्रसादयन् ॥१४-६-३२ (९२५१८)
ततो निवर्त्य संवर्तः परिश्रान्त उपाविशत् ।
शीतलच्छायमासाद्य न्यग्रोधं बहुशाखिनम् ॥ ॥१४-६-३३ (९२५१९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६-१३ मन्युं दैन्यम् ॥

आश्वमेधिकपर्व - अध्याय ००७
॥ श्रीः ॥
१४.७. अध्यायः ७

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
संवर्तमरुत्तसंवादः ॥ १ ॥
संवर्तेन समयबन्धनपूर्वकं मरुत्तंप्रति याजनप्रतिज्ञानम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

संवर्त उवाच ।
कथमस्मि त्वया ज्ञातः केन वा कथितोस्मि ते ।
एतदाचक्ष्व मे तत्त्वमिच्छसे चेन्मम प्रियम् ॥ १४-७-१ (९२५२०)
सत्यं ते ब्रुवतः सर्वे सम्पत्स्यन्ते मनोरथाः ।
मिथ्या च ब्रुवतो मूर्धा शतधा ते स्फुटिष्यति ॥ १४-७-२ (९२५२१)
मरुत्त उवाच । १४-७-३क्ष् (७७४६)
नारदेन भवान्मह्यमाख्यातो ह्यटता पथि ।
गुरुपुत्रो ममेति त्वं ततो मे प्रीतिरुत्तमा ॥ १४-७-३ (९२५२२)
संवर्त उवाच । १४-७-४क्ष् (७७४७)
सत्यमेतद्भवानाह स मां जानाति सत्रिणम् ।
कथयस्व तदेतन्मे क्वनु सम्प्रति नारदः ॥ १४-७-४ (९२५२३)
मरुत उवाच । १४-७-५क्ष् (७७४८)
भवन्तं कथयित्वा तु मम देवर्षिसत्तमः ।
ततो मामभ्यनुज्ञाय प्रविष्टो हव्यवाहनम् ॥ १४-७-५ (९२५२४)
व्यास उवाच । १४-७-६क्ष् (७७४९)
श्रुत्वा तु पार्थिवस्यैत्संवर्तः प्रमुदं गतः ।
एतावदहमप्येवं शक्नुयामिति सोऽब्रवीत् ॥ १४-७-६ (९२५२५)
ततो मरुत्तमुन्मत्तो वाचा निर्भर्त्सयन्निव ।
रूक्षया ब्राह्मणि राजन्पुनः पुनरथाब्रवीत् ॥ १४-७-७ (९२५२६)
वातप्रधानेन मया स्वचित्तवशवर्तिना ।
एवं विकृतरूपेण कथं याजितुमिच्छसि ॥ १४-७-८ (९२५२७)
भ्राता मम समर्थश्च वासवेन च सङ्गतः ।
वर्तते याजने चैव तेन कर्माणि कारय ॥ १४-७-९ (९२५२८)
गार्हस्थ्यं चैव याज्याश्च सर्वा गृह्याश्च देवताः ।
पूर्वजेन ममाक्षिप्तं शरीरं वर्जितं त्विदम् ॥ १४-७-१० (९२५२९)

नाहं तेनाननुज्ञातस्त्वामाविक्षित कर्हिचित् ।
याजयेयं कथंचिद्वै स हि पूज्यतमो मम ॥ १४-७-११ (९२५३०)
स त्वं बृहस्पतिं गच्च तमनुज्ञाप्य चाव्रज ।
ततोऽहं याजयिष्ये त्वां यदि यष्टुमिहेच्छसि ॥ १४-७-१२ (९२५३१)
मरुत्त उवाच। १४-७-१३क्ष् (७७५०)
बृहस्पतिं गतः पूर्वमहं संवर्ते तच्छृणु ।
न मां कामयते याज्यं मुनिर्वासववारितः ॥ १४-७-१३ (९२५३२)
अमरं याज्यमासाद्य याजयिष्ये न मानुषम् ।
शक्रेण प्रतिषिद्धोऽहं मरुत्तं मा स्म याजये ॥ १४-७-१४ (९२५३३)
स्पर्धते हि मया विप्र सदा हि स तु पार्थिवः ।
एवमस्त्विति चाप्युक्तो भ्रात्रा ते बलसूदनः ॥ १४-७-१५ (९२५३४)
स मामधिगतं प्रेम्णा याज्यत्वे न बुभूषति ।
देवराजं समाश्रित्य तद्विद्धि मुनिपुङ्गव ॥ १४-७-१६ (९२५३५)
सोहमिच्छामि भवता सर्वस्वेनापि याजितुम् ।
कामये समतिक्रान्तुं वासवं त्वत्कृतैर्गुणैः ॥ १४-७-१७ (९२५३६)
न हि मे वर्तते बुद्धिर्गन्तुं ब्रह्मन्बृहस्पतिम् ।
प्रत्याख्यातो हि तेनास्मि तथाऽनपकृते सति ॥ १४-७-१८ (९२५३७)
संवर्त उवाच। १४-७-१९क्ष् (७७५१)
चिकीर्षसि यथाकामं सर्वमेतत्त्वयि ध्रुवम् ।
यदि सर्वानभिप्रायान्कर्तासि मम पार्थिव ॥ १४-७-१९ (९२५३८)
याज्यमानं मया हि त्वां बृहस्पतिपुंरदरौ ।
द्विषेतां समभिक्रुद्धावेतदेकं समर्थये ॥ १४-७-२० (९२५३९)
स्थैर्यमत्र कथं मे स्यात्स त्वं निःसंशयं कुरु ।
कुपितस्त्वां न हीदानीं भस्म कुर्या सवान्धवम् ॥ १४-७-२१ (९२५४०)
मरुत्त उवाच। १४-७-२२क्ष् (७७५२)
यावत्तपेत्सहस्रांशुस्तिष्ठेरंश्चापि पर्वताः ।
तावल्लोकान्न लभेयं त्यजेयं सङ्गतं यदि ॥ १४-७-२२ (९२५४१)
मा चापि शुभबुद्धित्वं लभेयमिह कर्हिचित् ।
विषयैः सङ्गतं चास्तु त्यजेयं सङ्गतं यदि ॥ १४-७-२३ (९२५४२)
संवर्त उवाच। १४-७-२४क्ष् (७७५३)
आविक्षित शुभा बुद्धिर्वर्ततां तव कर्मसु ।
याजनं हि ममाप्येव वर्तते हृदि पार्थिव ॥ १४-७-२४ (९२५४३)
अभिधास्ते च ते राजन्नक्षयं द्रव्यमुत्तमम् ।
येन देवान्सग्धर्वाञ्शक्रं चाभिभविष्यसि ॥ १४-७-२५ (९२५४४)
न तु मे वर्तते बुद्धिर्धने याज्येषु वा पुनः ।
विप्रियं तु करिष्यामि भ्रातुश्चेन्द्रस्य चोभयो ॥ १४-७-२६ (९२५४५)

गमयिष्यामि शक्रेण समतामपि ते ध्रुवम् ।
प्रियं च ते करिष्यामि सत्यमेतद्ब्रवीमि ते ॥ ॥१४-७-२७ (९२५४६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७-१ मे सत्यं जीवितं चेत्प्रियंतवेति क थ पाठः ॥
७-७-४ सत्रिणं कपटवेषच्छन्नम् ॥
७-७-६ अहमप्येनं कुर्यामिति तमब्रवीदिति क थ पाठः ॥
७-७-८ मधुप्रयोगदानेन स्वचित्तपरिवर्तिनेति क थ पाठः ॥
७-७-२३ भोगेषु सम्यग्भोगांश्च त्यजेयमिति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ००८
॥ श्रीः ॥
१४.८. अध्यायः ८

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
संवर्तेन मरुत्तंप्रति हिमवत्संनिहिते मुञ्जवतिगिरौ महादेवस्य
निवासकथनपूर्वकं स्वोक्तनामशतकेन स्तुत्या तत्प्रसादनेन यागाय
तन्नत्यबहुसुवर्णहरणचोदना ॥ १ ॥
संवर्तेनि तदाहरणेन शिल्पिभिर्यागोपयोगिभाण्डनिर्मापणम् ॥ २ ॥
इन्द्रेण तच्छ्रवणनिर्विण्णस्य बृहस्पतेः समीपं प्रत्यागमनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

संवर्त उवाच ।
गिरेर्हिमवतः पृष्ठे मुञ्जवान्नाम पर्वतः ।
तप्यते यत्र भगवांस्तपो नित्यमुपापतिः ॥१४-८-१ (९२५४७)
वनस्पतीनां मूलेषु शृङ्गेषु विषमेषु च ।
गुहासु शैलराजस्य यथाकामं यथासुखम् ॥१४-८-२ (९२५४८)
उमासहायो भगवान्यत्र नित्यं महेश्वरः ।
आस्ते शूली महातेजा नानाभूतगणावृतः ॥१४-८-३ (९२५४९)
तत्र रुद्राश्च साध्याश्च विश्वेऽथ वसवस्तथा ।
यमश्च वरुणश्चैव कुबेरश्च सहानुगः ॥१४-८-४ (९२५५०)

भूतानि च पिशाचाश्च नासत्यावपि चाश्विनौ ।
गन्धर्वाप्सरसश्चैव यक्षा देवर्षयस्तथा ॥१४-८-५ (९२५५१)
आदित्या मरुतश्चैव यातुधानाश्च सर्वशः ।
उपासन्ते महात्मानं बहुरूपमुपापतिम् ॥१४-८-६ (९२५५२)
रमते भगवांस्तत्र कुबेरानुचरैः सह ।
विकृतैर्विकृताकारैः क्रीडद्भिः पृथिवीपते ॥१४-८-७ (९२५५३)
श्रिया ज्वलन्दृश्यते वै बालादित्यसमद्युतिः ।
न रूपं शक्यते तस्य संस्थानं वा कदाचन ।
निर्देष्टुं प्राणिभिः कैश्चित्प्राकृतैर्मांसलोचनैः ॥ १४-८-८ (९२५५४)
नोष्णं न शिशिरं तत्र न वायुर्न च भास्करः ।
न जारा क्षुत्पिपासे वा न मृत्युर्न भयं नृप ॥१४-८-९ (९२५५५)
तस्य शैलस्य पार्श्वेषु सर्वेषु जयतांवर ।
धातवो जातरूपस्य रश्मयः सवितुर्यथा ॥१४-८-१० (९२५५६)
रक्ष्यन्ते ते कुबेरस्य सहायैरुद्यतायुधैः ।
चिकीर्षद्भिः प्रियं राजन्कुबेरस्य महात्मनः ॥१४-८-११ (९२५५७)
ग्तत्र गत्वा समन्वास्य महायोगेश्वरं शिवम् ।
कुरु प्रणामं राजर्षे भक्त्या परमया यतुः ॥' १४-८-१२ (९२५५८)
तस्मै भगवते कृत्वा नमः शर्वाय वेधसे ।
गएभिस्त्वं नामभिर्देवं सर्वविद्याधरं स्तुहि ॥' १४-८-१३ (९२५५९)
रुद्राय शितिकण्ठाय सुरूपाय सुवर्चसे ।
कपर्दिने करालाय हर्यक्ष्णे वरदाय च ॥१४-८-१४ (९२५६०)
त्र्यक्ष्णे पूष्णो दन्तभिदे वामनाय शिवाय च ।
याम्यायाव्यक्तरूपाय सद्वृत्ते शङ्कराय च ॥१४-८-१५ (९२५६१)
क्षेम्याय हरिकेशाय स्थाणवे पुरुषाय च ।
हरिनेत्राय मुण्डाय क्रुद्धायोत्तरणाय च ॥१४-८-१६ (९२५६२)
भास्वराय सुतीर्थाय देवदेवाय रंहसे ।
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ॥१४-८-१७ (९२५६३)
गिरिशाय प्राशान्ताय यतये चीरवाससे ।
बिल्वदण्डाय सिद्धाय सर्वदण्डधराय च ॥१४-८-१८ (९२५६४)
मृगव्याधाय महते धन्विनेऽथ भवाय च ।
वराय सोमवक्त्राय सिद्धमन्त्राय चक्षुषे ॥१४-८-१९ (९२५६५)
हिरण्यबाहवे राजन्नुग्राय पतये दिशाम् ।
लेलिहानाय गोष्ठाय सिद्धमन्त्राय वृष्णये ॥१४-८-२० (९२५६६)
पशूनां पतये चैव भूतानां पतये नमः ।
वृषाय मातृभक्ताय सेनान्ये मध्यमाय च ॥१४-८-२१ (९२५६७)
ग्अभिवक्त्राय पतये सर्वदेवमयाय च।'

स्रुवहस्ताय पतये धन्विने भार्गवाय च ।
अजाय कृष्णनेत्राय विरूपाक्षाय चैव ह ॥ १४-८-२२ (९२५६८)
तीक्ष्णदंष्ट्राय तीक्ष्णाय वैश्वानरमुखाय च ।
महात्मने चानङ्गाय सर्वाय पतये विशाम् ॥१४-८-२३ (९२५६९)
गतथा रुद्राय पतये पृथवे कृत्तिवाससे।'
विलोहिताय दीप्ताय दीप्ताक्षाय महौजसे ।
वसुरेतःसुवपुषे पृथवे कृत्तिवाससे ॥ १४-८-२४ (९२५७०)
कपालमालिने चैव सुवर्णमुकुटाय च ।
महादेवाय कृष्णाय त्र्यम्बकायानघाय च ॥१४-८-२५ (९२५७१)
क्रोधनायानृशंसाय मृदवे बाहुशालिने ।
दण्डिने तप्ततपसे तथैवाक्रूरकर्मणे ॥१४-८-२६ (९२५७२)
सहस्रशिरसे चैव सहस्रचरणाय च ।
नमः स्वधास्वरूपाय बहुरूपाय दंष्ट्रिणे ॥१४-८-२७ (९२५७३)
पिनाकिनं महादेवं महाभोगिनमव्ययम् ।
त्रिशूलहस्तं वरदं त्र्यम्बकं भुवनेश्वरम् ॥१४-८-२८ (९२५७४)
त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ।
प्रभवं सर्वभूतानां दातारं धरणीधरम् ॥१४-८-२९ (९२५७५)
ईशानं शङ्करं सर्वं शिवं विश्वेश्वरं भवम् ।
उमापतिं पशुपतिं विश्वरूपं महेश्वरम् ॥१४-८-३० (९२५७६)
विरूपाक्षं दशभुजं विष्यन्दं गोवृषध्वजम् ।
उग्रं स्थाणुं शिवं रौद्रं शर्वं गौरीशमीश्वरम् ॥१४-८-३१ (९२५७७)
शितिकण्ठमजं शुक्रं पृथुं पृथुहरं वरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुपापतिम् ॥१४-८-३२ (९२५७८)
प्रणम्य शिरसा देवमनङ्गाङ्गहरं हरम् ।
शरण्यं शरणं याहि महादेवं चतुर्मुखम् ॥१४-८-३३ (९२५७९)
गविरोचमानं वपुषा दिव्याभरणभूषितम् ।
अनाद्यन्तमजं शंभुं सर्वव्यापिनमीश्वरम् ॥१४-८-३४ (९२५८०)
निस्त्रैगुण्यं निरुद्वेगं निर्मलं निधिमोजसाम् ।
प्रणम्य प्राञ्जलिः शर्वं प्रयामि शरणं हरम् ॥१४-८-३५ (९२५८१)
सम्मान्यं निश्चलं नित्यमकारुण्यमलेपनम् ।
अध्यात्मवेदमासाद्य प्रयामि शरणं मुहुः ॥१४-८-३६ (९२५८२)
यस्य नित्यं विदुः स्थानं मोक्षमध्यात्मचिन्तकाः ।
योगीशं तत्वमार्गस्थाः कैवल्यं पदमक्षरम् ॥१४-८-३७ (९२५८३)
यं विदुः सङ्गिनं मुक्ताः सामान्यं समदर्शिनः ।
तं प्रपद्ये जगद्योनिमयोनिं निर्गुणात्मकम् ॥१४-८-३८ (९२५८४)
असृजद्यस्तु भूतादीन्सप्त लोकान्सनातनान् ।

स्थितः सत्योपरि स्थाणुस्तं प्रपद्ये सनातनम् ॥१४-८-३९ (९२५८५)
भक्तानां सुलभं तं हि दुर्लभं दूरपातिनाम् ।
अदूरस्थममुं देवं प्रकृतेः परतः स्थितम् ॥१४-८-४० (९२५८६)
नमामि सर्वलोकस्थं व्रजामि शरणं शिवम्।'
एवं कृत्वा नमस्तस्मै महादेवाय रंहसे ।
महात्मने क्षितिपते तत्सुवर्णमवाप्स्यसि ॥ १४-८-४१ (९२५८७)
ग्लभन्ते गाणपत्यं च तदेकाग्रा हि मानवाः ।
किं पुनः स्वर्णिभाण्डानि तस्मात्त्वं गच्छ मा चिरं ॥१४-८-४२ (९२५८८)
महत्तरं हि ते लाभं हस्त्यश्वोष्ट्रादिभिः सह।'
सुवर्णमाहरिष्यन्तस्तत्र गच्छन्तु ते नराः ॥ १४-८-४३ (९२५८९)
व्यास उवाच।१४-८-४४क्ष् (७७५४)
इत्युक्तः स वचस्तस्य चक्रे कारन्धमात्मजः ।
गगङ्गाधरं नमस्कृत्य लब्धवान्धनमुत्तमम् ॥१४-८-४४ (९२५९०)
कुबेर इव तत्प्राप्य महादेवप्रसादतः।'
ततोऽतिमानुषं सर्वं चक्रे यज्ञस्य संविधिम् ॥ १४-८-४५ (९२५९१)
सौवर्णानि च भाण्डानि संचक्रुस्तत्र शिल्पिनः ।
गशालाश्च सर्वसम्भारांस्तत्र संवर्तशासनात् ॥' १४-८-४६ (९२५९२)
बृहस्पतिस्तु तां श्रुत्वा मरुत्तस्य महीपतेः ।
समृद्धिमति देवेभ्यः सन्तापमकरोद्भृशम् ॥१४-८-४७ (९२५९३)
सन्तप्यमानो वैवर्ण्यं कृशत्वं चागमत्परम् ।
भविष्यति हि मे शत्रुः संवर्तो वसुमानिति ॥१४-८-४८ (९२५९४)
तं श्रुत्वा भृशसंतप्तं देवराजो बृहस्पतिम् ।
अभिगम्यामरवृतः प्रोवाचेदं वचस्तदा ॥ ॥१४-८-४९ (९२५९५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
अष्टमोऽध्यायः ॥८ ॥

आश्वमेधिकपर्व - अध्याय ००९
॥ श्रीः ॥
१४.९. अध्यायः ९

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
बृहस्पतिना इन्द्रंप्रति स्वानुजेन संवर्तेन मरुत्तस्य
याजनकथनपूर्वकं तद्विघटनचोदना ॥१ ॥
अग्निना मरुत्तमेत्य याजनाय बृहस्पतिस्वीकरणरूपेन्द्रसन्देशकथनम्

॥ २ ॥
तथा पुनरिन्द्रमेत्य मरुत्तेन स्वसंदेशापरिग्रहणनिवेदनम् ॥ ३ ॥
तथा इन्द्रेण पुनर्मरुत्ते स्वसन्देशनिवेदनचोदने
संवर्ततपोभयात्तदनङ्गीकरणम् ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

इन्द्र उवाच ।
कच्चित्सुखं स्वपिषि त्वं बृहस्पते
कच्चिन्मनोज्ञाः परिचारकास्ते ।
कच्चिद्देवानां सुखकामोसि विप्र
कच्चिद्देवास्त्वां परिपालयन्ति ॥ १४-९-१ (९२५९६)
बृहस्पतिरुवाच। १४-९-२क्ष् (७७५५)
सुखं शये शयने देवराज
तथा मनोज्ञाः परिचारका मे ।
तथा देवानां सुखकामोस्मि नित्यं
देवाश्च मां सुभृशं पालयन्ति ॥ १४-९-२ (९२५९७)
इन्द्र उवाच। १४-९-३क्ष् (७७५६)
कुतो दुःखं मानसं देहजं वा
पाण्डुर्विवर्णश्च कुतस्त्वमद्य ।
आचक्ष्व मे ब्राह्मण यावदेता-
न्निहन्मि सर्वांस्तव दुःखकर्तॄन् ॥ १४-९-३ (९२५९८)
बृहस्पतिरुवाच। १४-९-४क्ष् (७७५७)
मरुत्तमाहुर्मघवन्यक्ष्यमाणं
महायज्ञेनोत्तमदक्षिणेन ।
संवर्तो याजयतीति मे श्रुतं
तदिच्छामि न स तं याजयेत् ॥ १४-९-४ (९२५९९)
इन्द्र उवाच। १४-९-५क्ष् (७७५८)
सर्वान्कामाननुयातोसि विप्र
त्वं देवानां मन्त्रयसे पुरोधाः ।
उभौ च ते जरामृत्यू व्यतीतौ
किं संवर्तस्तव कर्ताऽद्य विप्र ॥ १४-९-५ (९२६००)
बृहस्पतिरुवाच। १४-९-६क्ष् (७७५९)
देवैः सह त्वमसुरान्सम्प्रणुद्य
जिघांससे चाप्युत सानुबन्धान् ।
यंयं समृद्धं पश्यसि तत्रतत्र

दुःखं सपत्नेषु समृद्धिभावः ॥ १४-९-६ (९२६०१)
अतोस्मि देवेन्द्र विवर्णरूपः
सपत्नो मे वर्धते तन्निशम्य ।
सर्वोपायैर्मघवन्संनियच्छ
संवर्तं वा पार्थिवं वा मरुत्तम् ॥ १४-९-७ (९२६०२)
इन्द्र उवाच।१४-९-८क्ष् (७७६०)
एहि गच्छ प्रहितो जातवेदो
बृहस्पतिं परिदातुं मरुत्ते ।
अयं वै त्वां याजयिता बृहस्पति-
स्तथाऽमरं चैव करिष्यतीति ॥ १४-९-८ (९२६०३)
अग्निरुवाच।१४-९-९क्ष् (७७६१)
अहं गच्छामि तव शक्राद्य दूतो
बृहस्पतिं परिदातुं मरुत्ते ।
वाचं सत्यां पुरुहूतस्य कर्तुं
बृहस्पतेश्चापचितिं चिकीर्षुः ॥ १४-९-९ (९२६०४)
व्यास उवाच।१४-९-१०क्ष् (७७६२)
ततः प्रायाद्धूमकेतुर्महात्मा
वनस्पतीन्वीरुधश्चावमृद्नन् ।
कामाद्धिमान्ते परिवर्तमानः
काष्ठातिगो मातरिश्वेव नर्दन् ॥ १४-९-१० (९२६०५)
मरुत उवाच।१४-९-११क्ष् (७७६३)
आश्चर्यमद्य पश्यामि रूपिणं वह्निमागतम् ।
आसनं सलिलं पाद्यं गां चोपानय वै मुने ॥१४-९-११ (९२६०६)
अग्निरुवाच।१४-९-१२क्ष् (७७६४)
आसनं सलिलं पाद्यं प्रतिनन्दामि तेऽनघ ।
इन्द्रेण तु समादिष्टं विद्धि मां दूतमागतम् ॥१४-९-१२ (९२६०७)
मरुत उवाच।१४-९-१३क्ष् (७७६५)
कच्चिच्छ्रीमान्देवराजः सुखी च
कच्चिच्चास्मान्प्रीयते धूमकेतो ।
कच्चिद्देवा अस्य वशे यथाव-
त्प्रब्रूहि त्वं मम कार्त्स्न्येन देव ॥ १४-९-१३ (९२६०८)
अग्निरुवाच।१४-९-१४क्ष् (७७६६)
शक्रो भृशं सुसुखी पार्थिवेन्द्र
प्रातिं चेच्छत्यजरां वै त्वया सः ।
देवाश्च सर्वे वशगास्तस्य राज-
न्संदेशं त्वं शृणु मे देवराज्ञः ॥ १४-९-१४ (९२६०९)

यदर्थं मां प्राहिणोत्त्वत्सकाशं
बृहस्पतिं परिदातुं मरुत्ते ।
अयं गुरुर्याजयतां नृप त्वां
मर्त्यं सन्तममरं त्वां करोतु ॥ १४-९-१५ (९२६१०)
मरुत उवाच।१४-९-१६क्ष् (७७६७)
संवर्तोऽयं याजयिता द्विजो मां
बृहस्पतेरञ्जलिरेष तस्य ।
न चैवासौ याजयित्वा महेन्द्रं
मर्त्यं सन्तं याजयन्नद्य शोभेत् ॥ १४-९-१६ (९२६११)
अग्निरुवाच।१४-९-१७क्ष् (७७६८)
ये वै लोका देवलोके महान्तः
सम्प्राप्स्यसे तान्देवराजप्रसादात् ।
त्वां चेदसौ याजयेद्वै बृहस्पति-
र्नूनं स्वर्गं त्वं जयेः कीर्तियुक्तः ॥ १४-९-१७ (९२६१२)
तथा लोका मानुषा ये च दिव्याः
प्रजापतेश्चापि ये वै महान्तः ।
तेते जिता देवराज्यं च कृत्स्नं
बृहस्पतिर्याजयेच्चेन्नरेन्द्र ॥ १४-९-१८ (९२६१३)
संवर्त उवाच।१४-९-१९क्ष् (७७६९)
मा स्मैव त्वं पुनरागाः कथंचि-
द्बृहस्पतिं परिदातुं मरुत्ते ।
मा त्वां धक्ष्ये चक्षुषा दारुणेन
संक्रुद्धोऽहं पावक त्वं निबोधः ॥ १४-९-१९ (९२६१४)
व्यास उवाच।१४-९-२०क्ष् (७७७०)
ततो देवानगमद्धूमकेतु-
र्दाहाद्भीतो व्यथितोऽश्वत्थपर्णवत् ।
तं वै दृष्ट्वा प्राह शक्रो महात्मा
बृहस्पतेः सन्निधौ हव्यवाहम् ॥ १४-९-२० (९२६१५)
यस्त्वं गतः प्रहितो जातवेदो
बृहस्पतिं परिदातुं मरुत्ते ।
तत्किं प्राह स नृपो यक्ष्यमाणः
कच्चिद्वचः प्रतिगृह्णाति तच्च। १४-९-२१ (९२६१६)
अग्निरुवाच।१४-९-२२क्ष् (७७७१)
न ते वाचं रोचयते मरुत्तो
बृहस्पतेरञ्जलिं प्राहिणोत्सः ।
संवर्तो मां याजयितेत्युवाच

पुनः पुनः स मया याच्यमानः ॥ १४-९-२२ (९२६१७)
उवाचेदं मानुषा ये च दिव्या ।
प्रजापतेर्ये च लोका महान्तः ।
तांश्चेल्लभेयं संविदं तेन कृत्वा
तथापि नेच्छेयमिति प्रतीतः ॥ १४-९-२३ (९२६१८)
इन्द्र उवाच।१४-९-२४क्ष् (७७७२)
पुनर्गत्वा पार्थिवं त्वं समेत्य
वाक्यं मदीयं प्रापय स्वार्थयुक्तम् ।
पुनर्यद्युक्तो न करिष्यते वच-
स्त्वत्तो वज्रं सम्प्रहर्तास्मि तस्मै ॥ १४-९-२४ (९२६१९)
अग्निरुवाच।१४-९-२५क्ष् (७७७३)
गन्धर्वराड्यात्वयं तत्र दूतो
बिभेम्यहं वासव तत्र गन्तुम् ।
संरब्धो मामब्रवीत्तीक्ष्णरोषः
संवर्तो वाक्यं चरितब्रह्मचर्यः ॥ १४-९-२५ (९२६२०)
यद्यागच्छेः पुनरेवं कथंचि-
द्बृहस्पतिं परिदातुं मरुत्ते ।
दहेयं त्वां चक्षुषा दारुणेन
संक्रुद्ध इत्येतदवैहि शक्र ॥ १४-९-२६ (९२६२१)
शक्र उवाच।१४-९-२७क्ष् (७७७४)
त्वमेवान्यान्दहसे जातवेदो
न हि त्वदन्यो विद्यते भस्मकर्ता ।
त्वत्संस्पर्शात्सर्वलोको बिभेति
अश्रद्धेयं वदसे हव्यवाह ॥ १४-९-२७ (९२६२२)
अग्निरुवाच।१४-९-२८क्ष् (७७७५)
दिवं देवेन्द्र पृथिवीं च सर्वां
संवेष्टयेस्त्वं स्वबलेनैव शक्र ।
एवंविधस्येह सतस्तवासौ
कथं वृत्रस्त्रिदिवं प्राग्जहार ॥ १४-९-२८ (९२६२३)
इन्द्र उवाच।१४-९-२९क्ष् (७७७६)
नगण्डिकाकारयोगं करेऽणुं
न चारिसोमं प्रपिबामि वह्ने ।
न क्षीणशक्तौ प्रहारामि वज्रं
को मे सुखाय प्रहरेत मर्त्यः ॥ १४-९-२९ (९२६२४)
प्रव्रजयेयं कालकेयान्पृथिव्या-
मपाकर्षन्दानवानन्तरिक्षात् ।

दिवः प्रह्लादमवसानमानयं
को मेऽसुखाय प्रहरेत मानवः ॥ १४-९-३० (९२६२५)
अग्निरुवाच। १४-९-३१क्ष् (७७७७)
यत्र शर्यातिं च्यवनो याजयिष्य-
न्सहाश्विभ्यां सोममगृह्णदेकः ।
तं त्वं क्रुद्धः प्रत्यषेधीः पुरस्ता-
च्छर्यातियज्ञं स्म तं महेन्द्र ॥ १४-९-३१ (९२६२६)
वज्रं गृहीत्वा च पुरन्दर त्वं
सम्प्राहार्षीश्च्यवनस्यातिघोरम् ।
स ते विप्रः सह वज्रेणि बाहु-
मपागृह्णात्तपसा जातमन्युः ॥ १४-९-३२ (९२६२७)
ततो रोषात्सर्वतो घोररूपं
सपत्नं ते जनयामास भूयः ।
मदं नाम्ना चासुरं विश्वरूपं
यं त्वं दृष्ट्वा चक्षुषी संन्यमीलः ॥ १४-९-३३ (९२६२८)
हनुरेका जगतीस्था तथैका
दिवं गता महतो दानवस्य ।
सहस्रं दन्तानां शतयोजनानां
सुतीक्ष्णानां घोररूपं बभूव ॥ १४-९-३४ (९२६२९)
वृत्ताः स्थूला रजतस्तम्भवर्णा
दंष्ट्राश्चतस्रो द्वे शते योजनानाम् ।
स त्वां दन्तान्विदशन्नभ्यधाव-
ज्जिघांसया शूलमुद्यम्य घोरम् ॥ १४-९-३५ (९२६३०)
तं नापश्यस्त्वं तदा घोररूपं
सर्वे वै त्वां ददृशुर्दर्शनीयम् ।
यस्माद्भीतः प्राञ्जलिस्त्वं महर्षि-
मागच्छेथाः शरणं दानवघ्न ॥ १४-९-३६ (९२६३१)
क्षात्राद्बलाद्ब्रह्मबलं गरीयो
न ब्रह्मतः किञ्चिदन्यद्गरीयः ।
सोहं जानन्ब्रह्मतेजो यथाव-
न्न संवर्त गन्तुमिच्छामि शक्र ॥ ॥ १४-९-३७ (९२६३२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
नवमोऽध्यायः ॥ ९ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९-२९ नाहं दौर्बल्याद्वृत्रेण जित इति वक्तुं स्वसामर्थ्यमिन्द्रो वह्निप्रति वदति नगण्डिकाकारयोगं करेणुम् । नगं पर्वतं डीयते विहायसा गच्छतीति डीः पक्षी अल्पो डीर्डिका मक्षिकामशकादिस्तस्या आकारेण योगोस्यास्तीत्येवंरूपं अणुं सूक्ष्मं करेकुर्वे। कृञश्छान्दसं भौवादिकत्वम्। करेणेतिपाठे करोमीत्यध्याहारः। पार्थोधिं करे कर्तुमगस्त्य इवाहं पर्वतमपि मशकीकर्तुं समर्थोस्मीत्यर्थः। कुतस्तर्हि वृत्रस्त्वां नाराधितवानित्यत आह न चारिसोमं प्रपिबामि वह्ने। अरिसोमं शत्रुदत्तं सोमम्। त्वयैव स कुती न निर्जित इत्यत आह न क्षीणशक्तौ प्रहरामि वज्रमित्यादिना न दण्डकान्नारकान्नो कलिङ्गान्न करूशान्सोमं प्रपिबामि वह्ने। न दुर्बलायावसृजामि वज्रं को मे सुखी यः प्रहरेन्मनुष्यः इति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०१०

॥ श्रीः ॥

१४.१०. अध्यायः १०

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

इन्द्रेण गन्धर्वमुखात्स्वेन याजनाय बृहस्पतिवरणं चोदितेनापि मरुत्तेन तदनङ्गीकारे यज्ञविघाताय साटोपं यज्ञवाटं प्रत्यागमनम् ॥ १ ॥
संवर्तेन मरुत्तप्रार्थनया विद्याबलेनेन्द्रादीनां संस्तम्भनम् ॥ २ ॥
ततः संवर्तानुवर्तिनेन्द्रेण सभानिर्मापणादिना यज्ञनिर्वर्तनपूर्वकं देवैः सह हविर्ग्रहणम् ॥ ३ ॥
व्यासेनैव युधिष्ठिरंप्रति मरुत्तयज्ञप्रवृत्तिप्रकारकथनपूर्वकं तच्छिष्टद्रव्याहरमएनाश्वमेधकरणविधानम् ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

इन्द्र उवाच ।
एवमेतद्ब्रह्मबलं गरीयो
न ब्राह्मणात्किञ्चिदन्यद्गरीयः ।
आविक्षितस्य तु बलं न मृष्ये
वज्रमस्मै प्रहरिष्यामि घोरम् ॥ १४-१०-१ (९२६३३)

धृतराष्ट्र गच्छ प्रहितो मरुत्तं
संवर्तेन सङ्गतं तं वदस्व
बृहस्पतिं त्वमुपशिक्षस्व राज-
न्वज्रं वा ते प्रहरिष्यामि घोरम् ॥ १४-१०-२ (९२६३४)
व्यास उवाच। १४-१०-३क्ष् (७७७८)
ततो गत्वा धृतराष्ट्रो नरेन्द्रं
प्रोवाचेदं वचनं वासवस्य ॥ १४-१०-३ (९२६३५)
गन्धर्वं मां धृतराष्ट्रं निबोध
त्वामागतं वक्तुकामं नरेन्द्र ।
ऐन्द्रं वाक्यं शृणु मे राजसिंह
यत्प्राह लोकाधिपतिर्महात्मा ॥ १४-१०-४ (९२६३६)
बृहस्पतिं याजकं त्वं वृणीष्व
वज्रं वा ते प्रहरिष्यामि घोरम् ।
वचश्चेदेतन्न करिष्यसे मे
प्राहैतदेतावदचिन्त्यकर्मा ॥ १४-१०-५ (९२६३७)
मरुत्त उवाच। १४-१०-६क्ष् (७७७९)
त्वं चैवैतद्वेत्थ पुरन्दरश्च
विश्वेदेवा वसवश्चाश्विनौ च ।
मित्रद्रोहे निष्कृतिर्नास्ति लोके
महत्पापं ब्रह्महत्यासमं तत् ॥ १४-१०-६ (९२६३८)
बृहस्पतिर्याजयतां महेन्द्रं
देवश्रेष्ठं वज्रभृतां वरिष्ठम् ।
संवर्तो मां याजयिताऽद्य राज-
न्न ते वाक्यं तस्य वा रोचयामि ॥ १४-१०-७ (९२६३९)
गन्धर्व उवाच। १४-१०-८क्ष् (७७८०)
घोरो नादः श्रूयतां वासवस्य
नभस्तले गर्जतो राजसिंह ।
व्यक्तं वज्रं मोक्ष्यते ते महेन्द्रः
क्षेमं राजंश्चिन्त्यतामेष कालः ॥ १४-१०-८ (९२६४०)
व्यास उवाच। १४-१०-९क्ष् (७७८१)
इत्येवमुक्तो धृतराष्ट्रेण राज-
ञ्श्रुत्वा नादं नदतो वासवस्य ।
तपोनित्यं धर्मविदां वरिष्ठं
संवर्तं तं ज्ञापयामास कार्यम् ॥ १४-१०-९ (९२६४१)
मरुत्त उवाच। १४-१०-१०क्ष् (७७८२)
पश्यात्मानं प्लवमानं त्वमारा-

दध्वा दूरं तेन न दृश्यतेऽद्य ।
प्रपद्येऽहं शर्म विप्रेन्द्र त्वत्तः
प्रयच्छ तस्मादभयं विप्रमुख्य ॥ १४-१०-१० (९२६४२)
अयमायाति वे वज्री दिशो विद्योतयन्दस ।
अमानुषेण घोरेणि सदस्यास्त्रासिता हि नः ॥१४-१०-११ (९२६४३)
संवर्त उवाच।१४-१०-१२क्ष् (७७८३)
भयं शक्राद्व्येतु ते राजसिंह
प्रणोत्स्येऽहं भयमेतत्सुघोरम् ।
संस्तम्भिन्या विद्यया क्षिप्रमेव
मा भैस्त्वमस्याभिभवात्प्रतीतः ॥ १४-१०-१२ (९२६४४)
अहं संस्तम्भयिष्यामि मा भैस्त्वं शक्रतो नृप ।
यर्वेषामेव देवानां क्षयितान्यायुधानि मे ॥१४-१०-१३ (९२६४५)
दिशो वज्रं व्रजतां वायुरेतु
वर्षं भूत्वा वर्षतां काननेषु ।
आपः प्लवन्त्वन्तरिक्षे वृथा च
सौदामनी दृश्यते माऽपि भैस्त्वम् ॥ १४-१०-१४ (९२६४६)
वह्निर्देवस्त्रातु वा सर्वतस्ते
कामान्सर्वान्वर्षतु वासवो वा ।
वज्रं तथा स्थापयतां वधाय
महाघोरं पुवमानं जलौघैः ॥ १४-१०-१५ (९२६४७)
मरुत्त उवाच।१४-१०-१६क्ष् (७७८४)
घोरः शब्दः श्रूयते वै महास्वनो
वज्रस्यैष सहितो मारुतेन ।
आत्मा हि मे प्रव्यथते मुहुर्मुहु-
र्न मे स्वास्थ्यं जायते चाद्य विप्र ॥ १४-१०-१६ (९२६४८)
संवर्त उवाच।१४-१०-१७क्ष् (७७८५)
वज्रादुग्राद्व्येतु भयं तवाद्य
वातो भूत्वा व्रजतु नरेन्द्र वज्रम् ।
भयं त्वक्त्वा वरमन्यं वृणीष्व
कं ते कामं तपसा साधयामि ॥ १४-१०-१७ (९२६४९)
मरुत्त उवाच।१४-१०-१८क्ष् (७७८६)
इन्द्रः साक्षात्सहसाऽभ्येतु विप्र
हविर्यज्ञे प्रतिगृह्णातु चैव ।
स्वंस्वं हविश्चैव जुषन्तु देवा
हुतं सोमं प्रतिगृह्णन्तु चैव ॥ १४-१०-१८ (९२६५०)
संवर्त उवाच।१४-१०-१९क्ष् (७७८७)

अयमिन्द्रो हरिभिरायाति राज-
न्देवैः सर्वैस्त्वरितैः स्तूयमानः ।
मन्त्राहूतो यज्ञमिमं मयाऽद्य
पश्यस्वैनं मन्त्रविस्रस्तकायम् ॥ १४-१०-१९ (९२६५१)
व्यास उवाच।१४-१०-२०क्ष् (७७८८)
ततो देवैः सहितो देवराजो
रथे युङ्क्त्वा तान्हरीन्वाजिमुख्यान् ।
आयाद्यज्ञमथ राज्ञः पिपासु-
राविक्षितस्याप्रमेयस्य सोमम् ॥ १४-१०-२० (९२६५२)
तमायान्तं सहितं देवसङ्घैः
प्रत्युद्ययौ सपुरोधा मरुत्तः ।
चक्रे पूजां देवराजाय चाग्र्यां
यथाशास्त्रं विधिवत्प्रीयमाणः ॥ १४-१०-२१ (९२६५३)
संवर्त उवाच।१४-१०-२२क्ष् (७७८९)
सुस्वागतं ते पुरुहूतेह विद्व-
न्यज्ञोऽप्ययं सन्निहिते त्वयीन्द्र ।
शोशुभ्यते बलवृत्रघ्न भूयः
पिबस्व सोमं सुतमुद्यतं मया ॥ १४-१०-२२ (९२६५४)
मरुत्त उवाच।१४-१०-२३क्ष् (७७९०)
शिवेन मां पश्य नमश्च तेऽस्तु
प्राप्तो यज्ञः सफलं जीवितं मे ।
अयं यज्ञं कुरुते मे सुरेन्द्र
बृहस्पतेरवरो जन्मना च। १४-१०-२३ (९२६५५)
इन्द्र उवाच।१४-१०-२४क्ष् (७७९१)
जानामि ते गुरुमेनं तपोधनं
बृहस्पतेरनुजं तिग्मतेजसम्
यस्याह्वानादागतोऽहं नरेन्द्र
प्रीतिर्मेऽद्य त्वयि मन्युः प्रनष्टः ॥ १४-१०-२४ (९२६५६)
संवर्त उवाच।१४-१०-२५क्ष् (७७९२)
यदि प्रीतस्त्वमसि वै देवराज
तस्मात्स्वयं शाधि यज्ञे विधानम् ।
स्वयं सर्वान्कुरु भागान्सुरेन्द्र
जानात्वयं सर्वलोकश्च देव ॥ १४-१०-२५ (९२६५७)
व्यास उवाच।१४-१०-२६क्ष् (७७९३)
एवमुक्तस्त्वाङ्गिरसेन शक्रः
समादिदेश स्वयमेव देवान् ।

सभाः क्रियन्तामावसथाश्च मुख्याः
सहस्रशश्चित्रभूताः समृद्धाः ॥ १४-१०-२६ (९२६५८)
क्लृप्ताः स्थूणाः कुरुतारोहणानि
गन्धर्वाणामप्सरसां च शीघ्रम् ।
यत्र नृत्येरन्नप्सरसः समस्ताः
स्वर्गोपमः क्रियतां यज्ञवाटः ॥ १४-१०-२७ (९२६५९)
इत्युक्तास्ते चक्रुराशु प्रतीता
दिवौकसः शक्रवाक्यान्नरेन्द्र ।
ततो वाक्यं प्राह राजानमिन्द्रः
प्रीतो राजन्पूज्यमानो मरुत्तम् ॥ १४-१०-२८ (९२६६०)
एष त्वयाऽहमिह राजन्समेत्य
ये चाप्यन्ते तव पूर्वे नरेन्द्र ।
सर्वाश्चान्या देवताः प्रीयमाणा
हविस्तुभ्यं प्रतिगृह्णन्तु राजन् ॥ १४-१०-२९ (९२६६१)
आग्नेयं वै लोहितमालभन्तां
वैश्वदेवं बहुरूपं हि राजन् ।
निलं चोक्षाणं मेद्यमप्यालभन्तां
चलच्छिश्नं सम्प्रदिष्टं द्विजाग्र्याः ॥ १४-१०-३० (९२६६२)
ततो यज्ञो ववृधे तस्य राज-
न्यत्र देवाः स्वयमन्नानि जह्रुः ।
यस्मिञ्शक्रो ब्राह्मणैः पूज्यमानः
सदस्योऽभूद्धरिमान्देवराजः ॥ १४-१०-३१ (९२६६३)
ततः संवर्तश्चैत्यगतो माहात्मा
यथा वह्निः प्रज्वलितो द्वितीयः ।
हवींष्युच्चैराह्वयन्देवसङ्घा-
ञ्जुहावाग्नौ मन्त्रवत्सुप्रतीतः ॥ १४-१०-३२ (९२६६४)
ततः पीत्वा बलभित्सोममग्र्यं
ये चाप्यन्ते सोमपा देवसङ्घाः ।
सर्वेऽनुज्ञाताः प्रययुः पार्थिवेन
यथाजोषं तर्पिताः प्रीतिमन्तः ॥ १४-१०-३३ (९२६६५)
ततो राजा जातरूपस्य राशी-
न्पदेपदे कारयामास हृष्टः ।
द्विजातिभ्यो विसृजन्भूरि वित्तं
रराज वित्तेश इवारिहन्ता ॥ १४-१०-३४ (९२६६६)
ततो वित्तं विविधं सन्निधाय
यथोत्साहं कारयित्वा च कोशम् ।

अनुज्ञातो गुरुणां संनिवृत्त्य
शशास गामखिलां सागरान्ताम् ॥ १४-१०-३५ (९२६६७)
एवंगुणः सम्बभूवेह राजा
यस्य क्रतौ तत्सुवर्णं प्रभूतम् ।
तत्त्वं समादाय नरेन्द्र वित्तं
यजस्व देवांस्तपनीयैर्विधानैः ॥ १४-१०-३६ (९२६६८)
वैशम्पायन उवाच। १४-१०-३७क्ष् (७७९४)
ततो राजा पाण्डवो हृष्टरूपः
श्रुत्वा वाक्यं सत्यवत्याः सुतस्य ।
मनश्चक्रे तेन वित्तेन यष्टुं
ततोऽमात्यैर्मन्त्रयामास भूयः ॥ ॥ १४-१०-३७ (९२६६९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
दशमोऽध्यायः ॥ १० ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१०-६ मित्रद्रोहे निष्कृतिर्वै यथेह नास्तीति सदैववाद इति
क ट थ पाठः ॥
७-१०-८ क्षमं राजन्निति क ट थ पाठः ॥
७-१०-१० विलोभ्यि च्छित्त्वा मत्प्रतिष्ठा द्विनेन्द्राः इति क ट थ ॥।

आश्वमेधिकपर्व - अध्याय ०११
॥ श्रीः ॥
१४.११. अध्यायः ११

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति इन्द्रवृत्रासुरयुद्धप्रकारकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
इत्युक्ते नृपतौ तस्मिन्व्यासेनाद्भुतकर्मणा ।
वासुदेवो महातेजास्ततो वचनमाददे ॥ १४-११-१ (९२६७०)
तं नृपं दीनमनसं निहतज्ञातिबान्धवम् ।
उपप्लुतमिवादित्यं सधूममिव पावकम् ॥ १४-११-२ (९२६७१)

निर्विण्णमनसं पार्थं ज्ञात्वा वृष्णिकुलोद्वहः ।
आश्वासनन्धर्मसुतं प्रवक्तुमुपचक्रमे ॥ १४-११-३ (९२६७२)
वासुदेव उवाच। १४-११-४क्ष् (७७९५)
सर्वं जिह्मं मृत्युपदमजिह्मं ब्रह्मणः पदम् ।
एतावाञ्ज्ञानविषयः किं प्रलापः करिष्यति ॥ १४-११-४ (९२६७३)
नैव तेऽनुष्ठितं कर्म नैव ते शत्रवो जिताः ।
कथं शत्रुं शरीरस्तमात्मनो नावबुध्यसे ॥ १४-११-५ (९२६७४)
अत्र ते वर्तयिष्यामि यथाधर्मं यथाश्रुतम् ।
इन्द्रस्य सह वृत्रेण यथा युद्धमवर्तत ॥ १४-११-६ (९२६७५)
वृत्रेण पृथिवी व्याप्ता पुरा किल नराधिप ।
दृष्ट्वा स पृथिवीं व्याप्तां गन्धस्य विषये हृते ।
धराहरणदुर्गन्धो विषयः समपद्यत ॥ १४-११-७ (९२६७६)
शतक्रतुश्चुकोपाथ गन्धस्य विषये हृते ।
वृत्रस्य सततः क्रुद्धो घोरं वज्रमवासृजत् ॥ १४-११-८ (९२६७७)
स वध्यमानो वज्रेण सुभृशं भूरितेजसा ।
विवेश सहसा तोयं जग्राह विषयं ततः ॥ १४-११-९ (९२६७८)
अप्सु वृत्रगृहीतासु रसे च विषये हृते ।
शतक्रतुरतिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १४-११-१० (९२६७९)
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ।
विवेश सहसा ज्योतिर्जग्राह विषयं ततः ॥ १४-११-११ (९२६८०)
व्याप्ते ज्योतिषि वृत्रेण रूपेऽथ विषये हृते ।
शतक्रतुरतिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १४-११-१२ (९२६८१)
स वद्यमानो वज्रेण तस्मिन्नमिततेजसा ।
विवेश सहसा वायुं जग्राह विषयं ततः ॥ १४-११-१३ (९२६८२)
व्याप्ते वायौ तु वृत्रेण स्पर्शेऽथ विषये हृते ।
शतक्रतुरतिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १४-११-१४ (९२६८३)
स वध्यगानो वज्रेण तस्मिन्नमिततेजसा ।
आकाशमभिदुद्राव जग्राह विषयं ततः ॥ १४-११-१५ (९२६८४)
आकाशे वृत्रभूतेऽथ शब्दे च विषये हृते ।
शतक्रतुरभिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १४-११-१६ (९२६८५)
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ।
विवेश सहसा शक्रं जग्राह विषयं ततः ॥ १४-११-१७ (९२६८६)
तस्य वृत्रगृहीतस्य मोहः समभवन्महान् ।
रथन्तरेण तं साम्ना वसिष्ठः प्रत्यबोधयत् ॥ १४-११-१८ (९२६८७)
ततो वृत्रं शरीरस्थं जघान भरतर्षभ ।
शतक्रतुरदृश्येन वज्रेणेतीह नः श्रुतम् ॥ १४-११-१९ (९२६८८)

इदं धर्म्यं रहस्यं वै शक्रेणोक्तं महर्षिषु ।
ऋषिभिश्च मम प्रोक्तं तन्निबोध जनाधिप ॥ ॥ १४-११-२० (९२६८९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
एकादशोऽध्यायः ॥ ११ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-११-२ उपप्लुतं राहुग्रस्तम् ॥
७-११-४ जिह्मं कामादि । मृत्युपदं संसारप्रापकम्। अजिह्मं
शमादि। ब्रह्मणः पदं मोक्षस्य प्रापकम्। ज्ञानविषयो हेयोपादेयतया
ज्ञातव्योर्थः। आर्जवं ब्रह्मणः पदमिति झ.ध पाठः ॥
७-११-७ धराहरणनिस्सार इति क.थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०१२
॥ श्रीः ॥
१४.१२. अध्यायः १२

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति शारीरमानसभेदनेन
व्याधेर्द्वैविध्याभिधानपूर्वकं तत्परिहारोपायकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वासुदेव उवाच ।
द्विवोधो जायते व्याधिः शारीरो मानसस्तथा ।
परस्परं तयोर्जन्म निर्द्वन्द्वं नोपपद्यते ॥ १४-१२-१ (९२६९०)
शरीरे जायते व्याधिः शरीरः स निगद्यते ।
मानसे जायते व्याधिर्मानसस्तु निगद्यते ॥ १४-१२-२ (९२६९१)
शीतोष्णे चैव वायुश्च गुणा राजञ्शरीरजाः ।
तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणम् ॥ १४-१२-३ (९२६९२)
उष्णेन बाध्यते शीतं शीतेनोष्णं च बाध्यते ॥ १४-१२-४ (९२६९३)
सत्वं रजस्तमश्चेति त्रय आत्मगुणाः स्मृताः ।
तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणम् ॥ १४-१२-५ (९२६९४)
तेषामन्यतमोत्सेके विधानमुपदिश्यते ।
हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ॥ १४-१२-६ (९२६९५)

कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छति ।
कश्चित्सुखे वर्तमानो दुःखस्य स्मर्तुमिच्छति ॥१४-१२-७ (९२६९६)
स त्वं न दुःखी दुःखस्य न सुखी सुसुखस्य वा ।
स्मर्तुमिच्छसि कौन्तेय दैवं हि बलवत्तरम् ।
अथवा ते स्वभावोऽयं येन पार्थावकृष्यसे ॥ १४-१२-८ (९२६९७)
दृष्ट्वा सभागतां कृष्णामेकवस्त्रां रजस्वलाम् ।
मिषतां पाण्डवेयानां न तस्य स्मर्तुमिच्छसि ॥१४-१२-९ (९२६९८)
प्रव्राजनं च नगरादजिनैश्च विवासनम् ।
महारण्यनिवासश्च न तस्य स्मर्तुमिच्छसि ॥१४-१२-१० (९२६९९)
जटासुरात्परिक्लेशश्चित्रसेनेन चाहवः ।
सैन्धवाच्च परिक्लेशो न तस्य स्मर्तुमिच्छसि ॥१४-१२-११ (९२७००)
पुनरज्ञातचर्यायां कीचकेन पदा वधः ।
याज्ञसेन्यास्तथा पार्थ न तस्य स्मर्तुमिच्छसि ॥१४-१२-१२ (९२७०१)
यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिंदम ।
मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् ॥१४-१२-१३ (९२७०२)
तस्मादभ्युपगन्तव्यं युद्धाय भरतर्षभ ।
परमव्यक्तरूपस्य पारं युक्त्या स्वकर्मभिः ॥१४-१२-१४ (९२७०३)
यत्र नैव शरैः कार्यं न भृत्यैर्न च बन्धुभिः ।
आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् ॥१४-१२-१५ (९२७०४)
तस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि ।
एतज्ज्ञात्वा तु कौन्तेय कृतकृत्यो भविष्यसि ॥१४-१२-१६ (९२७०५)
एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिम् ।
पितृपैतामहे वृत्ते शाधि राज्यं यथोचितम् ॥ ॥१४-१२-१७ (९२७०६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
द्वादशोऽध्यायः ॥१२ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१२-३ शीतोष्णे कफपित्ते वायुर्वातः तेषां साम्ये स्वास्थ्यं वैषम्ये
व्याधिर्भवतीत्यर्थः ॥
७-१२-४ शीतोष्णयोरन्यतराविक्यजं दोष
मितरवर्धकेनौषधादिनापनयेदित्यर्थः ॥
७-१२-१२ कीचकेन पराभव इति क पाठः ॥
७-१२-१५ आत्मना मनसा ॥

आश्वमेधिकपर्व - अध्याय ०१३

॥ श्रीः ॥

१४.१३. अध्यायः १३

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

कामस्य शक्तिकथनेन दुर्जयत्वकथनपूर्वकं तज्जयोपायकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वासुदेव उवाच ।
न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत ।
शारीरं द्रव्यमुत्सृज्य सिद्धिर्बवति वा न वा ॥ १४-१३-१ (९२७०७)
बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृह्यतः ।
यो धर्मो यत्सुखं चैव द्विषतामस्तु तत्तव ॥ १४-१३-२ (९२७०८)
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति द्व्यक्षरो मृत्युर्नममेति च शाश्वतम् ॥ १४-१३-३ (९२७०९)
ब्रह्ममृत्यू ततो राजन्नात्मन्येव व्यवस्थितौ ।
अदृश्यमानौ भूतानि योधयेतामसंशयम् ॥ १४-१३-४ (९२७१०)
अविनाशोऽस्य तत्त्वस्य नियतो यदि भारत ।
भित्त्वा शरीरं भूतानामहिंसां प्रतिपद्यते ॥ १४-१३-५ (९२७११)
लब्ध्वा हि पृथिवीं कृत्स्नां सहस्थावरजङ्गमाम् ।
ममत्वं यस्य नैव स्यात्किं तया स करिष्यति ॥ १४-१३-६ (९२७१२)
अथवा वसतः पार्थ वने वन्येन जीवतः ।
ममता यस्य वित्तेषु मृत्योरास्ये स वर्तते ॥ १४-१३-७ (९२७१३)
ब्राह्यान्तराणां शत्रूणां स्वभावं पश्य भारत ।
यन्न पश्यति तद्भूतं मुच्यते स महाभयात् ॥ १४-१३-८ (९२७१४)
कामात्मानं न प्रशंसन्ति लोके
नेहाकामा काचिदस्ति प्रवृत्तिः ।
सर्वे कामा मनसोऽङ्ग प्रभूता
यान्पण्डितः संहरते विचिन्त्य ।
भूयोभूयो जन्मनोऽभ्यासयोगा-
द्योगी योगं सारमार्गं विचिन्त्य ॥ १४-१३-९ (९२७१५)
दानं च वेदाध्ययनं तपश्च
काम्यानि कर्माणि च वैदिकानि ।
व्रतं यज्ञान्नियमान्ध्यानयोगा-
न्कामेन यो नारभते विदित्वा ।

यद्यच्चायं कामयते स धमो
नयो धर्मो नियमस्तस्य मूलम् ॥ १४-१३-१० (९२७१६)
अत्र गाथाः कामगीताः कीर्तयन्ति पुराविदः ।
शृणु सङ्कीर्त्यमानास्ता अखिलेन युधिष्ठिर ॥१४-१३-११ (९२७१७)
काम उवाच।१४-१३-१२क्ष् (७७९६)
नाहं शक्योऽनुपायेन हन्तुं भूतेन केनचित् ॥ १४-१३-१२ (९२७१८)
यो मां प्रयतते हन्तुं ज्ञात्वा प्रहरणे बलम् ।
तस्य तस्मिन्प्रहरणे पुनः प्रादुर्भवाम्यहम् ॥१४-१३-१३ (९२७१९)
यो मां प्रयतते हन्तुं यज्ञैर्विविधदक्षिणैः ।
जङ्गमेष्विव धर्मात्मा पुनः प्रादुर्भवाम्यहम् ॥१४-१३-१४ (९२७२०)
यो मां प्रयतते हन्तुं वेदैर्वेदान्तसाधनैः ।
स्थावरेष्विव भूतात्मा तस्य प्रादुर्भवाम्यहम् ॥१४-१३-१५ (९२७२१)
यो मां प्रयतते हन्तुं धृत्या सत्यपराक्रमः ।
भावो भवामि तस्याहं स च मां नावबुध्यते ॥१४-१३-१६ (९२७२२)
यो मां प्रयतते हन्तुं तपसा संशितव्रतः ।
ततस्पपसि तस्यथ पुनः प्रादुर्भवाम्यहम् ॥१४-१३-१७ (९२७२३)
यो मां प्रयतते हन्तुं मोक्षमास्थाय पण्डितः ।
तस्य मोक्षरतिस्थस्य नृत्यामि च हसामि च ।
अवध्यः सर्वभूतानामहमेकः सनातनः ॥ १४-१३-१८ (९२७२४)
तस्मात्त्वमपि तं कामं यज्ञैर्विविधदक्षिणैः ।
धर्मे कुरु महाराज तत्र ते स भविष्यति ॥१४-१३-१९ (९२७२५)
मा ते व्यथाऽस्तु निहतान्बन्धून्वीक्ष्य पुनःपुनः ।
न शक्यास्ते पुनर्द्रष्टुं येऽहतास्मिन्रणाजिरे ॥१४-१३-२० (९२७२६)
स त्वमिष्ट्वा महायज्ञैः समृद्धैराप्तदक्षिणैः ।
कीर्तिं लोके परां प्राप्य गतिमग्र्यां गमिष्यसि ॥ ॥१४-१३-२१ (९२७२७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
त्रयोदशोऽध्यायः ॥१३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१३-१ न बाह्यस्य राज्यादेरर्थस्य त्यागात्त्यग्गी भवति किन्तु
शरीरं कामादिकं त्यक्त्वैव सिद्धिर्मोक्षः नवेति शुष्कवैराग्यवतो
विवेकशून्यस्य सिद्ध्यभावं सूचयति ।उत्सृज्य सिद्धिर्भवति
भारतेतिक ध पाठः ॥
७-१३-२ गृद्ध्य सक्तस्य यो धर्मः सः अधर्मएव यत्सुखं तद्दुःखमेव ॥
७-१३-३ मम त्वं संसारहेतुः तदभावो ब्रह्मप्राप्तिहेतुरित्यर्थः ॥

आश्वमेधिकपर्व - अध्याय ०१४
॥ श्रीः ॥
१४.१४. अध्यायः १४

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
व्यासनारदकृष्णादिभिर्बन्धुनिधनपरिशोचिनो युधिष्ठिरस्य समाश्वासनेन तत्रान्तर्धानम् ॥ १ ॥
युधिष्ठिरेण भीष्मदीनामौर्ध्वदेहिकदानेन हास्तिननगरप्रवेशः ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवं बहुविधैर्वाक्यैर्मुनिभिस्तैस्तपोधनैः ।
समाश्वस्त राजर्षिर्हितबन्धुर्युधिष्ठिरः ॥ १४-१४-१ (९२७२८)
सोऽनुनीतो भगवता विष्टरश्रवसा स्वयम् ।
द्वैपायनेन कृष्णेनि देवस्थानेन चाभिभूः ॥ १४-१४-२ (९२७२९)
नारदेनाथ भीमेन नकुलेन च पार्थिव ।
कृष्णया सहदेवेन विजयेन च धीमता ॥ १४-१४-३ (९२७३०)
अन्यैश्च पुरुषव्याघ्रैर्ब्राह्मणैः शास्त्रदृष्टिभिः ।
व्यजहाच्छोकजं दुःखं सन्तापं चैव मानसम् ॥ १४-१४-४ (९२७३१)
अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः ।
कृत्वाऽथ प्रेतकार्याणि सर्वेषां कुरुनन्दनः ।
अन्वशासच्च धर्मात्मा पृथिवीं सागराम्बराम् ॥ १४-१४-५ (९२७३२)
प्रशान्तचेताः कौरव्यः स्वराज्यं प्राप्य केवलम् ।
व्यासं च नारदं चैव तांश्चान्यानब्रवीन्नृपः ॥ १४-१४-६ (९२७३३)
आश्वासितोऽहं प्राग्वृद्धैर्भवद्भिर्मुनिपुङ्गवैः ।
न सूक्ष्ममपि मे किञ्चिद्व्यलीकमिह विद्यते ॥ १४-१४-७ (९२७३४)
अर्थश्च सुमहान्प्राप्तो येन यक्ष्यामि देवताः ।
पुरस्कृत्याद्य भवतः समानेष्यामहे मखम् ॥ १४-१४-८ (९२७३५)
हिमवन्तं त्वया गुप्ता गमिष्यामः पितामह ।
बह्वाश्चर्यो हि देशः स श्रूयते द्विजसत्तम ॥ १४-१४-९ (९२७३६)
तथा भगवता चित्रं कल्याणं बहु भाषितम् ।
देवर्षिणा नारदेन देवस्थानेन चैव ह ॥ १४-१४-१० (९२७३७)
नाभागधेयः पुरुषः कश्चिदेवंविधान्गुरून् ।

लभते व्यसनं प्राप्य सुहृदः साधुसम्मतान् ॥१४-१४-११ (९२७३८)
वैशम्पायन उवाच।१४-१४-१२क्ष् (७७९७)
एवमुक्तास्तु ते राज्ञा सर्व एव महर्षयः ।
अभ्यनुज्ञाप्य राजानं तथोभौ कृष्णफल्गुनौ ॥१४-१४-१२ (९२७३९)
पश्यतामेव सर्वेषां तत्रैवादर्शनं ययुः ।
ततो धर्मसुतो राजा तत्रैवोपाविशत्प्रभुः ॥१४-१४-१३ (९२७४०)
एवं नातिमहान्कालः स तेषां संन्यवर्तत ।
कुर्वतां शौचकार्याणि भीष्मस्य निधने तदा ।
महादानानि विप्रेभ्यो ददतामौर्ध्वदेहिकम् ॥ १४-१४-१४ (९२७४१)
भीष्मकर्णपुरोगाणां कुरूणां कुरुसत्तम ।
सहितो धृतराष्ट्रेण स ददावौर्ध्वदेहिकम् ॥१४-१४-१५ (९२७४२)
ततो दत्त्वा बहुधनं विप्रेभ्यः पाण्डवर्षभः ।
धृताराष्ट्रं पुरुस्कृत्य विवेश गजसाह्वयम् ॥ ॥१४-१४-१६ (९२७४३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
चतुर्दशोऽध्यायः ॥१४ ॥

आश्वमेधिकपर्व - अध्याय ०१५
॥ श्रीः ॥
१४.१५. अध्यायः १५

अश्वमेधपर्व ॥१ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
वैशंपायेन जनमेजयंप्रति युधिष्ठिरस्य प्रजापालनकाले
प्रजादीनामभ्युदयप्रकारवर्णनम् ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ग्वैशम्पायन उवाच ।
स समाश्वास्य पितरं प्रज्ञाचक्षुषमीश्वरम् ।
अन्वशासत धर्मात्मा पृथिवीं भ्रातृभिः सह ॥१४-१५-१ (९२७४४)
यथा मनुर्महाराजो रामो दाशरथिर्यथा ।
तथा भरतसिंहोऽपि पालयामास मेदिनीम् ॥१४-१५-२ (९२७४५)
नाधर्म्यमभवत्तत्र सर्वो धर्मरुचिर्जनः ।
बभूव नरशार्दूल यथा कृतयुगे तथा ॥१४-१५-३ (९२७४६)
कलिमासन्नमाविष्टं निवार्य नृपनन्दनः ।

भ्रातृभिः सहितो धीमान्बभौ धर्मबलोद्धतः ॥ १४-१५-४ (१२७४७)
ववर्ष भगवान्देवः काले देशे यथेप्सितम् ।
निरामयं जगदभूत्क्षुत्पिपासे न किञ्चन ॥ १४-१५-५ (१२७४८)
आधिर्नास्ति मनुष्याणां व्यसने नाभवन्मतिः ।
ब्राह्मणप्रमुखा वर्णास्ते स्वधर्मोत्तराः शुभाः ॥ १४-१५-६ (१२७४९)
धर्मसत्यप्रधानाश्च सत्यं सद्विषयान्वितम् ।
धर्मासनस्थः सद्भिः स स्त्रीबालातुरवृद्धकान् ।
वर्णक्रमान्पूर्णभृतान्साकल्याद्रक्षणोद्यतः ॥ १४-१५-७ (१२७५०)
अवृत्तिवृत्तिदानाद्यैर्यज्ञाद्यैर्व्याधितैरपि ।
आमुष्मिकं भयं नास्ति लौकिकं कृतमेव ॥ १४-१५-८ (१२७५१)
स्वर्गलोकोपमो लोकस्तदा तस्मिन्प्रशासति ।
बभूव सुखमेवाग्रं तद्विशिष्टतरं परम् ॥ १४-१५-९ (१२७५२)
नार्यः पतिव्रताः सर्वा रूपवत्यः स्वलंकृताः ।
यथोक्तवृत्ताः स्वगुणैर्बभूवुः प्रीतिहेतवः ॥ १४-१५-१० (१२७५३)
पुमांसः पुण्यशीलाढ्याः स्वंस्वं धर्ममनुव्रताः ।
सुखिनः सूक्ष्ममप्येनो न कुर्वन्ति कदाचन ॥ १४-१५-११ (१२७५४)
सर्वे नरांश्च नार्यश्च सततं प्रियवादिनः ।
अजिह्ममनसः शुक्ला बभूवुः श्रमवर्जिताः ॥ १४-१५-१२ (१२७५५)
भूषिताः कुण्डलैर्हारैः कटकैः कटिसूत्रकैः ।
सुवाससः सुगन्धाढ्याः प्रायशः पृथिवीतले ॥ १४-१५-१३ (१२७५६)
सर्वे ब्रह्मविदो विप्राः सर्वत्र परिनिष्ठिताः ।
वलीपलितहीनास्तु सुखिनो दीर्घदर्शिनः ॥ १४-१५-१४ (१२७५७)
इच्छा न जायतेऽन्यत्र वर्णेषु न च सङ्करः ।
मनुष्याणां महाराज मर्यादा सुव्यवस्थिता ॥ १४-१५-१५ (१२७५८)
तस्मिञ्शासति राजेन्द्रे मृगव्यालसरीसृपाः ।
अन्योन्यमपि चान्येषु न बाधन्ते कदाचन ॥ १४-१५-१६ (१२७५९)
गावः सुक्षीरभूयिष्ठाः सुस्ववालमुखोदराः ।
अपीडिताः कर्षकाद्यैर्हृतव्याधिकवत्सकाः ॥ १४-१५-१७ (१२७६०)
अवन्ध्यकाला मनुजाः पुरुषार्थेषु च क्रमात् ।
विषयेष्वनिषिद्धेषु वेदशास्त्रेषु चोद्यताः ॥ १४-१५-१८ (१२७६१)
सुवृत्ता वृषभाः पुष्टा रसनाभाः सुखोदयाः ॥ १४-१५-१९ (१२७६२)
अतीव मधुरः शब्दः स्पर्शश्चातिसुखं रसम् ।
करूपं दृष्टिक्षमं रम्यं मनोज्ञं गन्धवद्बभौ ॥ १४-१५-२० (१२७६३)
धर्मार्थकामसंयुक्तं मोक्षाभ्युदयसाधनम् ।
प्रह्लादजननं पुण्यं सम्बभूवाथ मानसम् ॥ १४-१५-२१ (१२७६४)
स्थावरा बहुपुष्पाढ्याः फलच्छायावहास्तथा ।

सुस्पर्शा विषहीनाश्च सुपत्रत्वक्प्ररोहिणः ॥ १४-१५-२२ (९२७६५)
मनोनुकूलाः सर्वेषां चेष्टाभूतापवर्जिताः ।
तथा बभूव राजर्षिस्तद्वृत्तमभवद्भुवि ॥ १४-१५-२३ (९२७६६)
सर्वलक्षणसम्पन्नाः पाण्डवा धर्मचारिणः ।
ज्येष्ठानुवर्तिनः सर्वे बभूवुः प्रियदर्शनाः ॥ १४-१५-२४ (९२७६७)
सिंहोरस्का जितक्रोधास्तेजोबलसमन्विताः ।
आजानुबाहवः सर्वे दानशीला जितेन्द्रियाः ॥ १४-१५-२५ (९२७६८)
तेषु शासत्सु धरणीमृतवः स्वगुणैर्बभुः ।
सुखोदयाय वर्तन्ते ग्रहास्तारागणैः सह ॥ १४-१५-२६ (९२७६९)
मही च सस्यबहुला सर्वरत्नगुणोदया ।
कामधुग्धेनुवद्भोगान्फलन्ति स्म सहस्रधा ॥ १४-१५-२७ (९२७७०)
मन्वादिभिः कृताः पूर्वं मर्यादा मानवेषु याः ।
अनतिक्रम्य ताः सर्वाः कुलेषु समयानि च ।
अन्वशासत राजानो धर्मपुत्रप्रियंकराः ॥ १४-१५-२८ (९२७७१)
महाकुलानि धर्मिष्ठा वर्धयन्तो विशेषतः ।
मनुप्रणीतया वृत्त्या तेऽन्वशासनसुन्धराम् ॥ १४-१५-२९ (९२७७२)
राजवृत्तिर्हि सा शश्वद्धर्मिष्ठाऽभून्महीतले ।
प्रायो लोकमतिस्तान राजवृत्तानुगामिनी ॥ १४-१५-३० (९२७७३)
एवं भारतवर्षं स्वं राजा स्वर्गं सुरेन्द्रवत् ।
शशास जिष्णुना सार्धं गोत्रां गाण्डीवधन्वन'॥ ॥ १४-१५-३१ (९२७७४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१५-३१ शशास विष्णुना सार्धं गुप्तो गाण्डीवधन्वनेति थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०१६
॥ श्रीः ॥
१४.१६. अध्यायः १६

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics
वैशम्पायनेन कुरुविजयानन्तरं हास्तिनपुरे
कृष्णार्जुनविहारप्रकारवर्णनम् ॥ १ ॥
कृष्णेनार्जुनंप्रति युधिष्ठिरे स्वस्य

निजनगरजिगमिषानिवेदनचोदना ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
विजिते पाण्डवेयैस्तु प्रशान्ते च द्विजोत्तम ।
राष्ट्रे ते चक्रतुर्वीरौ वासुदेवधनंजयौ ॥ १४-१६-१ (९२७७५)
वैशम्पायन उवाच। १४-१६-२क्ष् (७७९८)
विजिते पाण्डवै राजन्प्रशान्ते च विशाम्पतौ ।
राष्ट्रे बभूवतुर्हृष्टौ वासुदेवधनंजयौ ॥ १४-१६-२ (९२७७६)
विजह्राते मुदा युक्तौ दिवि देवश्वराविव ।
तौ वनेषु विचित्रेषु पर्वतेषु ससानुषुः ॥ १४-१६-३ (९२७७७)
तीर्थेषु चैव पुण्येषु पल्वलेषु नदीषु च ।
चंक्रम्यमाणौ संहृष्टावश्विनाविव नन्दने ॥ १४-१६-४ (९२७७८)
इन्द्रप्रस्थे महात्मानौ रेमाते कृष्णपाण्डवौ ।
प्रविश्य तां सभां रम्यां विजह्राते च भारत ॥ १४-१६-५ (९२७७९)
तत्र युद्धकथाश्चित्राः परिक्लेशांश्च पार्थिव ।
कथायोगे कथायोगे कथयामासतुः सदा ॥ १४-१६-६ (९२७८०)
ऋषीणां देवतानां च वंशांस्तावाहतुः सदा ।
प्रीयमाणौ महात्मानौ पुराणावृषिसत्तमौ ॥ १४-१६-७ (९२७८१)
मधुरास्तु कथाश्चित्राश्चित्रार्थपदनिश्चयाः ।
निश्चयज्ञः स पार्थाय कथयामास केशवः ॥ १४-१६-८ (९२७८२)
पुत्रशोकाभिसंतप्तं ज्ञातीनां च सहस्रशः ।
कथाभिः शमयामास पार्तं शौरिर्जनार्दनः ॥ १४-१६-९ (९२७८३)
स तमाश्वास्य विधिवद्विधानज्ञो महातपाः ।
अपहृत्यात्मनो भारं विशश्रामेव सात्वतः ॥ १४-१६-१० (९२७८४)
ततः कथान्ते गोविन्दो गुडाखेशमुवाच ह ।
सान्त्वयञ्श्लक्ष्णया वाचा हेतुयुक्तमिदं वचः ॥ १४-१६-११ (९२७८५)
विजितेयं धरा कृत्स्ना सव्यसाचिन्परंतप ।
त्वद्बाहुबलमाश्रित्य राज्ञा धर्मसुतेन ह ॥ १४-१६-१२ (९२७८६)
असपत्नां महीं भुङ्क्ते धर्मराजो युधिष्ठिरः ।
भीमसेनानुभावेन यमयोश्च नरोत्तम ॥ १४-१६-१३ (९२७८७)
धर्मेणि राज्ञा धर्मज्ञ प्राप्तं राज्यमकण्टकम् ।
धर्मेण निहतः सङ्ख्ये स च राजा सुयोधनः ॥ १४-१६-१४ (९२७८८)
अधर्मरुचयो लुब्धाः सदा चाप्रियवादिनः ।
धार्तराष्ट्रा दुरात्मानः सानुबन्धा निपातिताः ॥ १४-१६-१५ (९२७८९)

प्रशान्तामखिलां पार्थ पृथिवीं पृथिवीपतिः ।
भुङ्क्ते धर्मसुतो राजा त्वया गुप्तः कुरूद्वह ॥ १४-१६-१६ (९२७९०)
रमे चाहं त्वया सार्धमरण्येष्वपि पाण्डव ।
किमु यत्र जनोऽयं वै पृथा चामित्रकर्मन ॥ १४-१६-१७ (९२७९१)
यत्र धर्मसुतो राजा यत्र यत्र भीमो महाबलः ।
यत्र माद्रवतीपुत्रौ रतिस्तत्र परा मम ॥ १४-१६-१८ (९२७९२)
तथैव स्वर्गलोकेषु सभोद्देशेषु कौरव ।
रमणीयेषु पुण्येषु सहितस्य त्वयाऽनध ॥ १४-१६-१९ (९२७९३)
कालो महांस्त्वतीतो मे शूरसूनुमपश्यतः ।
बलदेवं च कौरव्यं तथाऽन्यान्वृष्णिपुङ्गवान् ॥ १४-१६-२० (९२७९४)
सोहं गन्तुमभीप्सामि पुरीं द्वारावतीं प्रति ।
रोचतां गमनं तुभ्यं ममापि पुरुषर्षभ ॥ १४-१६-२१ (९२७९५)
उक्तो बहुविधं राजा तत्रतत्र युधिष्ठिरः ।
सह भीष्मेण यद्युक्तमस्माभिः शोककर्शितः ॥ १४-१६-२२ (९२७९६)
शिष्टो युधिष्ठिरोऽस्माभिः शास्ता सन्नपि पाण्डवः ।
तेन तत्तु वचः सम्यग्गृहीतं सुमहात्मना ॥ १४-१६-२३ (९२७९७)
धर्मपुत्रे हि धर्मज्ञे कृतज्ञे सत्यवादिनि ।
सत्यं धर्मो मतिश्चाग्र्या स्थितिश्च सततं स्थिरा ॥ १४-१६-२४ (९२७९८)
तत्र गत्वा महात्मानं यदि ते रोचतेऽर्जुन ।
अस्मद्गमनसंयुक्तं वचो ब्रूहि जनाधिपम् ॥ १४-१६-२५ (९२७९९)
न हि तस्याप्रियं कुर्यां प्राणत्योगेऽप्युपस्थिते ।
कुतो गन्तुं महाबाहो पुरीं द्वारावतीं प्रति ॥ १४-१६-२६ (९२८००)
सर्वं त्विदमहं पार्त त्वत्प्रीतिहितकाम्यया ।
ब्रवीमि सत्यं कौरव्य न मिथ्यैतत्कथञ्चन ॥ १४-१६-२७ (९२८०१)
प्रयोजनं च निर्वृत्तमिह वासेन मेऽर्जुन ।
धार्तराष्ट्रो हतो राजा सबलः सपदानुगः ॥ १४-१६-२८ (९२८०२)
पृथिवी च वशे तात धर्मपुत्रस्य धीमतः ।
स्थिता समुद्रवसना सशैलवनकानना ॥ १४-१६-२९ (९२८०३)
चिता रत्नैर्बहुविधैः कुरुराजस्य पाण्डव ।
धर्मेण राजा धर्मज्ञः पातु सर्वां वसुन्धराम् ॥ १४-१६-३० (९२८०४)
उपास्यमानो मुनिभिः सिद्धैश्चापि महात्मभिः ।
स्तूयमानश्च सततं बन्दिभिर्भरतर्षभ ॥ १४-१६-३१ (९२८०५)
तं मया सह गत्वाऽद्य राजानं कुरुवर्धनम् ।
आपृच्छ कुरुशार्दूल गमनं द्वारकां प्रति ॥ १४-१६-३२ (९२८०६)
इदं शरीरं वसु यच्च मे गृहे
निवेदितं पार्थ सदा युधिष्ठिरे ।

प्रियश्च मान्यश्च हि मे युधिष्ठिरः
सदा कुरूणामधिपो महामतिः ॥ १४-१६-३३ (९२८०७)
प्रयोजनं चापि निवासकारणे
न विद्यते मे त्वदृते नृपात्मज ।
स्थिता हि पृथ्वी तव पार्थ शासने
गुरोः सुवृत्तस्य युधिष्ठिरस्य च ॥ १४-१६-३४ (९२८०८)
इतीदमुक्तः स तदा महात्मना
जनार्दनेनामितविक्रमोऽर्जुनः ।
तथेति दुःखादिव वाक्यमैरय-
ज्जनार्दनं सम्प्रतिपूज्य पार्थिव ॥ ॥ १४-१६-३५ (९२८०९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अश्वमेधपर्वणि
षोडशोऽध्यायः ॥१६ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१६-४ शैलेषु गह्वरारण्ये पल्वलेष्विति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०१७
॥ श्रीः ॥
१४.१७. अध्यायः १७

अथानुगीतापर्व ॥ २ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन कृष्णंप्रति पूर्वोपदिष्टगीतार्थस्य विस्मरणोक्त्या
पुनस्तदुपदेशप्रार्थना ॥ १ ॥
कृष्णेनार्जुनंप्रति स्वस्मै ब्राह्मणोक्तसिद्धकाश्यपसंवादानुवादः ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
सभायां वसतोस्तत्र निहत्यारीन्महात्मनोः ।
केशवार्जुनयोः का नु कथा समभवद्द्विज ॥ १४-१७-१ (९२८१०)
वैशम्पायन उवाच । १४-१७-२क्ष् (७७९९)
कृष्णेन सहितः पार्थः स्वं राज्यं प्राप्य केवलम् ।
तस्यां सभायां दिव्यायां विजहार मुदा युतः ॥ १४-१७-२ (९२८११)
तत्र कञ्चित्सभोद्देशं स्वर्गोद्देशसमं नृप ।

यदृच्छया तौ मुदितौ जग्मतुः स्वजनावृतौ ॥ १४-१७-३ (९२८१२)
ततः प्रतीतः कृष्णेन सहितः पाण्डवोऽर्जुनः ।
निरीक्ष्य तां सभां रम्यामिदं वचनमब्रवीत् ॥ १४-१७-४ (९२८१३)
विदितं मे महाबाहो सङ्ग्रामे समुपस्थिते ।
महात्म्यं देवकीपुत्र तच्च ते रूपमैश्वरम् ॥ १४-१७-५ (९२८१४)
यत्तु तद्भवता प्रोक्तं पुरा केशव सौहृदात् ।
तत्सर्वं पुरुषव्याघ्र नष्टं मे व्यग्रचेतसः ॥ १४-१७-६ (९२८१५)
मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः पुनः ।
भवांस्तु द्वारकां गन्ता नचिरादिव माधव ॥ १४-१७-७ (९२८१६)
वैशम्पायन उवाच। १४-१७-८क्ष् (७८००)
एवमुक्तस्तु तं कृष्णः फाल्गुनं प्रत्यभाषत ।
परिष्वज्य महातेजा वचनं वदतांवरः ॥ १४-१७-८ (९२८१७)
वासुदेव उवाच। १४-१७-९क्ष् (७८०१)
श्रावितस्त्वं मया गुह्यं ज्ञापितश्च सनातनम् ।
धर्मं स्वरूपिणं पार्त सर्वलोकांश्च शाश्वतान् ॥ १४-१७-९ (९२८१८)
अबुद्ध्या यन्न गृह्णीतास्तन्मे सुमहदप्रियम् ।
न च साऽद्य पुनर्भूयः स्मृतिर्मे सम्भविष्यति ॥ १४-१७-१० (९२८१९)
नूनमश्रद्दधानोऽसि दुर्मेधा ह्यसि पाण्डव ।
न च शक्यं पुनर्वक्तुमशेषेण धनंजय ॥ १४-१७-११ (९२८२०)
स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने ।
न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः ॥ १४-१७-१२ (९२८२१)
परं हि ब्रह्म कथितं योगयुक्तेन तन्मया ।
इतिहासं तु वक्ष्यामि तस्मिन्नर्थे पुरातनम् ॥ १४-१७-१३ (९२८२२)
यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि ।
शृणु धर्मभृतांश्रेष्ठ गदतः सर्वमेव मे ॥ १४-१७-१४ (९२८२३)
आगच्छद्ब्राह्मणः कश्चित्स्वर्गलोकादरिंदम ।
ब्रह्मलोकाच्च दुर्धर्षः सोस्माभिः पूजितोऽभवत् ॥ १४-१७-१५ (९२८२४)
अस्माभिः परिपृष्ठश्च यदाह भरतर्षभ ।
दिव्येन विधिना पार्थ तच्छृणुष्वाविचारयन् ॥ १४-१७-१६ (९२८२५)
ब्राह्मण उवाच। १४-१७-१७क्ष् (७८०२)
मोक्षधर्मं समाश्रित्य कृष्ण यन्माऽनुपृच्छसि ।
भूतानामनुकम्पार्थं मन्मोहच्छेदनं विभो ॥ १४-१७-१७ (९२८२६)
तत्तेऽहं सम्प्रवक्ष्यामि यथावन्मधुसूदन ।
शृणुष्वावहितो भूत्वा गदतो मम माधव ॥ १४-१७-१८ (९२८२७)
कश्चिद्विप्रस्तपोयुक्तः काश्यपो धर्मवित्तमः ।
आससाद द्विजं कंचिद्धर्माणामागतागमम् ॥ १४-१७-१९ (९२८२८)

गतागमं सुबहुशो ज्ञानविज्ञानपारगम् ।
लोकतत्त्वार्थकुशलं ज्ञातरं सुखदुःखयोः ॥१४-१७-२० (९२८२९)
जातिस्मरणतत्त्वज्ञं कोविदं पापपुण्ययोः ।
द्रष्टारमुच्चनीचानां कर्मभिर्देहिनां गतिम् ॥१४-१७-२१ (९२८३०)
चरन्तं मुक्तवत्सिद्धं प्रशान्तं संयतेन्द्रियम् ।
दीप्यमानं श्रिया ब्राह्मया क्रममाणं च सर्वशः ॥१४-१७-२२ (९२८३१)
अन्तर्धानगतिज्ञं च श्रुत्वा तत्त्वेन काश्यपः ।
तथैवान्तर्हितैः सिद्धैर्यान्तं चक्रधरैः सह ॥१४-१७-२३ (९२८३२)
सम्भाषमाणमेकान्ते समासीनं च तैः सह ।
यदृच्छया च गच्छन्तमसक्तं पवनं यथा ॥१४-१७-२४ (९२८३३)
तं समासाद्य मेधावी स तदा द्विजसत्तमः ।
चरणौ धर्मकामो वै स तस्य सुसमाहितः ।
प्रतिपदे यथान्यायं भक्त्या परमया युतः ॥ १४-१७-२५ (९२८३४)
विस्मितश्चाद्भुतं दृष्ट्वा काश्यपस्तं द्विजोत्तमम् ।
परिचारेण महता गुरुं तं पर्यतोषयत् ॥१४-१७-२६ (९२८३५)
उपपन्नं च तत्सर्वं श्रुतचारित्रसंयुतम् ।
भौमेनातोषयच्चैनं गुरुवृत्तिं समास्थितः ॥१४-१७-२७ (९२८३६)
तस्मै तुष्टः स शिष्याय यत्प्रसन्नोऽब्रवीद्गुरुः ।
सिद्धिं परामभिप्रेक्ष्य शृणु मत्तो जनार्दन ॥१४-१७-२८ (९२८३७)
सिद्ध उवाच।१४-१७-२९क्ष् (७८०३)
विविधैः कर्मभिस्तात पुण्ययोगैश्च केवलैः ।
गच्छन्तीह गतिं मर्त्या देवलोके च वा स्थितिम् ॥१४-१७-२९ (९२८३८)
न क्वचित्सुखमत्यन्तं न क्वचिच्छाश्वती स्थितिः ।
स्थानाच्च महतो भ्रंशो दुःखलब्दात्पुनः पुनः ॥१४-१७-३० (९२८३९)
अशुभा गतयः प्राप्ताः कष्टा मे पापसेवनात् ।
काममन्युपरीतेन तृष्णया मोहितेन च ॥१४-१७-३१ (९२८४०)
पुनः पुनश्च मरणं जन्म चैव पुनः पुनः ।
आहारा विविधा भुक्ताःपीता नानाविधाःस्तनाः ॥१४-१७-३२ (९२८४१)
मातरो विविधा दृष्टाः पितरश्च पृथग्विधाः ।
सुखानि च विचित्राणि दुःखानि च मयाऽनघ ॥१४-१७-३३ (९२८४२)
प्रियैर्विवासो बहुशः संवासश्चाप्रियैः सह ।
धननाशश्च सम्प्राप्तो लब्ध्वा दुःखेन तद्धनम् ॥१४-१७-३४ (९२८४३)
अवमानाः सुकष्टाश्च परतः स्वजनात्तथा ।
शारीरा मानसा वाऽपि वेदना भृशदारुणाः ॥१४-१७-३५ (९२८४४)
प्राप्ता विमाननाश्चोग्रा वधबन्धाश्च दारुणाः ।
पतनं निरये चैव यातनाश्च यमक्षये ॥१४-१७-३६ (९२८४५)

जरारोगाश्च सततं व्यसनानि च भूरिशः ।
लोकेऽस्मिन्ननुभूतानि द्वन्द्वजानि भृशं मया ॥१४-१७-३७ (९२८४६)
ततः कदाचिन्निर्वेदान्निकारान्निकृतेन च ।
लोकतन्त्रं परित्यक्तं दुःखार्तेन भृशं मया ॥१४-१७-३८ (९२८४७)
लोकेऽस्मिन्ननुभूयाहमिमं मार्गमनुष्ठितः ।
ततः सिद्धिरियं प्राप्ता प्रसादादात्मनो मया ।
नाहं पुनरिहागन्ता लोकानालोकयाम्यहम् ॥ १४-१७-३९ (९२८४८)
आसिद्धेराप्रजासर्गादात्मनोपि गतीः शुभाः ।
उपलब्धा द्विजश्रेष्ठ तथेयं सिद्धिरुत्तमा ॥१४-१७-४० (९२८४९)
इतः परं गमिष्यामि ततः परतरं पुनः ।
ब्रह्मणः पदमव्यक्तं मा तेऽभूतत्र संशयः ॥१४-१७-४१ (९२८५०)
नाहं पुनरिहागन्ता मर्त्यलोकं परन्तप ।
प्रीतोस्मि ते महाप्राज्ञ ब्रूहि किं करवाणि ते ॥१४-१७-४२ (९२८५१)
यदीप्सुरुपपन्नस्त्वं तस्य कालोऽयमागतः ।
अभिजाने च तदहं यदर्थं मामुपागतः ॥१४-१७-४३ (९२८५२)
अचिरात्तु गमिष्यामि येनाहं त्वामचूचुदम् ।
भृशं प्रीतोस्मि भवतश्चारित्रेण विचक्षण ॥१४-१७-४४ (९२८५३)
परिपृच्छ यावद्भवतो भाषे यद्यत्तवेप्सितम् ॥ १४-१७-४५ (९२८५४)
बहुमन्ये च ते बुद्धिं भृशं सम्पूजयामि च ।
येनाहं भवता बुद्धो मेधावी ह्यसि काश्यप ॥ ॥१४-१७-४६ (९२८५५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्तदशोऽध्यायः ॥१७ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१७-१९ आगतागमं प्राप्तशास्त्ररहस्यमूहापोहकुशलमित्यर्थः ॥
७-१७-४३ बहुमन्ये भृशं पूजये ।अहमन्तर्धानगतोऽपि यतस्त्वया ज्ञातः ॥

आश्वमेधिकपर्व - अध्याय ०१८
॥ श्रीः ॥
१४.१८. अध्यायः १८

अश्वमेधपर्व ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

ब्राह्मणेन कृष्णंप्रति प्राणिनां

वासुदेव उवाच ।
ततस्तस्योपसङ्गृह्य पादौ प्रश्नान्सुदुर्वचान् ।
पप्रच्छ तांश्च धर्मान्स प्राह धर्मभृतांवरः ॥ १४-१८-१ (९२८५६)
काश्यप उवाच। १४-१८-२क्ष् (७८०४)
कथं शरीराच्च्यवते कथं चैवोपपद्यते ।
कथं कष्टाच्च संसारात्संसरन्परिमुच्यते ॥ १४-१८-२ (९२८५७)
आत्मानं वा कथं युक्त्वा तच्छरीरं विमुञ्चति ।
शरीरे च विनिर्मुक्तो कथमन्यत्प्रपद्यते ॥ १४-१८-३ (९२८५८)
कथं शुभाशुभे चायं कर्मणी स्वकृते नरः ।
उपभुङ्क्ते क्व वा कर्म विदेहस्योपतिष्ठते ॥ १४-१८-४ (९२८५९)
ब्राह्मण उवाच। १४-१८-५क्ष् (७८०५)
एवं सञ्चोदितः सिद्धः प्रश्नांस्तान्प्रत्यभाषत ।
आनुपूर्व्येण वार्ष्णेय तन्मे निगदतः शृणुः ॥ १४-१८-५ (९२८६०)
सिद्ध उवाच। १४-१८-६क्ष् (७८०६)
ग्अस्मिन्नेवाशु फलदा आयुष्यास्तु क्रियाःस्मृताः ।
आयुःकीर्तिकराणीह यानि कृत्यानि सेवते ।
शरीरग्रहणेऽन्यस्मिंस्तेषु क्षीणेषु सर्वशः ॥ १४-१८-६ (९२८६१)
आयुःक्षयपरीतात्मा विपरीतानि सेवते ।
बुद्धिर्व्यावर्तते चास्य विनाशे प्रत्युपस्थिते ॥ १४-१८-७ (९२८६२)
सत्त्वं बलं च कालं चाविदित्वा चात्मनस्तथा ।
अतिवेलमुपाश्नाति स्वविरुद्धान्यनात्मवान् ॥ १४-१८-८ (९२८६३)
यदाऽयमतिकष्टानि सर्वाण्युपनिषेवते ।
अत्यर्थमपि वा भुङ्क्ते न वा भुङ्क्ते कदाचन ॥ १४-१८-९ (९२८६४)
दुष्टान्नामिषपानं च यदन्योन्यविरोधि च ।
गुरु चाप्यमितं भुङ्क्ते नातिजीर्णे दिवा पुनः ॥ १४-१८-१० (९२८६५)
व्यायाममतिमात्रं च व्यावाय चोपसेवते ।
सततं कर्मलोभाद्वा प्राप्तं वेगं विधारयेत् ॥ १४-१८-११ (९२८६६)
रसाभियुक्तमन्नं वा दिवास्वप्नं च सेवते ।
अपक्वानागते काले स्वयं दोषान्प्रकोपयेत् ॥ १४-१८-१२ (९२८६७)
स्वदोषकोपनाद्रोगं लभते मरणान्तिकम् ।
अपि वोद्बन्धनादीनि परीतानि व्यवस्यति ॥ १४-१८-१३ (९२८६८)
तस्य तैः कारणैर्जन्तोः शरीरं च्यवते तदा ।

जीवितं प्रोच्यमानं तद्यथावदुपधारय ॥१४-१८-१४ (९२८६९)
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ।
शरीरमनुपर्येत्य सर्वान्प्राणान्रुणद्धि वै ॥१४-१८-१५ (९२८७०)
अत्यर्थं बलवानूष्मा शरीरे परिकोपितः ।
भिनत्ति जीवस्थानानि तानि कर्मणि विद्धि च ॥१४-१८-१६ (९२८७१)
ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरन् ।
शरीरं त्यजते जन्तुश्छिद्यमानेषु मर्मसु ।
वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम ॥ १४-१८-१७ (९२८७२)
जनीमरणसंविग्नाः सततं सर्वजन्तवः ।
दृश्यन्ते संत्यजन्तश्च शरीराणि द्विजर्षभ ॥
गर्भसंक्रमणे चापि गर्भाणापुपसर्पणे ।
तादृशीमेव लभते वेदनां मानवः पुनः ॥ १४-१८-१८ (९२८७३)
भिन्नसंधिरथ क्लेदमद्भिः स लभते नरः ॥ १४-१८-२० (९२८७४)
यथा पञ्चसु भूतेषु सम्भूतत्वं नियच्छति ।
शैत्यात्प्रकुपितः काये तीव्रवायुसमीरितः ॥१४-१८-२१ (९२८७५)
यः स पञ्चसु भूतेषु प्राणापाने व्यवस्थितः ।
स गच्छत्यूर्ध्वगो वायुः कृच्छ्रान्मुक्त्वा शरीरिणः ।
शरीरं च जहात्येवं निरुच्छ्वासश्च दृश्यते ॥ १४-१८-२२ (९२८७६)
स निरूष्मा निरुच्छ्वासो निःश्रीको गतचेतनः ।
कर्मणा सम्परित्यक्तो मृत इत्युच्यते नरः ॥१४-१८-२३ (९२८७७)
स्रोतोभिर्यैर्विजानाति इन्द्रियार्थाञ्शरीरभृत् ।
तैरेव न विजानाति प्राणानाहारसम्भवान् ॥१४-१८-२४ (९२८७८)
तत्रैव कुरुते काये यः स जीवः सनातनः ॥ १४-१८-२५ (९२८७९)
तथा यद्यद्भवेन्मुक्तं सन्निपाते क्वचित्क्वचित् ।
तत्तन्मर्म विजानीहि शास्त्रदृष्टं हि तत्तथा ॥१४-१८-२६ (९२८८०)
तेषु मर्मसु भिन्नेषु ततः स समुदीरयन् ।
आविश्य हृदयं जन्तोः सत्त्वं चाशु रुणद्धि वै ॥१४-१८-२७ (९२८८१)
ततः सचेतनो जन्तुर्नाभिजानाति किञ्चन ।
तमसा संवृतज्ञानः संवृतेष्वेव मर्मसु ।
स जीवो निरदिष्ठानश्चाल्यते मातरिश्वना ॥ १४-१८-२८ (९२८८२)
ततः स तं महोच्छ्वासं भृशमुच्छ्वस्य दारुणम् ।
निष्क्रमन्कम्पयत्याशु तच्छरीरमचेतनम् ॥१४-१८-२९ (९२८८३)
स जीवः प्रच्युतः कायात्कर्मभिः स्वैः समावृतः ।
अङ्कितः स्वैः शुभैः पुण्यैः पापैर्वाऽप्युपपद्यते ॥१४-१८-३० (९२८८४)
ब्राह्मणा ज्ञानसम्पन्ना यथावच्छ्रुतनिश्चयाः ।
इतरं कृतपुण्यं वा तं विजानन्ति लक्षणैः ॥१४-१८-३१ (९२८८५)

यथान्धकारे खद्योतं दीप्यमानं ततस्ततः ।
चक्षुष्मन्तः प्रपश्यन्ति तथा च ज्ञानचक्षुषः ॥ १४-१८-३२ (९२८८६)
पश्यन्त्येवंविधं सिद्धा जीवं दिव्येन चक्षुषा ।
च्यवन्तं जायमानं च योनिं चानुप्रवेशितम् ॥ १४-१८-३३ (९२८८७)
तस्य स्थानानि दृष्टानि विविधानीह शास्त्रतः ।
कर्मभूमिरियं भूमिर्यत्र तिष्ठन्ति जन्तवः ॥ १४-१८-३४ (९२८८८)
ततः शुभाशुभं कृत्वा लभन्ते सर्वदेहिनः ।
इहैवोच्चावचान्भोगान्प्राप्नुवन्ति स्वकर्मभिः ॥ १४-१८-३५ (९२८८९)
इहैवाशुभकर्माणः कर्मभिर्निरयं गताः ।
अवाग्गतिरियं कष्टा यत्र पच्यन्ति मानवाः ।
तस्मात्सुदुर्लभो मोक्षो रक्ष्यश्चात्मा ततो भृशम् ॥ १४-१८-३६ (९२८९०)
ऊर्ध्वं तु जन्तवो गत्वा येषु स्थानेष्ववस्थिताः ।
कीर्त्यमानानि तानीह तत्त्वतः संनिबोध मे ॥ १४-१८-३७ (९२८९१)
तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुद्ध्येथाः कर्मनिश्चयम् ।
तारारूपाणि सर्वाणि यत्रैतच्चन्द्रमण्डलम् ॥ १४-१८-३८ (९२८९२)
यत्र विभ्राजते लोके स्वभासा सूर्यमण्डलम् ।
स्थानान्येतानि जानीहि जनानां पुण्यकर्मणाम् ॥ १४-१८-३९ (९२८९३)
कर्मक्षयाच्च ते सर्वे च्यवन्ते वै पुनः पुनः ।
तत्रापि च विशेषोस्ति दिवि नीचोच्चमध्यमः ॥ १४-१८-४० (९२८९४)
न च तत्रापि संतोषो दृष्ट्वा दीप्ततरां श्रियम् ।
इत्येता गतयः सर्वाः पृथक्ते समुदीरिताः ॥ १४-१८-४१ (९२८९५)
उपपत्तिं तु वक्ष्यामि गर्भस्याहमतः परम् ।
तथावत्तां निगदतः शृणुष्वावहितो द्विज ॥ ॥ १४-१८-४२ (९२८९६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१८-१० दुष्टान्नं विषमान्नं विते क ट पाठः ॥
७-१८-१२ अपक्वाशं गते काले स्वयं दोषप्रकोपनमिति क ट थ पाठः ॥
७-१८-१९ गर्भसङ्क्रमणे गर्भस्थदेहप्रवेशे ॥
७-१८-२१ श्लेष्मा प्रकुपित इति क थ पाठः ॥
७-१८-२४ स्नोतोभिरिन्द्रियैः ॥

आश्वमेधिकपर्व - अध्याय ०१९
॥ श्रीः ॥

१४.१९. अध्यायः १९

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

ब्राह्मणेन कृष्णंप्रति जीवस्य
गर्भप्रवेशादिप्रतिपादककाश्यपसिद्धसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
शुभानामशुभानां च नेह नाशोस्ति कर्मणाम् ।
प्राप्यप्राप्यानुपच्यन्ते क्षेत्रेक्षेत्रे तथातथा ॥ १४-१९-१ (९२८९७)
यथा प्रसूयमानस्तु फली दद्यात्फलं बहु ।
तथा स्याद्विपुलं पुण्यं शुद्धेन मनसा कृतम् ॥ १४-१९-२ (९२८९८)
पापं चापि तथैव स्यात्पापेन मनसा कृतम् ।
पुरोधाय मनो हीह कर्मण्यात्मा प्रवर्तते ॥ १४-१९-३ (९२८९९)
यथा कर्मसमाविष्टः काममन्युसमावृतः ।
नरो गर्भं प्रविशति तत्रापि शृणु चोत्तरम् ॥ १४-१९-४ (९२९००)
शुक्रं शोणितसंसृष्टं स्त्रिया गर्भाशयं गतम् ।
क्षेत्रं कर्मजमाप्नोति शुभं वा यदि वाऽशुभम् ॥ १४-१९-५ (९२९०१)
सौक्ष्म्यादव्यक्तयावाच्च न च क्वचन सज्जति ।
सम्प्राप्य ब्राह्मणः कायं तस्मात्तद्ब्रह्म शाश्वतम् ॥ १४-१९-६ (९२९०२)
तद्बीजं सर्वभूतानां तेन जीवन्ति जन्तवः ॥ १४-१९-७ (९२९०३)
स जीवः सर्वभूतानां गर्भमाविश्य भागशः ।
दधाति चेतना सद्यः प्राणस्थानेष्ववस्थितः ।
ततः स्पन्दयतेऽङ्गानि स गर्भश्चेतनान्वितः ॥ १४-१९-८ (९२९०४)
यथा लोहस्य विष्यन्दो निषिक्तो बिम्बविग्रहम् ।
उपैति तद्वज्जानीहि गर्भे जीवप्रवेशनम् ॥ १४-१९-९ (९२९०५)
लोहपिण्डं यथा वह्निः प्रविश्य ह्यतितापयेत् ।
तथा त्वमपि जानीहि गर्भे जीवोपपादनम्। १४-१९-१० (९२९०६)
यथा च दीपः शरणं दीप्यमानः प्रकाशयेत् ।
एवमेव शरीराणि प्रकाशयति चेतनः ॥ १४-१९-११ (९२९०७)
यद्यच्च कुरुते कर्म शुभं वा यदि वाऽशुभम् ।
पूर्वदेहकृतं सर्वमवश्यमुपभुज्यते ॥ १४-१९-१२ (९२९०८)
ततस्तु क्षीयते चैव पुनश्चान्यत्प्रचीयते ।
यावत्तु मोक्षयोगस्थं धर्मं नैवावबुध्यते ॥ १४-१९-१३ (९२९०९)

तत्ते धर्मं प्रवक्ष्यामि सुखी भवति येन वै ।
आवर्तमानो जातीषु यथाऽन्योन्यासु सत्तम ॥ १४-१९-१४ (९२९१०)
दानं व्रतं ब्रह्मचर्यं यथोक्तव्रतधारणम् ।
दमः प्रशान्तता चैव भूतानां चानुकम्पनम् ॥ १४-१९-१५ (९२९११)
संयमश्चानृशंस्य च परस्वादानवर्जनम् ।
व्यलीकानामकरणं भूताना मनसा भुवि ॥ १४-१९-१६ (९२९१२)
मातापित्रोश्च शुश्रूषा देवतातितिपूजनम् ।
गुरुपूजा घृणा शौचं नित्यमिन्द्रियसंयमः ॥ १४-१९-१७ (९२९१३)
प्रवर्तनं शुभानां च तत्सतां व्रतमुच्यते ।
ततो धर्मः प्रभवति यः प्रजाः पाति शाश्वतीः ॥ १४-१९-१८ (९२९१४)
ग्सद्भिराचरितो धर्मः सदाचारे प्रतिष्ठितः ।
उभयार्थो भवत्येव स्वर्गार्थो मोक्षतस्तथा ॥' ॥ १४-१९-१९ (९२९१५)
एवं सत्सु सदा पश्येत्तत्रच्छाप्येषा ध्रुवा स्थितिः ।
आचारो धर्ममाचष्टे यस्मिन्सन्तो व्यवस्थिताः ॥ १४-१९-२० (९२९१६)
तेषु तत्कर्म निक्षिप्तं यः स धर्मः सनातनः ।
यस्तं समभिपद्येत न स दुर्गतिमाप्नुयात् ॥ १४-१९-२१ (९२९१७)
अतो नियम्यते लोकः प्रच्यवन्धर्मवर्त्मसु ।
यश्च योगी च मुक्तश्च स ऐतेभ्यो विशिष्यते ॥ १४-१९-२२ (९२९१८)
वर्तमानस्य धर्मेण पुरुषस्य यथा तथा ।
संसारतारणं ह्यस्य कालेन महता भवेत् ॥ १४-१९-२३ (९२९१९)
एवं पूर्वकृतं कर्म सर्वो जन्तुः प्रपद्यते ।
सर्वं तत्कारणं येन निकृतोऽप्यमिहागतः ॥ १४-१९-२४ (९२९२०)
शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितम् ।
इत्येवं संशये लोके तच्च वक्ष्याम्यतः परम् ॥ १४-१९-२५ (९२९२१)
शरीरमात्मनः कृत्वा सर्वलोकपितामहः ।
त्रैलोक्यमसृजद्ब्रह्मा कृत्स्नं स्थावरजङ्गमम् ॥ १४-१९-२६ (९२९२२)
ततः प्रधानमसृजच्चेतनां तु शरीरिणाम् ।
यया सर्वमिदं व्याप्तं यां लोके परमां विदुः ॥ १४-१९-२७ (९२९२३)
इदं तत्क्षरमित्युक्तं परं त्वमृतमक्षरम् ।
त्रयाणां मिथुनं सर्वमेकैकस्य पृथक्पृथक् ॥ १४-१९-२८ (९२९२४)
असृजत्सर्वभूतानि पूर्वदृष्टः प्रजापतिः ।
स्थावराणि च भूतानि इत्येषा पौर्विकी श्रुतिः ॥ १४-१९-२९ (९२९२५)
तस्य कालपरीमाणमकरोत्स पितामहः ।
भूतेषु परिवृत्तिं च पनरावृत्तिमेव च ॥ १४-१९-३० (९२९२६)
यथा तु कश्चिन्मेधावी दृष्टात्मा पूर्वजन्मनि ।
यत्प्रवक्ष्यामि तत्सर्वं यथावदुपपद्यते ॥ १४-१९-३१ (९२९२७)

सुखदुःखे यथा सम्यगनित्ये यः प्रपश्यति ।
कायं चामेध्यसंस्थानं विनाशं कर्मसंहितम् ॥ १४-१९-३२ (९२९२८)
यच्च किञ्चित्सुखं तच्च दुःखं दृष्टमिति स्मरन् ।
संसारसागरं घोरं तरिष्यति सुदुस्तरम् ॥ १४-१९-३३ (९२९२९)
जनीमरणरोगैश्च समाविष्टः प्रधानवित् ।
चेतनाव्तसु चैतन्यं समं भूतेषु पश्यति ॥ १४-१९-३४ (९२९३०)
निर्विद्यते ततः कश्चिन्मार्गमाणः परं पदम् ।
तस्योपदेशं वक्ष्यामि याथातथ्येन सत्तम ॥ १४-१९-३५ (९२९३१)
शाश्वतस्याव्ययस्याथ् यदस्य ज्ञानमुत्तमम् ।
प्रोच्यमानं मया विप्र निबोधदमशेषतः ॥ ॥ १४-१९-३६ (९२९३२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकोविंशोऽध्यायः ॥ १९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१९-२ फली वृक्षः । ७-१९-८ तथापि तेजसा सम्यक्प्राणस्थाने
इति थ। पाठः ॥
७-१९-९ यथा स्वर्णद्रवः स्वल्पोति कृत्स्नां ताम्रप्रतिमां
स्वर्णमयीमिव करोत्येवं गर्भे जीवप्रवेशनं । शरीरे सूक्ष्मस्यापि
चैतन्यस्य व्याप्तिरित्याद्यस्य परिहारः ॥
७-१९-२८ क्षरं जडम् ॥

आश्वमेधिकपर्व - अध्याय ०२०
॥ श्रीः ॥
१४.२०. अध्यायः २०

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति
मोक्षसाधनादिप्रतिपादकसिद्धकाश्यपसंवादरूपानुगीतोपदेशः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
यः स्यादेकान्त आसीनस्तूष्णीं किञ्चिदचिन्तयन् ।
पूर्वंपूर्वं परित्यज्य स निरारम्भको भवेत् ॥ १४-२०-१ (९२९३३)

सर्वमित्रः सर्वसहः शमे रक्तो जितेन्द्रियः ।
व्यपेतभयमन्युश्च कामहा मुच्यते नरः ॥१४-२०-२ (९२९३४)
आत्मवत्सर्वभूतेषु यश्चरेन्नियतः शुचिः ।
ग्नित्यमेव यथान्यायं यश्चरेन्नियतेन्द्रियः।'
अमानी निरभीमानः सर्वतो मुक्त एव सः ॥ १४-२०-३ (९२९३५)
जीवितं मरणं चोभे सुखदुःखे तथैव च ।
लाभालाभे प्रियद्वेष्ये यः समः स च मुच्यते ॥१४-२०-४ (९२९३६)
न कस्यचित्स्पृहयते नावजानाति किचन ।
निर्द्वन्द्वो वीतरागात्मा सर्वथा मुक्त एव सः ॥१४-२०-५ (९२९३७)
अनमित्रश्च निर्बन्धुरनपत्यश्च यः क्वचित् ।
त्यक्तधर्मार्थकामश्च निराराङ्क्षी च मुच्यते ॥१४-२०-६ (९२९३८)
नैव धर्मी न चाधर्मी पूर्वोपचितहा च यः ।
क्षीणधातुः प्रशान्तात्मा निर्द्वद्वः स विमुच्यते ॥१४-२०-७ (९२९३९)
अकर्मा चाविकाङ्क्षश्च पश्येज्जगदशाश्वतम् ।
अस्वस्तमवशं नित्यं जन्ममृत्युजरायुतम् ॥१४-२०-८ (९२९४०)
वैराग्यबुद्धिः सततं तावद्दोषव्यपेक्षकः ।
आत्मबन्धविनिर्मोक्षं स करोत्यचिरादिव ॥१४-२०-९ (९२९४१)
अगन्धमरसस्पर्शमशब्दमपरिग्रहम् ।
अरूपमनभिज्ञेयं दृष्ट्वाऽऽत्मानं विमुच्यते ॥१४-२०-१० (९२९४२)
पञ्चभूतगुणैर्हीनममूर्तिमदलेपकम् ।
अगुणं गुणभोक्तारं यः पश्यति स मुच्यते ॥१४-२०-११ (९२९४३)
विहाय सर्वसङ्कल्पान्बुद्ध्या शारीरमानसान् ।
शनैर्निर्वाणमाप्नोति निरिन्धन इवानलः ॥१४-२०-१२ (९२९४४)
सर्वसंस्कारनिर्मुक्तो निर्द्वन्द्वो निष्परिग्रहः ।
तपसा इन्द्रियग्रामं यश्चरेन्मुक्त एव सः ॥१४-२०-१३ (९२९४५)
विमुक्तः सर्वसंस्कारैस्ततो ब्रह्मि सनातनम् ।
परमाप्नोति संशान्तमचलं नित्यमक्षरम् ॥१४-२०-१४ (९२९४६)
अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमम् ।
यज्ज्ञात्वा सिद्धमात्मानं लोके पश्यन्ति योगिनः ॥१४-२०-१५ (९२९४७)
तस्योपदेशं वक्ष्यामि यथावत्तन्निबोध मे ।
यैर्योगैर्भावयन्नित्यं पश्यत्यात्मानमात्मनि ॥१४-२०-१६ (९२९४८)
इन्द्रियाणि तु संहृत्य मन आत्मनि धारयेत् ।
तीव्रं तप्त्वा तपः पूर्वं मोक्षयोगं समाचरेत् ॥१४-२०-१७ (९२९४९)
तपस्वी नित्यसङ्कल्पो दम्भाहङ्कारवर्जितः ।
मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि ॥१४-२०-१८ (९२९५०)
स चेच्छक्रोत्ययं साधुर्योक्तुमात्मानमात्मनि ।

तत एकान्तशीलः स पश्यत्यात्मानमात्मनि ॥१४-२०-१९ (९२९५१)
संयतः सततं युक्त आत्मवान्विजितेन्द्रियः ।
यथा य आत्मनाऽऽत्मानं सम्प्रयुक्तः प्रपश्यति ॥१४-२०-२० (९२९५२)
यथाहि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति ।
तथारूपमिवात्मानं साधुयुक्तः प्रपश्यति ॥१४-२०-२१ (९२९५३)
इषीकां च यथा मुञ्जात्कश्चिन्निष्कृष्य दर्शयेत् ।
योगी निष्कृष्य चात्मानं तथा पश्यति देहतः ॥१४-२०-२२ (९२९५४)
मुञ्जं शरीरमित्याहुरिषीकामात्मनि श्रिताम् ।
एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमम् ॥१४-२०-२३ (९२९५५)
यदा हि युक्तमात्मानं सम्यक् पश्यति देहभृत् ।
न तस्येहेश्वरः कश्चित्त्रैलोक्यस्यापि यः प्रभुः ॥१४-२०-२४ (९२९५६)
अन्यान्याश्चैव तनवो यथेष्टं प्रतिपद्यते ।
विनिर्भिद्य जरां मृत्युं न शोचति न हृष्यति ॥१४-२०-२५ (९२९५७)
देवानामपि देवत्वं युक्तः कारयते वशी ।
ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतम् ॥१४-२०-२६ (९२९५८)
विनश्यत्सु च लोकेषु न भयं तस्य जायते ।
क्लिश्यमानेषु भूतेषु न स क्लिश्यति केनचित् ॥१४-२०-२७ (९२९५९)
दुःखशोकमलैर्घोरैः सङ्गस्नेहसमुद्भवैः ।
न विचाल्यति युक्तात्मा निस्पृहः शान्तमानसः ॥१४-२०-२८ (९२९६०)
नैनं शस्त्राणि विध्यन्ते न मृत्युश्चास्य विद्यते ।
नातः सुखतरं किञ्चिल्लोके क्वचन दृश्यते ॥१४-२०-२९ (९२९६१)
सम्यग्युक्त्वा स आत्मानमात्मन्येव प्रतिष्ठिते ।
विनिवृत्तजरादुःखः सुखं स्वपिति चापि सः ॥१४-२०-३० (९२९६२)
देहान्यथेष्टमभ्येति हित्वेमां मानुषीं तनुम् ।
निर्वेदस्तु न कर्तव्यो भुञ्जानेन कथञ्चन ॥१४-२०-३१ (९२९६३)
सम्यग्युक्तो यदात्मानमात्मन्येव प्रपश्यति ।
तदैव न स्पृहयते साक्षादपि शतक्रतोः ॥१४-२०-३२ (९२९६४)
योगमेकान्तशीलस्तु यथा विन्दति तच्छृणु ।
दृष्टपूर्वां दिशं चिन्त्य यस्मिन्संनिवसेत्पुरे ॥१४-२०-३३ (९२९६५)
पुरस्याभ्यन्तरे तस्य मनः स्थाप्यं न बाह्यतः ।
पुरस्याभ्यन्तरे तिष्ठन्यस्मिन्नावसथे वसेत ।
तस्मिन्नावसथे धार्यं सबाह्याभ्यन्तरं मनः ॥ १४-२०-३४ (९२९६६)
प्रचिन्त्यावसथे कृत्स्नं यस्मिन्काये स पश्यति ।
तस्मिन्काये मनश्चास्य न च किञ्चन बाह्यतः ॥१४-२०-३५ (९२९६७)
सन्नियम्येन्द्रियग्रामं निर्घोषं निर्जने वने ।
कायमभ्यन्तरं कृत्स्नमेकाग्रः परिचिन्तयेत् ॥१४-२०-३६ (९२९६८)

इन्तांस्तालु च जिह्वां च गलं ग्रीवां तथैव च ।
हृदयं चिन्तयेच्चापि तथा हृदयबन्धनम् ॥१४-२०-३७ (९२९६९)
इत्युक्तः स मया शिष्यो मेधावी मधुसूदन ।
पप्रच्छ पुनरेवेमं मोक्षधर्मं सुदुर्वचम् ॥१४-२०-३८ (९२९७०)
भुक्तं भुक्तमिदं कोष्ठे कथमन्नं विपच्यते ।
कथं रसत्वं व्रजति शोणितत्वं कथं पुनः ॥१४-२०-३९ (९२९७१)
तथा मांसं च मेदश्च स्नाय्वस्थीनि च पोषयेत् ।
कथमेतानि सर्वाणि शरीराणि शरीरिणाम् ॥१४-२०-४० (९२९७२)
वर्धन्ते वर्धमानस्य वर्धते च कथं बलम् ।
निरासनं निष्कसनं मलानां च पृथक् पृथक् ॥१४-२०-४१ (९२९७३)
कुतो वाऽयं प्रश्वसिति उच्छ्वसित्यपि वा पुनः ।
कं च देशमधिष्ठाय तिष्ठत्यात्माऽयमात्मनि ॥१४-२०-४२ (९२९७४)
जीवः कथं वहति च चेष्टमानः कलेवरम् ।
किंवर्णं कीदृशं चैव निवेशयति वै मनः ॥१४-२०-४३ (९२९७५)
याथातथ्येन भगवन्वक्तुमर्हसि मेऽनघ ।
इति सम्परिपृष्टोऽहं तेन विप्रेणि माधव ॥१४-२०-४४ (९२९७६)
प्रत्यब्रवं महाबाहो यथाश्रुतमरिंदम ।
यथा स्वकोष्ठे प्रक्षिप्य भाण्डं भाण्डमना भवेत् ॥१४-२०-४५ (९२९७७)
तथा स्वकाये प्रक्षिप्य मनोद्वारैरनिश्चलैः ।
आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत् ॥१४-२०-४६ (९२९७८)
एवं सततमुद्युक्तः प्रीतात्मा नचिरादिव ।
आसादयति तद्ब्रह्म यद्दृष्ट्वा स्यात्प्रधानवित् ॥१४-२०-४७ (९२९७९)
न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपीन्द्रियैः ।
मनसैव प्रदीपेन महानात्मा प्रदृश्यते ॥१४-२०-४८ (९२९८०)
सर्वतः पाणिपादान्तः सर्वतोक्षिशिरोमुखः ।
सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठति ॥१४-२०-४९ (९२९८१)
जीवो निष्क्रान्तमात्मानं शरीरात्सम्प्रपश्यति ।
स तमुत्सृज्य देहं स्वं पारयेद्ब्रह्म केवलम् ॥१४-२०-५० (९२९८२)
आत्मानमालोकयति मनसा प्रहसन्निव ।
तदेवमाश्रयं कृत्वा मोक्षं याति ततो मयि ॥१४-२०-५१ (९२९८३)
इदं सर्वरहस्यं ते मया प्रोक्तं द्विजोत्तम ।
आपृच्छे साधयिष्यामि गच्छ विप्र यथासुखम् ॥१४-२०-५२ (९२९८४)
इत्युक्तः स तदा कृष्ण मया शिष्यो महातपाः ।
अगच्छत यथाकामं ब्राह्मणश्छिन्नसंशयः ॥१४-२०-५३ (९२९८५)
वासुदेव उवाच।१४-२०-५४क्ष् (७८०७)
इत्युक्त्वा स तदा वाक्यं मां पार्थ द्विजसत्तमः ।

मोक्षधर्माश्रितं सम्यक् तत्रैवान्तरधीयत ॥१४-२०-५४ (९२९८६)
कच्चिदेतत्त्वया पार्थ श्रुत्मेकाग्रचेतसा ।
तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि ॥१४-२०-५५ (९२९८७)
नैतत्पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः ।
नरेणाकृतसङ्ज्ञेन विशुद्धेनान्तरात्मना ॥१४-२०-५६ (९२९८८)
सुरहस्यमिदं प्रोक्तं देवानां भरतर्षभ ।
कच्चित्त्विदं श्रुतं पार्थ मनुष्येणेह कर्हिचित् ॥१४-२०-५७ (९२९८९)
न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वामृतेऽनघ ।
नैतदन्येनि विज्ञेयं व्यामिश्रेणान्तरात्मना ॥१४-२०-५८ (९२९९०)
क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवानां मर्त्यैरुपरि वर्तनम् ॥१४-२०-५९ (९२९९१)
परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनातनम् ।
यत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी ॥१४-२०-६० (९२९९२)
इमं धर्मं समास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥१४-२०-६१ (९२९९३)
किं पुनर्ब्राह्मणाः पार्थ क्षत्रिया वा बहुश्रुताः ।
स्वधर्मरतयो नित्यं ब्रह्मलोकपरायणः ॥१४-२०-६२ (९२९९४)
हेतुमच्चैतदुद्दिष्टमुपायाश्चास्य साधने ।
सिद्धिं फलं च मोक्षश्च दुःखस्य च विनिर्णियः ॥१४-२०-६३ (९२९९५)
नातः परं सुखं त्वन्यत्किंचित्स्याद्भरतर्षभ ।
श्रुतवाञ्श्रद्दधानश्च पराक्रान्तश्च पाण्डव ॥१४-२०-६४ (९२९९६)
यः परित्यज्यते मर्त्यो लोकसारमसरवत् ।
एतैरुपायैः स क्षिप्रं परां गतिमवाप्नुते ॥१४-२०-६५ (९२९९७)
एतावदेव वक्तव्यं नान्तो भूयोस्ति किञ्चन ।
षण्मासान्नित्ययुक्तस्य योगः पार्थ प्रवर्तते ॥ ॥१४-२०-६६ (९२९९८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि विंशोऽध्यायः
॥ २० ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२०-२ सर्वमित्रोऽद्रोही ।सर्वसहः क्षमी ॥
७-२०-६ अनमित्रः शत्रुहीनः ॥
७-२०-११ अमूर्तिमदहेतुकमिति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२१
॥ श्रीः ॥

१४.२१. अध्यायः २१

Mahabharata - Ashvamedhika Parva - Chapter Topics

कृष्णेनार्जुनंप्रति
भूतप्राणादिसृष्ट्यादिप्रतिपादकब्राह्मणदंपतिसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वासुदेव उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
दंपत्योः पार्थ संवादो योऽभकवद्भरतर्षभ ॥ १४-२१-१ (९२९९९)
ब्राह्मणी ब्राह्मणं कंचिज्ज्ञानविज्ञानपारगम् ।
दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत् ॥ १४-२१-२ (९३०००)
कं नु लोकं गमिष्यामि त्वामहं पतिमाश्रिता ।
न्यस्तकर्माणमासीनं कीनाशमविचक्षणम् ॥ १४-२१-३ (९३००१)
भार्याः पतिकृताँल्लोकानाप्नुवन्तीति नः श्रुतम् ।
त्वामहं पतिमासाद्य कां गमिष्यामि वै गतिम् ॥ १४-२१-४ (९३००२)
एवमुक्तः स शान्तात्मा तामुवाच हसन्निव ।
सुभगे नाभ्यसूयामि वाक्यस्यास्य तवानघे ॥ १४-२१-५ (९३००३)
ग्राह्यं दृश्यं तथा श्राव्यं यदिदं कर्म विद्यते ।
एतदेव व्यवस्यन्ति कर्म कर्मेति कर्मिणः ॥ १४-२१-६ (९३००४)
मोहमेव निगच्छन्ति कर्मिणो ज्ञानवर्जिताः ।
नैष्कर्म्यं न च लोकेऽस्मिन्मौर्तमित्युपलभ्यते ॥ १४-२१-७ (९३००५)
कर्मणा मनसा वाचा शुभं वा यदि वाऽशुभम् ।
जन्मादिमूर्तिभेदानां कर्म भूतेषु वर्तते ॥ १४-२१-८ (९३००६)
रक्षोभिर्वध्यमानेषु दृश्यश्राव्येषु कर्मसु ।
आत्मस्थमात्मना तेन दृष्टमायतनं मया ॥ १४-२१-९ (९३००७)
यत्र तद्ब्रह्म निर्द्वन्द्वं यत्र सोमः सहाग्निना ।
व्यवायं कुरुते नित्यं धीरो भूतानि धारयन् ॥ १४-२१-१० (९३००८)
यत्रि ब्रह्मादयो युक्तास्तदक्षरमुपासते ।
विद्वांसः सुव्रता यत्र शान्तात्मानो जितेन्द्रियाः ॥ १४-२१-११ (९३००९)
घ्राणेन न तदाघ्रेयं नास्वाद्यं चैव जिह्वया ।
स्पर्शनेन तदस्पृश्यं मनसा त्ववगम्यते ॥ १४-२१-१२ (९३०१०)
चक्षुषा न विषह्यं च यत्किञ्चिच्छ्रवणात्परम् ।
अगन्धमरसस्पर्शमरूपं शब्दवर्जितम् ।
यतः प्रवर्तते तन्त्रं यत्र चैतत्प्रतिष्ठितम् ॥ १४-२१-१३ (९३०११)

प्राणोऽपानः समानश्च व्यानश्चोदान एव च ।
तत एव प्रवर्त्तते तदेव प्रविशन्ति च ॥ १४-२१-१४ (९३०१२)
समानव्यानयोर्मध्ये प्राणापानौ विचेरतुः ।
तस्मिन्सुप्ते प्रलीयेते समानो व्यान एव च ॥ १४-२१-१५ (९३०१३)
अपनाप्राणयोर्मध्ये उदानो व्याप्य तिष्ठति ।
तस्माच्छयानं पुरुषं प्राणापानौ न मुञ्चतः ॥ १४-२१-१६ (९३०१४)
प्राणोनोपहते यत्तु तमुदानं प्रचक्षते ।
तस्मात्तपो व्यवस्यन्ति तद्भवं ब्रह्मवादिनः ॥ १४-२१-१७ (९३०१५)
तेषामन्योन्यसक्तानां सर्वेषां देहचारिणाम् ।
अग्निर्वैश्वानरो मध्ये सप्तधा विहितोऽन्तरा ॥ १४-२१-१८ (९३०१६)
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः ॥ १४-२१-१९ (९३०१७)
घ्रेयं दृश्यं च पेयं च स्पृश्यं श्राव्यं तथैव च ।
मन्तव्यमवबोद्धव्यं ताः सप्त समिधो मताः ॥ १४-२१-२० (९३०१८)
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च स्प्तैते भवन्ति परमर्त्विजः ॥ १४-२१-२१ (९३०१९)
घ्रेये पेये च दृश्ये च स्पृश्ये श्राव्ये तथैव च ।
मन्तव्येऽप्यथ बोद्धव्ये सुभगे पश्य सर्वदा ॥ १४-२१-२२ (९३०२०)
हवींष्याग्निषु होतारः सप्तधा सप्तसप्तसु ।
सम्यक्प्रक्षिप्य विद्वांसो जनयन्ति स्वयोनिषु ॥ १४-२१-२३ (९३०२१)
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
मनो बुद्धिश्च सप्तैता योनिरित्येव शब्दिताः ॥ १४-२१-२४ (९३०२२)
हविर्भूतगुणाः सर्वे प्रविशन्त्यग्नियं मुखम् ।
अन्तर्वासमुषित्वा च जायन्ते स्वासु योनिषु ॥ १४-२१-२५ (९३०२३)
तत्रैव च निरुध्यन्ते प्रलये भूतभावने ।
ततः संजायते गन्धस्ततः संजायते रसः ॥ १४-२१-२६ (९३०२४)
ततः संजायते रूपं ततः स्पर्शोऽभिजायते ।
ततः संजायते शब्दः संशयस्तत्र जायते ।
ततः संजायते निष्ठा जन्मैतत्सप्तधा विदुः ॥ १४-२१-२७ (९३०२५)
अनेनैव प्रकारेण प्रगृहीतं पुरातनैः ।
पूर्णाहुतिभिरापूर्णास्ते पूर्यन्ते हि तेजसा ॥ ॥ १४-२१-२८ (९३०२६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२१-३ कर्म अग्निहोत्रादिकं न्यस्तं चेन तम् । कीनाशं कर्कशं मयि निरनुक्रोशम्। अविचक्षणं मम अनन्यगतिकत्वमजानन्तम् ॥
७-२१-७ मौर्ख्यमित्युपलभ्यते इति थ द्द पाठः ॥
७-२१-१७ तत्परं ब्रह्मवादिन इति द पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२२
॥ श्रीः ॥
१४.२२. अध्यायः २२

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति
दशेन्द्रियगुणादिप्रतिपादकब्राह्मणदंपतिसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निबोध दशहोतृणां विधानमिह यादृशम् ॥ १४-२२-१ (९३०२७)
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चरणौ करौ ।
उपस्थं पायुरिति वाग्घोतृणि दश भामिनि ॥ १४-२२-२ (९३०२८)
शब्दस्पर्शौ रूपरसौ गन्धो वाक्यं क्रिया गतिः ।
रेतोमूत्रपुरीषाणां त्यागो दश हवींषि च ॥ १४-२२-३ (९३०२९)
दिशो वायू रविश्चन्द्रः पृथ्व्यग्नी विष्णुरेव च ।
इन्द्रः प्रजापतिर्मित्रमग्नयो दश भामिनि ॥ १४-२२-४ (९३०३०)
दशेन्द्रियाणि होतृणि हवींषि दश भामिनि ।
विषया नाम समिधो हूयन्ते तु दशाग्निषु ॥ १४-२२-५ (९३०३१)
चित्तं स्रुवश्च वित्तं च पवित्रं ज्ञानमुत्तमम् ।
सुविभक्तमिदं पूर्वं जगदासीदिति श्रुतम् ॥ १४-२२-६ (९३०३२)
ग्ततो विविक्ता वित्तासीत्सा वित्तं पर्यवेक्षते।'
सर्वमेवात्र विज्ञेयं चित्ते ज्ञानमवेक्षता ।
रेतः शरीरभृत्काये विज्ञाता तु शरीरभृत् ॥ १४-२२-७ (९३०३३)
शरीरभृद्गार्हपत्यस्तस्मादग्निः प्रणीयते ।
मनश्चाहवनीयस्तु तस्मिन्प्रक्षिप्यते हविः ॥ १४-२२-८ (९३०३४)
ततो वाचस्पतिर्जज्ञे तं मनः पर्यवेक्षते ।
रूपं भवति वै वक्त्रं तदनुद्रवते मनः ॥ १४-२२-९ (९३०३५)

ब्राह्मण्युवाच। १४-२२-१०क्ष् (७८०८)
कस्माद्वागभवत्पूर्वं कस्मात्पश्चान्मनोऽभवत् ।
मनसा चिन्तितं पूर्वं वाक्यं समभिपद्यते ॥ १४-२२-१० (९३०३६)
केन विज्ञानयोगेन मतिश्चित्तं समास्थिता ।
समुन्नीता नाध्यगच्छत्को वै तां प्रतिबाधते ॥ १४-२२-११ (९३०३७)
ब्राह्मण उवाच। १४-२२-१२क्ष् (७८०९)
तन्मनस्थः पतिर्भूत्वा तस्मात्प्रेहन्निवायति ।
तां मतिं मनसः प्राहुर्मनस्तस्मादपेक्षते ॥ १४-२२-१२ (९३०३८)
प्रश्नं तु वाङ्मनसयोर्यस्मात्त्वमनुपृच्छसि ।
तस्मात्ते वर्तयिष्यामि तयोरेव समाह्वयम् ॥ १४-२२-१३ (९३०३९)
उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छताम् ।
आवयोः श्रेष्ठमाचक्ष्व च्छिन्धि नौ संशयं विभो ॥ १४-२२-१४ (९३०४०)
मन इत्येवि भगवांस्तदा प्राह सरस्वतीम् ।
अहं वै कामधुक्तुभ्यमिति तं प्राह वागथ ॥ १४-२२-१५ (९३०४१)
ब्राह्मण उवाच। १४-२२-१६क्ष् (७८१०)
स्थावरं जङ्गमं चैव विद्ध्युभे मनसी मम ।
स्थावरं मत्सकाशे वै जङ्गमं विषये तव ॥ १४-२२-१६ (९३०४२)
यस्तु ते विषये गच्छन्मन्त्रो वर्णः स्वरोपि वा ।
तन्मनो जङ्गमं नाम तस्मादसि गरीयसी ॥ १४-२२-१७ (९३०४३)
तस्माद्भवितुमर्हामि स्वयमभ्येत्य शोभने ।
तस्मादुच्छ्वासमासाद्य प्रवक्ष्यामि सरस्वति ॥ १४-२२-१८ (९३०४४)
प्राणापानावन्तरे यद्वाग्वै नित्यं स्म तिष्ठति ।
प्रीयमाणा महाभागे विना प्राणांश्च मामपि ।
प्रजापतिमुपाधावत्प्रसीद भगवन्निति ॥ १४-२२-१९ (९३०४५)
ततः प्राणः प्रादुरभूद्वाचमाप्याययन्पुनः ।
तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥ १४-२२-२० (९३०४६)
घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते ।
तयोरपि च घोषिण्या निर्घोषैव गरीयसी ॥ १४-२२-२१ (९३०४७)
गौरिव प्रस्रवत्यर्थान्रसमुत्तमशालिनी ।
सततं स्यन्दते ह्येषा शाश्वतं ब्रह्मवादिनी ॥ १४-२२-२२ (९३०४८)
दिव्यादिव्यप्रभावेन भारती गौः शुचिस्मिते ।
एतयोरन्तरं पश्य सूक्ष्मयोर्यतमानयोः ॥ १४-२२-२३ (९३०४९)
ब्राह्मण्युवाच। १४-२२-२४क्ष् (७८११)
अनुत्पन्नेषु वाक्येषु चोद्यमाना सिसृक्षया ।
किंन्नु पूर्वं तदा देवी व्याजहार सरस्वती ॥ १४-२२-२४ (९३०५०)
ब्राह्मण उवाच। १४-२२-२५क्ष् (७८१२)

प्राणेन य सम्भवते शरीरे
प्राणादपानं प्रतिपद्यते च ।
उदानभूता च विसृज्य देहं
व्यानेन सर्वं दिवमावृणोति ॥ १४-२२-२५ (९३०५१)
ततः समाने प्रतितिष्ठतीह
इत्येव पूर्वं प्रजजल्प वागपि ।
तस्मान्मनः स्थावरत्वाद्विशिष्टं
तथा देवी जङ्गमत्वाद्विशिष्टाः ॥ ॥ १४-२२-२६ (९३०५२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२२-२२ मासमुत्तमशालिनीति क ट थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२३
॥ श्रीः ॥
१४.२३. अध्यायः २३

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति पृथग्घ्राणादीन्द्रियगुणप्रतिपादनपूर्वकं
तेषां मनसा सह विवादप्रतिपादकब्राह्मणदंपतिसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सुभगे सप्तहोतॄणां विधानमिह यादृशम् ॥ १४-२३-१ (९३०५३)
घ्राणश्चक्षुश्च जिह्वा च त्वक् श्रोत्रं चैव पञ्चमम् ।
मनो बुद्धिश्च सप्तैते होतारः पृथगाश्रिताः ॥ १४-२३-२ (९३०५४)
सूक्ष्माकाशे समं प्राप्ते न पश्यन्तीतरेतरम् ।
एतद्वै सप्तहोतृत्वं स्वभावाद्विद्धि शोभने ॥ १४-२३-३ (९३०५५)
ब्राह्मण्युवाच । १४-२३-४क्ष् (७८१३)
सूक्ष्मे तु काशे सम्प्राप्ते कथं नान्योन्यदर्शिनः ।
कथं स्वभावाद्भगवन्नेतदाचक्ष्व मे प्रभो ॥ १४-२३-४ (९३०५६)

ब्राह्मण उवाच। १४-२३-५क्ष् (७८१४)
गुणज्ञानेषु विज्ञानं गुणज्ञानामभिज्ञता ।
परस्परं गुणानेते नाभिजानन्ति कर्हिचित् ॥ १४-२३-५ (९३०५७)
जिह्वा चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न गन्धानधिगच्छन्ति घ्राणस्तानधिगच्छति ॥ १४-२३-६ (९३०५८)
घ्राणं चक्षुस्तथा क्षोत्रं त्वङ्मनो बुद्धिरेव च ।
न रसानधिगच्छन्ति जिह्वा तानधिगच्छति ॥ १४-२३-७ (९३०५९)
घ्राणं जिह्वा तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न रूपाण्यधिगच्छन्ति चक्षुस्तान्यधिगच्छति ॥ १४-२३-८ (९३०६०)
घ्राणं जिह्वा ततश्चक्षुः श्रोत्रं बुद्धिर्मनस्तथा ।
न स्पर्शानधिगच्छन्ति त्वक्च तानधिगच्छति ॥ १४-२३-९ (९३०६१)
घ्राणं जिह्वा च चक्षुश्च त्वङ्मनो बुद्धिरेव च ।
न शब्दानधिगच्छन्ति श्रोत्रं तानधिगच्छति ॥ १४-२३-१० (९३०६२)
घ्राणं जिह्वा च चक्षुश्च त्वक् श्रोत्रं बुद्धिरेव च ।
सङ्कल्पान्नाधिगच्छन्ति मनस्तानधिगच्छति ॥ १४-२३-११ (९३०६३)
घ्राणं जिह्वा च चक्षुश्च त्वक् श्रोत्रं मन एव च ।
न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति ॥ १४-२३-१२ (९३०६४)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
इन्द्रियाणां च संवादं मनसश्चैव भामिनि ॥ १४-२३-१३ (९३०६५)
मन उवाच। १४-२३-१४क्ष् (७८१५)
नाघ्राति मामृते घ्राणं रसं जिह्वा न वेत्ति च ।
रूपं चक्षुर्न गृह्णाति त्वक् स्पर्शं नावबुध्यते ॥ १४-२३-१४ (९३०६६)
न श्रोत्रं बुध्यते शब्दं मया हीनं कथञ्चन ।
प्रवरं सर्वबूतानामहमस्मि सनातनम् ॥ १४-२३-१५ (९३०६७)
अगाराणीव शून्यानि शान्तार्चिष इवाग्नयः ।
इन्द्रियाणि न भासन्ते मया हीनानि नित्यशः ॥ १४-२३-१६ (९३०६८)
काष्ठानीवार्द्रशुष्काणि यतमानैरपीन्द्रियैः ।
गुणार्थान्नाधिगच्छन्ति मामृते सर्वजन्तवः ॥ १४-२३-१७ (९३०६९)
इन्द्रियाण्यूचुः। १४-२३-१८क्ष् (७८१६)
एवमेतद्भवेत्सत्यं यथैतन्मन्यते भवान् ।
ऋतेऽस्मानस्मदर्थांस्त्वं भोगान्भुङ्क्ते भवान्यदि ॥ १४-२३-१८ (९३०७०)
यद्यस्मासु प्रलीनेषु तर्पणं प्राणधारणम् ।
भोगान्भुङ्क्ते भवान्सत्यं यथैतन्मन्यते तथा ॥ १४-२३-१९ (९३०७१)
अथवाऽस्मासु लीनेषु तिष्ठत्सु विषयेषु च ।
यदि सङ्कल्पमात्रेण भुङ्क्ते भोगान्यथार्थवत् ॥ १४-२३-२० (९३०७२)
अथ चेन्मन्यसे सिद्धिमस्मदर्थेषु नित्यदा ।

घ्राणेन रूपमादत्स्व रसमादत्स्व चक्षुषा ॥१४-२३-२१ (९३०७३)
श्रोत्रेण गन्धानादत्स्व स्पर्शानादत्स्व जिह्वया ।
त्वचा च शब्दमादत्स्व बुद्ध्या स्पर्शमथापि च ॥१४-२३-२२ (९३०७४)
बलवन्तो ह्यनियमा नियमा दुर्बलीयसाम् ।
भोगानपूर्वानादत्स्व नोच्छिष्टं भोक्तुमर्हति ॥१४-२३-२३ (९३०७५)
यथा हि शिष्यः शास्तारं श्रुत्यर्थमभिधावति ।
ततः श्रुतमुपादाय श्रुतार्थमुपतिष्ठति ॥१४-२३-२४ (९३०७६)
विषयानेवमस्माभिर्दर्शितानभिमन्यसे ।
अनुभूतानतीतांश्च स्वप्ने जागरणे तथा ॥१४-२३-२५ (९३०७७)
वैमनस्यं गतानां च जन्तूनामल्पचेतसाम् ।
अस्मदर्थे कृते दृश्यते प्राणधारणम् ॥१४-२३-२६ (९३०७८)
बहूनपि हि सङ्कल्पान्मत्वा स्वप्नानुपास्य च ।
बुभुक्षया पीड्यमानो विषयानेन धावति ॥१४-२३-२७ (९३०७९)
अगारमद्वारमिव प्रविश्य
सङ्कल्पभोगान्विषयानविन्दन् ।
प्राणक्षये शान्तिमुपैति नित्यं
दारुक्षयेऽग्निर्ज्वलितो यथैव ॥ १४-२३-२८ (९३०८०)
कामं तु नष्टेषु गुणेषु सङ्गः
कामं च नान्योन्यगुणोपलब्धिः ।
अस्मान्विना नास्ति तपोपलब्धि-
स्तामप्यृते त्वां न भजेत्प्रहर्षः ॥ ॥ १४-२३-२९ (९३०८१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

आश्वमेधिकपर्व - अध्याय ०२४
॥ श्रीः ॥
१४.२४. अध्यायः २४

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति प्राणापानादीनां
स्वस्वश्रैष्ठ्यप्रकारकविवादादिप्रतिपादकब्राह्मणदंपतिसंवादानुवादः
॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सुभगे पञ्चहोतॄणां विधानमिह यादृशम् ॥१४-२४-१ (९३०८२)
प्राणापानवुदानश्च समानो व्यान एव च ।
पञ्चहोतॄंस्तथैतान्वै परं भावं विदुर्बुधाः ॥१४-२४-२ (९३०८३)
ब्राह्मण्युवाच।१४-२४-३क्ष् (७८१७)
स्वबावात्सप्तहोतार इति मे पूर्विका मतिः ।
यथा वै पञ्च होतारः परो भावस्तदुच्यताम् ॥१४-२४-३ (९३०८४)
ब्राह्मण उवाच।१४-२४-४क्ष् (७८१८)
प्राणेन सम्भृतो वायुरपानो जायते ततः ।
अपाने सम्भृतो वायुस्ततो व्यानः प्रवर्तते ॥१४-२४-४ (९३०८५)
व्यानेन सम्भृतो वायुस्ततोदानः प्रवर्तते ।
उदाने सम्भृतो वायुः समानो नाम जायते ॥१४-२४-५ (९३०८६)
तेऽपृच्छन्त पुरो गत्वा पूर्वजातं पितामहम् ।
यो नः श्रेष्ठस्तमाचक्ष्व स नः श्रेष्ठो भविष्यति ॥१४-२४-६ (९३०८७)
ब्रह्मोवाच।१४-२४-७क्ष् (७८१९)
यस्मिन्प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
यस्मिन्प्रवृत्ते च पुनश्चरन्ति
स वै श्रेष्ठो गच्छत यत्र कामः ॥ १४-२४-७ (९३०८८)
प्राण उवाच।१४-२४-८क्ष् (७८२०)
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४-२४-८ (९३०८९)
ब्राह्मण उवाच।१४-२४-९क्ष् (७८२१)
प्रामः प्रालीयत ततः पुनश्च प्रचचार ह ।
समानश्चाप्युदानश्च वचो ब्रूतां पुनः शुभे ॥१४-२४-९ (९३०९०)
न त्वं सर्वमिदं व्याप्य तिष्ठसीह यथा वयम् ।
न त्वं श्रेष्ठो हि नः प्राण अपानो हि वशे तव ।
प्रचचार पुनः प्राणस्ततोऽपानोऽभ्यभाषत ॥ १४-२४-१० (९३०९१)
उपान उवाच।१४-२४-११क्ष् (७८२२)
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४-२४-११ (९३०९२)

ब्राह्मण उवाच। १४-२४-१२क्ष् (७८२३)
व्यानश्च तमुदानश्चि भाषमाणमथोचतुः ।
अपान न त्वं श्रेष्ठोसि प्राणो हि वशगस्तव ॥१४-२४-१२ (९३०९३)
अपानः प्रचचाराथ व्यानस्तं पुनरब्रवीत् ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥१४-२४-१३ (९३०९४)
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४-२४-१४ (९३०९५)
ब्राह्मण उवाच। १४-२४-१५क्ष् (७८२४)
प्रालीयत ततो व्यानः पुनश्च प्रचचार ह ।
प्राणापानावुदानस्च समानश्च तमब्रुवन् ॥१४-२४-१५ (९३०९६)
न त्वं श्रेष्ठोसि नो व्यान समानस्तु वशे तव ।
प्रचचार पुनर्व्यानः समानः पुनरब्रवीत् ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १४-२४-१६ (९३०९७)
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४-२४-१७ (९३०९८)
ग्ततः समानः प्रालिल्ये पुनश्च प्रचचार ह ।
प्राणापानावुदानस्च व्यानश्चैव तमब्रवीत् ।
न त्वं समान श्रेष्ठोसि व्यान एव वशे तव ॥' १४-२४-१८ (९३०९९)
समानः प्रचचाराथ उदानस्तमुवाच ह ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥१४-२४-१९ (९३१००)
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४-२४-२० (९३१०१)
ततः प्रालीयतोदानः पुनश्च प्रचचार ह ।
प्राणापानौ समानश्च व्यानश्चैव तमब्रुवन् ।
उदानि न त्वं श्रेष्ठोसि व्यानि एव वशे तव ॥ १४-२४-२१ (९३१०२)
ब्राह्मण उवाच। १४-२४-२२क्ष् (७८२५)
ततस्तानब्रवीत्सर्वान्स्मयमानः प्रजापतिः ।
सर्वे श्रेष्ठा न च श्रेष्ठाः सर्वे चान्योन्यकाङ्क्षिणः ॥१४-२४-२२
(९३१०३)
सर्वे स्वविषये श्रेष्ठाः सर्वे चान्योन्यधर्मिणः ।

इति तानब्रवीत्सर्वान्समवेतान्प्रजापतिः ॥ १४-२४-२३ (९३१०४)
एकः स्थिरश्चराश्चान्ये विशेषात्पञ्च वायवः ।
एक एव च सर्वात्मा बहुधाऽप्युपचीयते ॥ १४-२४-२४ (९३१०५)
परस्परस्य सुहृदो भावयन्तः परस्परम् ।
स्वस्ति व्रजत भद्रं वो धारयध्वं परस्परम् ॥ ॥ १४-२४-२५ (९३१०६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२४-२४ बहुधाप्युपलीयते इति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२५
॥ श्रीः ॥
१४.२५. अध्यायः २५

Mahabharata - Ashvamedhika Parva - Chapter Topics

कृष्णेनार्जुनंप्रति ब्राह्मेन
ब्राह्मणींप्रत्युक्तसृष्ट्यादिप्रतिपादकनारददेवमतसंवादानुवादः
॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादमृषेर्देवमतस्य च ॥ १४-२५-१ (९३१०७)
देवमत उवाच। १४-२५-२क्ष् (७८२६)
जन्तोः संजायमानस्य किंनु पूर्वं प्रवर्तते ।
प्राणोऽपानः समानो वा व्यानो वोदान एव च ॥ १४-२५-२ (९३१०८)
नारद उवाच। १४-२५-३क्ष् (७८२७)
येनायं सृज्यते जन्तुस्ततोऽन्यः पूर्वमेति तम् ।
प्राणद्वन्द्वं हि विज्ञेयं तिर्यगूर्ध्वमधश्च यत् ॥ १४-२५-३ (९३१०९)
देवमत उवाच। १४-२५-४क्ष् (७८२८)
केनायं सृज्यते जन्तुः कश्चान्यः पूर्वमेति तम् ।
प्राणद्वन्द्वं च मे ब्रूहि तिर्यगूर्ध्वमधश्च यत् ॥ १४-२५-४ (९३११०)
नारद उवाच। १४-२५-५क्ष् (७८२९)

सङ्कल्पाज्जायते हर्षः शब्दादपि च जायते ।
रसात्संजायते चापि रूपादपि च जायते ॥ १४-२५-५ (९३१११)
ग्स्पर्शात्संजायते चापि गन्धादपि च जायते।'
शुक्राच्छोणितसंसृष्टात्पूर्वं प्राणः प्रवर्तते ।
प्राणेन विकृते शुक्रे ततोऽपानः प्रवर्तते ॥ १४-२५-६ (९३११२)
शुक्रात्संजायते चापि रसादपि च जायते ।
एतद्रूपमुदानस्य हर्षो मिथुनमन्तरा ॥ १४-२५-७ (९३११३)
कामात्संजायते शुक्रं शुक्रात्संजायते रजः ।
समानव्यानजनिते सामान्ये शुक्रशोणिते ॥ १४-२५-८ (९३११४)
प्राणापानाविदं द्वन्द्वमवाक् चोर्ध्वं च गच्छतः ।
व्यानः समानश्चैवोभौ तिर्यग्द्वन्द्वत्वमुच्यते ॥ १४-२५-९ (९३११५)
अग्निर्वै देवताः सर्वा इति देवस्य शासनात् ।
संजायते हि प्राणेषु ज्ञानं बुद्धिसमन्वितम् ॥ १४-२५-१० (९३११६)
तस्य धूमस्तमोरूपं रजो भस्म सुतेजसः ।
सर्वं संजायते तस्य यत्र प्रक्षिप्यते हविः ॥ १४-२५-११ (९३११७)
हविः समानो व्यानश्च इति यज्ञविदो विदुः ।
प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः ॥ १४-२५-१२ (९३११८)
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ।
निर्द्वन्द्वमिति यत्त्वेतत्तन्मे निगदतः शृणुः ॥ १४-२५-१३ (९३११९)
अहोरात्रमिदं द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १४-२५-१४ (९३१२०)
ग्उभे सत्यानृते द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥' १४-२५-१५ (९३१२१)
सच्चासच्चैव तद्द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १४-२५-१६ (९३१२२)
ग्उभे शुभाशुभे द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥' १४-२५-१७ (९३१२३)
ऊर्ध्वं समानो व्यानश्च व्यस्यते कर्म तेन तत् ।
द्वितीयं तु समानेन पुनरेव व्यवस्यते ॥ १४-२५-१८ (९३१२४)
शान्त्यर्थं वामदेव्यं च शान्तिर्ब्रह्म सनातनम् ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ ॥ १४-२५-१९ (९३१२५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

७-२५-१८ पूर्वंसमानो व्यानोऽथ व्यस्यते तेन कर्मकृत् इति क ष्ट पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२६
॥ श्रीः ॥
१४.२६. अध्यायः २६

अथानुगीतापर्व २
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति
कर्तृकर्मादिप्रतिपादकब्राह्मणदंपतिसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
चातुर्होत्रविधानस्य विदानमिह यादृशम् ॥ १४-२६-१ (९३१२६)
तस्य सर्वस्य विधिवद्विधानमुपदेक्ष्यते ।
शृणु मे गदतो भद्रे रहस्यमिदमुद्भुतम् ॥ १४-२६-२ (९३१२७)
करणं कर्म कर्ता च मोक्ष इत्येव भामिनि ।
चत्वार एते होतारो यैरिदं जगदावृतम् ॥ १४-२६-३ (९३१२८)
होतॄणां साधनं चैव शृणु सर्वमशेषतः ।
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैते ज्ञेयाः कारणहेतवः ॥ १४-२६-४ (९३१२९)
गन्धो रसश्च रूपं च शब्दः स्पर्शश्च पञ्चमः ।
मन्तव्यमवबोद्धव्यं सप्तैते कर्महेतवः ॥ १४-२६-५ (९३१३०)
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते विज्ञेयाः कर्तृहेतवः ॥ १४-२६-६ (९३१३१)
स्वगुणान्भक्षयन्त्येते गुणवन्तः शुभाशुभान् ।
असन्तो निर्गुणाश्चैते सप्तैते मोक्षहेतवः ॥ १४-२६-७ (९३१३२)
विदुषां बुध्यमानानां स्वंस्वं स्थानं यथाविधि ।
गुणास्ते देवता भूत्वा सततं भुञ्जते हविः ॥ १४-२६-८ (९३१३३)
ग्अदन्हवींषि चान्नानि ममत्वेन विहन्यते ।'
आत्मार्थे पाचयन्नन्नं ममत्वेनोपहन्यते ॥ १४-२६-९ (९३१३४)
अभक्ष्यभक्षणं चैव मद्यपानं च हन्ति तम् ।
स चान्नं हन्ति तं चान्नं स हत्वा हन्यते पुनः ॥ १४-२६-१० (९३१३५)
हन्ता ह्यन्नमिदं विद्वान्पुनर्जनयतीश्वरः ।

न चान्नाज्जायते तस्मिन्सूक्ष्मो नाम व्यतिक्रमः ॥१४-२६-११ (९३१३६)
मनसा मन्यते यच्च यच्च वाचा निगद्यते ।
श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते ॥१४-२६-१२ (९३१३७)
स्पर्शेन स्पृश्यते यच्च घ्राणेन घ्रायते च यत् ।
मनस्येतानि संयम्य हवींष्येतानि सर्वशः ॥१४-२६-१३ (९३१३८)
गुणवत्पावको मह्यं दीप्यतेऽन्तःशरीरगः ।
योगयज्ञः प्रवृत्तो मे ज्ञानं ब्रह्ममयो हविः
।प्राणस्तोत्रोऽपानशस्त्रः सर्वत्यागसुदक्षिणः ॥ १४-२६-१४ (९३१३९)
कर्ताऽनुमन्ता ब्रह्मात्मा होताऽध्वर्युः कृतस्तुतिः
ऋतं प्रशास्ता तच्छस्त्रमपवर्गोऽस्य दक्षिणा ॥ १४-२६-१५ (९३१४०)
ऋचश्चाप्यत्र शंसन्ति नारायणविदो जनाः ।
नारायणाय देवाययदविन्दन्पशून्पुरा ॥१४-२६-१६ (९३१४१)
तत्र सामानि गायन्ति तत्र चाहुर्निदर्शनम् ।
देवं नारायणं भीरु सर्वात्मानं निबोध तम् ॥ ॥१४-२६-१७ (९३१४२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षडिंशोऽध्यायः ॥२६ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२६-११ अद्यमन्नमदन्नह्नि पुनरिति क पाठः ॥
७-२६-१४ दीप्यते हव्यवाहन इति क ट थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२७
॥ श्रीः ॥
१४.२७. अध्यायः २७

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति प्रजापतिना एकेनैव शब्देन
परब्रह्मोपदेशे देवर्ष्यादीनां स्वस्वयोग्यतानुसारेण
नानार्थावगमप्रतिपादकब्राह्मणदंपतिसंवादानुवादः ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
एकः शास्ता न द्वितीयोस्ति शास्ता

यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनैव युक्तः प्रवणादिवोदकं
यथा नियुक्तोस्मि तथा वहामि ॥ १४-२७-१ (९३१४३)
एको गुरुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
पुरा हता दानवाः सर्व एव ॥ १४-२७-२ (९३१४४)
एको बन्धुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनानुशिष्टा बान्धवा बन्धुमन्तः
सप्तर्षयः पार्थ दिवि प्रभान्ति ॥ १४-२७-३ (९३१४५)
एकः श्रोता नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तस्मिन्गुरौ गुरुवासं निरुष्यट
शक्रो गतः सर्वलोकामरत्वम् ॥ १४-२७-४ (९३१४६)
एको द्वेष्टा नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
लोके द्विष्टाः पन्नगाः सर्व एव ॥ १४-२७-५ (९३१४७)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रजापतौ पन्नगानां देवर्षीणां च संविदम् ॥ १४-२७-६ (९३१४८)
देवर्षयश्च नागाश्चाप्यसुराश्च प्रजापतिम् ।
पर्यपृच्छन्नुपासीनं श्रेयोः नः प्रोच्यतामिति ॥ १४-२७-७ (९३१४९)
तेषां प्रोवाच भगवाञ्श्रेयः समनुपृच्छताम् ।
ओमित्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन्दिशः ॥ १४-२७-८ (९३१५०)
तेषां प्रद्रवमाणानामुपदेशं च शृण्वताम् ।
सर्पाणां दंशने भावः प्रवृत्तः पूर्वमे तु ॥ १४-२७-९ (९३१५१)
असुराणां प्रवृत्तस्तु दंभभावः स्वभावजः ।
दानं देवा व्यवसिता दममेव महर्षयः ॥ १४-२७-१० (९३१५२)
एकं शास्तारमासाद्य शब्देनैकेन संस्कृताः ।
नानाव्यवसिताः सर्वे सर्पदेवर्षिदानवाः ॥ १४-२७-११ (९३१५३)
शृणोत्ययं प्रोच्यमानं गृह्णाति च यथातथम् ।
पृच्छतस्तदतो भूयो गुरुरन्यो न विद्यते ॥ १४-२७-१२ (९३१५४)
तस्य चानुमते कर्म ततः पश्चात्प्रवर्तते ।
गुरुर्बन्धुश्च शास्ता च द्वेष्टा च हृदि संश्रिताः ॥ १४-२७-१३ (९३१५५)
पापेन विचरँल्लोके पापचारी भवत्ययम् ।

शुभेन विचरँल्लोके शुभचारी भवत्युत ॥१४-२७-१४ (९३१५६)
कामचारी तु कामेन य इन्द्रियसुखे रतः ।
ब्रह्मचारी सदैवैष य इन्द्रियजये रतः ॥१४-२७-१५ (९३१५७)
अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः ।
ब्रह्मभूतश्चरँल्लोके ब्रह्मचारी भवत्ययम् ॥१४-२७-१६ (९३१५८)
ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्मसंस्तरः ।
आपो ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समाहितः ॥१४-२७-१७ (९३१५९)
एतदेवेदृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः ।
विदित्वा चान्वपद्यन्त क्षेत्रज्ञेनानुदर्शिताः ॥ ॥१४-२७-१८ (९३१६०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२७-१ एकः शास्ता न द्वितीयोस्ति कश्चिद्यथा नियुक्तोऽस्मि तथा
चरामि ।हृद्येष तिष्ठन्पुरुषः शास्ति शास्ता तेनानुयुक्तः
प्रवणादिवोदकमिति क ट ह पाठः ॥
७-२७-७ देवाश्च ऋषयश्चेति द्वन्द्वः ॥
७-२७-८ प्राद्रवन्प्रतिपेदिरे ।दिशो बहून्मार्गान् ॥
७-२७-१३ गुरुर्बोद्धा च श्रोता च द्वेष्टा च हृदि निःसृत इति
झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२८
॥ श्रीः ॥
१४.२८. अध्यायः २८

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णने युधिष्ठिरंप्रति
विद्याब्रह्मणोररण्यत्वरूपणपरब्राह्मणदंपतिसंवादानुवादः ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
संकल्पदंशमशकं शोकहर्षहिमातपम् ।
मोहान्धकारतिमिरं लोभव्याधिसरीसृपम् ॥१४-२८-१ (९३१६१)

विषयैकात्ययाध्वानं कामक्रोधकिरातकम् ।
तदतीत्य महादुर्गं प्रविष्टोस्मि महद्वनम् ॥१४-२८-२ (९३१६२)
ब्राह्मण्युवाच।१४-२८-३क्ष् (७८३०)
क्व तद्वनं महाप्राज्ञ के वृक्षाः सरितश्च काः ।
कियन्तः पर्वताश्चैव कियत्यध्यनि तद्वनम् ॥१४-२८-३ (९३१६३)
ब्राह्मण उवाच।१४-२८-४क्ष् (७८३१)
नैतदस्ति पृथग्भावः किञ्चिनद्यत्ततः सुखम् ।
नैतदस्त्यपृथग्भावः किञ्चिद्दुःखतरं ततः ॥१४-२८-४ (९३१६४)
तस्माद्ध्रस्वतरं नास्ति न ततोस्ति महत्तरम् ।
नास्ति तस्माद्दुःखतरं नास्त्यन्यत्तत्समं सुखम् ॥१४-२८-५ (९३१६५)
न तत्राविश्य शोचन्ति न प्रहृष्यन्ति च द्विजाः ।
न च बिभ्यति केभ्यश्चिन्नैभ्यो बिभ्यति केचन ॥१४-२८-६ (९३१६६)
तस्मिन्वने सप्त महाद्रुमाश्च
फलानि सप्तातिथयश्च सप्त ।
सप्ताश्रमाः सप्त समाधयश्च
दीक्षाश्च सप्तैतदरण्यरूपम् ॥ १४-२८-७ (९३१६७)
पञ्चवर्णानि दिव्यानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वन्म् ॥१४-२८-८ (९३१६८)
सुवर्णानि द्विवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥१४-२८-९ (९३१६९)
ग्शङ्कराणि त्रिवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम्' १४-२८-१० (९३१७०)
सुरभीणि द्विवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥१४-२८-११ (९३१७१)
सुरभीण्येकवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥१४-२८-१२ (९३१७२)
बहून्यव्यक्तवर्णानि पुष्पाणि च फलानि च ।
विसृजन्तौ महावृक्षौ तद्वनं व्याप्य तिष्ठतः ॥१४-२८-१३ (९३१७३)
एको वह्निः सुमना ब्राह्मणोत्र
पञ्चेन्द्रियाणि समिधश्चात्र सन्ति ।
तेभ्यो वृक्षाःक सप्त फलन्ति दीक्षा
गुणाः फलान्यतिथयः फलाशाः ॥ १४-२८-१४ (९३१७४)
आतिथ्यं प्रतिगृह्णन्ति तत्र सप्त महर्षयः ।
अर्चितेषु प्रलीनेषु तेष्वन्यद्रोचते वनम् ॥१४-२८-१५ (९३१७५)
प्रज्ञावृक्षं मोक्षफलं शान्तिच्छायासमन्वितम् ।
ज्ञानाश्रयं तृप्तितोयमन्तःक्षेत्रज्ञभास्करम् ॥१४-२८-१६ (९३१७६)

येऽधिगच्छन्ति तत्सन्तस्तेषां नास्ति पुनर्भवः ।
ऊर्ध्वं चाधश्च तिर्यक्च तस्य नान्तोऽधिगम्यते ॥ १४-२८-१७ (९३१७७)
सप्त स्त्रियस्तत्र चरन्ति सत्या-
स्त्ववाङ्मुखा भानुमत्यो जनित्र्यः ।
ऊर्ध्वं रसानाददते प्रजाभ्यः
सर्वान्यथा नित्यमनित्यता च ॥ १४-२८-१८ (९३१७८)
तत्रैव प्रतितिष्ठन्ति पुनस्तत्रोदयन्ति च ।
सप्त सप्तर्षयः सिद्धा वसिष्ठप्रमुखैः सह ॥ १४-२८-१९ (९३१७९)
यशो वर्चो भगश्चैव विजयः सिद्धतेजसः ।
एतमेवानुवर्तन्ते सप्त ज्योतींषि भास्करम् ॥ १४-२८-२० (९३१८०)
ऋषयः पर्वताश्चैव सन्ति तत्र समासतः ।
नद्यश्च परितो वारि वहन्त्यो ब्रह्मसम्भवम् ॥ १४-२८-२१ (९३१८१)
नदीनां सङ्गमश्चैव वैताने समुपह्वरे ।
स्वात्मतृप्ता यतो यान्ति साक्षादेव पितामहम् ॥ १४-२८-२२ (९३१८२)
कृशाशाः सुव्रताः शान्तास्तपसा दग्धकिल्बिषाः ।
आत्मन्यात्मानमावेश्य ब्राह्मणास्तमुपासते ॥ १४-२८-२३ (९३१८३)
शमिमप्यत्र शंसन्ति विद्यारण्यविदो जनाः ।
तदरण्यमभिप्रेत्य यथातत्वमजायत ॥ १४-२८-२४ (९३१८४)
एतदेवेदृशं पुण्यमरण्यं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनानुदर्शिना ॥ ॥ १४-२८-२५ (९३१८५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२८-७ सप्तर्षयः सप्त तथेन्धनानि इति क थ पाठः ॥
७-२८-९ चतुर्वर्णानि दिव्यानीति क थ पाठः ॥
७-२८-१३ सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनमिति
क ट थ पाठः ॥
७-२८-१९ तत्रोपयन्ति चेति झ पाठः । तेच सप्तर्षयः सिद्धा इति
क थ पाठः ॥
७-२८-२० भगश्चोजो विजयः सिद्धितेजसी इति क थ पाठः ॥
७-२८-२४ ऋचमप्यत्र पश्यन्ति विद्यारण्येति क थ पाठः ॥
७-२८-२५ विदित्वा नानुपश्यन्ति क्षेत्रज्ञा नानुदर्शनमिति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०२९

॥ श्रीः ॥
१४.२९. अध्यायः २९

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति यागीयहिंसाया
अधर्म्यत्वाभावप्रतिपादकाध्वर्युयतिसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
गन्धान्न जिघ्रामि रासान्न वेद्मि
रूपं न पश्यामि न च स्पृशामि ।
न चापि शब्दान्विविधाञ्शृणोमि
न चापि सङ्कल्पमुपैमि कञ्चित् ॥ १४-२९-१ (९३१८६)
अर्थानिष्टान्कामयते स्वभावः
सर्वान्द्वेष्यान्प्रद्विषते स्वभावः ।
कामद्वेषानुद्भवतः स्वभावा-
त्प्राणापानौ जन्तुदेहान्निवेश्य ॥ १४-२९-२ (९३१८७)
तेभ्यश्चान्यांस्तेषु नित्यांश्च भावा-
न्भूतात्मानं अक्षयेऽहं शरीरे ।
तस्मिंस्तिष्ठन्नास्मि सक्तः कथंचि-
त्कामक्रोधाभ्यां जरया मृत्युना च ॥ १४-२९-३ (९३१८८)
अकामयानस्य च सर्वकामा-
नविद्विषाणस्य च सर्वदोषान् ।
न मे स्वभावेषु भवन्ति लेपा-
स्तोयस्य बिन्दोरिव पुष्करेषु ॥ १४-२९-४ (९३१८९)
नित्यस्य चैतस्य भवन्ति नित्या
निरीक्ष्यमाणस्य बहून्स्वभावान् ।
न सज्जते कर्मसु भोगजालं
दिवीव सूर्यस्य मयूखजालम् ॥ १४-२९-५ (९३१९०)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अध्वर्युयतिसंवादं तं निबोध यशस्विनि ॥ १४-२९-६ (९३१९१)
प्रोक्ष्यमाणं पशुं दृष्ट्वा यज्ञकर्मण्यथाब्रवीत् ।
यतिरध्वर्युमासीनो हिंसोयमिति कुत्सयन् ॥ १४-२९-७ (९३१९२)
तमध्वर्युः प्रत्युवाच नायं छागो विनश्यति ।

श्रेयसा योक्ष्यते जन्तुर्यज्ञाच्छ्रुतिरियं तथा ॥ १४-२९-८ (९३१९३)
यो ह्यस्य पार्थिवो भागः पृथिवीं स गमिष्यति ।
यदस्य वारिजं किञ्चिदपस्तत्सम्प्रवेक्ष्यति ॥ १४-२९-९ (९३१९४)
सूर्यं चक्षुर्दिशः श्रोत्रे प्राणोऽस्य दिवमेव च ।
आगमे वर्तमानस्य नमे दोषोस्ति कश्चन ॥ १४-२९-१० (९३१९५)
यतिरुवाच। १४-२९-११क्ष् (७८३२)
प्राणैर्वियोगे च्छागस्य यदि श्रेयः प्रपश्यसि ।
छागार्थे वर्तते यज्ञो भवतः किं प्रयोजनम् ॥ १४-२९-११ (९३१९६)
अनु त्वां मन्यते माता अनु त्वां मन्यते पिता ।
मन्त्रविज्ञानमुन्नीय परिवर्ते विशेषतः ॥ १४-२९-१२ (९३१९७)
एवमेवानुमन्येरंस्तान्भवान्द्रष्टुमर्हति ।
तेषामनुमतिं श्रुत्वा शक्या कर्तुं विचारणा ॥ १४-२९-१३ (९३१९८)
अध्वर्युरुवाच। १४-२९-१४क्ष् (७८३३)
प्राणा अप्यस्य च्छागस्य प्रापितास्ते स्वयोनिषु ।
शरीरं केवलं शिष्टं निश्चेष्टमिति मे मतिः ॥ १४-२९-१४ (९३१९९)
इन्धनस्य तु तुल्येन शरीरेणि विचेतसा ।
हिंसा हि यष्टुकामानामिन्धनं पशुसंज्ञितम् ॥ १४-२९-१५ (९३२००)
अहिंसा सर्वधर्माणामिति वृद्धानुशासनम् ।
यदहिंस्रं भवेत्कर्म तत्कार्यमिति विद्महे ॥ १४-२९-१६ (९३२०१)
अहिंसेति प्रतिज्ञेयं यदि वक्ष्याम्यतः परम् ।
शक्यं बहुविधं वक्तुं भवता कार्यदूषणम् ॥ १४-२९-१७ (९३२०२)
अहिंसा सर्वभूतानां नित्यमस्मासु रोचते ।
प्रत्यक्षतः साधयामो न परोक्षमुपास्महे ॥ १४-२९-१८ (९३२०३)
अध्वर्यरुवाच। १४-२९-१९क्ष् (७८३४)
भूमेर्गन्धगुणान्भुङ्क्ष्व पिबस्यापोमयान्रसान् ।
ज्योतिषां पश्यते रूपं स्पृशस्यनिलजान्गुणान् ॥ १४-२९-१९ (९३२०४)
शृणोष्याकाशजाञ्शब्दान्मनसा मन्यसे मतिम् ।
सर्वाण्येतानि भूतानि प्राणा इति च मन्यसे ॥ १४-२९-२० (९३२०५)
प्राणादाने निवृत्तोसि हिंसायां वर्तते भवान् ।
नास्ति चेष्टा विना हिंसां किं वा त्वं मन्यसे द्विज ॥ १४-२९-२१ (९३२०६)
यतिरुवाच। १४-२९-२२क्ष् (७८३५)
अक्षरं च क्षरं चैव द्वैधीभावोऽयमात्मनः ।
अक्षरं तत्र सद्भावः स्वभावः क्षर उच्यते ॥ १४-२९-२२ (९३२०७)
प्राणो जिह्वा मनः सत्त्वं सद्भावो रजसा सह ।
भावैरेतैर्विमुक्तस्य निर्द्वन्द्वस्य निराशिषः ॥ १४-२९-२३ (९३२०८)
समस्य सर्वभूतेषु निर्ममस्य जितात्मनः ।

समन्तात्परिमुक्तस्य न भयं विद्यते क्वचित् ॥१४-२९-२४ (९३२०९)
अध्वर्युरुवाच।१४-२९-२५क्ष् (७८३६)
सद्भिरेवेह संवादः कार्यो मतिमतांवर ।
भवतो हि मतं श्रुत्वा प्रतिभाति मतिर्मम ॥१४-२९-२५ (९३२१०)
भगवन्भगवद्बुद्ध्या प्रतिबुद्धो ब्रवीम्यहम् ।
व्रतं मन्त्रकृतं कर्तुर्नापराधोस्ति मे द्विज ॥१४-२९-२६ (९३२११)
ब्राह्मण उवाच।१४-२९-२७क्ष् (७८३७)
उपपत्त्या यतिस्तूर्ष्णीं वर्तमानस्ततः परम् ।
अध्वर्युरपि निर्मोहः प्रचचार महामखे ॥१४-२९-२७ (९३२१२)
एवमेतादृशं मोक्षं सुसूक्ष्मं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनार्थदर्शिना ॥ ॥१४-२९-२८ (९३२१३)

इति श्रीमन्महाभारते आश्वमेदिकपर्वणि अनुगीतापर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-२९-२ सर्वानेतान्द्वेष्टि चैव स्वभाव इति क ट पाठः
। जन्तुदेहानिहैत्येति क ट पाठः ॥
७-२९-३ नास्ति शक्यः कथंचिदिति क ट थ पाठः ॥
७-२९-१२ अत्र त्वां मन्यतां भ्राता पिता माता सखेति च
। मन्त्रयस्वैनमुन्नीय परवन्तं विशेषत इति झ द पाठः ॥
७-२९-१९ भूमेरिति नानुपहत्य भूतानि भोगः सम्भवतीति
न्यायाज्जीवतोऽपरिहार्यैव हिंसेत्यर्थः ॥
७-२९-२१ किं कथं त्वं मन्यसेऽहिंसामिति शेषः ॥
७-२९-२६ मतं मन्तुं क्रतुं कर्तुमिति थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०३०
॥ श्रीः ॥
१४.३०. अध्यायः ३०

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्राह्मणेन स्वभार्यांप्रति हिंसाया अकर्तव्यत्वे महर्षिवचसां
प्रमाणीकरणोपयोगितया परशुरामचरित्रकथनारम्भः ॥१ ॥
रामेण कार्तवीर्ये निहते तदनुयायिभिर्जमदग्नेर्हनम् ॥२ ॥
ततः क्रुद्धेन रामेण त्रिःसप्तकृत्वः सर्वक्षत्रियहनने तत्पितृभी

रामस्य परिसान्त्वप्रयतनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
कार्तवीर्यस्य संवादं समुद्रस्य च भामिनि ॥ १४-३०-१ (९३२१४)
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ॥ १४-३०-२ (९३२१५)
स कदाचित्समुद्रान्ते विचरन्बलदर्पितः ।
अवीकिरच्छरशतैः समुद्रमिति नः श्रुतम् ॥ १४-३०-३ (९३२१६)
तं समुद्रो नमस्कृत्य कृताञ्जलिरुवाचह ।
मा मुञ्च वीर नाराचान्ब्रूहि किं करवाणि ते ॥ १४-३०-४ (९३२१७)
मदाश्रयाणि भूतानि त्वद्विसृष्टैर्महेषुभिः ।
वध्यन्ते राजशार्दूल तेभ्यो देह्यभयं विभो ॥ १४-३०-५ (९३२१८)
अर्जुन उवाच। १४-३०-६क्ष् (७८३८)
मत्समो यदि संग्रामे शरासनधरः क्वचित् ।
विद्यते तं समाचक्ष्व यः समो मे महामृधे ॥ १४-३०-६ (९३२१९)
समुद्र उवाच। १४-३०-७क्ष् (७८३९)
महर्षिर्जमदग्निस्ते यदि राजन्पुरा श्रुतः ।
तस्य पुत्रस्तवातिथ्यं यथावत्कर्तुमर्हति ॥ १४-३०-७ (९३२२०)
ततः स राजा प्रययौ क्रोधेन महता वृतः ।
स तमाश्रममागम्य राममेवान्वपद्यत ॥ १४-३०-८ (९३२२१)
स रामप्रतिकूलानि चकार सह बन्धुभिः ।
आयासं जनयामास रामस्य च महात्मनः ॥ १४-३०-९ (९३२२२)
ततस्तेजः प्रजज्वाल रामस्यामिततेजसः ।
प्रदहन्रिपुसैन्यानि तदा कमललोचने ॥ १४-३०-१० (९३२२३)
ततः परशुमादाय स तं बाहुसहस्रिणम् ।
चिच्छेद सहसा रामो बहुशाखमिव द्रुमम् ॥ १४-३०-११ (९३२२४)
तं हतं पतितं दृष्ट्वा समेताः सर्वबान्धवाः ।
असीनादाय शक्तीश्च भार्गवं पर्यधावयन् ॥ १४-३०-१२ (९३२२५)
रामोऽपि धनुरादाय रथमारुह्य सत्वरः ।
विसृजञ्शरवर्षाणि व्यधमत्पार्थिवं बलम् ॥ १४-३०-१३ (९३२२६)
ततस्तु क्षत्रियाः केचिज्जमदग्निं निहत्य च ।
विविशुर्गिरिदुर्गाणि मृगाः सिंहार्दिता इव ॥ १४-३०-१४ (९३२२७)
तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठताम् ।

प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् ॥१४-३०-१५ (९३२२८)
एवं ते द्रविडाऽभीराः पुण्ड्राश्च शबरैः सह ।
वृषलत्वं परिगता व्युत्थानात्क्षत्रधर्मतः ॥१४-३०-१६ (९३२२९)
ततश्च हतवीरासु क्षत्रियासु पुनः पुनः ।
द्विजैरुत्पादितं क्षत्रं जामदग्न्यो न्यकृन्तत ॥१४-३०-१७ (९३२३०)
एकविंशतिमे याते रामं वागशरीरिणी ।
दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता ॥१४-३०-१८ (९३२३१)
रामराम निवर्तस्व कं गुणं तात पश्यसि ।
क्षत्रबन्धूनिमान्प्राणैर्विप्रयोज्य पुनः पुनः ॥१४-३०-१९ (९३२३२)
तथैव तं महात्मानमृचीकप्रमुखास्तदा ।
पितामहा महाभाग निवर्तस्वेत्यथाब्रुवन् ॥१४-३०-२० (९३२३३)
पितुर्वधममृष्यंस्तु रामः प्रोवाच तानृषीन् ।
नार्हन्तीह भवन्तो मां निवारयितुमित्युत ॥१४-३०-२१ (९३२३४)
पितर ऊचुः।१४-३०-२२क्ष् (७८४०)
नार्हसे क्षत्रबन्धूंस्त्वं निहन्तुं जयतांवर ।
नेह युक्तं त्वया हन्तुं ब्राह्मणेन सता नृपान् ॥ ॥१४-३०-२२ (९३२३५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि त्रिंशोऽध्यायः
॥ ३० ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३०-१५ तेषामुपरतं कर्मेति ट पाठः ॥
७-३०-१६ व्युत्थानात्क्षत्रधर्मिण इति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०३१
॥ श्रीः ॥
१४.३१. अध्यायः ३१

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
परशुरामंप्रति तत्पितृभिः
क्षत्रियवधान्निवर्तनायालर्कोपाख्यानकथनम् ॥१ ॥
रामेण तच्छ्रवणाद्धिंसातो निवर्त्य तपश्चरणम् ॥२ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

पितर ऊचुः ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
श्रुत्वा च तत्तथा कार्यं भवता द्विजसत्तम ॥१४-३१-१ (९३२३६)
अलर्को नाम राजर्षिरभवत्सुमहातपाः ।
धर्मज्ञः सत्यवादी च महात्मा सुदृढव्रतः ॥१४-३१-२ (९३२३७)
स सागरान्तां धनुषा विनिर्जित्य महीमिमाम् ।
कृत्वा सुदुष्करं कर्म मनः सूक्ष्मे समादधे ॥१४-३१-३ (९३२३८)
स्थितस्य वृक्षमूलेऽथ तस्य चिन्ता बभूव ह ।
उत्सृय सुमहद्राज्यं सूक्ष्मं प्रति महामते ॥१४-३१-४ (९३२३९)
अलर्क उवाच।१४-३१-५क्ष् (७८४१)
मनसो मे बलं जातं मनो जित्वा ध्रुवो जयः ।
अन्यत्र बाणानस्यामि शत्रुभिः परिवारितः ॥१४-३१-५ (९३२४०)
यदिदं चापलात्कर्म सर्वान्मर्त्यांश्चिकीर्षति ।
मनः प्रति सुतीक्ष्णाग्रानहं मोक्ष्यामि सायकान् ॥१४-३१-६ (९३२४१)
मन उवाच।१४-३१-७क्ष् (७८४२)
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥१४-३१-७ (९३२४२)
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तत्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥१४-३१-८ (९३२४३)
आघ्राय सुबहून्गान्धांस्तानेव प्रतिगृध्यति ।
तस्माद्घ्राणं प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥१४-३१-९ (९३२४४)
घ्राण उवाच।१४-३१-१०क्ष् (७८४३)
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥१४-३१-१० (९३२४५)
अन्यान्याणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥१४-३१-११ (९३२४६)
इयं स्वादून्रसान्भुक्त्वा तानेव प्रति गृध्यति ।
तस्माज्जिह्वां प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥१४-३१-१२ (९३२४७)
जिह्वोवाच।१४-३१-१३क्ष् (७८४४)
नेमे वाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति ततो हास्यसि जीवितम् ॥१४-३१-१३ (९३२४८)
अन्यान्वाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥१४-३१-१४ (९३२४९)
स्पृष्ट्वा त्वग्विविधान्स्पर्शांस्तानेव प्रतिगृध्यति ।
तस्मात्त्वचं पाटयिष्ये विविधैः कङ्कपत्रिभिः ॥१४-३१-१५ (९३२५०)
त्वगुवाच।१४-३१-१६क्ष् (७८४५)

नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ १४-३१-१६ (९३२५१)
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥ १४-३१-१७ (९३२५२)
श्रुत्वा तु विविधाञ्शब्दांस्तानेव प्रतिगृध्यति ।
तस्माच्छ्रोत्रं प्रति शरान्प्रति मुञ्चाम्यहं शितान् ॥ १४-३१-१८ (९३२५३)
श्रोत्रमुवाच। १४-३१-१९क्ष् (७८४६)
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति ततो हास्यति जीवितम् ॥ १४-३१-१९ (९३२५४)
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥ १४-३१-२० (९३२५५)
दृष्ट्वा रूपाणि बहुशस्तान्येव प्रतिगृध्यति ।
तस्माच्चक्षुर्हनिष्यामि निशितैः सायकैरहम् ॥ १४-३१-२१ (९३२५६)
चक्षुरुवाच। १४-३१-२२क्ष् (७८४७)
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ १४-३१-२२ (९३२५७)
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यति
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥ १४-३१-२३ (९३२५८)
इयं निष्ठा बहुविधा प्रज्ञया त्वद्यवस्यति ।
तस्माद्बुद्धिं प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥ १४-३१-२४ (९३२५९)
बुद्धिरुवाच। १४-३१-२५क्ष् (७८४८)
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ।
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ १४-३१-२५ (९३२६०)
पितर ऊचुः। १४-३१-२६क्ष् (७८४९)
ततोऽलर्कस्तपो घोरं तत्रैवास्थाय दुष्करम् ।
नाध्यगच्छत्परं शक्त्या बाणमेतेषु सप्तसु ॥ १४-३१-२६ (९३२६१)
सुसमाहितचेतास्तु स ततोऽचिन्तयत्प्रभुः ।
स विचिन्त्य चिरं कालमलर्को द्विजसत्तम ।
नाध्यगच्छत्परं श्रेयो योगान्मतिमतांवरः ॥ १४-३१-२७ (९३२६२)
स एकाग्रं मनः कृत्वा निश्चलो योगमास्थितः ।
इन्द्रियाणि जघानाशु बाणेनैकेन वीर्यवान् ॥ १४-३१-२८ (९३२६३)
योगेनात्मानमाविश्य सिद्धिं परमिकां गतः ।
विस्मितश्चापि राजर्षिरिमां गाथां जगाद ह ॥ १४-३१-२९ (९३२६४)
अहो कष्टं यदस्माभिः सर्वं बाह्यमनुष्ठितम् ।
भोगतृष्णासमायुक्तैः पूर्वं राज्यमुपासितम् ।

इति पश्चान्मया ज्ञातं योगान्नास्ति परं सुखम् ॥ १४-३१-३० (९३२६५)
इति त्वमनुजानीहि राम मा क्षत्रियान्वधीः ।
तपो घोरमुपातिष्ठ ततः श्रेयोऽभिपत्स्यसे ॥ १४-३१-३१ (९३२६६)
इत्युक्तः पितृभिः सोथ तपो घोरं समास्थितः ।
जामदग्न्यो महाभागे सिद्धिं च परमां गतः ॥ ॥ १४-३१-३२ (९३२६७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३१-१ अत्र हिंसाया अकार्यत्वे। १ । ।
७-३१-५ अन्यत्र बाह्यशत्रुभ्य इति शेषः । शत्रुभिरिन्द्रियाख्यवैरिभिः ॥
५ ॥

आश्वमेधिकपर्व - अध्याय ०३२
॥ श्रीः ॥
१४.३२. अध्यायः ३२

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्राह्मणेन स्वभार्यांप्रति
कामक्रोधादिपरित्यागपूर्वकं भगवदवबोधस्य
परमपुरुषार्थसाधनतावबोधकाम्बरीषगीतगाथाकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
त्रयो वै रिपवो लोके नवधा गुणतः स्मृताः ।
हर्षः स्तंभोतिमानश्च त्रयस्ते सात्विका गुणाः ॥ १४-३२-१ (९३२६८)
शोकः क्रोधाभिसंरम्भो राजसास्ते गुणाः स्मृताः ।
स्वप्नस्तन्द्रा च मोहश्च त्रयस्ते तामसा गुणाः ॥ १४-३२-२ (९३२६९)
एतान्निकृत्य धृतिमान्बाणसङ्घैरतन्द्रितः ।
जेतुं परानुत्सहते प्रशान्तात्मा जितेन्द्रियः ॥ १४-३२-३ (९३२७०)
अत्र गाथाः कीर्तयन्ति पुराकल्पविदो जनाः ।
अम्बरीषेण या गीता राज्ञा राज्यं प्रशासता ॥ १४-३२-४ (९३२७१)
समुदीर्णेषु दोषेषु बाध्यमानेषु साधुषु ।

जग्राह तरसा राज्यमम्बरीष इति श्रुतिः ॥१४-३२-५ (९३२७२)
स निगृह्यात्मनो दोषान्साधून्समभिपूज्य च ।
जगाम महतीं सिद्धिं गाथाश्चेमा जगाद ह ॥१४-३२-६ (९३२७३)
भूयिष्ठं विजिता दोषा निहताः सर्वशत्रवः ।
एको दोषो वरिष्ठश्च वध्यः स न हतो मया ॥१४-३२-७ (९३२७४)
यत्प्रयुक्तो जन्तुरयं वैतृष्ण्यं नाधिगच्छति ।
तृष्णार्त इव निम्नानि धावमानो न बुध्यते ॥१४-३२-८ (९३२७५)
अकार्यमपि येनेह प्रयुक्तः सेवते नरः ।
तं लोभमसिभिस्तीक्ष्णैर्निकृत्य सुखमेधते ॥१४-३२-९ (९३२७६)
लोभाद्धि जायते तृष्णा ततश्चिन्ता प्रवर्तते ।
स लिप्समानो लभते भूयिष्ठं राजसान्गुणान् ।
तदवाप्तौ तु लभते भूयिष्ठं तामसान्गुणान् ॥ १४-३२-१० (९३२७७)
स तैर्गुणैः संहतदेहबन्धनः ।
पुनःपनर्जायति कर्म चेहते ।
जन्मक्षये भिन्नविकीर्मदेहो
मृत्युं पुनर्गच्छति जन्मनैव ॥ १४-३२-११ (९३२७८)
तस्मादेतं सम्यगवेक्ष्य लोभं
निगृह्य धृत्याऽऽत्मनि राज्यमिच्छेत् ।
एतद्राज्यं नान्यदस्तीह राज्य-
मात्मैव राजा विदितो यथावत् ॥ १४-३२-१२ (९३२७९)
इति राज्ञाऽम्बरीषेण गाथा गीता यशस्विना ।
आधिराज्य पुरस्कृत्य लोभमेकं निकृन्तता ॥ ॥१४-३२-१३ (९३२८०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३२-१ गुणतः वृत्तिभेदात् ॥
७-३२-२ अभिसंरम्भो द्वेषाभिनिवेशः ॥
७-३२-३ निकृत्य च्छित्त्वा ।बाणसंघैः शमादिभिः ॥
७-३२-११ पुनर्जायति चेह तत्फलम् ।फलक्षये भिन्नविदीर्णदेहः
पुनर्मृत्यु गच्छति चैव जन्मनीति क थ पाठः ॥
७-३२-१२ नान्यदस्तीति विद्या यैश्चैव राजा विजितो मयैक इति
क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०३३

॥ श्रीः ॥
१४.३३. अध्यायः ३३

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्राह्मणेन स्वभार्यांप्रति ममतावर्जनस्य पुरुषार्थसाधनतायां
दृष्टान्ततया ब्राह्मणजनकसंवादानुवादः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मणि उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं जनकस्य च भामिनि ॥ १४-३३-१ (९३२८१)
ब्राह्मणं जनको राजा सन्नं कस्मिंश्चिदागसि ।
विषये मे न वस्तव्यमिति शिष्ट्यर्थमब्रवीत् ॥ १४-३३-२ (९३२८२)
इत्युक्तः प्रत्युवाचाथ ब्राह्मणो राजसत्तमम् ।
आचक्ष्व विषयं राजन्यावांस्तव वशे स्थितः ॥ १४-३३-३ (९३२८३)
सोऽन्यस्य विषये राज्ञो वस्तुमिच्छाम्यहं विभो ।
वचस्ते कर्तुमिच्छामि यथाशास्त्रं महीपते ॥ १४-३३-४ (९३२८४)
इत्युक्तस्तु तदा राजा ब्राह्मणेन यशस्विना ।
मुहुरुष्णं विनिःस्वस्य न किञ्चित्प्रत्यभाषत ॥ १४-३३-५ (९३२८५)
तमासीनं ध्यायमानं राजानममितौजसम् ।
कश्मलं सहसाऽगच्छद्भानुमन्तमिव ग्रहः ॥ १४-३३-६ (९३२८६)
समाश्वास्य ततो राजा विगते कश्यमे तदा ।
ततो मूहूर्तादिव तं ब्राह्मणं वाक्यमब्रवीत् ॥ १४-३३-७ (९३२८७)
पितृपैतामहे राज्ये वश्ये जनपदे सति ।
विषयं नाधिगच्छामि विचिन्वन्पृथिवीमहम् ॥ १४-३३-८ (९३२८८)
नाध्यगच्छं यदा पृथ्व्यां मिथिला मार्गिता मया ।
नाध्यगच्छं यदा तस्यां स्वप्रजा मार्गिता मया ॥ १४-३३-९ (९३२८९)
नाध्यगच्छं यदा तस्यां तदा मे कश्मलोऽभवत् ।
ततो मे कश्मलस्यान्ते मतिः पुनरुपस्थिता ॥ १४-३३-१० (९३२९०)
तदा न विषयं मन्ये सर्वो वा विषयो मम ।
आत्माऽपि चायं न मम सर्वा वा पृथिवी मम ॥ १४-३३-११ (९३२९१)
यथा मम तथाऽन्येषामिति मन्ये द्विजोत्तम ।
उष्यतां यावदुत्साहो भुज्यतां यावदिष्यते ॥ १४-३३-१२ (९३२९२)
ब्राह्मण उवाच । १४-३३-१३क्ष् (७८५०)

पितृपैतामहे राज्ये वश्ये जनपदे सति ।
ब्रूहि कां मतिमास्थाय ममत्वं वर्जितं त्वया ॥ १४-३३-१३ (९३२९३)
कां वै बुद्धिं समाश्रित्य सर्वो वै विषयस्तव ।
नावैषि विषयं येन सर्वो वा विषयस्तव ॥ १४-३३-१४ (९३२९४)
जनक उवाच। १४-३३-१५क्ष् (७८५१)
अन्तवन्त इहारम्भा विदिताः सर्वकर्मसु ।
नाध्यगच्छमहं तस्मान्ममेदमिति यद्भवेत् ॥ १४-३३-१५ (९३२९५)
कस्येदमिति कस्य स्वमिति वेदवचस्तथा ।
नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत् ॥ १४-३३-१६ (९३२९६)
एतां बुद्धिं समाश्रित्य ममत्वं वर्जितं मया ।
शृणु बुद्धिं च यां ज्ञात्वा सर्वत्र विषयो मम ॥ १४-३३-१७ (९३२९७)
नाहमात्मार्थमिच्छामि गन्धान्घ्राणगतानपि ।
तस्मान्मे निर्जिता भूमिर्वशे तिष्ठति नित्यदा ॥ १४-३३-१८ (९३२९८)
नाहमात्मार्थमिच्छामि रसानास्येऽपि वर्ततः ।
आपो मे निर्जितास्तस्माद्वशे तिष्ठन्ति नित्यदा ॥ १४-३३-१९ (९३२९९)
नाहमात्मार्थमिच्छामि रूपं ज्योतिश्च चक्षुषः ।
तस्मान्मे निर्जितं ज्योतिर्वशे तिष्ठति नित्यदा ॥ १४-३३-२० (९३३००)
नाहमात्मार्थमिच्छामि स्पर्शांस्त्वचि गताश्च ये ।
तस्मान्मे निर्जितो वायुर्वशे तिष्ठति नित्यदा ॥ १४-३३-२१ (९३३०१)
नाहमात्मार्थमिच्छामि शब्दाञ्श्रोत्रगतानपि ।
आकाशं मे जितं तस्माद्वशे तिष्ठति नित्यदा ॥ १४-३३-२२ (९३३०२)
नाहमात्मार्थमिच्छामि मनो नित्यं मनोन्तरे ।
मनो मे निर्जितं तस्माद्वशे तिष्ठति नित्यदा ॥ १४-३३-२३ (९३३०३)
देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽतिथिभिः सह ।
इत्यर्थं सर्व एवेति समारम्भा भवन्ति वै ॥ १४-३३-२४ (९३३०४)
ततः प्रहस्य जनकं ब्राह्मणः पुनरब्रवीत् ।
त्वज्जिज्ञासार्थमद्येह विद्धि मां धर्ममागतम् ॥ १४-३३-२५ (९३३०५)
त्वमस्य ब्रह्मनाभस्य दुर्वारस्यानिवर्तिनः ।
सत्वनेमिनिरुद्धस्य चक्रस्यैकः प्रवर्तकः ॥ ॥ १४-३३-२६ (९३३०६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्र्यस्त्रिंशोऽध्यायः ॥ ३३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३३-१ अत्र लोभे निकृन्तनीये ॥
७-३३-२ क्लान्तं कस्मिंश्चिदागमे इति द पाठः ॥

क्षान्तं कस्मिंश्चिदागमे इति क ठ थ पाठः । शिष्यार्थमब्रवीदिति पाठान्तरम् ॥

आश्वमेधिकपर्व - अध्याय ०३४
॥ श्रीः ॥
१४.३४. अध्यायः ३४

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्राह्मणेन ब्राह्मणींप्रति स्वमाहात्म्यप्रकाशनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
नाहं तथा भूरु चरामि लोके
यथा त्वं मां तर्जयसे स्वबुद्ध्या ।
विप्रोस्मिं मुक्तोस्मि वनेचरोस्मि
गृहस्थधर्मा व्रतवांस्तथाऽस्मि ॥ १४-३४-१ (९३३०७)
नाहमस्मि यता मां त्वं पश्यसे च शुभाशुभे ।
मया व्याप्तमिदं सर्वं यत्किञ्चिज्जगतीगतम् ॥ १४-३४-२ (९३३०८)
ये केचिज्जन्तवो लोके जङ्गमाः स्थावराश्च ह ।
तेषां मामन्तकं विद्धि दारुणामिव पावकम् ॥ १४-३४-३ (९३३०९)
राज्ये पृथिव्यां सर्वस्यामथवापि त्रिविष्टपे ।
तथा बुद्धिरियं वेत्ति बुद्धिरेव धनं मम ॥ १४-३४-४ (९३३१०)
एकः पन्था ब्राह्मणानां येन गच्छन्ति तद्विदः ।
गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु ॥ १४-३४-५ (९३३११)
लिङ्गैर्बहुभिरव्यग्रैरेका बुद्धिरुपास्यते ।
नानालिङ्गाश्रमस्थानां येषां बुद्धिः शमात्मिका ॥ १४-३४-६ (९३३१२)
ते भावमेकमायान्ति सरितः सागरं यथा ।
बुद्ध्याऽयं गम्यते मार्गः शरीरेणि न गम्यते ।
आद्यन्तवन्ति कर्माणि शरीरं कर्मबन्धनम् ॥ १४-३४-७ (९३३१३)
तस्मान्मे सुभगे नास्ति परलोककृतं भयम् ।
तद्भावभावनिरता ममैवात्मानमेष्यसि ॥ ॥ १४-३४-८ (९३३१४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३४-३ तेषामन्तर्गतं विद्धि इति क.ध.पाठः ॥
७-३४-७ विद्ध्यान्तवन्ति कर्माणीति क.थ.पाठः ॥
७-३४-८ तस्मात्ते सुभगे इति झ.पाठः । मद्भावभावनिरता मामेवैष्यस्यथात्मनेति क.पाठः ॥

आश्वमेधिकपर्व - अध्याय ०३५
॥ श्रीः ॥
१४.३५. अध्यायः ३५

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति ब्राह्मणीब्राह्मणशब्दनिर्दिष्टयोः क्रमेणि बुद्धिमनस्त्वकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्राह्मण उवाच ।
नेदमल्पात्मना शक्यं वेदितुं वाऽकृतात्मना ।
बहु चाल्पं च संक्षिप्तं विस्तृतं च मतं मम ॥ १४-३५-१ (९३३१५)
उपायं तं मम ब्रूहि येनैषा लभ्यते मतिः ।
तन्मन्ये कारणं कर्म यत एषा प्रवर्तते ॥ १४-३५-२ (९३३१६)
ब्राह्मण उवाच। १४-३५-३क्ष् (७८५२)
अरणीं ब्राह्मणीं विद्धि गुरुरस्योत्तरारणिः ।
तपःश्रुतेभिमथिनी ज्ञानाग्निर्जायते ततः ॥ १४-३५-३ (९३३१७)
ब्राह्मणयुवाच। १४-३५-४क्ष् (७८५३)
यदिदं ब्रह्मणो लिङ्गं क्षेत्रज्ञ इति संज्ञितम् ।
ग्रहीतुं येन यच्छक्यं लक्षणं तस्य तद्वद ॥ १४-३५-४ (९३३१८)
ब्राह्मण उवाच। १४-३५-५क्ष् (७८५४)
अलिङ्गो निर्गुणश्चैव कारणं नास्य विग्रहे ।
उपायमेव वक्ष्यामि येन गृह्येत भावना ॥ १४-३५-५ (९३३१९)
सम्यगप्युपदिष्टस्य ह्यमृतस्येव तृप्यसे ।
कर्मबुद्धिरबुद्धित्वाज्ज्ञानलिङ्गान्निपातितः। १४-३५-६ (९३३२०)
इदं कार्यमिदं नेति न मोक्षेषूपदिश्यते ।
पश्यतः शृण्वतो बुद्धिरात्मनैवोपजायते ॥ १४-३५-७ (९३३२१)

यावन्त इह शक्येरंस्तावतोंऽसान्प्रकल्पयेत् ।
अव्यक्तान्व्यक्तरूपांश्च शतशोऽथ सहस्रशः ॥१४-३५-८ (९३३२२)
सर्वानुमानयुक्तांश्च सर्वान्प्रत्यक्षहेतुकान् ।
यतः परं न विद्येत ततोऽभ्यासे भविष्यति ॥१४-३५-९ (९३३२३)
श्रीभगवानुवाच।१४-३५-१०क्ष् (७८५५)
ततस्तु तस्या ब्राह्मण्या मतिः क्षेत्रज्ञसंशये ।
क्षेत्रज्ञानेन परतः क्षेत्रज्ञोऽन्यः प्रवर्तते ॥१४-३५-१० (९३३२४)
अर्जुन उवाच।१४-३५-११क्ष् (७८५६)
क्व नु सा ब्राह्मणि कृष्ण क्व चासौ ब्राह्मणर्षभः ।
याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत ॥१४-३५-११ (९३३२५)
श्रीभगवानुवाच।१४-३५-१२क्ष् (७८५७)
मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम् ।
क्षेत्रज्ञ इति यश्चोक्तः सोऽहमेव धनंजय ॥ ॥१४-३५-१२ (९३३२६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चत्रिंशोऽध्यायः ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३५-६ सम्यगुपायो दृष्टश्च भ्रमरैरिव लक्ष्यत इति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०३६
॥ श्रीः ॥
१४.३६. अध्यायः ३६

अथानुगीतापर्व-२

Mahabharata - Ashvamedhika Parva - Chapter Topics

कृष्णेनार्जुनंप्रति
परब्रह्मस्वरूपतत्प्राप्तिसाधनादिप्रतिपादकगुरुशिष्यसंवादानुवादः
॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

अर्जुन उवाच ।
ब्रह्म यत्परमं ज्ञेयं तन्मे व्याख्यातुमर्हसि ।
भतो हि प्रसादेन सूक्ष्मे मे रमते मतिः ॥१४-३६-१ (९३३२७)
वासुदेव उवाच।१४-३६-२क्ष् (७८५८)

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह ॥१४-३६-२ (९३३२८)
कश्चिद्ब्राह्मणमासीनमाचार्यं संशितव्रतम् ।
शिष्यः पप्रच्छ मेधावी किंस्विच्छ्रेयः परंतप ॥१४-३६-३ (९३३२९)
भगवन्तं प्रपन्नोऽहं निःश्रेयसपराणः ।
याचे त्वां शिरसा विप्र यद्ब्रूयां ब्रूहि तन्मम ॥१४-३६-४ (९३३३०)
तमेवंवादिनं पार्थ शिष्यं गुरुरुवाच ह ।
कथयस्व प्रवक्ष्यामि यत्र ते संशयो द्विज ॥१४-३६-५ (९३३३१)
इत्युक्तः स कुरुश्रेष्ठ गुरुणा गुरुवत्सलः ।
प्राञ्जलिः परिपप्रच्छ यत्तच्छृणु महामते ॥१४-३६-६ (९३३३२)
शिष्य उवाच।१४-३६-७क्ष् (७८५९)
कुतश्चाहं कुतश्च त्वं तत्सत्यं ब्रूहि यत्परम् ।
कुतो जातानि भूतानि स्थावराणि चराणि च ॥१४-३६-७ (९३३३३)
केन जीवन्ति भूतानि तेषामायुश्च किं परम् ।
किं सत्यं किं तपो विप्र के गुणाः सद्भिरीरिताः ॥१४-३६-८ (९३३३४)
के पन्थानः शिवाश्च स्युः किं सुखं कि च दुष्कृतम् ।
एतान्मे भगवन्प्रश्नान्याथातथ्येन सुव्रत ॥१४-३६-९ (९३३३५)
वक्तुमर्हसि विप्रर्षे यथावदिह तत्त्वतः ।
त्वदन्यः कश्च न प्रश्नानेतान्वक्तुमिहार्हति ॥१४-३६-१० (९३३३६)
ब्रूहि धर्मविदां श्रेष्ठ परं कौतूहलं मम ।
मोक्षधर्मार्थकुशलो भवाँल्लोकषु गीयते ॥१४-३६-११ (९३३३७)
सर्वसंशयसंच्छेत्ता त्वदन्यो न च विद्यते ।
संसारभीरवश्चैव मोक्षकामास्तथा वयम् ॥१४-३६-१२ (९३३३८)
वासुदेव उवाच।१४-३६-१३क्ष् (७८६०)
तस्मै सम्प्रतिपन्नाय यथावत्परिपृच्छते ।
शिष्याय गुणयुक्ताय शान्ताय गुरुवर्तिने ॥१४-३६-१३ (९३३३९)
छायाभूताय दान्ताय यतते ब्रह्मचारिणे ।
तान्प्रश्नानब्रवीत्पार्थ मेधावी स धृतव्रतः ।
गुरुः कुरुकुलश्रेष्ठ सम्यक्सर्वानरिंदम ॥ १४-३६-१४ (९३३४०)
गुरुरुवाच।१४-३६-१५क्ष् (७८६१)
ब्रह्मणोक्तमिदं धर्ममृषिप्रवरसेवितम् ।
वेदविद्यासमावाप्तं तत्त्वभूतार्थभावनम् ॥१४-३६-१५ (९३३४१)
ज्ञानं त्वेव परं विद्युः संन्यासं तप उत्तमम् ।
यस्तु वेद निराबाधं ज्ञानतत्त्वं विनिश्चयात् ।
सर्वबूतस्थमात्मानं स सर्वगतिरिष्यते ॥ १४-३६-१६ (९३३४२)
ये विद्वान्सहसंवासं विवासं चैव पश्यति ।

तथैवैकत्वनानात्वे स दुःखात्परिमुच्यते ॥१४-३६-१७ (९३३४३)
यो न कामयते किञ्चिन्न किञ्चिदभिमन्यते ।
इह लोकस्थ एवैष ब्रह्मभूयाय कल्पते ॥१४-३६-१८ (९३३४४)
प्रधानगुणतत्त्वज्ञः सर्वभूतविधानवित् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः ॥१४-३६-१९ (९३३४५)
अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियाङ्कुरकोटरः ॥१४-३६-२० (९३३४६)
महाभूतविशेषश्च विशेषप्रतिशाखवान् ।
सदापर्णः सदापुष्पः शुभाशुभफलोदयः ॥१४-३६-२१ (९३३४७)
आजीवः सर्वभूतानां ब्रह्मबीजः सनातनः ।
एतज्ज्ञात्वा च तत्त्वानि ज्ञानेन परमासिना ।
छित्त्वा चामरतां प्राप्य जहाति मृत्युजन्मनी ॥ १४-३६-२२ (९३३४८)
भूतभव्यभविष्यादिधर्मकामार्थनिश्चयम् ।
सिद्धसङ्घपरिज्ञातं पुराकल्पं सनातनम् ॥१४-३६-२३ (९३३४९)
प्रवक्ष्येऽहं महाप्राज्ञ पदमुत्तममद्य ते ।
बुद्ध्वा यदिहं संसिद्धा भवन्तीह मनीषिणः ॥१४-३६-२४ (९३३५०)
उपगम्यर्षयः पूर्वं जिज्ञासन्तः परस्परम् ।
प्रजापतिभरद्वाजौ गौतमो भार्गवस्तथा ॥१४-३६-२५ (९३३५१)
वसिष्ठः कश्यपश्चैव विश्वामित्रोऽत्रिरेव च ।
मार्गान्सर्वान्परिक्रम्य परिश्रान्तः स्वकर्मभिः ॥१४-३६-२६ (९३३५२)
ऋषिमाङ्गिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः ।
ददृशुर्ब्रह्मभवने ब्रह्माणं वीतकल्मषम् ॥१४-३६-२७ (९३३५३)
तं प्रणम्य महात्मानं सुखासीनं महर्षयः ।
पप्रच्छुर्विनयोपेता नैःश्रेयसमिदं परम् ॥१४-३६-२८ (९३३५४)
कथं कर्म कृतं साधु कथं मुच्येत किल्बिषात् ।
के नो मार्गाः शिवाश्च स्युः किं सत्यं किं च दुष्कृतं ॥१४-३६-२९
(९३३५५)
कौ चोभौ कर्मणां मार्गौ प्राप्नुयुर्दक्षिणोत्तरौ ।
निरयं चापवर्गं च भूतानां प्रभवाप्ययौ ॥१४-३६-३० (९३३५६)
इत्युक्तः स मुनिश्रेष्ठैर्यदाह प्रपितामहः ।
तत्तेऽहं सम्प्रवक्ष्यामि शृणु शिष्य यथागमम् ॥१४-३६-३१ (९३३५७)
ब्रह्मोवाच।१४-३६-३२क्ष् (७८६२)
सत्याद्भूतानि जातानि स्थावराणि चराणि च ।
तपसा तानि जीवन्ति जीवितं तद्धि सुव्रतम् ।
स्वां योनिं पुनरागम्य वर्तते स्वेन कर्मणा ॥ १४-३६-३२ (९३३५८)
सत्यं हि गुणसंयुक्तं नियतं पञ्चलक्षणम् ॥ १४-३६-३३ (९३३५९)

ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः ।
सत्याद्भूतानि जातानि सत्यं भूतमयं जगत् ॥ १४-३६-३४ (९३३६०)
तस्मात्सत्याश्रया विप्रा नित्यं योगपरायणाः ।
अतीक्रोधसंतापा नियता धर्मसेतवः ॥ १४-३६-३५ (९३३६१)
अन्योन्यनियतान्वैद्यान्धर्मसेतुप्रवर्तकान् ।
तानहं सम्प्रवक्ष्यामि शाश्वताँल्लोकभावनान् ॥ १४-३६-३६ (९३३६२)
चातुर्विद्यं तथा वर्णांश्चातुराश्रमिकान्पृथक् ।
धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः ॥ १४-३६-३७ (९३३६३)
पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः ।
नियतं ब्रह्मभावाय यातं पूर्वं मनीषिभिः ॥ १४-३६-३८ (९३३६४)
गदन्तस्तु ममाद्येह पन्थानं दुर्विदं परैः ।
निबोधत महाभागा निखिलेन परं पदम् ॥ १४-३६-३९ (९३३६५)
ब्रह्मचर्यमिहैवाहुराश्रमं प्रथमं पदम् ।
गार्हस्थ्यं तु द्वितीयं स्याद्वानप्रस्थमतः परम् ।
ततः परं तु विज्ञेयमध्यात्मं परमं पदम् ॥ १४-३६-४० (९३३६६)
ज्योतिराकाशमादित्यो वायुरिन्द्रः प्रजापतिः ।
नोपैति यावदध्यात्मं तावदेतान्न पश्यति ॥ १४-३६-४१ (९३३६७)
तस्योपायं प्रवक्ष्यामि पुरस्तात्तं निबोधत ।
फलमूलानिलभुजां मुनीनां वसतां वने ॥ १४-३६-४२ (९३३६८)
वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते ।
सर्वेषामेव वर्णानां गृहस्थोऽयं विशिष्यते ॥ १४-३६-४३ (९३३६९)
श्रद्धालक्षणमित्येकं धर्मं धीराः प्रचक्षते ।
ग्नैष्ठिकोऽथ यतिर्वाऽपि विरक्तो ब्रह्मदर्शनः ॥' १४-३६-४४ (९३३७०)
इत्येवं देवयाना वः पन्थानः परिकीर्तिताः ।
सद्भिरध्यासिता धीरैः कर्मभिर्धर्मसेतवः ॥ १४-३६-४५ (९३३७१)
एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः ।
कालात्पश्यति भूतानां सदैव प्रभवाप्ययौ ॥ १४-३६-४६ (९३३७२)
अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना ।
विषयस्थानि सर्वाणि वर्तमानानि भागशः ॥ १४-३६-४७ (९३३७३)
महानात्मा तथाऽव्यक्तमहंकारस्तथैव च ।
इन्द्रियाणि दशैकं च महाभूतानि पञ्च च ॥ १४-३६-४८ (९३३७४)
विशेषाः पञ्चभूतानामित्येषा वैदिकी श्रुतिः ।
चतुर्विंशतिरेषा वस्तत्वानां परिकीर्तिता ॥ १४-३६-४९ (९३३७५)
तत्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ ।
स धीरः सर्वभूतेषु न मोऽहमधिगच्छति ॥ १४-३६-५० (९३३७६)
तत्त्वानि यो वेदयते यथातथं

गुणांश्च सर्वानखिलाश्च देवताः ।
विधूतपाप्मा प्रविमुच्य बन्धनं
स सर्वलोकानमलान्समश्नुते ॥ ॥ १४-३६-५१ (९३३७७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षट्त्रिंशोऽध्यायः ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३६-१० कश्च कोऽपि ॥
७-३६-२९ कथं कर्म क्रियात्साद्यु इति झ
। झ पाठः । क्रियात्कुर्वीत । के । नोऽस्माकम् ॥
७-३६-४३ गार्हस्थ्यं तद्विधीयते इति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०३७
॥ श्रीः ॥
१४.३७. अध्यायः ३७

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा कश्यपादिमहर्षीन्प्रति तमोगुणकार्यनिरूपणम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् ।
नवद्वारं पुरं विद्यात्त्रिगुणं पञ्चधातुकम् ॥ १४-३७-१ (९३३७८)
एकादशपरिक्षेपं मनोव्याकरणात्मकम् ।
बुद्धिस्वामिकमित्येतत्परमेकादशं भवेत् ॥ १४-३७-२ (९३३७९)
त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायन्ते पुनःपुनः ।
प्रनाड्यस्तिस्र एवैताः प्रवर्न्तते गुणात्मिकाः ॥ १४-३७-३ (९३३८०)
तमो रजस्तथा सत्वं गुणानेतान्प्रचक्षते ।
अन्योन्यमिथुनाः सर्वे तथाऽन्योन्यानुजीविनः ॥ १४-३७-४ (९३३८१)
अन्योन्यापाश्रयाश्चापि तथाऽन्योन्यानुवर्तिनः ।
अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्चधातवः ॥ १४-३७-५ (९३३८२)
तमसो मिथुनं सत्वं सत्वस्य मिथुनं रजः ।
रजसश्चापि सत्वं स्यात्सत्वस्य मिथुनं तमः ॥ १४-३७-६ (९३३८३)

नियम्यते तमो यत्र रजस्तत्र निवर्तते ।
नियम्यते रजो यत्र सत्वं तत्र प्रवर्तते ॥१४-३७-७ (९३३८४)
नैशात्मकं तमो विद्यात्त्रिगुणं मोहसंज्ञितम् ।
अधर्मलक्षणं चैव नियतं पापकर्मसु ।
तामसं रूपमेतत्तु दृश्यते चापि सङ्गतम् ॥ १४-३७-८ (९३३८५)
प्रकृत्यात्मकमेवाहू रजः पर्यायकारकम् ।
सत्त्वे तु सर्वभूतेषु दृश्यमुत्पत्तिलक्षणम् ॥१४-३७-९ (९३३८६)
प्रकाशं सर्वभूतेषु लाघवं श्रद्धधानता ।
सात्विकं रूपमेवं तु लाघवं साधुसंमितम् ॥१४-३७-१० (९३३८७)
एतेषां गुणतत्त्वानि वक्ष्यन्ते तत्त्वहेतुभिः ।
समासव्यासयुक्तानि तत्त्वतस्तानि बोधत ॥१४-३७-११ (९३३८८)
सम्मोहो ज्ञानमत्यागः कर्मणामविनिर्णयः ।
स्वप्नः स्तंभो भयं लोभः शोकः सुकृतदूषणम् ॥१४-३७-१२ (९३३८९)
अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता ।
निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥१४-३७-१३ (९३३९०)
अकृते कृतमानित्वमज्ञाने ज्ञानमानिता ।
अमैत्री विकृतो भावो ह्यश्रद्धा मूढभावना ॥१४-३७-१४ (९३३९१)
अनार्जवमसंज्ञत्वं कर्म पापमचेतना ।
गुरुत्वं सन्नभावत्वमवशित्वमवाग्गतिः ॥१४-३७-१५ (९३३९२)
सर्व एते गुणा वृत्तास्तामसाः सम्प्रकीर्तिताः ।
ये चान्ये विहिता भावा लोकेऽस्मिन्भावसंज्ञिताः ॥१४-३७-१६ (९३३९३)
तत्रतत्र नियम्यन्ते सर्वे ते तामसा गुणाः ।
परिवादकथा नित्यं मेवब्राह्मणवैरिता ॥१४-३७-१७ (९३३९४)
अत्यागश्चातिमानश्च मोहो मन्युस्तथाऽक्षमा ।
मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते ॥१४-३७-१८ (९३३९५)
वृथारम्भा हि ये केचिद्वृथा दानानि यानि च ।
वृथाभक्षणमित्येतत्तामसं वृत्तमिष्यते ॥१४-३७-१९ (९३३९६)
अतिवादोऽतितिक्षा च मात्सर्यमभिमानिता ।
अश्रद्दधानता चैव तामसं वृत्तमिष्यते ॥१४-३७-२० (९३३९७)
एवंविधाश्च ये केचिल्लोकेऽस्मिन्पापकर्मिणः ।
मनुष्या भिन्नमर्यादास्ते सर्वे तामसाः स्मृताः ॥१४-३७-२१ (९३३९८)
तेषां योनीः प्रवक्ष्यामि नियताः पापकर्मिणाम् ।
अवाङ्गिरयभावा ये तिर्यङ्गिरयगामिनः। १४-३७-२२ (९३३९९)
स्थावराणि च भूतानि पशवो वाहनानि च ।
क्रव्यादा दंदशूकाश्च कृमिकीटविहङ्गमाः ॥१४-३७-२३ (९३४००)
अब्जाता जन्तवश्चैव सर्वे चापि चतुष्पदाः ।

उन्मत्ता बधिरा मूका ये चान्ये पापरोगिणः ॥ १४-३७-२४ (९३४०१)
मग्नास्तमसि दुर्वृत्ताः स्वकर्मकृतलक्षणाः ।
अवाक्स्रोतस इत्येते मग्नास्तमसि तामसाः ॥ १४-३७-२५ (९३४०२)
तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम् ।
यथा ते सुकृतां लोकाँल्लभन्ते पुण्यकर्मिणः ॥ १४-३७-२६ (९३४०३)
अन्यथा प्रतिपन्नास्तु विवृद्धा ये च कर्मसु ।
स्वकर्मनिरतानां च ब्राह्मणानां शुभैषिणाम् ॥ १४-३७-२७ (९३४०४)
संस्कारेणोर्ध्वमायान्ति यतमानाः सलोकताम् ।
स्वर्गं गच्छन्ति देवानामित्येषा वैदिकी श्रुतिः ॥ १४-३७-२८ (९३४०५)
अन्यथा प्रतिपन्नास्ते विबुद्धाः स्वेषु कर्मसु ।
पुनरावृत्तिधर्माणस्ते भवन्तीह मानुषाः ॥ १४-३७-२९ (९३४०६)
पापयोनिं समापन्नाश्चण्डाला मूकचूचुकाः ॥
वर्णान्पर्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम् ॥ १४-३७-३० (९३४०७)
शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः ।
स्रोतोमध्ये समागम्य वर्तन्ते तामसे गुणे ॥ १४-३७-३१ (९३४०८)
अभिष्वङ्गस्तु कामेषु महामोह इति स्मृतः ।
ऋषयो मुनयो देवा मुह्यन्त्यत्र सुखेप्सवः ॥ १४-३७-३२ (९३४०९)
तमोमोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।
मरणं त्वन्धतामिस्रस्तामिस्रः क्रोध उच्यते ॥ १४-३७-३३ (९३४१०)
वर्णतो गुणतश्चैव योनितश्चैव तत्त्वतः ।
सर्वमेततमो विप्राः कीर्तितं वो यथाविधि ॥ १४-३७-३४ (९३४११)
को न्वेतद्बुध्यते साधु को न्वेतत्साधु पश्यति ।
अतत्त्वे तत्त्वदर्शी यस्तमसस्तच्च लक्षणम् ॥ १४-३७-३५ (९३४१२)
तमोगुणा बहुविधाः प्रकीर्तिता
यथावदुक्तं च तमः परावरम् ।
नरो हि यो वेद गुणानिमान्सदा
स तामसैः सर्वगुणैः प्रमुच्यते ॥ ॥ १४-३७-३६ (९३४१३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३७-२४ अण्डजा जन्तव इति झ पाठः ॥
७-३७-३० चूचुकाः स्खलद्गिरः ।पुष्पचूचुका इति क पाठः ॥
७-३७-३२ कामेषु स्त्र्याद्यर्थेषु ।अभिष्वङ्ग आसक्तिः ॥

आश्वमेधिकपर्व - अध्याय ०३८
॥ श्रीः ॥
१४.३८. अध्यायः ३८

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मण महर्षीन्प्रति रजोगुणकार्यनिरूपणम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
रजोऽहं वः प्रवक्ष्यामि याथातथ्येन सत्तमाः ।
निबोधत महाभागा गुणवृत्तं च राजसम् ॥ १४-३८-१ (९३४१४)
संतापो रूपमायासः सुखदुःखे हिमातपौ ।
ऐश्वर्यं विग्रहः सिद्धिर्हेतुवादोऽरतिः क्षमा ॥ १४-३८-२ (९३४१५)
बलं शौर्यं मदो रोषो व्यायामकलहावपि ।
ईर्ष्येप्सा पैशुनं युद्धं ममत्वं परिपालनम् ॥ १४-३८-३ (९३४१६)
वधबन्धपरिक्लेशाः क्रयो विक्रय एव च ।
निकृन्त च्छिन्धि भिन्धीति परवर्मावकर्तनम् ॥ १४-३८-४ (९३४१७)
उग्रं दारुणमाक्रोशः परवित्तानुरागिता ।
लोकचिन्ताऽनुचिन्ता च मत्सरः परिभाषणम् ॥ १४-३८-५ (९३४१८)
वृथाशास्त्रं मृषावादो विकल्पपरिभाषणम् ।
निन्दा स्तुतिः प्रशंसा च प्रतापः परिधर्षणम् ॥ १४-३८-६ (९३४१९)
परिचर्या च शुश्रूषा सेवा तृष्णा व्यपाश्रयः ॥
व्यूहो नयः प्रमादश्च परिवादः परिग्रहः ॥ १४-३८-७ (९३४२०)
संस्कारा ये च लोकेषु प्रवर्तन्ते पृथक्पृथक् ।
नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च ॥ १४-३८-८ (९३४२१)
संतापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये ।
प्रधानमाशीर्युक्तं च सततं मे भवत्विति ॥ १४-३८-९ (९३४२२)
स्वाहाकारो नमस्कारः स्वधाकारो वषट्क्रिया ।
याजनाध्यापने चोभे यजनाध्ययने अपि ॥ १४-३८-१० (९३४२३)
दानं प्रतिग्रहश्चैव प्रायश्चित्तानि मङ्गलम् ।
इदं मे स्यादिदं मे स्यात्स्नेहो गुणसमुद्भवः ॥ १४-३८-११ (९३४२४)
अभिद्रोहस्तथा माया निकृतिर्मान एव च ।
स्तैन्यं हिंसा जुगुप्सा च परितापः प्रजागरः ॥ १४-३८-१२ (९३४२५)
दम्भो दर्पोऽथ रागश्च भक्तिः प्रीतिः प्रमोदनम् ।

द्यूतं च जनवादश्च सम्बन्धाः स्त्रीकृताश्च ये ॥१४-३८-१३ (९३४२६)
नृत्यवादित्रगीतानां प्रसङ्गा ये च केचन ।
सर्व एते गुणा विप्रा राजसाः सम्प्रकीर्तिताः ॥१४-३८-१४ (९३४२७)
भूतभव्यभविष्याणां भावानां भुवि भावनाः ।
त्रिवर्गनिरता नित्यं धर्मोऽर्थः काम इत्यपि ॥१४-३८-१५ (९३४२८)
कामवृत्ताः प्रमोदन्ते सर्वकामसमृद्धिभिः ।
अर्वाक्स्रोतस इत्येते मनुष्या रजसा वृताः ॥१४-३८-१६ (९३४२९)
अस्मिँलोके प्रमोदन्ते जायमानाः पुनःपनः ।
प्रेत्यभाविकमीहन्ते हलौकिकमेव च ।
ददति प्रतिगृह्णन्ति तर्पयन्त्यथ जुह्वति ॥ १४-३८-१७ (९३४३०)
रजोगुणा वो बहुधानुकीर्तिता
यथावदुक्तं गुणवृत्तमेव च ।
नरोपि यो वेद गुणानिमान्सदा
स राजसैः सर्वगुणैर्विमुच्यते ॥ ॥ १४-३८-१८ (९३४३१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३८-२ संघातो रूपमायास इति क ट थ पाठः ॥
७-३८-५ उग्रं निष्ठुरं दारुणं हिंस्रत्वम् ॥
७-३८-६ परिभाषणं धिक्कृत्य भाषणम् ॥
७-३८-७ व्यूहः व्यवहाररचनाकौशलम् ॥
७-३८-८ शरणेषु रक्षितृषु ॥
७-३८-९ अप्रत्ययः अविश्वासः ॥
७-३८-१२ परितापः स्वजनकैवल्यनिमित्तो दाहः । पाठान्तरे परिवादः सर्वनिन्दा ॥
७-३८-१४ प्रसङ्गा येन केनचिदिति क थ पाठः ॥
७-३८-१६ अर्वाक् स्वर्गादधः भूमेरुपरि स्रोतः प्रवाहो येषां ते तथा ॥
७-३८-१७ प्रेत्यभाविकं जन्मान्तरीयं कुशलम् ॥

आश्वमेधिकपर्व - अध्याय ०३९
॥ श्रीः ॥
१४.३९. अध्यायः ३९

अथानुगीतापर्व-२

Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति सत्वगुणकार्यनिरूपणम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमम् ।
सर्वभूतहितं लोके सतां धर्ममनिन्दितम् ॥ १४-३९-१ (९३४३२)
आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च ।
अकार्पण्यमसंरम्भः संतोषः श्रद्दधानता ॥ १४-३९-२ (९३४३३)
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
अक्रोधश्चानसूया च शौचं दाक्ष्यं पराक्रमः ॥ १४-३९-३ (९३४३४)
मुधाज्ञानं मुधावृत्तं मुधासेवा मुदाश्रमः ।
एवं यो युक्तधर्मः स्यात्सोमुत्रात्यन्तमश्नुते ॥ १४-३९-४ (९३४३५)
निर्ममो निरहङ्कारो निराशीः सर्वतः समः ।
अकामहत इत्येव सतां धर्मः सनातनः ॥ १४-३९-५ (९३४३६)
विश्रंभो ह्रीस्तितिक्षा च त्यागः शौचमतन्द्रिता ।
आनृशंस्यमसंमोहो दया भूतेष्वपैशुनम् ॥ १४-३९-६ (९३४३७)
हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तिता ।
शान्तिकर्मविशुद्धिश्च भावशुद्धिर्विमोचनम् ॥ १४-३९-७ (९३४३८)
उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः ।
निर्ममत्वमनाशीष्ट्वमपरिक्षतधर्मता ॥ १४-३९-८ (९३४३९)
मुधादानं मुधायज्ञो मुधाधीतं मुधाव्रतम् ।
मुधाप्रतिग्रहश्चैव मधाश्रमो मुधातपः ॥ १४-३९-९ (९३४४०)
एवंवृत्तास्तु ये केचिल्लोकेऽस्मिन्सत्वसंश्रयाः ।
ब्राह्मणा ब्रह्मयोनिस्थास्ते धीराः साधुदर्शिनः ॥ १४-३९-१० (९३४४१)
हित्वा सर्वाणि पापानि निःशोका ह्यजरामराः ।
दिव्यं प्राप्य तु ते धीराः कुर्वते वै ततस्तनूः ॥ १४-३९-११ (९३४४२)
ईशित्वं च वशित्वं च लघुत्वं चाणुता तथा ।
विकुर्वते महात्मानो देवास्त्रिदिवगा इव ॥ १४-३९-१२ (९३४४३)
ऊर्ध्वस्रोतस इत्येते देवा वैकारिकाः स्मृताः ।
विकुर्वन्तः प्रकृत्या वै दिवं प्राप्तास्ततस्ततः ॥ १४-३९-१३ (९३४४४)
यद्यदिच्छन्ति तत्सर्वं भजन्ते विभजन्ति च ।
इत्येतत्सात्विकं वृत्तं कथितं वो द्विजर्षभाः ।
एतद्विज्ञाय लभते विधिवद्यद्यदिच्छति ॥ १४-३९-१४ (९३४४५)
प्रकीर्तिताः सत्त्वगुणा विशेषतो

यथावदुक्तं गुणवृत्तमेव च ।
नरस्तु यो वेद गुणानिमान्सदा
गुणान्स भुङ्क्ते न गुणैः स युज्यते ॥ ॥ १४-३९-१५ (९३४४६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-३९-७ हर्षः पुत्रजन्मादिजं सुखम् । तुष्टिरलबुद्धिः । शान्तिकर्मणि
मुक्त्युपाये शुद्धिः आर्जवेन प्रवृत्तिः ॥
७-३९-८ उपेक्षा औदासीन्यम् ॥

आश्वमेधिकपर्व - अध्याय ०४०
॥ श्रीः ॥
१४.४०. अध्यायः ४०

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति सत्वादिगुणत्रयनिरूपणम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
नैव शक्या गुणा वक्तुं पृथक्त्वेनैव सर्वशः ।
अविच्छिन्नानि दृश्यन्ते रजः सत्वं तमस्तथा ॥ १४-४०-१ (९३४४७)
अन्योन्यमनुरज्यन्ते ह्यन्योन्येनानुजीविनः ।
अन्योन्यापाश्रयाः सर्वे तथाऽन्योन्यानुवर्तिनः ॥ १४-४०-२ (९३४४८)
यावत्सत्वं रजस्तावद्वर्तते नात्र संशयः ।
यावत्तमश्च सत्वं च रजस्तावदिहोच्यते ॥ १४-४०-३ (९३४४९)
संहत्य कुर्वते यात्रां सहिताः सङ्घचारिणः ।
सङ्घातवृत्तयो ह्येते वर्तन्ते हेत्वहेतुभिः ॥ १४-४०-४ (९३४५०)
उद्रेकव्यतिरिक्तानां तेषामन्योन्यवर्तिनाम् ।
वक्ष्यते तद्यथाऽन्यूनं व्यतिरिक्तं च सर्वशः ॥ १४-४०-५ (९३४५१)
व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत् ।
अल्पं तत्रथ रजो ज्ञेयं सत्वमल्पतरं तथा ॥ १४-४०-६ (९३४५२)
उद्रिक्तं च रजो यत्र मध्यस्रोतोगतं भवेत् ।

अल्पं तत्र तमो ज्ञेयं सत्वमल्पतरं तथा ॥१४-४०-७ (९३४५३)
उद्रिक्तं च यदा सत्वमूर्ध्वस्रोतोगतं भवेत् ।
अल्पं तत्र तमो ज्ञेयं रजश्चाल्पतरं तथा ॥१४-४०-८ (९३४५४)
सत्वं वैकारिकी योनिरिन्द्रियाणां प्रकाशिका ।
न हि सत्वात्परो भावः कश्चिदन्यो विधीयते ॥१४-४०-९ (९३४५५)
ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणसंयुक्ता यान्त्यधस्तामसा जनाः ॥१४-४०-१० (९३४५६)
तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्वमुत्तमम् ।
इत्येवं त्रिषु वर्णेषु विवर्तन्ते गुणास्त्रयः ॥१४-४०-११ (९३४५७)
दूरादपि हि दृश्यनते सहिताः सङ्घचारिणः ।
तमः सत्वं रजश्चैव पृथक्त्वेनानुशुश्रुम ॥१४-४०-१२ (९३४५८)
दृष्ट्वा त्वादित्यमुद्यन्तं कुचोराणां भयं भवेत् ।
अध्वगाः परितप्येयुरुष्णतो दुःखभागिनः ॥१४-४०-१३ (९३४५९)
आदित्यः सत्वमुद्दिष्टः कुचोरास्तु तथा तमः ।
परितापोऽध्वगानां च रजसो गुण उच्यते ॥१४-४०-१४ (९३४६०)
प्राकाश्यं सत्वमादित्यः संतापो रजसो गुणः ।
उपप्लवस्तु विज्ञेयस्तामसस्तस्य पर्वसु ॥१४-४०-१५ (९३४६१)
एवं ज्योतिषु सर्वेषु प्रवर्तन्ते गुणास्त्रयः ॥
पर्यायेण च वर्न्तते तत्रतत्र तथातथा ॥१४-४०-१६ (९३४६२)
स्थावरेषु तु भावेषु तिर्यग्भावगतं तमः ।
राजसास्तु विवर्तन्ते स्नेहभावस्तु सात्विकैः ॥१४-४०-१७ (९३४६३)
अहस्त्रिधा तु विज्ञेयं त्रिधा रात्रिर्विधीयते ।
मासार्दमासवर्षाणि ऋतवः सन्धयस्तथा ॥१४-४०-१८ (९३४६४)
त्रिधा दानानि दीयन्ते त्रिधा यज्ञः प्रवर्तते ।
त्रिधा लोकास्त्रिधा देवास्त्रिधा विद्यास्त्रिधा गतिः ॥१४-४०-१९ (९३४६५)
भूतं भव्यं भविष्यं च धर्मोऽर्थः काम एव च ।
प्राणापानावुदानश्चाप्येत एव त्रयो गुणाः ॥१४-४०-२० (९३४६६)
पर्यायेण प्रवर्तन्ते तत्रतत्र तथातथा ।
यत्किञ्चिदिह लोकेऽस्मिन्सर्वमेते त्रयो गुणाः ॥१४-४०-२१ (९३४६७)
त्रयो गुणाः प्रवर्तन्ते ह्यव्यक्ता नित्यमेव तु ।
सत्वं रजस्तमश्चैव गुणसर्गः सनातनः ॥१४-४०-२२ (९३४६८)
तमोऽव्यक्तं शिवं धाम रजो योनिः सनातनः ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ॥१४-४०-२३ (९३४६९)
अनुद्रिक्तमनूनं वाऽप्यकम्पमचलं ध्रुवम् ।
सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतम् ।
ज्ञेयानि नामधेयानि नरैरद्यात्मचिन्तकैः ॥ १४-४०-२४ (९३४७०)

अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्वाणि गतीश्च केवलाः ।
विमुक्तदेहः प्रविभागतत्त्ववि-
त्स मुच्यते सर्वगुणैर्निरामयः ॥ ॥ १४-४०-२५ (९३४७१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

आश्वमेधिकपर्व - अध्याय ०४१
॥ श्रीः ॥
१४.४१. अध्यायः ४१

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति महदहङ्कारतत्वनिरूपणम् ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
अव्यक्तात्पूर्वमुत्पन्नो महानात्मा महामतिः ।
आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते ॥१४-४१-१ (९३४७२)
महानात्मा मतिर्विष्णुर्जिष्णुः शंभुश्च वीर्यवान् ।
बुद्धिः प्रज्ञोपलब्धिश्च तता ख्यातिर्धृतिःस्मृतिः। १४-४१-२ (९३४७३)
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते ।
तं जानन्ब्राह्मणो विद्वान्प्रमोहं नाधिगच्छति ॥१४-४१-३ (९३४७४)
सर्वतःपाणिपादं च सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वं व्याप्यवतिष्ठति ॥१४-४१-४ (९३४७५)
महाप्रभावः पुरुषः सर्वस्य हृदि निष्ठितः ।
अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ॥१४-४१-५ (९३४७६)
तत्र बुद्धिमतां लोके सद्भावनिरताश्च ये ।
ध्यानिनो नित्ययोगाश्च सत्यसन्धा जितेन्द्रियाः ॥१४-४१-६ (९३४७७)
ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः ।
प्रसन्नमनसो धीरा निर्ममा निरहंक्रियाः ॥१४-४१-७ (९३४७८)
विमुक्ताः सर्व एवैते महत्त्वमुपयान्त्युत ।
आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम् ॥१४-४१-८ (९३४७९)
अहङ्कारात्प्रसूतानि महाभूतानि पञ्च वै ।

पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ १४-४१-९ (९३४८०)
तेषु भूतानि युज्यन्ते महाभूतेषु पञ्चसु ।
ते शब्दस्पर्शरूपेषु रसगन्धक्रियासु च ॥ १४-४१-१० (९३४८१)
महाभूतविनाशान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणभृतां धीरा महदुत्पद्यते भयम् ॥ १४-४१-११ (९३४८२)
स धीरः सर्वलोकेषु न मोहमधिगच्छति ।
विष्णुरेवादिसर्गेषु स्वयंभूर्भवति प्रभुः ॥ १४-४१-१२ (९३४८३)
एवं हि यो वेद गुहाशयं प्रभुं
परं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान्बुद्धिमतीत्य तिष्ठति ॥ १४-४१-१३ (९३४८४)
य उत्पन्नो महान्पूर्वमहङ्कारः स उच्यते ।
अहमित्येव सम्भूतो द्वितीयः सर्ग उच्यते ॥ १४-४१-१४ (९३४८५)
अहङ्कारश्च भूतादिर्वैकारिक इति स्मृतः ।
तेजसश्चेतना धातुः प्रजासर्गः प्रजापतिः ॥ १४-४१-१५ (९३४८६)
देवानां प्रभवो देवो मनसश्च त्रिलोककृत् ।
अहमित्येव तत्सर्वमभिमानः स उच्यते ॥ १४-४१-१६ (९३४८७)
अध्यात्मज्ञानतृप्तानां मुनीनां भावितात्मनाम् ।
स्वाध्यायक्रतुसिद्धानामेष लोकः सनातनः ॥ १४-४१-१७ (९३४८८)
अहङ्कारेणाहरतो गुणानिमा-
न्भूतादिरेवं सृजते स भूतकृत् ।
वैकारिकः सर्वमिदं विचेष्टते
स्वतेजसा रञ्जयते जगत्तथा ॥ ॥ १४-४१-१८ (९३४८९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

आश्वमेधिकपर्व - अध्याय ०४२
॥ श्रीः ॥
१४.४२. अध्यायः ४२

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रत्यहङ्कारतत्वाद्भूतादिसृष्टिप्रकारकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
अहङ्कारात्प्रसूतानि महाभूतानि पञ्च वै ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ १४-४२-१ (९३४९०)
तेषु भूतानि मुह्यन्ति महाभूतेषु पञ्चसु ।
शब्दस्पर्शनरूपेषु रसगन्धक्रियासु च ॥ १४-४२-२ (९३४९१)
महाभूतविकारान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणभूतां धीरा महदुत्पद्यते भयम् ॥ १४-४२-३ (९३४९२)
यद्यस्माज्जायते भूतं तत्र तत्प्रविलीयते ।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ॥ १४-४२-४ (९३४९३)
ततः प्रलीने सर्वस्मिन्भूते स्थावरजङ्गमे ।
स्मृतिमन्तस्तदा धीरा न लीयन्ते कदाचन ॥ १४-४२-५ (९३४९४)
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
क्रियाः करणयुक्ताः स्युरनित्या मोहसंज्ञिताः ॥ १४-४२-६ (९३४९५)
लोभप्रजनसम्भूता निर्विशेषा ह्यकिञ्चनाः ।
मांसशोणितसङ्घाता अन्योन्यस्योपजीविनः ॥ १४-४२-७ (९३४९६)
बहिरात्मान इत्येते दीनाः कृपणजीविनः ।
प्राणापानावुदानश्च समानो व्यान एव च ॥ १४-४२-८ (९३४९७)
अन्तरात्मनि चाप्येते नियताः पञ्च वायवः ।
वाङ्मनोबुद्धिरित्येभिः सार्धमष्टात्मकं जगत् ॥ १४-४२-९ (९३४९८)
त्वग्घ्राणश्रोत्रचक्षूंषि रसना वाक्च संयताः ।
विशुद्धं च मनो यस्य बुद्धिश्चाव्यभिचारिणी ॥ १४-४२-१० (९३४९९)
अष्टौ यस्याग्नयो ह्येते दहन्तेऽहङ्क्रियाः सदा ।
स तद्ब्रह्म शुभं याति तस्माद्भूयो न विद्यते ॥ १४-४२-११ (९३५००)
एकादश च यान्याहुरिन्द्रियाणि विशेषतः ।
अहङ्कारात्प्रसूतानि तानि वक्ष्यामि नामतः ॥ १४-४२-१२ (९३५०१)
श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पादौ पायुरुपस्थश्च हस्तौ वाग्दशमी भवेत् ॥ १४-४२-१३ (९३५०२)
इन्द्रियग्राम इत्येष मन एकादशं भवेत् ।
एतं ग्रामं जयेत्पूर्वं ततो ब्रह्म प्रकाशते ॥ १४-४२-१४ (९३५०३)
बुद्धीन्द्रियाणि पञ्चाहुः पञ्च कर्मेन्द्रियाणि च ।
श्रोत्रादीन्यपि पञ्चाहुर्बुद्धियुक्तानि तत्त्वतः ॥ १४-४२-१५ (९३५०४)
अविशेषाणि चान्यानि कर्मयुक्तानि यानि तु ।
उभयत्र मनो ज्ञेयं बुद्धिस्तु द्वादशी भवेत् ॥ १४-४२-१६ (९३५०५)
इत्युक्तानीन्द्रियाण्येतान्येकादश यथाक्रमम् ।
मन्यन्ते कृतमित्येवं विदित्वा तानि पण्डिताः ॥ १४-४२-१७ (९३५०६)

ग्त्रीणि स्थानानि भूतानां चतुर्थं नोपपद्यते।'
स्थलमापस्तथाऽऽकाशं जन्म चापि चतुर्विधम् ॥ १४-४२-१८ (९३५०७)
अण्डजोद्भिज्जसंस्वेदजरायुजमथापि च ।
चतुर्धा जन्म इत्येतद्भूतग्रामस्य लक्ष्यते ॥१४-४२-१९ (९३५०८)
अपराण्यथ भूतानि खेचराणि तथैव च ।
अण्डजानि विजानीयात्सर्वांश्चैव सरीसृपान् ॥१४-४२-२० (९३५०९)
स्वेदजाः कृमयः प्रोक्ता जन्तवश्च यथाक्रमम् ।
जन्मद्वितीयमित्येतज्जघन्यतरमुच्यते ॥१४-४२-२१ (९३५१०)
भित्त्वा तु पृथिवीं यानि जायन्ते कालपर्ययात् ।
उद्भिज्जानि च तान्याहुर्भूतानि द्विजसत्तमाः ॥१४-४२-२२ (९३५११)
द्विपादबहुपादानि तिर्यग्गतिमतीनि च ।
जरायुजानि भूतानि विकृतान्यपि सत्तमाः ॥१४-४२-२३ (९३५१२)
द्विविधा खलु विज्ञेया ब्रह्मयोनिः सनातना ।
तपः कर्म च यत्पुण्यमित्येष विदुषां नयः ॥१४-४२-२४ (९३५१३)
विविधं कर्म विज्ञेयमिज्या दानं च तन्मखे ।
वेदस्याध्ययनं पुण्यमिति वृद्धानुशासनम् ॥१४-४२-२५ (९३५१४)
एतद्यो वेत्ति विधिवत्स मुक्तः स्याद्विद्वजर्षभाः ।
विमुक्तः सर्वपापेभ्य इति चैव निबोधत ॥१४-४२-२६ (९३५१५)
ग्अतः परं प्रवक्ष्यामि सर्वं विविधमिन्द्रियम् ॥' १४-४२-२७ (९३५१६)
आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते ।
अधिभूतं तथा शब्दो दिशश्चात्राधिदैवतम् ॥१४-४२-२८ (९३५१७)
द्वितीयं मारुतं भूतं त्वगध्यात्मं च विश्रुतम् ।
स्प्रष्टव्यमधिभूतं तु विद्युत्तत्राधिदैवतम् ॥१४-४२-२९ (९३५१८)
तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममिष्यते ।
अधिभूतं ततो रूपं सूर्यस्तत्राधिदैवतम् ॥१४-४२-३० (९३५१९)
चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममिष्यते ।
अधिभूतं रसश्चात्र सोमस्तत्राधिदैवतम् ॥१४-४२-३१ (९३५२०)
पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते ।
अधिभूतं तथा गन्धो वायुस्तत्रादिदैवतम् ॥१४-४२-३२ (९३५२१)
एषु पञ्चसु भूतेषु चतुष्टयविधिः स्मृतः ।
अतः परं प्रवक्ष्यामि सर्वं त्रिविधमिन्द्रियम् ॥१४-४२-३३ (९३५२२)
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्वदर्शिनः ।
अधिभूतं तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥१४-४२-३४ (९३५२३)
अवाग्गतिरपानश्च पायुरध्यात्ममिष्यते ।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ॥१४-४२-३५ (९३५२४)
प्रजनः सर्वभूतानामुपस्थोऽध्यात्ममुच्यते ।

अधिभूतं तथा शुक्रं दैवतं च प्रजापतिः ॥१४-४२-३६ (९३५२५)
हस्तावध्यात्ममित्याहुरद्यात्मविदुषो जनाः ।
अधिभूतं च कर्माणि शक्रस्तत्राधिदैवतम् ॥१४-४२-३७ (९३५२६)
वैश्वदेवी मनःपूर्वा वागध्यात्ममिहोच्यते ।
वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतम् ॥१४-४२-३८ (९३५२७)
अध्यात्मं मन इत्याहुः पञ्चभूतात्मचारकम् ।
अधिभूतं च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम् ॥१४-४२-३९ (९३५२८)
अहङ्कारस्तथाऽध्यात्मं सर्वसंसारकारणम् ।
अभिमानोऽधिभूतं च रुद्रस्तत्राधिदैवतम् ॥१४-४२-४० (९३५२९)
अध्यात्मं बुद्धिरित्याहुः षडिन्द्रियविचारिणी ।
अधिभूतं तु विज्ञेयमहस्तत्राधिदैवतम् ॥१४-४२-४१ (९३५३०)
यथावदध्यात्मविधिरेष वः कीर्तितो मया ।
ज्ञानमस्य हि धर्मज्ञाः प्राप्तं ज्ञानवतामिह ॥१४-४२-४२ (९३५३१)
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च ।
सर्वाण्येतानि संधाय मनसा सम्प्रधारयेत् ॥१४-४२-४३ (९३५३२)
क्षीणे मनसि सर्वस्मिन्न जन्मसुखमिष्यते ।
ज्ञानसम्पन्नसत्त्वानां तत्सुखं विदुषां मतम् ॥१४-४२-४४ (९३५३३)
अतः परं प्रवक्ष्यामि सूक्ष्मभावकरीं शिवाम् ।
निवृत्तिं सर्वभूतेषु मृदुना दारुणेन वा ॥१४-४२-४५ (९३५३४)
गुणागुणमनासङ्गमेकचर्यमनन्तरम् ।
एतद्ब्राह्मणजं वृत्तमाहुरेकपदं सुखम् ॥१४-४२-४६ (९३५३५)
विद्वान्कूर्म इवाङ्गानि कामान्संहृत्य सर्वशः ।
विरजाः सर्वतो मुक्तो यो नरः स सुखी सदा ॥१४-४२-४७ (९३५३६)
कामानात्मनि संयम्य क्षीणतृष्णः समाहितः ।
सर्वभूतसुहृन्मैत्रो ब्रह्मभूयाय कल्पते ॥१४-४२-४८ (९३५३७)
इन्द्रियाणां निरोधेन सर्वेषां विषयैषिणाम् ।
मुनेर्जनपदत्यागादध्यात्माग्निः समिध्यते ॥१४-४२-४९ (९३५३८)
यथाऽग्निरिन्धनैरिद्धो महाज्योतिः प्रकाशते ।
तथेन्द्रियनिरोधेन महानात्मा प्रकाशतदे ॥१४-४२-५० (९३५३९)
यदा पश्यति भूतानि प्रसन्नात्माऽऽत्मनो हृदि ।
स्वयंज्योतिस्तदासूक्ष्मात्सूक्ष्मं प्राप्नोत्यनुत्तमम् ॥१४-४२-५१ (९३५४०)
अग्नी रूपं रसं स्रोतो वायुः स्पर्शनमेव च ।
मही गन्धधरा घ्राणमाकाशः श्रवणं तथा ।
ग्दृश्यमादित्यमेवाहुरध्यात्मविदुषो जनाः ॥' १४-४२-५२ (९३५४१)
रोगशोकसमाविष्टं पञ्चस्रोतःसमावृतम् ।
पञ्चभूतसमायुक्तं नवद्वारं द्विदैवतम् ॥१४-४२-५३ (९३५४२)

रजस्वलमथादृश्यं त्रिगुणं सप्तधातुकम् ।
संसर्गाभिरतं मूढं शरीरमिति धारणा ॥ १४-४२-५४ (९३५४३)
दुश्चरं जीवलोकेऽस्मिन्सत्वं प्रति समाश्रितम् ।
एतदेव हि लोकेऽस्मिन्कालचक्रं प्रवर्तते ॥ १४-४२-५५ (९३५४४)
एतन्महार्णवं घोरमगाधं मोहसंज्ञितम् ।
विसृजन्संक्षिपेच्चैव मोहयन्स्वापयञ्जगत् ॥ १४-४२-५६ (९३५४५)
कामं क्रोधं भयं लोभमभिद्रोहमथानृतम् ।
इन्द्रियाणां निरोधेन सततस्त्यजति दुस्त्यजान् ॥ १४-४२-५७ (९३५४६)
यस्यैते निर्जिता लोके त्रिगुणाः पञ्चधातवः ।
व्योम्नि तस्य परं स्थानमानन्तमथ लक्ष्यते ॥ १४-४२-५८ (९३५४७)
पञ्चेन्द्रियमहाकूलां मनःस्रोतोभयावहाम् ।
नदीं मोहह्रदां तीर्त्वा कामक्रोधावुभौ जयेत् ॥ १४-४२-५९ (९३५४८)
स सर्वदोषनिर्मुक्तस्ततः पश्यति तत्परम् ।
मनो मनसि सन्धाय पश्यन्नात्मानमात्मनि ॥ १४-४२-६० (९३५४९)
सर्ववित्सर्वभूतेषु द्रक्ष्यत्यात्मानमात्मनि ।
एकधा बहुधा चैव विकुर्वाणस्ततस्ततः ॥ १४-४२-६१ (९३५५०)
ध्रुवं पश्यति रूपाणि दीपाद्दीपशतं यथा ।
स वै विष्णुश्च मित्रश्च वरुणोऽग्निः प्रजापतिः ॥ १४-४२-६२ (९३५५१)
स हि धाता विधाता च स प्रभुः सर्वतोमुखः ।
हृदयं सर्वभूतानां महानात्मा प्रकाशते ॥ १४-४२-६३ (९३५५२)
तं विप्रसङ्घाश्च सुरासुराश्च
यक्षाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव सदा स्तुवन्ति ॥ ॥ १४-४२-६४ (९३५५३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४२-७ लोकप्रजनसंयुक्ता इति क ट पाठः ॥
७-४२-९ इत्युक्ता इति क पाठः ॥
७-४२-२५ जातस्याध्ययनं पुण्यमिति झ पाठः ॥
७-४२-६४ पितरश्च सिद्धा इति क पाठः ॥

आश्वमेधिकपर्व - अध्याय ०४३
॥ श्रीः ॥

१४.४३. अध्यायः ४३

अथानुगीतापर्व-२

Mahabharata - Ashvamedhika Parva - Chapter Topics

ब्रह्मणा महर्षीन्प्रति मनुष्येषु क्षत्रियाणां रजोगुणकार्यबलप्रधानतया तेषां सत्वप्रधानब्राह्मणरक्षणस्य कर्तव्यत्वकथनप्रसङ्गेन तत्तज्जातिश्रेष्ठवस्तुकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
मनुष्याणां तु राज्यः क्षत्रियो मध्यमो गुणः ।
कुञ्जरो वाहनानां च सिंहश्चारण्यवासिनाम् ॥ १४-४३-१ (९३५५४)
अविः पशूनां सर्वेषामहिस्तु बिलवासिनाम् ।
गवां गोवृषभश्चैव स्त्रीणां पुरुष एव च ॥ १४-४३-२ (९३५५५)
न्यग्रोधो जम्बुवृक्षश्च पिप्पलः शाल्मलिस्तथा ।
शिंशपा मेषशृङ्गश्च तथा कीचकवेणवः ॥ १४-४३-३ (९३५५६)
एते द्रुमाणां राजानो गणानां मरुतस्तथा ।
हिमवान्पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान् ॥ १४-४३-४ (९३५५७)
श्वेतो नीलश्च भासश्च राष्ट्रवांश्चैव पर्वतः ।
भृशस्कन्धो महेन्द्रश्च माल्यवान्पर्वतस्तथा ॥ १४-४३-५ (९३५५८)
एते पर्वतराजानो गणानां मरुतस्तथा ।
सूर्यो ग्रहाणामधिपो नक्षत्राणां च चन्द्रमाः ॥ १४-४३-६ (९३५५९)
यमः पितॄणामधिपः सरितामथ सागरः ।
अंभसां वरुणो राजा मरुतामिन्द्र उच्यते ॥ १४-४३-७ (९३५६०)
अर्कोऽधिपतिरुष्णानां ज्योतिषामिन्दुरुच्यते ।
अग्निर्भूतपतिर्नित्यं ब्राह्मणानां बृहस्पतिः ॥ १४-४३-८ (९३५६१)
ओषधीनां पतिः सोमो विष्णुर्बलवतां वरः ।
त्वष्टाऽधिनां पतिः सोमो विष्णुर्बलवतां वरः। १४-४३-९ (९३५६२)
दक्षिणानां तथा यज्ञो वेदानामृच एव च ।
दिशामुदीची विप्राणां सोमो राजा प्रतापवान् ॥ १४-४३-१० (९३५६३)
कुबेरः सर्वरत्नानां देवतानां पुरंदरः ।
एष भूताधिपः सर्गः प्रजानां च प्रजापतिः ॥ १४-४३-११ (९३५६४)
सर्वेषामेव भूतानामहं ब्रह्ममयो महान् ।
भूतं परतरं मत्तो विष्णोर्वाऽपि न विद्यते ॥ १४-४३-१२ (९३५६५)
राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् ।

ईश्वरं तं विजानीमः स विभुः स प्रजापतिः ॥१४-४३-१३ (९३५६६)
नरकिन्नरयक्षाणां गन्धर्वोरगरक्षसाम् ।
देवदानवनागानां सर्वेषामीश्वरो हि सः ॥१४-४३-१४ (९३५६७)
भगदेवानुयातानां सर्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्वती हि सा ॥१४-४३-१५ (९३५६८)
उमां देवीं विजानीध्वं नारीणामुत्तमां शुभाम् ।
रतीनां वसुमत्यस्तु स्त्रीणामप्सरसस्तथा ॥१४-४३-१६ (९३५६९)
धर्मिकामाश्च राजानो ब्राह्मणा धर्मसेतवः ।
तस्माद्राजा द्विजातीनां प्रयतेतेह रक्षणे ॥१४-४३-१७ (९३५७०)
राज्ञां हि विषये येषामवसीदन्ति साधवः ।
हीनास्ते स्वगुणैः सर्वैः प्रेत्यावाङ्मार्गगामिनः ॥१४-४३-१८ (९३५७१)
राज्ञां हि विषये येषां साधवः परिरक्षिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते प्रेत्य चानन्दमेव च ॥१४-४३-१९ (९३५७२)
प्राप्नुवन्ति महात्मान इति वित्त द्विजर्षभाः ।
अत ऊर्ध्वं प्रवक्ष्यामि नियतं धर्मलक्षणम् ॥१४-४३-२० (९३५७३)
अहिंसालक्षणो धर्मो हिंसा चाधर्मलक्षणा ।
प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः ॥१४-४३-२१ (९३५७४)
शब्दलक्षणमाकाशं वायुस्तु स्पर्शलक्षणः ।
ज्योतिषां लक्षणं रूपमापश्च रसलक्षणाः ॥१४-४३-२२ (९३५७५)
धारिणी सर्वभूतानां पृथिवी गन्धलक्षणा ।
स्वरव्यञ्जनसंस्कारा भारती शब्दलक्षणा ॥१४-४३-२३ (९३५७६)
मनसो लक्षणं चिन्ता तथोक्ता बुद्धिरन्वयात् ।
मनसा चिन्तितानर्थान्बुद्ध्या चेह व्यवस्यति ॥१४-४३-२४ (९३५७७)
बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः ।
लक्षणं मनसो ध्यानमव्यक्तं साधुलक्षणम् ॥१४-४३-२५ (९३५७८)
प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ॥१४-४३-२६ (९३५७९)
संन्यासी ज्ञानसंयुक्तः प्राप्नोति परमां गतिम् ।
अतीतो द्वन्द्वमभ्येति तमोमृत्युजरातिगः ॥१४-४३-२७ (९३५८०)
धर्मलक्षणसंयुक्तमुक्तं वो विधिवन्मया ।
गुणानां ग्रहणं सम्यग्वक्ष्याम्यहमतः परम् ॥१४-४३-२८ (९३५८१)
पार्तिवो यस्तु गन्धो वै घ्राणेन हि स गृह्यते ।
प्राणस्यश्च तथा वायुर्गन्धज्ञाने विधीयते ॥१४-४३-२९ (९३५८२)
अपां धातू रसो नित्यं जिह्वया स तु गृह्यते ।
जिह्वास्थश्च तथा सोमो रसज्ञाने विधीयते ॥१४-४३-३० (९३५८३)
तेजसस्तु गुणो रूपं चक्षुषा तच्च गृह्यते ।

चक्षुःस्थश्च ततादित्यो रूपज्ञाने विधीयते ॥१४-४३-३१ (९३५८४)
वायव्यस्तु सदा स्पर्शस्त्वचा प्रज्ञायते च सः ।
त्वक्स्थश्चैव सदा वायुः स्पर्सने स विधीयते ॥१४-४३-३२ (९३५८५)
आकाशस्य गुणो घोषः श्रोत्रेण च स गृह्यते ।
श्रोत्रस्थाश्च दिशः सर्वाः शब्दज्ञाने प्रकीर्तिताः ॥१४-४३-३३ (९३५८६)
मनसश्च गुणश्चिन्ता प्रज्ञया स तु गृह्यते ।
हृदिस्थश्चेतनो धातुर्मनोज्ञाने विधीयते ॥१४-४३-३४ (९३५८७)
बुद्धिरध्यवसायेन ध्यानेन च महांस्तथा ।
निश्चित्य ग्रहणाद्व्यक्तमव्यक्तं नात्र संशयः ॥१४-४३-३५ (९३५८८)
अलिङ्गग्रहणो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ।
तस्मादलिङ्गः क्षेत्रज्ञः केवलं ज्ञानलक्षणः ॥१४-४३-३६ (९३५८९)
अव्यक्तं क्षेत्रमुद्दिष्टं गुणानां प्रभवाप्ययम् ।
सदा पश्याम्यहं लीनं विजानामि शृणोमि च ॥१४-४३-३७ (९३५९०)
पुरुषस्तद्विजानीते तस्मात्क्षेत्रज्ञ उच्यते ।
गुणवृत्तं तथा कृत्स्नं क्षेत्रज्ञः परिपश्यति ॥१४-४३-३८ (९३५९१)
आदिमद्यावसानं तत्सृज्यमानमचेतनम् ।
न गुणा विदुरात्मानं सृज्यमानाः पुनःपुनः ॥१४-४३-३९ (९३५९२)
न सत्यं वेद वै कश्चित्क्षेत्रज्ञस्त्वेव विन्दति ।
गुणानां गुणभूतानां यत्परं परतो महत् ॥१४-४३-४० (९३५९३)
तस्माद्गुणांश्च तत्वं च परित्यज्येह तत्ववित् ।
क्षीणदोषो गुणान्हित्वा क्षेत्रज्ञं प्रविशत्यथ ॥१४-४३-४१ (९३५९४)
निर्द्वन्द्वो निर्नमस्कारो निःस्वधाकार एव च ।
अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विधिः ॥ ॥१४-४३-४२ (९३५९५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४३-२ आखुश्च बिलवासिनामिति क थ पाठः ॥
७-४३-७ राजासत्त्वानां मित्र उच्यत इति क ट थ ॥।
७-४३-८ उष्णानां देवानामिन्द्र उच्यत इति क ट थ पाठः ॥
७-४३-१५ भगदेवाः कामुकास्तैरनुयातानामनुसृतानां स्त्रीणां सर्वासां
मध्ये माहेश्वरी वामलोचनेति सम्बन्धः ॥
भद्रादेवाभिजातानां सर्वेषां वारिजेक्षणेति क ट पाठः ॥
७-४३-१६ रतीनां प्रीतिसुखानाम् । वसुमत्यः
धनवत्यः। धनलाभगर्वितं यत्प्रीतिसुखं तदेव महदित्यर्थः ॥

७-४३-१७ वर्णक्रमाश्च राजान इति क ट थ पाठः ॥
७-४३-२५ लक्षणं महतो ध्यानमिति क पाठः ॥

आश्वमेधिकपर्व - अध्याय ०४४
॥ श्रीः ॥
१४.४४. अध्यायः ४४

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति स्वस्वजातिषु श्रेष्ठवस्तु प्रतिपादनपूर्वकं ज्ञानस्याविनाशित्वकथनेन तस्यैव श्रेयःसाधनत्वोक्तिः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
यदादिमध्यपर्यन्तं ग्रहणोपायमेव च ।
नामलक्षणसंयुक्तं सर्वं वक्ष्यामि तत्त्वतः ॥ १४-४४-१ (९३५९६)
अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयः स्मृताः ।
श्रवणादीनि ऋक्षाणि ऋतवः शिशिरादयः ॥ १४-४४-२ (९३५९७)
भूमिरादिस्तु गन्धानां रसानामाप एव च ।
रूपाणामादिरग्निस्तु स्पर्शादिर्वायुरुच्यते ॥ १४-४४-३ (९३५९८)
शब्दस्यादिस्तथाऽऽकाशमेष भूतकृतो गुणः ।
अतः परं प्रवक्ष्यामि भूतानामादिमुत्तमम् ॥ १४-४४-४ (९३५९९)
आदित्यो ज्योतिषामादिरग्निर्भूतादिरुच्यते ।
सावित्री सर्वविद्यानां देवतानां प्रजापतिः ॥ १४-४४-५ (९३६००)
ओङ्कारः सर्ववेदानां वचसां प्राण एव च ।
यदस्मिन्नियतं लोके सर्वं सावित्रमुच्यते ॥ १४-४४-६ (९३६०१)
गायत्री च्छन्दसामादिः प्रजानां सर्ग उच्यते ।
गावश्चतुष्पदामादिर्मनुष्याणां द्विजातयः ॥ १४-४४-७ (९३६०२)
श्येनः पतत्रिणामादिर्यज्ञानां हुतमुत्तमम् ।
प्रसर्पिणां तु सर्वेषां ज्येष्ठः सर्पो द्विजोत्तमाः ॥ १४-४४-८ (९३६०३)
कृतमादिर्युगानां च सर्वेषां नात्र संशयः ।
हिरण्यं सर्वरत्नानामोषधीनां यवास्तथा ॥ १४-४४-९ (९३६०४)
सर्वेषां भक्ष्यभोज्यानामन्नं परममुच्यते ।
द्रवाणां चैव सर्वेषां पेयानामाप उत्तमाः ॥ १४-४४-१० (९३६०५)
स्थावराणां तु भूतानां सर्वेषामविशेषतः ।

ब्रह्मक्षेत्रं सदा पुण्यं प्लक्षः प्रवरजः स्मृतः ॥१४-४४-११ (९३६०६)
अहं प्रजापतीनां च सर्वेषां नात्र संशयः ।
मम विष्णुरचिन्त्यात्मा स्वयंभूरिति संस्मृतः ॥१४-४४-१२ (९३६०७)
पर्वतानां महामेरुः सर्वेषामग्रजः स्मृतः ।
दिशां च प्रदिशां चोर्ध्वं दिक्पूर्वा प्रथमा तथा ॥१४-४४-१३ (९३६०८)
तथा त्रिपथगा गङ्गा नदीनामग्रजा स्मृता ।
तथा सरोदपानानां सर्वेषां सागरोऽग्रजः ॥१४-४४-१४ (९३६०९)
देवदानवभूतानां पिशाचोरगरक्षसाम् ।
नरकिन्नरयक्षाणां सर्वेषामीश्वरः प्रभुः ॥१४-४४-१५ (९३६१०)
आदिर्विश्वस्य जगतो विष्णुर्ब्रह्ममयो महान् ।
ततः परतरं यस्मात्त्रैलोक्ये नेह विद्यते ॥१४-४४-१६ (९३६११)
आश्रमाणां च सर्वेषां गार्हस्थ्यं नात्र संशयः ।
लोकानामादिरव्यक्तं सर्वस्यान्तस्तदेव च ॥१४-४४-१७ (९३६१२)
अहान्यस्तमयान्तानि उदयान्ता च शर्वरी ।
सुखस्यान्तं सदा दुःखं दुःखस्यान्तं सदा सुखम ॥१४-४४-१८ (९३६१३)
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगाश्च वियोगान्ता मरणान्तं च जीवितम् ॥१४-४४-१९ (९३६१४)
सर्वं कृतं विनाशान्तं जातस्य मरणं ध्रुवम् ।
अशाश्वतं हि लोकेऽस्मिन्सदा स्थावरजङ्गमम् ॥१४-४४-२० (९३६१५)
इष्टं दत्तं तपोऽधीतं व्रतानि नियमाश्च ये ।
सर्वमेतद्विनाशान्तं ज्ञानस्यान्तो न विद्यते ॥१४-४४-२१ (९३६१६)
तस्माज्ज्ञानेन शुद्धेन प्रशान्तात्मा जितेन्द्रियः ।
निर्ममो निरहंकारो मुच्यते सर्वपाप्मभिः ॥ ॥१४-४४-२२ (९३६१७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४४-२ श्रविष्ठादीनि सर्वाणिति क ट थ पाठः ॥
७-४४-३ रूपाणां ज्योतिरादित्य इति झ पाठः ॥
७-४४-८ हुतं अग्नौ ब्राह्मणे वा देवतोद्देशेन दत्तम् ॥
७-४४-११ ब्रह्मवृक्षः सदा पुण्यः इति क थ पाठः ॥
७-४४-१४ सरोदपानानां सरसां कूपादीनां च
। संधिरार्षः। तथाचाश्वो वाहनानां सर्वेषां सागरोग्रज इति
क पाठः ॥
७-४४-१५ ईश्वरः रुद्रः ॥

आश्वमेधिकपर्व - अध्याय ०४५
॥ श्रीः ॥
१४.४५. अध्यायः ४५

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति शरीरस्य कालचक्रवत्सर्वनाशकत्वोक्तिपूर्वकं गृहस्थधर्मानुष्ठानस्य श्रेयःसाधनत्वोक्तिः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
बुद्धिसारं मनस्तम्भमिन्द्रियग्रामबन्धनम् ।
महाभूतारविष्कम्भं निमेषपरिवेष्टनम् ॥ १४-४५-१ (९३६१८)
जराशोकसमाविष्टं व्याधिव्यसनसञ्चरम् ।
देशकालविचारीदं श्रमव्यायामनिःस्वनम् ॥ १४-४५-२ (९३६१९)
अहोरात्रपरिक्षेपं शीतोष्णपरिमण्डलम् ।
सुखदुःखान्तसंश्लेषं क्षुत्पिपासावकीलकम् ॥ १४-४५-३ (९३६२०)
छायातपविलेखं च निमेषोन्मेषविह्वलम् ।
शोकमोहजराकीर्णं वर्तमानमचेतनम् ॥ १४-४५-४ (९३६२१)
मासार्धमासगुणितं विषमं लोकसञ्चरम् ।
तमोनिचयपङ्कं च रजोवेगप्रवर्तकम् ॥ १४-४५-५ (९३६२२)
सत्त्वालङ्कारदीप्तं च गुणसंघातमण्डलम् ।
विरतिग्रहणाभीकं शोकसंहारवर्तनम् ॥ १४-४५-६ (९३६२३)
क्रियाकारणसंयुक्तं रागविस्तारमायतम् ।
लोभेप्सापरिविक्षोभं विविक्तज्ञानसम्भवम् ॥ १४-४५-७ (९३६२४)
भयमोहपरीवारं भूतसंमोहकारकम् ।
आनन्दप्रीतिचारं च कामक्रोधपरिग्रहम् ॥ १४-४५-८ (९३६२५)
महदादिविशेषान्तमव्यक्तं प्रभवाप्ययम् ।
मनोजवनमश्रान्तं कालचक्रं प्रवर्तते ॥ १४-४५-९ (९३६२६)
एतद्द्वन्द्वसमायुक्तं कालचक्रमचेतनम् ।
विसृजेत्संक्षिपेच्चापि बोधयेत्स्वापयेज्जगम् ॥ १४-४५-१० (९३६२७)
कालचक्रप्रवृत्तिं च निवृत्तिं चैव तत्त्वतः ।
यस्तु वेद नरो नित्यं न स भूतेषु मुह्यति ॥ १४-४५-११ (९३६२८)
विमुक्तः सर्वसङ्क्लेशैः सर्वद्वन्द्वातिगो मुनिः ।

विमुक्तः सर्वपापेभ्यः प्राप्नोति परमां गतिम् ॥१४-४५-१२ (९३६२९)
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः ॥१४-४५-१३ (९३६३०)
यः कश्चिदिह लोकेऽस्मिन्नाश्रमः परिकीर्तितः ।
तस्यान्तगमनं श्रेयः कीर्तिरेषा सनातनी ॥१४-४५-१४ (९३६३१)
संस्कारैः संस्कृतः पूर्वं यथावच्चरितव्रतः ।
जातौ गुणविशिष्टायां समावर्तेत वेदवित् ॥१४-४५-१५ (९३६३२)
स्वदारनिरतो नित्यं शिष्टाचारो जितेन्द्रियः ।
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेदिह ॥१४-४५-१६ (९३६३३)
देवतातिथिशिष्टाशी निरतो वेदकर्मसु ।
इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥१४-४५-१७ (९३६३४)
न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य गोचरः ॥१४-४५-१८ (९३६३५)
नित्यं यज्ञोपवीती स्याच्छुक्लवासाः शुचिव्रतः ।
नियतो यमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥१४-४५-१९ (९३६३६)
जितशिश्नोदरो मैत्रः शिष्टाचारसमन्वितः ।
वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ॥१४-४५-२० (९३६३७)
ग्त्रीणि धारयते नित्यं कमण्डलुमतन्द्रितः ।
एकमाचमनार्थाय एकं वै पादधावनम् ।
एकं शौचविधानार्थमित्येतत्त्रितयं तथा ॥' १४-४५-२१ (९३६३८)
अधीत्याध्यापनं कुर्यात्तथा यजनयाजने ।
दानं प्रतिग्रहं वाऽपि षड्गुणां वृत्तिमाचरेत् ॥१४-४५-२२ (९३६३९)
त्रीणि कर्माणि जानीत ब्राह्मणानां तु जीविकाः ।
याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥१४-४५-२३ (९३६४०)
अथ शेषाणि चान्यानि त्रीणि कर्माणि यानि तु ।
दानमध्ययनं यज्ञो धर्मयुक्तानि तानि तु ॥१४-४५-२४ (९३६४१)
तेष्वप्रमादं कुर्वीत त्रिषु कर्मसु धर्मवित् ।
दान्तो मैत्रः क्षमायुक्तः सर्वभूतसमो मुनिः ॥१४-४५-२५ (९३६४२)
सर्वमेतद्यथाशक्ति विप्रो निर्वर्तयञ्शुचिः ।
एवं युक्तो जयेत्स्वर्गं गृहस्थः संशितव्रतः ॥ ॥१४-४५-२६ (९३६४३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४५-१ इन्द्रियग्रामवर्धनमिति क ट थ पाठः ॥

७-४५-८ अनन्तप्रतिसारं चेति ट पाठः ॥
७-४५-१० मोहयेत्सामरं जगदिति क ट थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०४६
॥ श्रीः ॥
१४.४६. अध्यायः ४६

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति ब्रह्मचारिवनस्थधर्मनिरूपणपूर्वकं
तदनुष्ठानस्य श्रेयःसाधनत्वोक्तिः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
एवमेतेन मार्गेण पूर्वोक्तेन यथाविधि ।
अधीतवान्यथाशक्ति तथैव ब्रह्मचर्यवान् ॥ १४-४६-१ (९३६४४)
स्वधर्मनिरतो विद्वान्सर्वेन्द्रिययतो मुनिः ।
गुरोः प्रियहिते युक्तः सत्यधर्मपरः शुचिः ॥ १४-४६-२ (९३६४५)
गुरुणा समनुज्ञातो भुञ्जीतान्नमकुत्सयन् ।
हविष्यभैक्ष्यभुक् चापि स्थानासनविहारवान् ॥ १४-४६-३ (९३६४६)
द्विकालमग्निं जुह्वानः शुचिर्भूत्वा समाहितः ।
धारयीत सदा दण्डं बैल्वं पालाशमेव वा ॥ १४-४६-४ (९३६४७)
क्षौमं कार्पासिकं वाऽपि मृगाजिनमथापि वा ।
सर्वं काषायरक्तं वा वासो वाऽपि द्विजस्य ह ॥ १४-४६-५ (९३६४८)
मेखला च भवेन्मौञ्जी जटो नित्योदकस्तथा ।
यज्ञोपवीती स्वाध्यायी अलुप्तनियतव्रतः ॥ १४-४६-६ (९३६४९)
पूताभिश्च तथैवाद्भिः सदा दैवततर्पणम् ।
भावेन नियतः कुर्वन्ब्रह्मचारी प्रशस्यते ॥ १४-४६-७ (९३६५०)
एवं युक्तो जयेत्स्वर्गमूर्ध्वरेताः समाहितः ।
न संसरति जातीषु परमं स्थानमाश्रितः ॥ १४-४६-८ (९३६५१)
संस्कृतः सर्वसंस्कारैस्तथैव ब्रह्मचर्यवान् ।
ग्रामान्निष्क्रम्य चारण्ये मुनिः प्रव्रजितो वसेत् ॥ १४-४६-९ (९३६५२)
चर्मवल्कलसंवासी सायं प्रातरुपस्पृशेत् ।
अरण्यगोचरो नित्यं न ग्रामं प्रविशेत्पुनः ॥ १४-४६-१० (९३६५३)
अर्चयन्नतिथीन्काले दद्याच्चापि प्रतिश्रयम् ।

फलपत्रावरैर्मूलैः श्यामाकेन च वर्तयन् ॥१४-४६-११ (९३६५४)
स नित्यमुदकं वायुं सर्वं वानेयमाश्रयेत् ।
प्राश्नीयादानुपूर्व्येण यथादीक्षमतन्द्रितः ॥१४-४६-१२ (९३६५५)
समूलफलशाकाद्यैरर्चेदतिथिमागतम् ।
यद्भक्षः स्यात्ततो दद्याद्भिक्षां नित्यमतन्द्रितः ॥१४-४६-१३ (९३६५६)
देवतातिथिपूर्वं च सदा प्राश्नीत वाग्यतः ।
अस्कन्दितमनाश्चैव लघ्वाशी देवताश्रयः ॥१४-४६-१४ (९३६५७)
दान्तो मैत्रः क्षमायुक्तः कशाञ्शमश्रु च धारयन् ।
जुह्वन्स्वाध्यायशीलश्च सत्यधर्मपरायणः ॥१४-४६-१५ (९३६५८)
न्यस्तदेहः सदा दक्षो वननित्यः समाहितः ।
एवं युक्तो जयेत्स्वर्गं वानप्रस्थो जितेन्द्रियः ॥१४-४६-१६ (९३६५९)
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथवा पुनः ।
य इच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत् ॥१४-४६-१७ (९३६६०)
अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत् ।
सर्वभूतहितो मैत्रः सर्वेन्द्रिययतो मुनिः ॥१४-४६-१८ (९३६६१)
अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया ।
कृत्वा प्राह्णे चरेद्भैक्ष्यं विधूमे भुक्तवज्जने ॥१४-४६-१९ (९३६६२)
वृत्ते शरावसम्पाते भैक्ष्यं लिप्सेत मोक्षवित् ।
लाभेन च न हृष्येत नालाभे विमना भवेत् ।
न चातिभिक्षां भिक्षेत केवलं प्राणयात्रिकः ॥ १४-४६-२० (९३६६३)
यात्रार्थी कालमाकाङ्क्षंश्चरेद्भैक्ष्यं समाहितः ।
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः ॥ १४-४६-२१ (९३६६४)
अभिपूजितलाभाद्धि विजुगुप्सेत भिक्षुकः ।
भुक्तान्यन्नानि तिक्तानि कषायकटुकानि च ॥१४-४६-२२ (९३६६५)
नास्वादयीत भुञ्जानो रसांश्च मधुरांस्तथा ।
यात्रामात्रं च भुञ्जीत केवलं प्राणधारणम् ॥१४-४६-२३ (९३६६६)
असंरोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित् ।
न चान्यमन्नं लिप्सेत भिक्षमाणः कथञ्चन ॥१४-४६-२४ (९३६६७)
न सन्निकाशयेद्धर्मं विविक्ते चारजाश्चरेत् ।
शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा ॥१४-४६-२५ (९३६६८)
प्रतिश्रयार्थं सेवेत पार्वतीं वा पुनर्गुहाम् ।
ग्रामैकरात्रिको ग्रीष्मे वर्षास्वेकत्र वा वसेत् ॥१४-४६-२६ (९३६६९)
अध्वा सूर्येण निर्दिष्टः कीटवच्च चरेन्महीम् ।
दयार्तं चैव भूतानां समीक्ष्य पृथिवीं चरेत् ॥१४-४६-२७ (९३६७०)
सञ्चयांश्च न कुर्वीत स्नेहवासं च वर्जयेत् ।
पूताभिरद्भिर्नित्यं वै कार्यं कुर्वीत मोक्षवित् ॥१४-४६-२८ (९३६७१)

उपस्पृशेदुद्धृताभिरद्भिश्च पुरुषः सदा ।
अहिंसा ब्रह्मचर्यं च सत्यमार्जवमेव च ॥१४-४६-२९ (९३६७२)
अक्रोधश्चानसूया च दमो नित्यमपैशुनम् ।
अष्टस्वेतेषु युक्तः स्याद्व्रतेषु नियतेन्द्रियः ॥१४-४६-३० (९३६७३)
अपापमशठं वृत्तमजिह्मं नित्यमाचरेत् ।
जोषयेत सदा भोज्यं ग्रासमागतमस्पृहः ॥१४-४६-३१ (९३६७४)
यात्रामात्रं च भुञ्जीत केवलं प्राणयात्रिकम् ।
धर्मलब्धमथाश्नीयान्न काममनुवर्तयेत् ॥१४-४६-३२ (९३६७५)
ग्रासादाच्छादनादन्यन्न गृह्णीयात्कथञ्चन ।
यावदाहारयेत्तावत्प्रतिगृह्णीत नाधिकम् ॥१४-४६-३३ (९३६७६)
परेभ्यो न प्रतिग्राह्यं न च देयं कदाचन ।
दैन्यभावाच्च भूतानां संविभज्य सदा बुधः ॥१४-४६-३४ (९३६७७)
नाददीत परस्वानि न गृह्णीयान्न याचयेत् ।
न किञ्चिद्विषयं भुक्त्वा स्पृहयेत्तस्य वै पुनः ॥१४-४६-३५ (९३६७८)
मृदमापस्तथाऽन्नानि पत्रपुष्पफलानि च ।
असंवृतानि गृह्णीयात्प्रवृत्तानि च कार्यवान् ॥१४-४६-३६ (९३६७९)
न शिल्पजीविकां जीवेद्द्विरन्नं नोत कामयेत् ।
न द्वेष्टा नोपदेष्टा च भवेच्च निरुपस्कृतः ॥१४-४६-३७ (९३६८०)
श्रद्धापूतानि भुञ्जीत निमित्तानि च वर्जयेत् ।
मुधावृत्तिरसक्तश्च सर्वभूतैरसंधितः ॥१४-४६-३८ (९३६८१)
आशीर्युक्तानि सर्वाणि हिंसायुक्तानि यानि च ।
लोकसङ्ग्रहधर्मं च नैव कुर्यान्न कारयेत् ॥१४-४६-३९ (९३६८२)
सर्वभावानतिक्रम्य लघुमात्रः परिव्रजेत् ।
समः सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥१४-४६-४० (९३६८३)
परं नोद्वेजयेत्कञ्चिन्न च कस्यचिदुद्विजेत् ।
विश्वास्यः सर्वभूतानामग्र्यो मोक्षविदुच्यते ॥१४-४६-४१ (९३६८४)
अनागतं च न ध्यायेन्नातीतमनुचिन्तयेत् ।
वर्तमानमुपेक्षेत कालाकाङ्क्षी समाहितः ॥१४-४६-४२ (९३६८५)
न चक्षुषा न मनसा न वाचा दूषयेत्क्वचित् ।
न प्रत्यक्षं परोक्षं वा किञ्चिद्दुष्टं समाचरेत् ॥१४-४६-४३ (९३६८६)
इन्द्रियाण्युपसंहृत्य कूर्मोऽङ्गानीव सर्वशः ।
क्षीणेन्द्रियमनोबुद्धिर्निरीहः सर्वतत्त्ववित् ॥१४-४६-४४ (९३६८७)
निर्द्वन्द्वो निर्नमस्कारो निःस्वाहाकार एव च ।
निर्ममो निरहङ्कारो निर्योगक्षेम आत्मवान् ॥१४-४६-४५ (९३६८८)
निराशीर्निर्गुणः शान्तो निरासक्तो निराश्रयः ।
आत्मसङ्गी च तत्त्वज्ञो मुच्यते नात्र संशयः ॥१४-४६-४६ (९३६८९)

अपादपाणिपृष्ठं तदशिरस्कमनूदरम् ।
अभिन्नगुणकर्माणं केवलं विमलं स्थिरम् ॥१४-४६-४७ (९३६९०)
अगन्धमरसस्पर्शमरूपाशब्दमेव च ।
अनुगम्यमनासक्तममांसमपि चैव यत् ॥१४-४६-४८ (९३६९१)
निशाचिन्तमव्ययं दिव्यं गृहस्थमपि सर्वदा ।
सर्वभूतस्थमात्मानं ये पश्यन्ति न ते मृताः ॥१४-४६-४९ (९३६९२)
न तत्र क्रमते बुद्धिर्नेन्द्रियाणि न देवताः ।
वेदा यज्ञाश्च लोकाश्च न तपो न व्रतानि च ॥१४-४६-५० (९३६९३)
यत्र ज्ञानवतां प्राप्तिलिङ्गग्रहणा स्मृता ।
तस्मादलिङ्गधर्मज्ञो धर्मतत्त्वमुपाचरेत् ॥१४-४६-५१ (९३६९४)
गूढधर्माश्रितो विद्वान्विज्ञानचरितं चरेत् ।
अमूढो मूढरूपेण चरेद्धर्ममदूषयन् ॥१४-४६-५२ (९३६९५)
यथैनमवमन्येरन्परे सततमेव हि ।
तथावृत्तश्चरेच्छान्तः सतां धर्मानकुत्सयन् ॥१४-४६-५३ (९३६९६)
य एवं वृत्तसम्पन्नः स मुनिः श्रेष्ठ उच्यते ।
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च ॥१४-४६-५४ (९३६९७)
मनो बुद्धिरहङ्कारमव्यक्तं पुरुषं तथा ।
एतत्सर्वं प्रसङ्ख्याय यथावत्तत्त्वनिश्चयात् ॥१४-४६-५५ (९३६९८)
ततः स्वर्गमवाप्नोति विमुक्तः सर्वबन्धनैः ।
एतावदन्तवेलायां परिसङ्ख्याय तत्त्ववित् ॥१४-४६-५६ (९३६९९)
ध्यायेदेकान्तमास्थाय मुच्यतेऽथ निराश्रयः ।
निर्मुक्तः सर्वसङ्गेभ्यो वायुराकाशगो यथा ॥१४-४६-५७ (९३७००)
क्षीणकोशो निरातङ्कस्तथेदं प्राप्नुयात्परम् ॥ ॥ १४-४६-५८ (९३७०१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

आश्वमेधिकपर्व - अध्याय ०४७
॥ श्रीः ॥
१४.४७. अध्यायः ४७

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति संन्यासज्ञानतपसां
परमपुरुषार्थसाधनत्वोक्तिः ॥१ ॥

ब्रह्मोवाच ।
संन्यासं तप इत्याहुर्वृद्धा निश्चितवादिनः ।
ब्राह्मणा ब्रह्मयोनिस्था ज्ञानं ब्रह्म परं विदुः ॥ १४-४७-१ (९३७०२)
अतिदूरात्मकं ब्रह्म वेदविद्याव्यपाश्रयम् ।
निर्द्वन्द्वं निर्गुणं नित्यमचिन्त्यगुणमुत्तमम् ॥ १४-४७-२ (९३७०३)
ज्ञानेन तपसा चैव धीराः पश्यन्ति तत्परम् ।
निर्णिक्तमनसः पूता व्युत्क्रान्तरजसोऽमलाः ॥ १४-४७-३ (९३७०४)
तपसा क्षेममध्वानं गच्छन्ति परमेश्वरम् ।
संन्यासनिरता नित्यं ये च ब्रह्मविदो जनाः ॥ १४-४७-४ (९३७०५)
तपः प्रदीप इत्याहुराचारो धर्मसाधकः ।
ज्ञानं वै परमं विद्यात्संन्यासं तप उत्तमम् ॥ १४-४७-५ (९३७०६)
यस्तु वेद निराबाधं ज्ञानं तत्त्वविनिश्चयात् ।
सर्वभूतस्थमात्मानं स सर्वविदिहोच्यते ॥ १४-४७-६ (९३७०७)
यो विद्वान्सहवासं च विवासं चैव पश्यति ।
तथैवेकत्वनानात्वे स दुःखात्प्रतिमुच्यते ॥ १४-४७-७ (९३७०८)
यो न कामयते किञ्चिन्न किञ्चिदवमन्यते ।
इह लोकस्थ एवैष ब्रह्मभूयाय कल्पते ॥ १४-४७-८ (९३७०९)
प्रधानगुणतत्त्वज्ञः सर्व भूतविधानवित् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः ॥ १४-४७-९ (९३७१०)
निर्द्वन्द्वो निर्नमस्कारो निःस्वधाकार एव च ।
निर्गुणं नित्यमद्वन्द्वं प्रशमेनैव गच्छति ॥ १४-४७-१० (९३७११)
हित्वा गुणमयं सर्वं कर्म जन्तुः शुभाशुभम् ।
उभे सत्यानृते हित्वा मुच्यते नात्र संशयः ॥ १४-४७-११ (९३७१२)
अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियान्तरकोटरः ॥ १४-४७-१२ (९३७१३)
महाभूतविशाखश्च विशेषप्रतिशाखवान् ।
सदापत्रः सदापुष्पः शुभाशुभफलोदयः ॥ १४-४७-१३ (९३७१४)
आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ।
एनं छित्त्वा च भित्त्वा च तत्त्वज्ञानासिना बुधः ॥ १४-४७-१४ (९३७१५)
हित्वा सङ्गमयान्पाशान्मृत्युजन्मजरोदयान् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः ॥ १४-४७-१५ (९३७१६)
द्वाविमौ पक्षिणौ नित्यौ संक्षेपौ चाप्यचेतनौ ।
एताभ्यां तु परो योन्यश्चेतनावान्स उच्यते ॥ १४-४७-१६ (९३७१७)
अचेतनः सत्वसङ्ख्याविमुक्तः

सत्त्वात्परं चेतयतेऽन्तरात्मा ।
स क्षेत्रवित्सर्वसङ्ख्यातबुद्धि-
र्गुणातिगो मुच्यते सर्वपापैः ॥ ॥ १४-४७-१७ (९३७१८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४७-१५ हित्वा चामरतां प्राप्य जह्याद्यो मृत्युजन्मनीति क ठ थ
। पाठः ॥
७-४७-१६ पक्षिणौ जीवेश्वरौ ॥
७-४७-१७ अचेतनस्तत्वसंघातयुक्तस्तत्वात्परं चेतयतेन्तरात्मा
। स क्षेत्रज्ञस्तत्वसंघातबुद्धिर्गुणातिगो मुच्यते मृत्युपाशादिति
क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०४८
॥ श्रीः ॥
१४.४८. अध्यायः ४८

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
ब्रह्मणा महर्षीन्प्रति योगिनां चातुर्विध्यादिकथनपूर्वकं
मुमुक्षुवेद्यनानार्थकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
केचिद्ब्रह्ममयं वृक्षं केचिद्ब्रह्ममयं वनम् ।
केचित्परममव्यक्तं केचित्परमनामयम् ।
मन्यन्ते सर्वमप्येतदव्यक्तप्रभवाव्ययम् ॥ १४-४८-१ (९३७१९)
उच्छ्वासमात्रमपि चेद्योऽन्तकाले समो भवेत् ।
आत्मानमुपसङ्म्य सोमृतत्वाय कल्पते ॥ १४-४८-२ (९३७२०)
निमेषमात्रमपि चेत्संयम्यात्मानमात्मनि ।
गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम् ॥ १४-४८-३ (९३७२१)
प्राणायामैरथ प्राणान्संयम्य स पुनःपुनः ।
दशद्वादशभिर्वापि चतुर्विंशात्समन्ततः ॥ १४-४८-४ (९३७२२)

एवं पूर्वं प्रसन्नात्मा लभते यद्यदिच्छति ।
अव्यक्तात्सत्वमुद्रिक्तममृतत्वाय कल्पते ॥ १४-४८-५ (९३७२३)
सत्वात्परतरं नान्यत्प्रशंसन्तीह तद्विदः ।
अनुमानाद्विजानीमः पुरुषं सत्वसंश्रयम् ।
न शक्यमन्यथा गन्तुं पुरुषं द्विजसत्तमाः ॥ १४-४८-६ (९३७२४)
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
ज्ञानं त्यागोथ संन्यासः सात्विकं वृत्तमिष्यते ॥ १४-४८-७ (९३७२५)
एतेनैवानुमानेन मन्यन्ते वै मनीषिणः ।
सत्वं च पुरुषश्चैव तत्र नास्ति विचारणा ॥ १४-४८-८ (९३७२६)
आहुरेके च विद्वांसो ये ज्ञाने सुप्रतिष्ठिताः ।
क्षेत्रज्ञसत्वयोरैक्यमित्येतन्नोपपद्यते ॥ १४-४८-९ (९३७२७)
पृथग्भूतस्तथा नित्यमित्येतदविचारितम् ।
पृथग्भावश्च विज्ञेयः सहजश्चापि तत्त्वतः ॥ १४-४८-१० (९३७२८)
तथैवैकत्वनानात्वमिष्यते विदुषां नयः ।
मशकोदुम्बरे चैक्यं पृथक्त्वमपि दृश्यते ॥ १४-४८-११ (९३७२९)
मत्स्यो यथाऽन्यः स्यादप्सु सम्प्रयोगस्तथा तयोः ।
सम्बन्धस्तोयबिन्दूनां पर्णैः कोकनदस्य च ॥ १४-४८-१२ (९३७३०)
गुरुरुवाच। १४-४८-१३क्ष् (७८६३)
इत्युक्तवन्तस्ते विप्रास्तदा लोकपितामहम् ।
पुनः संशयमापन्नाः पप्रच्छुर्मुनिसत्तमाः ॥ ॥ १४-४८-१३ (९३७३१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४८-२ भोक्तुः कालेन वै भवेदिति ट पाठः ॥
७-४८-१३ उक्तं विद्यते येषु ते उक्तवन्तः उक्तमर्थं
सम्यगवधृतवन्त इत्यर्थः ॥

आश्वमेधिकपर्व - अध्याय ०४९
॥ श्रीः ॥
१४.४९. अध्यायः ४९

अथानुगीतापर्व-२

Mahabharata - Ashvamedhika Parva - Chapter Topics

महर्षिभिर्ब्रह्मणंप्रति धर्मविषये

नानाविधवादिविप्रतिपत्तिप्रदर्शनपूर्वकं
तत्प्रयुक्तस्वीयसंशयनिवर्तनप्रार्थना ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ऋषय ऊचुः ।
को वा स्विदिह धर्माणामनुष्ठेयतमो मतः ।
व्याहतामिव पश्यामो धर्मस्य विविधां गतिम् ॥ १४-४९-१ (९३७३२)
ऊर्द्ध्वं देहाद्वदन्त्येके नैतदस्तीति चापरे ।
केचित्संशयितं सर्वं निःसंशयमथापरे ॥ १४-४९-२ (९३७३३)
अनित्यं नित्यमित्येके नास्त्यस्तीत्यपि चापरे ।
त्रिधेत्येके द्विधेत्येके व्याकीर्णमिति चापरे ॥ १४-४९-३ (९३७३४)
मन्यन्ते ब्राह्मणा एव ब्रह्मज्ञास्तत्त्वदर्शिनः ।
एकमेके पृथक्चान्ये बहुत्वमिति चापरे ॥ १४-४९-४ (९३७३५)
देशकालावुभौ केचिन्नैतदस्तीति चापरे ।
जटाजिनधराश्चान्ये मुण्डाः केचिदसंवृताः ॥ १४-४९-५ (९३७३६)
अश्नानं केचिदिच्छन्ति स्नानमप्यपरे जनाः ।
मन्यन्ते ब्राह्मणा देवा ब्रह्मज्ञास्तत्त्वदर्शिनः ॥ १४-४९-६ (९३७३७)
आहारं केचिदिच्छन्ति केचिच्चानशने रताः ।
कर्म केचित्प्रशंसन्ति प्रशान्ति चापरे जनाः ॥ १४-४९-७ (९३७३८)
केचिन्मोक्षं प्रशंसन्ति केचिद्भोगान्पृथग्विधान् ।
धनानि केचिदिच्छन्ति निर्धनत्वमथापरे ।
उपास्य साधनं त्वेके नैतदस्तीति चापरे ॥ १४-४९-८ (९३७३९)
अहिंसानिरताश्चान्ये केचिद्धिंसापरायणाः ।
पुण्येन यशसा चान्ये नैतदस्तीति चापरे ॥ १४-४९-९ (९३७४०)
सद्भावनिरताश्चान्ये केचित्संशयिते स्थिताः ।
दुःखादन्ये सुखादन्ये ध्यानमित्यपरे जनाः ॥ १४-४९-१० (९३७४१)
यज्ञ इत्यपरे विप्राः प्रदानमिति चापरे ।
तपस्त्वन्ये प्रशंसन्ति स्वाध्यायमपरे जनाः ॥ १४-४९-११ (९३७४२)
ज्ञानं संन्यासमित्येके स्वभावं भूतचिन्तकाः ।
सर्वमेके प्रशंसन्ति न सर्वमिति चापरे ॥ १४-४९-१२ (९३७४३)
एवं व्युत्थापिते धर्मे बहुधा विप्रबोधिते ।
निश्चयं नाधिगच्छामः श्रेयः किमिति सत्तम ॥ १४-४९-१३ (९३७४४)
इदं श्रेय इदं श्रेय इत्येवं व्युस्थितो जनः ।
यो हि यस्मिन्रतो धर्मे स तं पूजयते सदा ॥ १४-४९-१४ (९३७४५)
तेन नोऽविहिता प्रज्ञा मनश्च बहुलीकृतम् ।

एतदाख्यातमिच्छामः श्रेयः किमिति सत्तम ॥१४-४९-१५ (९३७४६)
अतः परं तु यद्गुह्यं तद्भवान्वक्तुमर्हति ।
सत्वक्षेत्रज्ञयोश्चापि सम्बन्धः केन हेतुना ॥१४-४९-१६ (९३७४७)
एवमुक्तः स तैर्विप्रैर्भगवाँल्लोकभावनः ।
तेभ्यः शशंस धर्मात्मा याथातथ्येन बुद्धिमान् ॥ ॥१४-४९-१७ (९३७४८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकोनपञ्चशोऽध्यायः ॥ ४९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-४९-१ न कर्मणेति कुर्वन्नेवेह
कर्माणीत्युभयविधश्रुतिदर्शनान्मुह्यामहे इति भावः ॥
७-४९-२ ऊर्ध्वं देहात् देहनाशादूर्ध्वमपि आत्मास्तीत्येके वदन्तीति
सम्बन्धः ।नैतदिति लोकायताः।सर्वं संशयितमिति स्याद्वादिनः
सप्तभङ्गीनयज्ञाः।निःसंशयमिति प्रातिस्विकं सर्वं तैर्तिकाः ॥
७-४९-३ अनित्यं सर्वं सृष्टिप्रलययुक्तमिति तार्किकादयः ।नित्यं
प्रवाहनित्यमिति मीमांसकाः।नास्तीति शून्यवादिनः।अस्ति परंतु
क्षणिकमिति सौगताः ॥
७-४९-६ अस्नानं नैष्ठिकब्रह्मचर्यम् ।स्नानं गार्हस्थ्यम् ॥
७-४९-८ साधनं ध्यानादिकमुपास्य कृत्वापि नैतदस्तीति
पश्चात्सर्वमपवदन्ति ॥
७-४९-९ पुण्येन पुण्यार्थमेव यतेतेत्यन्ये ।एतत्पुण्यं नास्त्येवेत्यन्ये
लोकायताः ॥
७-४९-१० संशयिते कृतमस्ति नवेति संदिग्धे पथि
।दुःखात् दुःखनिवृत्त्यर्थं सुखात्सुखप्राप्त्यर्थं ध्यानं
कर्तव्यम्।निष्काममेवेत्यपरे ॥
७-४९-११ सत्यमेके प्रशंसन्ति असत्यमिति चापरे इति थ।पाठः ॥
७-४९-१२ ज्ञानं संन्यासं संन्यासैकप्राप्यम्
।भूतचिन्तकाः वस्तुतत्त्वविचारकाः।स्वभावं
साधनपौष्कल्यम्।साधनपौष्कल्यस्वाभाव्यादेव ज्ञानमुत्पद्यते
आश्रमान्तरेपि न संन्यासमात्रेणेत्याहुः ॥
७-४९-१५ अविहिता अशिक्षिता ।आख्यातं त्वयेति शेषः ॥

आश्वमेधिकपर्व - अध्याय ०५०
॥ श्रीः ॥
१४.५०. अध्यायः ५०

अथानुगीतापर्व-२

Mahabharata - Ashvamedhika Parva - Chapter Topics

ब्रह्मणा महर्षिन्प्रति धर्मप्रदर्शनपूर्वकं
तदनुष्ठानसहकृतज्ञानस्यैव दृष्टान्तप्रदर्शनेन
परमपुरुषार्थसाधनत्वोक्तिः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
हन्त वः सम्प्रक्ष्यामि यन्मां पृच्छथ सत्तमाः ।
गुरुणा शिष्यमासाद्य यदुक्तं तन्निबोधत ॥ १४-५०-१ (९३७४९)
समस्तमिह तच्छ्रुत्वा सम्यगेवावधार्यताम् ।
अहिंसा सर्वभूतानामेतत्कृत्यतमं मतम् ॥ १४-५०-२ (९३७५०)
एतत्पदमनुद्विग्नं वरिष्ठं धर्मलक्षणम् ।
ज्ञानं निःश्रेय इत्याहुर्वृद्धा निश्चितदर्शिनः ।
तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्वकिल्बिषैः ॥ १४-५०-३ (९३७५१)
हिंसापराश्च ये केचिद्ये च नास्तिकवृत्तयः ।
लोभमोहसमायुक्तास्ते वै निरयगामिनः ॥ १४-५०-४ (९३७५२)
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः ।
तेऽस्मिन्लोके प्रमोदन्ते जायमानाः पुनः पुनः ॥ १४-५०-५ (९३७५३)
कुर्वते ये तु कर्माणि श्रद्दधाना विपश्चितः ।
अनाशीर्योगसंयुक्तास्ते धीराः साधुदर्शिनः ॥ १४-५०-६ (९३७५४)
अतः परं प्रवक्ष्यामि सत्वक्षेत्रज्ञयोर्यथा ।
संयोगो विप्रयोगश्च तन्निबोधत सत्तमाः ॥ १४-५०-७ (९३७५५)
विषयो विषयित्वं च सम्बन्धोऽयमिहोच्यते ।
विषयी पुरुषो नित्यं सत्वं च विषयः स्मृतः ॥ १४-५०-८ (९३७५६)
व्याख्यातं पूर्वकल्पेनि मशकोदुम्बरं यथा ।
भुज्यमानं न जानीते नित्यं सत्वमचेतनम् ।
यस्त्वेवं तं विजानीते यो भुङ्क्ते यश्च भुज्यते ॥ १४-५०-९ (९३७५७)
अनित्यं द्वन्द्वसंयुक्तं सत्वमाहुर्मनीषिणः ।
निर्द्वन्द्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ॥ १४-५०-१० (९३७५८)
समः संज्ञानुगश्चैव स सर्वत्र व्यवस्थितः ।
न सज्जते सदा सत्वमापः पुष्करपर्णवत् ॥ १४-५०-११ (९३७५९)
सर्वैरपि गुणैर्विद्वान्व्यतिषक्तो न लिप्यते ।
जलबिन्दुर्यथा लोलः पद्मिनीपत्रसंस्थितः ॥ १४-५०-१२ (९३७६०)

एवमेवाप्यसंयुक्तः पुरुषः स्यान्न संशयः ।
द्रव्यमात्रमभूत्सत्वं पुरुषस्येति निश्चयः ॥ १४-५०-१३ (९३७६१)
यथा द्रव्यं च कर्ता च संयोगोऽप्यनयोस्तथा ।
यथा प्रदीपमादाय कश्चित्तमसि गच्छति ।
तथा सत्त्वप्रदीपेन गच्छन्ति परमर्षयः ॥ १४-५०-१४ (९३७६२)
यावद्द्रव्यं गुणस्तावत्प्रदीपः सम्प्रकाशते ।
क्षीणे द्रव्ये गुणे ज्योतिरन्तर्धानाय गच्छति ॥ १४-५०-१५ (९३७६३)
व्यक्तः सत्वगुणस्त्वेवं पुरुषो द्रव्यमुच्यते ।
एतद्विप्रा विजानीत हन्त भूयो ब्रवीमि वः ॥ १४-५०-१६ (९३७६४)
सहस्रेणापि दुर्मेधा न बुद्धिमधिगच्छति ।
चतुर्थेनाप्यथांशेन बुद्धिमान्सुखमेधते ॥ १४-५०-१७ (९३७६५)
एवं धर्मस्य विज्ञेयं संसाधनमुपायतः ।
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ॥ १४-५०-१८ (९३७६६)
यथाऽध्वानमपाथेयः प्रपन्नो मनुजः क्वचित् ।
क्लेशेन याति महता विनश्यत्यन्तराऽपि च ॥ १४-५०-१९ (९३७६७)
तथा कर्मसु विज्ञेयं फलं भवति वा न वा ।
पुरुषस्यात्मनिःश्रेयः शुभाशुभनिदर्शनम् ॥ १४-५०-२० (९३७६८)
यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते ।
अदृष्टपूर्वं सहसा तत्त्वदर्शनवर्जितः ॥ १४-५०-२१ (९३७६९)
तमेव च यथाऽध्वानं रथेनेहाशुगामिना ।
गच्छत्यश्वप्रयुक्तेन तथा बुद्धिमतां गतिः ॥ १४-५०-२२ (९३७७०)
ऊर्ध्वं पर्वतमारुह्य नान्ववेक्षेत भूतलम् ।
रथेन रथिनं पश्येत्क्लिश्यमानमचेतनम् ॥ १४-५०-२३ (९३७७१)
यावद्रथपथस्तावद्रथेन स तु गच्छति ।
क्षीणे रथपदे विद्वान्रथमुत्सृज्य गच्छति ॥ १४-५०-२४ (९३७७२)
एवं गच्छति मेधावी तत्त्वयोगविधानवित् ।
परिज्ञाय गुणज्ञश्च उत्तरादुत्तरोत्तरम् ॥ १४-५०-२५ (९३७७३)
यथाऽर्णवं महाघोरमप्लवः सम्प्रगाहते ।
बाहुभ्यामेव सम्मोहाद्वधं वाञ्छत्यसंशयम् ॥ १४-५०-२६ (९३७७४)
नावा चापि यथा प्राज्ञो विभागज्ञः स्वरित्रया ।
अश्रान्तः सलिलं गहाच्छीघ्रं संतरते ह्रदम् ॥ १४-५०-२७ (९३७७५)
तीर्णो गच्छेत्परं पारं नावमुत्सृज्य निर्ममः ।
व्याख्यातं पूर्वकल्पेन यथा रथपदातिनोः ॥ १४-५०-२८ (९३७७६)
स्नेहात्सम्मोहमापन्नो नावि दाशो यथा तथा ।
ममत्वेनाभिभूतः संस्तत्रैव परिवर्तते ॥ १४-५०-२९ (९३७७७)
नावं न शक्यमारुह्य स्थले विपरिवर्तितुम् ।

तथैव रथमारुह्य नाप्सु चर्या विधीयते ॥१४-५०-३० (९३७७८)
एवं कर्म कृतं वित्त विषयस्थं पृथक्पृथक् ।
यथा कर्म कृतं लोके तथा तदुपपद्यते ॥१४-५०-३१ (९३७७९)
यन्नैव गन्धि नो रस्यं न रूपस्पर्शशब्दवत् ।
मन्यते न मनो बुद्ध्या तत्प्रधानं प्रचक्षते ॥१४-५०-३२ (९३७८०)
तत्र प्रधानमव्यक्तमव्यक्तस्य गुणो महान् ।
महप्रधानभूतस्य गुणोऽहङ्कार एव च ॥१४-५०-३३ (९३७८१)
अहङ्कारात्तु सम्भूतो महाभूतकृतो गुणः ।
पृथक्त्वेन हि भूतानां विषया वै गुणाःस्मृताः ॥१४-५०-३४ (९३७८२)
बीजधर्मं यथाऽव्यक्तं तथैव प्रसवात्मकम् ।
बीजधर्मा महानात्मा प्रसवश्चेति नः श्रुतम् ॥१४-५०-३५ (९३७८३)
बीजधर्मात्साहङ्कारात्प्रसवश्च पुनःपुनः ।
बीजप्रसवधर्माणि महाभूतानि पञ्च वै ॥१४-५०-३६ (९३७८४)
बीजधर्मिण इत्याहुः प्रसवं च प्रकुर्वते ।
विशेषाः पञ्चभूतानां तेषां वित्त विशेषणम् ॥१४-५०-३७ (९३७८५)
तत्रैकगुणमाकाशं द्विगुणो वायुरुच्यते ।
त्रिगुणं ज्योतिरित्याहुरापश्चापि चतुर्गुणाः ॥१४-५०-३८ (९३७८६)
पृथ्वी पञ्चगुणा ज्ञेया चरस्थावरसङ्कुला ।
सर्वभूतकरी देवी शुभाशुभनिदर्शिनी ॥१४-५०-३९ (९३७८७)
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
एते पञ्चगुणा भूमेर्विज्ञेया द्विजसत्तमाः ॥१४-५०-४० (९३७८८)
पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः ।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून्गुणान् ॥१४-५०-४१ (९३७८९)
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा ।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ॥१४-५०-४२ (९३७९०)
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत ।
शब्दः स्पर्शस्तथा रूपं द्रवश्चापां गुणाः स्मृताः ॥१४-५०-४३ (९३७९१)
रसज्ञानं तु वक्ष्यामि रसस्तु बहुधा स्मृतः ।
मधुरोऽम्लः कटुस्तिक्तः कषायो लवणस्तथा ॥१४-५०-४४ (९३७९२)
एवं षड्विधविस्तारो रसो वारिमयः स्मृतः ।
शब्दः स्पर्शस्तथा रूपं त्रिगुणं ज्योतिरुच्यते ॥१४-५०-४५ (९३७९३)
ज्योतिषश्च गुणो रूपं रूपं च बहुधा स्मृतम् ।
शुक्लं कृष्णं तथा रक्तं नीलं पीतारुणं तथा ॥१४-५०-४६ (९३७९४)
ह्रस्वं दीर्घं कृशं स्थूलं चतुरश्राणुवृत्तकम् ।
एवं द्वादशविस्तारं तेजसो रूपमुच्यते ॥१४-५०-४७ (९३७९५)
विज्ञेयं ब्राह्मणैर्वृद्धैर्धर्मज्ञैः सत्यवादिभिः ।

शब्दस्पर्शौ च विज्ञेयौ द्विगुणो वायुरुच्यते ॥१४-५०-४८ (९३७९६)
वायोश्चापि गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः ।
उष्णः शीतः सुखो दुःखः स्निग्धो विशद एव च ॥१४-५०-४९ (९३७९७)
कठिनश्चिक्वणः श्लक्ष्णः पिच्छिलो दारुणो मृदुः ।
एवं द्वादशविस्तारो वायव्यो गुण उच्यते ॥१४-५०-५० (९३७९८)
विधिवद्ब्राह्मणैः सिद्धैर्मन्त्रज्ञैस्तत्त्वदार्शिभिः ॥ १४-५०-५१ (९३७९९)
तत्रैकगुणमाकाशं शब्द इत्येव च स्मृतः ।
तस्य शब्दस्यि वक्ष्यामि विस्तरेण बहून्गुणान् ॥१४-५०-५२ (९३८००)
षड्जर्षभः सगान्धारो मध्यमः पञ्चमस्तथा ।
अतः परं तु विज्ञेयो निषादो धैवतस्तथा ।
इष्टश्चानिष्टशब्दश्च संहतः प्रतिभानवान् ॥ १४-५०-५३ (९३८०१)
एवं बहुविधो ज्ञेयः शब्द आकाशसम्भवः ।
आकाशमुत्तमं भूतमहङ्कारस्ततः परः ॥१४-५०-५४ (९३८०२)
अहङ्कारात्परा बुद्धिर्बुद्धेरात्मा ततः परः ।
तस्मात्तु परमव्यक्तमव्यक्तात्पुरुषः परः ॥१४-५०-५५ (९३८०३)
परावरज्ञो भूतानां विधिज्ञः सर्वकर्मणाम् ।
सर्वभूतात्मभूतात्मा यं प्राप्यानन्त्यमश्नुते ॥ ॥१४-५०-५६ (९३८०४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चाशोऽध्यायः ॥५० ॥

आश्वमेधिकपर्व - अध्याय ०५१
॥ श्रीः ॥
१४.५१. अध्यायः ५१

अथानुगीतापर्व-२
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनार्जुनंप्रति
मुक्त्युपायप्रतिपादकगुरुशिष्यसंवादानुवादसमापनपूर्वकं स्वस्य
निजनगरजिगमिषानिवेदनम् ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

ब्रह्मोवाच ।
भूतानामथ पञ्चानामथेषामीश्वरं मनः ।
नियमे च विसर्गे च भूतानां मन एव च ॥१४-५१-१ (९३८०५)

अधिष्ठातृमनो नित्यं भूतानां महतां तथा ।
बुद्धिरैश्वर्यमाचष्टे क्षेत्रज्ञश्च स उच्यते ॥ १४-५१-२ (९३८०६)
इनद्रियाणि मनो युङ्क्ते सदश्वानिव सारथिः ।
इन्द्रियाणि मनो बुद्धिः क्षेत्रज्ञे युज्यते सदा ॥ १४-५१-३ (९३८०७)
महदश्वसमायुक्तं बुद्धिसंयमनं रथम् ।
समारुह्य स भूतात्मा समन्तात्परिधावति ॥ १४-५१-४ (९३८०८)
इन्द्रियग्रामसंयुक्तो मनःसारथिरेव च ।
बुद्धिसंयमनो नित्यं महान्ब्रह्ममयो रथः ॥ १४-५१-५ (९३८०९)
एवं यो वेत्ति विद्वान्वै सदा ब्रह्ममयं रथम् ।
स धीरः सर्वलोकेषु न मोहमधिगच्छति ॥ १४-५१-६ (९३८१०)
अव्यक्तादिविशेषान्तं सहस्थावरजङ्गमम् ॥
सूर्यचन्द्रप्रभालोकं ग्रहनक्षत्रमण्डितम् ॥ १४-५१-७ (९३८११)
नदीपर्वतजालैश्च सर्वतः परिभूषितम् ।
विविधाभिस्तथा चाद्भिः सततं समलंकृतम् ॥ १४-५१-८ (९३८१२)
अजितं सर्वभूतानां सर्वप्राणभृतां गतिः ।
एतद्ब्रह्मवनं नित्यं तस्मिंश्चरति क्षेत्रवित् ॥ १४-५१-९ (९३८१३)
लोकेऽस्मिन्यानि सत्वानि त्रसानि स्थावराणि च ।
तान्येवाग्रे प्रलीयन्ते पश्चाद्भूतकृता गुणाः ।
गुणेभ्यः पञ्च भूतानि एष भूतसमुच्छ्रयः ॥ १४-५१-१० (९३८१४)
देवा मनुष्या गन्धर्वाः पिशाचासुरराक्षसाः ।
सर्वे स्वभावतः सृष्टा न क्रियाभ्यो न कारणात् ॥ १४-५१-११ (९३८१५)
एते विश्वसृजो विप्रा जायन्तीह पुनः पुनः ।
तेभ्यः प्रसूतास्तेष्वेव महाभूतेषु पञ्चसु ।
प्रलीयन्ते यथाकालमूर्मयः सागरे यथा ॥ १४-५१-१२ (९३८१६)
विश्वसृग्भ्यस्तु भूतेभ्यो महाभूतास्तु सर्वशः ।
भूतेब्यश्चापि पञ्चभ्यो भुक्तो गच्छेत्परां गतिम् ॥ १४-५१-१३ (९३८१७)
प्रजापतिरिदं सर्वं मनसैवासृजत्प्रभुः ।
तथैव देवानृषयस्तपसा प्रतिपेदिरे ॥ १४-५१-१४ (९३८१८)
तपसश्चानुपूर्व्येण फलमूलाशिनस्तथा ।
त्रैलोक्यं तपसा सिद्धाः पश्यन्तीह समाहिताः ॥ १४-५१-१५ (९३८१९)
औषधान्यगदादीनि नानाविद्याश्च सर्वशः ।
तपसैव प्रसिद्ध्यन्ति तपोमूलं हि साधनम् ॥ १४-५१-१६ (९३८२०)
यद्दुरापं दुराम्नायं दुराधर्षं दुरन्वयम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ १४-५१-१७ (९३८२१)
सुरापो ब्रह्महा स्तेनो भ्रूणहागुरुतल्पगः ।
तपसैव सुतप्तेन मुच्यते किल्बिषात्ततः ॥ १४-५१-१८ (९३८२२)

मनुष्याः पितरो देवाः पशवो मृगपक्षिणः ।
यानि चान्यानि भूतानि चराणि स्थावराणि च ॥१४-५१-१९ (९३८२३)
तपःपरायणा नित्यं सिद्ध्यन्ते तपसा सदा ।
तथैव तपसा देवा महाभागा दिवं गताः ॥१४-५१-२० (९३८२४)
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः ।
अहङ्कारसमायुक्तास्ते सकाशे प्रजापतेः ॥१४-५१-२१ (९३८२५)
ध्यानयोगेन शुद्धेन निर्ममा निरहंकृताः ।
आप्नुवन्ति महात्मानो महान्तं लोकमुत्तमम् ॥१४-५१-२२ (९३८२६)
ध्यानयोगमुपागम्य प्रसन्नमतयः सदा ।
सुखोपचयमव्यक्तं प्रविशन्त्यात्मवित्तमाः ॥१४-५१-२३ (९३८२७)
ध्यानयोगादुपागम्य निर्ममा निरहंकृताः ।
अव्यक्तं प्रविशन्तीह महतां लोकमुत्तमम् ॥१४-५१-२४ (९३८२८)
अव्यक्तादेव सम्भूताः समयज्ञा गताः पुनः ।
तमोरजोभ्यां निर्मुक्ताः सत्वमास्थाय केवलम् ॥१४-५१-२५ (९३८२९)
निर्मुक्तः सर्वपापेभ्यः सर्वं त्यजति निष्कलः ।
क्षेत्रज्ञ इति तं विद्याद्यस्तं वेद स वेदवित् ॥१४-५१-२६ (९३८३०)
चित्तं चित्तादुपागम्य मुनिरासीत संयतः ।
यच्चित्तस्तन्मना भूत्वा ग्राह्यमेतत्सनातनम् ॥१४-५१-२७ (९३८३१)
अव्यक्तादिविशेषान्तमविद्यालक्षणं स्मृतम् ।
निबोधत तथा ज्ञानं गुणैर्लक्षणमित्युत ॥१४-५१-२८ (९३८३२)
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ॥१४-५१-२९ (९३८३३)
कर्म केचित्प्रशंसन्ति मन्दबुद्धितया नराः ।
ये तु वृद्धा महात्मानो न प्रशंसन्ति कर्म ते ॥१४-५१-३० (९३८३४)
कर्मणा जायते जन्तुर्मूर्तिमान्षोडशात्मकः ।
पुरुषं ग्रसते विद्या तद्ग्राह्यममृताशिनम् ॥१४-५१-३१ (९३८३५)
तस्मात्कर्मसु निःस्नेहा ये केचित्पारदर्शिनः ।
विद्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः ॥१४-५१-३२ (९३८३६)
य एवममृतं नित्यमग्राह्यं शश्वदक्षरम् ॥
वश्यात्मानमसंश्लिष्टं यो वेद न मृतो भवेत् ॥१४-५१-३३ (९३८३७)
अपूर्वमकृतं नित्यं य एनमविचारिणम् ।
य एवं विन्देदात्मानमग्राह्यममृताशनम् ।
अग्राह्यो ह्यमृतो भवति स एभिः कारणैर्ध्रुवः ॥ १४-५१-३४ (९३८३८)
आयोज्य सर्वसंस्कारान्संयम्यात्मानमात्मनि ।
स तद्ब्रह्म शुभं वेत्ति यस्माद्भूयो न विद्यते ॥१४-५१-३५ (९३८३९)
प्रसादे चैव सत्वस्य प्रसादं समवाप्नुयात् ।

लक्षणं हि प्रसादस्य यथा स्यात्स्वप्नदर्शनम् ॥१४-५१-३६ (९३८४०)
गतिरेषा तु मुक्तानां ये ज्ञानपरिनिष्ठिताः ।
प्रवृत्तयश्च याः सर्वाः पश्यन्ति परिणामजाः ॥१४-५१-३७ (९३८४१)
एषा गतिर्विरक्तानामेष धर्मः सनातनः ।
एषा ज्ञानवतां प्राप्तिरेतद्वृत्तमनिन्दितम् ॥१४-५१-३८ (९३८४२)
समेन सर्वभूतेषु निस्पृहेण निराशिषा ।
शक्या गतिरियं गन्तुं सर्वत्र समदर्शिना ॥१४-५१-३९ (९३८४३)
एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः ।
एवमाचरत क्षिप्रं ततः सिद्धिमवाप्स्यथ ॥१४-५१-४० (९३८४४)
गुरुरुवाच।१४-५१-४१क्ष् (७८६४)
इत्युक्तास्ते तु मुनयो गुरुणा ब्रह्मणा तथा ।
कृतवन्तो महात्मानस्ततो लोकमवाप्नुवन् ॥१४-५१-४१ (९३८४५)
त्वमप्येतन्महाभाग मयोक्तं ब्रह्मणो वचः ।
सम्यगाचर शुद्धात्मंस्ततः सिद्धिमवाप्स्यसि ॥१४-५१-४२ (९३८४६)
वासुदेव उवाच।१४-५१-४३क्ष् (७८६५)
इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमम् ।
चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ॥१४-५१-४३ (९३८४७)
कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह ।
तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ॥१४-५१-४४ (९३८४८)
अर्जुन उवाच।१४-५१-४५क्ष् (७८६६)
को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन ।
श्रोतव्यं चेन्मयैतद्वै तत्त्वमाचक्ष्व मे विभो ॥१४-५१-४५ (९३८४९)
वासुदेव उवाच।१४-५१-४६क्ष् (७८६७)
अहं गुरुर्महाबाहो मनः शिष्य च विद्धि मे ।
त्वत्प्रीत्या गुह्यमेतच्च कथितं ते धनंजय ॥१४-५१-४६ (९३८५०)
मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह ।
अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्रत ॥१४-५१-४७ (९३८५१)
ततस्त्वं सम्यगाचीर्णो धर्मेऽस्मिन्नरिकर्शन ।
सर्वपापविनिर्मुक्तो मोक्षं प्राप्स्यसि केवलम् ॥१४-५१-४८ (९३८५२)
पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते ।
मया तव महाबाहो तस्मादत्र मनः कुरु ॥१४-५१-४९ (९३८५३)
मया तु भरतश्रेष्ठ चिरदृष्टः पिता प्रभुः ।
तमहं द्रष्टमिच्छामि सम्मते तव फल्गुन ॥१४-५१-५० (९३८५४)
वैशम्पायन उवाच।१४-५१-५१क्ष् (७८६८)
इत्युक्तवचनं कृष्णं प्रत्युवाच धनंजयः ।
ग्यदिष्टं कुरु सर्वेषामीश्वरोऽस्मान्प्रपालय ॥१४-५१-५१ (९३८५५)

नमस्ते सर्वलोकात्मन्नारायण परात्पर ।
मनोमलात्तपोशक्यं कर्म चाविद्यया हतम् ।
दानमप्यर्थदोषेणि नाम तस्मात्कलौ स्मरेत् ॥ १४-५१-५२ (९३८५६)
यदि गन्तुं कृता बुद्धिर्वासुदेव नमोस्तु ते ।'
गच्छावो नगरं कृष्ण गजसाह्वयमद्य वै ॥ १४-५१-५३ (९३८५७)
समेत्य तत्रि राजानं धर्मात्मानं युधिष्ठिरम् ।
समनुज्ञाप्य राजानं स्वां पुरीं यातुमर्हसि ॥ ॥ १४-५१-५४ (९३८५८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५१-१३ महाभूतानि गच्छतीति क ट थ पाठः ॥
७-५१-३१ विममो यः स पुरुष इति क पाठः ॥
७-५१-३५ अपोह्य सर्वान्संकल्पान्संयतात्मानमात्मनीति थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०५२
॥ श्रीः ॥
१४.५२. अध्यायः ५२

Mahabharata - Ashvamedhika Parva - Chapter Topics
अनुगीतोपदेशानन्तरं कृष्णार्जुनाभ्यां हास्तिनपुरंप्रति प्रस्थानम् ॥ १ ॥
तत्र मध्येमार्गमर्जुनेन कृष्णंप्रति स्तुतिपूर्वकं व्यासनारदादिभ्यः
स्वस्य कृष्णयाथात्म्यावगतिनिवेदनम् ॥ २ ॥
ततः कृष्णेन सहार्जुनेन हास्तिनपुरमेत्य धृतराष्ट्रादिभ्यः
पादाभिवादनम् ॥ ३ ॥
ततो युधिष्ठिराद्यनुमत्या सुभद्रामानीय सहसात्यकिना द्वारकांप्रति
प्रस्थानम् ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
ततोऽभ्यनोदयत्कृष्णो युज्यतामिति दारुकम् ।
मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः ॥ १४-५२-१ (९३८५९)
तथैव चानुयात्राणि चोदयामास पाण्डवः ।
सन्नह्यध्वं प्रयास्यामो नगर गजसाह्वयम् ॥ १४-५२-२ (९३८६०)

इत्युक्ताः सैनिकास्ते तु सज्जीभूता विशाम्पते ।
आचख्युः सज्जमित्येवं पार्थायामिततेजसे ॥१४-५२-३ (९३८६१)
ततस्तौ रथमास्थाय प्रयातौ कृष्णपाण्डवौ ।
विकुर्वाणौ कताश्चित्राः प्रीयमाणौ विशाम्पते ॥१४-५२-४ (९३८६२)
रथस्थं तु महातेजा वासुदेवं धनञ्जयः ।
पुनरेवाब्रवीद्वाक्यमिदं भरतसत्तम ॥१४-५२-५ (९३८६३)
त्वत्प्रसादाज्ज्यः प्राप्तो राज्ञा वृष्णिकुलोद्वह ।
निहताः शत्रवश्चापि प्राप्तं राज्यमकण्टकम् ॥१४-५२-६ (९३८६४)
नाथवन्तश्च भवता पाण्डवा मधुसूदन ।
भवन्तं प्लवमासाद्य तीर्णाः स्म कुरुसागरम् ।
ग्भक्तांस्त्वमाश्रितानस्मान्पालयामुत्र चेह च।' १४-५२-७ (९३८६५)
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसत्तम ।
तथा त्वामभिजानामि तथा चाहं भवान्मतः ॥१४-५२-८ (९३८६६)
त्वत्तेजःसम्भवो नित्यं हुताशो मधुसूदन ।
रतिः क्रीडामयी तुभ्यं माया ते रोदसी विभो ॥१४-५२-९ (९३८६७)
त्वयि सर्वमिदं विश्वं यदिदं स्थाणु जङ्गमम् ।
त्वं हि सर्वं विकुरुषे भूतग्रामं चतुर्विधम् ॥१४-५२-१० (९३८६८)
पृथिवीं चान्तरिक्षं च तथा स्थावरजङ्गमम् ।
हसितं तेऽमला ज्योत्स्ना ऋतवश्चेन्द्रियाणि ते ॥१४-५२-११ (९३८६९)
प्राणो वायुः सततगः क्रोधो मृत्युः सनातनः ।
प्रसादे चापि पद्मा श्रीर्नित्यं त्वयि महामते ॥१४-५२-१२ (९३८७०)
रतिस्तुष्टिर्धृतिः क्षान्तिर्मतिः कान्तिश्चराचरम् ।
त्वमेवेह युगान्तेषु निधनं प्रोच्यसेऽनघ ॥१४-५२-१३ (९३८७१)
सुदीर्घेणापि कालेन न ते शक्या गुणा मया ।
आत्मा च परमो वक्तुं नमस्ते नलिनेक्षण ॥१४-५२-१४ (९३८७२)
विदितो मे सुदुर्धर्ष नारदाद्देवलात्तथा ।
कृष्णद्वैपायनाच्चेव तथा कुरुपितामहात् ॥१४-५२-१५ (९३८७३)
त्वयि सर्वं समासक्तं त्वमेवैको जनेश्वरः ।
यच्चानुग्रहसंयुक्तमेतदुक्तं त्वयाऽनघ ॥१४-५२-१६ (९३८७४)
एतत्सर्वमहं सम्यगाचरिष्ये जनार्दन ।
इदं चाद्भुतमत्यन्तं कृतमस्मत्प्रियेप्सया ॥१४-५२-१७ (९३८७५)
यत्पापो निहतः सङ्ख्ये कौरव्यो धृतराष्ट्रजः ।
त्वया दग्धं हि तत्सैन्यं मया विजितमाहवे ॥१४-५२-१८ (९३८७६)
भवता तत्कृतं कर्म येनावाप्तो जयो मया ।
दुर्योधनस्य सङ्ग्रामे तव बुद्धिपराक्रमैः ॥१४-५२-१९ (९३८७७)
कर्णस्य च वधोपायो यथावत्सम्प्रदर्शितः ।

सैन्धवस्य च पापस्य भूरिश्रवस एव च ॥१४-५२-२० (९३८७८)
ग्तस्मात्त्वमेव सञ्चिन्त्य हितं कुरु यथा तथा।'
अहं च प्रीयमाणेन त्वया देवकिनन्दन ।
यदुक्तस्तत्करिष्यामि न हि मेऽत्र विचारणा ॥ १४-५२-२१ (९३८७९)
राजानं च समासाद्य धर्मात्मानं युधिष्ठिरम् ।
चोदयिष्यामि धर्मज्ञ गमनार्थं तवानघ ॥१४-५२-२२ (९३८८०)
आहृतं हि ममैतत्ते द्वारकागमनं प्रभो ।
अचिरादेव द्रष्टा त्वं मातुलं मे जनार्दन ।
बलदेवं च दुर्धर्षं तथाऽन्यान्वृष्णिपुङ्गवान् ॥ १४-५२-२३ (९३८८१)
एवं सम्भाषमाणौ तौ प्राप्तौ वारणसाह्वयम् ।
तथा विविशतुश्चोभौ सम्प्रहृष्टनराकुलम् ॥१४-५२-२४ (९३८८२)
तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमम्। १४-५२-२५ (९३८८३)
ददृशाते महाराज धृतराष्ट्रं जनेश्वरम् ॥ १४-५२-२५ (९३८८४)
विदुरं च महाबुद्धिं राजानं च युधिष्ठिरम् ।
भीमसेनं च दुर्धर्षं माद्रीपुत्रौ च पाण्डवौ ॥१४-५२-२६ (९३८८५)
धृतराष्ट्रमुपासीनं युयुत्सुं चापराजितम् ।
गान्धारीं च महाप्रज्ञां पृथा कृष्णां च भामिनीम् ॥१४-५२-२७ (९३८८६)
सुभद्राद्याश्च ताः सर्वा भरतानां स्त्रियस्तथा ।
ददृशाते स्त्रियः सर्वा गान्धारीपरिचारिकाः ॥१४-५२-२८ (९३८८७)
ततः समेत्य राजानं धृतराष्ट्रमरिंदमौ ।
निवेद्य नामधेये स्वे तस्य पादावगृह्णताम् ॥१४-५२-२९ (९३८८८)
गान्धार्याश्च पृथायाश्च धर्मराजस्य चैव हि ।
भीमस्य च महात्मानौ तथा पादावगृह्णताम् ॥१४-५२-३० (९३८८९)
क्षत्तारं चापि सङ्गृह्य पृष्ट्वा कुशलमव्ययम् ।
ग्परिष्वज्य महात्मानं वैश्यापुत्रं महारथम्।'
तैः सार्धं नृपतिं वृद्धं ततस्तौ पर्युपासताम् ॥ १४-५२-३१ (९३८९०)
ततो निशि महाराजो धृतराष्ट्रः कुरूद्वहान् ।
जनार्दनं च मेधावी व्यसर्जयत वै गृहान् ॥१४-५२-३२ (९३८९१)
तेऽनुज्ञाता नृपतिना ययुः स्वं स्वं निवेशनम् ।
धनंजयगृहानेव ययौ कृष्णस्तु वीर्यवान् ॥१४-५२-३३ (९३८९२)
तत्रार्चितो यथान्यायं सर्वकामैरुपस्थितः ।
कृष्णः सुष्वाप मेधावी धनंजयसहायवान् ॥१४-५२-३४ (९३८९३)
प्रभातायां तु शर्वर्यां कृत्वा पौर्वाह्णिकीं क्रियाम् ।
धर्मराजस्य भनं जग्मतुः परमार्चितौ ।
यत्रास्ते स सहामात्यो धर्मराजो महाबलः ॥ १४-५२-३५ (९३८९४)
तौ प्रविश्य महात्मानौ तद्गृहं परमार्चितम् ।

धर्मराजं ददृशतुर्देवराजमिवाश्विनौ ॥१४-५२-३६ (९३८९५)
समासाद्य तु राजानं वार्ष्णेयकुरुपुङ्गवौ ।
निषीदतुरनुज्ञातौ प्रीयमाणेन तेन तौ ॥१४-५२-३७ (९३८९६)
ततः स राजा मेधावी विवक्षू प्रेक्ष्य तावुभौ ।
प्रोवाच वदतां श्रेष्ठो वचनं राजसत्तमः ॥१४-५२-३८ (९३८९७)
विवक्षू हि युवां मन्ये वीरौ यदुकुरूद्वहौ ।
ब्रूतं कर्तास्मि सर्वं वां नचिरान्मा विचार्यताम् ॥१४-५२-३९ (९३८९८)
इत्युक्तः फल्गुनस्तत्र धर्मराजानमब्रवीत् ।
विनीतवदुपागम्य वाक्यं वाक्यविशारदः ॥१४-५२-४० (९३८९९)
अयं चिरोषितो राजन्वासुदेवः प्रतापवान् ।
भवन्तं समनुज्ञाप्य पितरं द्रष्टुमिच्छति ॥१४-५२-४१ (९३९००)
स गच्छेदभ्यनुज्ञातो भवता यदि मन्यसे ।
आनर्तनगरीं वीरस्तदनुज्ञातुमर्हसि ॥१४-५२-४२ (९३९०१)
युधिष्ठिर उवाच।१४-५२-४३क्ष् (७८६९)
पुण्डरीकाक्ष भद्रं ते गच्छ त्वं मदुसूदन ।
पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं प्रभो ॥१४-५२-४३ (९३९०२)
रोचते मे महाबाहो गमनं तव केशव ।
मातुलश्चिरदृष्टो मे त्वया देवी च देवकी ॥१४-५२-४४ (९३९०३)
समेत्यि मातुलं गत्वा बलदेवं च मानद ।
पूजयेथा महाप्राज्ञ मद्वाक्येन यथाऽर्हतः ॥१४-५२-४५ (९३९०४)
स्मरेथाश्चापि मां नित्यं भीमं च बलिनां वरम् ।
फाल्गुनं सहदेवं च नकुलं चैव मानद ॥१४-५२-४६ (९३९०५)
आनर्तानवलोक्य त्वं पितरं च महाभुजः ।
वृष्णींश्च पुनरागच्छेर्हयमेधे ममानघ ॥१४-५२-४७ (९३९०६)
स गच्छ रत्नान्यादाय विविधानि वसूनि च ।
यच्चप्यन्यन्मनोज्ञं ते तदप्यादत्स्व सात्वत ॥१४-५२-४८ (९३९०७)
इयं च वसुधा कृत्स्ना प्रसादात्तव केशव ।
अस्मानुपागता वीर निहताश्चापि शत्रवः ॥१४-५२-४९ (९३९०८)
स्वर्गापवर्गविषयं त्वद्भक्तानां न दुर्लभम् ।
संसारगहने चेद्धपापाग्निप्रशमाम्बुद ॥' १४-५२-५० (९३९०९)
एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥१४-५२-५१ (९३९१०)
तवैव रत्नानि धनं च केवलं
धरा तु कृत्स्ना तु महाभुजाद्य वै ।
यदस्ति चान्यद्द्रविणं गृहे मम
त्वमेव तस्येश्वर नित्यमीश्वरः ॥ १४-५२-५२ (९३९११)

तथेत्यथोक्तः प्रतिपूजितस्तदा
गदाग्रजो धर्मसुतेन वीर्यवान् ।
पितृष्वसारं त्ववदद्यथाविधि
सम्पूजितश्चाप्यगमत्प्रदक्षिणम् ॥ १४-५२-५३ (९३९१२)
तया स सम्यक् प्रतिनन्दितस्तत-
स्तथैव सर्वैर्विदुरादिभिस्तथा ।
विनिर्ययौ नागपुराद्गदाग्रजो
रथेन दिव्येन चतुर्भुजः स्वयम् ॥ १४-५२-५४ (९३९१३)
रथे सुभद्रामधिरोप्य भामिनीं
युधिष्ठिरस्यानुमते जनार्दनः ।
पितृष्वसुश्चापि तथा महाभुजो
विनिर्ययौ पौरजनाभिसंवृतः ॥ १४-५२-५५ (९३९१४)
तमन्वयाद्वानरवर्यकेतनः
ससात्यकिर्माद्रवतीसुतावपि ।
अगाधबुद्धिर्विदुरश्च माधवं
स्वयं च भीमो गजराजविक्रमः ॥ १४-५२-५६ (९३९१५)
निवर्तयित्वा कुरुराष्ट्रवर्धनां-
स्ततः स सर्वान्विदुरं च वीर्यवान् ।
जनार्दनो दारुकमाह सत्वरः
प्रचोदयाश्वानिति सात्यकिं तथा ॥ १४-५२-५७ (९३९१६)
ततो ययौ शत्रुगणप्रमर्दनः
शिनिप्रवीरानुगतो जनार्दनः ।
यथा निहत्यारिगणं शतक्रतु-
र्दिवं तथाऽऽनर्तपुरीं प्रतापवान् ॥ ॥ १४-५२-५८ (९३९१७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्विपञ्चसोऽध्यायः ॥५२ ॥

आश्वमेधिकपर्व - अध्याय ०५३
॥ श्रीः ॥
१४.५३. अध्यायः ५३

Mahabharata - Ashvamedhika Parva - Chapter Topics
कुरुपुराद्द्वारकां गच्छता कृष्णेन मध्येमार्गं दृष्टेनोदङ्केन
सह संवादः ॥१ ॥
तथा कौरवादिविनाशे स्वोपेक्ष्याया हेतुत्वधिया स्वंप्रति

शापदानोद्यतोदङ्कपरिसान्त्वनाय तंप्रति तत्वकथनोपक्रमः ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
तथा प्रयान्तं वार्ष्णेयं द्वारकां भरतर्षभाः ।
परिष्वज्य न्यवर्तन्त सानुयात्राः परंतपाः ॥ १४-५३-१ (९३९१८)
पुनःपुनश्च वार्ष्णेयं पर्यष्वजत फल्गुनः ।
आचक्षुर्विषयाच्चैनं स ददर्श पुनःपुनः ॥ १४-५३-२ (९३९१९)
कृच्छ्रेणैव तु तां पार्तो गोविन्दे विनिवेशिताम् ।
संजहार ततो दृष्टिं कृष्णश्चाप्यपराजितः ॥ १४-५३-३ (९३९२०)
तस्य प्रयाणे यान्यासन्निमित्तानि महात्मनः ।
बहून्यद्भुतरूपाणि तानि मे गदतः शृणु ॥ १४-५३-४ (९३९२१)
वायुर्वेगेन महता रथस्य पुरतो ववौ ।
कुर्वन्निःशर्करं मार्गं विरजस्कमकण्टकम् ॥ १४-५३-५ (९३९२२)
ववर्ष वासवश्चैव तोयं शुचि सुगन्धि च ।
दिव्यानि चैव पुष्पाणि पुरतः शार्ङ्गधन्वनः ॥ १४-५३-६ (९३९२३)
स प्रयातो महाबाहुः समेषु मरुधन्वसु ।
ददर्शाथ मुनिश्रेष्ठमुदङ्कममितौजसम् ॥ १४-५३-७ (९३९२४)
ग्महर्षिं सिद्धतपसं सर्वलोकान्तविश्रुतम्।'
स तं सम्पूज्य तेजस्वी मुनिं पृथुललोचनः ।
पूजितस्तेन च तदा पर्यपृच्छदनामयम् ॥ १४-५३-८ (९३९२५)
स पृष्टः कुशलं तेन सम्पूज्य मधुसूदनम् ।
उदङ्को ब्राह्मणश्रेष्ठस्ततः पप्रच्छ माधवम् ॥ १४-५३-९ (९३९२६)
कच्चिच्छौरे त्वया गत्वा कुरुपाण्डवसद्म तत् ।
कृतं सौभ्रात्रमचलं तन्मे व्याख्यातुमर्हसि ॥ १४-५३-१० (९३९२७)
अपि सन्धाय तान्वीरानुपावृत्तोसि केशव ।
सम्बन्दिनःक स्वदयितान्सततं वृष्णिपुङ्गव ॥ १४-५३-११ (९३९२८)
कच्चित्पाण्डुसुताः पञ्च धृतराष्ट्रस्य चात्मजाः ।
लोकेषु विहरिष्यन्ति त्वया सह परंतप ॥ १४-५३-१२ (९३९२९)
स्वराष्ट्रे ते च राजानः कच्चित्प्राप्स्यन्ति वै सुखम् ।
कौरवेषु प्रशान्तेषु त्वया नाथेन केशव ॥ १४-५३-१३ (९३९३०)
या मे सम्भावना तात त्वयि नित्यमवर्तत ।
अपि सा सफला तात कृता ते भरतान्प्रति ॥ १४-५३-१४ (९३९३१)
श्रीभगवानुवाच। १४-५३-१५क्ष् (७८७०)
कृतो यत्नो मया पूर्वं सौशाम्ये कौरवान्प्रति ।

नाशक्यन्त यदा साम्ये ते स्थापयितुमञ्जसा। १४-५३-१५ (९३९३२)
न दिष्टमप्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ।
महर्षे विदितं भूयः सर्वमेतत्तवानघ ॥ १४-५३-१६ (९३९३३)
तेऽत्यक्रामन्मतिं मह्यं भीष्मस्य विदुरस्य च ।
ततो यमक्षयं जग्मुः समासाद्येतरेतरम् ॥ १४-५३-१७ (९३९३४)
पञ्चैव पाण्डवाः शिष्टा इतमित्रा हतात्मजाः ।
धार्तराष्ट्राश्च निहताः सर्वे ससुतबान्धवाः ॥ १४-५३-१८ (९३९३५)
इत्युक्तवचने कृष्णे भृशं क्रोधसमन्वितः ।
उदङ्क इत्युवाचैनं रोषादुत्फुल्ललोचनः ॥ १४-५३-१९ (९३९३६)
यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपुङ्गवाः ।
सम्बन्धिनः प्रियास्तस्माच्छप्स्येऽहं त्वामसंशयम् ॥ १४-५३-२० (९३९३७)
न च ते प्रसभं यस्मात्ते निगृह्य निवारिताः ।
तस्मान्मन्युपरीतस्त्वां शप्स्यामि मधुसूदन ॥ १४-५३-२१ (९३९३८)
त्वया शक्तेन हि सता मिथ्याचारेणि माधव ।
ते परीताः कुरुश्रेष्ठा नश्यन्तः स्म ह्युपेक्षिताः ॥ १४-५३-२२ (९३९३९)
वासुदेव उवाच। १४-५३-२३क्ष् (७८७१)
शृणु मे विस्तरेणेदं यद्वक्ष्ये भृगुनन्दन ।
गृहाणानुनयं चापि तपस्वी ह्यसि भार्गवम् ॥ १४-५३-२३ (९३९४०)
श्रुत्वा च मे तदध्यात्मं मुञ्चेथाः शापमद्य वै ।
न च मां तपसाऽल्पेन शक्तोऽभिभवितुं पुमान् ॥ १४-५३-२४ (९३९४१)
न च ते तपसो नाशमिच्छामि तपतां वर ।
तपस्ते सुमहद्दीप्तं गुरवश्चापि तोषिताः ॥ १४-५३-२५ (९३९४२)
कौमारं ब्रह्मचर्यं ते जानामि द्विजसत्तम ।
दुःखार्जितस्य तपसस्तस्मान्नेच्चामि तेऽव्ययम् ॥ ॥ १४-५३-२६ (९३९४३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५३-१५ सौशाम्ये सौरस्ये ॥
७-५३-२२ परीताः परितः प्राप्ताः ॥
७-५३-२३ अनुनयं शिक्षाम् ॥
७-५३-२४ मे मत्तः ॥

आश्वमेधिकपर्व - अध्याय ०५४
॥ श्रीः ॥

१४.५४. अध्यायः ५४

Mahabharata - Ashvamedhika Parva - Chapter Topics

कृष्णेनोदङ्कंप्रति स्वमाहात्म्यप्रकाशनपूर्वकं कुरूणां स्ववचनातिक्रमणादिरूपस्वापराधेनैव निधनोक्तिः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

उदङ्क उवाच ।
ब्रूहि केशव तत्त्वेन त्वमध्यात्ममनिन्दितम् ।
श्रुत्वा श्रेयोऽभिधास्यामि शापं वा ते जनार्दन ॥ १४-५४-१ (९३९४४)
वासुदेव उवाच। १४-५४-२क्ष् (७८७२)
तमो रजश्च सत्वं च विद्धि भावान्मदाश्रयान् ।
गस्थितिसृष्टिलयाध्यक्षो विष्णुब्रह्मेशसंज्ञितः ॥ १४-५४-२ (९३९४५)
कदाचित्तमसा रुद्रो विष्णुः सत्त्वगुणे स्थितः ।
रजस्यपि तथा ब्रह्मा स्वगुणान्यगुणानुभौ ॥ १४-५४-३ (९३९४६)
प्रणवात्मा च शब्दादींस्त्रिगुणात्मा चराचरम्।'
तथा रुद्रान्वसून्वाऽपि विद्धि मत्प्रभवान्द्विज ॥ १४-५४-४ (९३९४७)
मयि सर्वाणि भूतानि सर्वभूतेषु चाप्यहम् ।
स्थित इत्यभिजानीहि मा ते भूदत्र संशयः ॥ १४-५४-५ (९३९४८)
तथा दैत्यगणान्सर्वान्यक्षगन्धर्वराक्षसान् ।
नागानप्सरसश्चैव विद्धि मत्प्रभवान्द्विज ॥ १४-५४-६ (९३९४९)
सदसच्चैव यत्प्राहुरव्यक्तं व्यक्तमेव च ।
अक्षरं च क्षरं चैव सर्वमेतन्मदात्मकम् ॥ १४-५४-७ (९३९५०)
ये चाश्रमेषु वै धर्माश्चतुर्षु विहिता मुने ।
वैदिकानि च कर्माणि विद्धि सर्वं मदात्मकम् ॥ १४-५४-८ (९३९५१)
असच्च सच्चैव च यद्विश्वं सदसतः परम् ।
ततः परतरं नास्ति देवदेवात्सनातनात् ॥ १४-५४-९ (९३९५२)
ओंकारप्रभवान्वेदान्विद्धि मां त्वं भृगूद्वह ।
यूपं सोमं चरुं होमं त्रिदशाप्यायनं मखे ॥ १४-५४-१० (९३९५३)
होतारमपि हव्यं च विद्धिं मां भृगुनन्दन ।
अध्वर्युः कल्पकृच्चापि हविः परमसंस्कृतम् ॥ १४-५४-११ (९३९५४)
उद्गाता चापि मां स्तौति गीतघोषैर्महाध्वरे ।
प्रायश्चित्तेषु मां ब्रह्मञ्शान्तिमङ्गलवाचकाः ॥ १४-५४-१२ (९३९५५)
स्तुवन्ति विश्वकर्माणं सततं द्विजसत्तम ।
मम विद्धि सुतं धर्ममग्रजं द्विजसत्तम ॥ १४-५४-१३ (९३९५६)

मानसं दयितं विप्र सर्वभूतदयात्मकम् ।
तत्राहं वर्तमानैश्च निवृत्तैश्चैव मानवैः ॥ १४-५४-१४ (९३९५७)
बह्वीः संसरमाणो वै योनीर्वर्तामि सत्तम ।
लोकसरंक्षणार्थाय धर्मसंस्थापनाय च ॥ १४-५४-१५ (९३९५८)
तैस्तैर्वेषैश्च रूपैश्च त्रिषु लोकेषु भार्गव ।
अहं विष्णुरहं ब्रह्मा शक्रोऽथ प्रभवाप्ययः ॥ १४-५४-१६ (९३९५९)
भूतग्रामस्य सर्वस्य स्रष्टा संहार एव च ।
अधर्मे वर्तमानानां सर्वेषामहमच्युतः ॥ १४-५४-१७ (९३९६०)
धर्मस्य सेतुं बध्नामि चलिते चलिते युगे ।
तास्ता योनीः प्रविश्याहं प्रजानां हितकाम्यया ॥ १४-५४-१८ (९३९६१)
यदा त्वहं देवयोनौ वर्तामि भृगुनन्दन ।
तदाऽहं देववत्सर्वमाचरामि न संशयः ॥ १४-५४-१९ (९३९६२)
यदा गन्धर्वयोनौ तु वर्तामि भृगुनन्दन ।
तदा गन्धर्ववच्चेष्टा सर्वाश्चेष्टामि भार्गव ॥ १४-५४-२० (९३९६३)
नागयोनौ यदा चैव तदा वर्तामि नागवत् ।
यक्षराक्षसयोन्योस्तु यथावद्विचराम्यहम् ॥ १४-५४-२१ (९३९६४)
मानुष्ये वर्तमाने तु कृपणं याचिता मया ।
न च ते जातसम्मोहा वचोऽगृह्णन्त मोहिताः ॥ १४-५४-२२ (९३९६५)
भयं च महदुद्दिश्य त्रासिताः कुरवो मया ।
क्रुद्धेन भूत्वा तु पुर्यथावदनुदर्शिताः ॥ १४-५४-२३ (९३९६६)
तेऽधर्मेणेह संयुक्ताः परीताःक कालधर्मणा ।
धर्मेण निहता युद्धे गताः स्वर्गं न संशयः ॥ १४-५४-२४ (९३९६७)
लोकेषु पाण्डवाश्चैव गताः ख्यातिं द्विजोत्तम ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ ॥ १४-५४-२५ (९३९६८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५४-८ दैवतानि च कर्माणि विद्धि सर्वान्गुणान्ममेति ट थ पाठः ॥
७-५४-१० ओंकारप्रमुखानिति झ पाठः ॥
७-५४-११ अध्वर्युः कल्पन इति ट थ पाठः ॥
७-५४-१२ गतमोक्षे महाध्वरे इति ट थ पाठः ॥
७-५४-१४ सर्वभूतगुणात्मकमिति क ट थ । पाठः ॥
७-५४-१९ पुनस्त्वहं देवयोनाविति ट थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०५५
॥ श्रीः ॥
१४.५५. अध्यायः ५५

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनोदङ्काय विश्वरूपप्रदर्शनपूर्वकं पिपासाकाले
जललाभरूपवरदानम् ॥ १ ॥
कृष्णेनोदङ्कायामृतदानं चोदितेनेन्द्रेण कदाचिद्वनमध्ये
पिपासुमुदङ्कंप्रति चण्डालवेषेण जलस्वीकारप्रार्थने उदङ्केन
चण्डालत्वबुद्ध्या तदधिक्षेपः ॥ २ ॥
पश्चात्तस्य तिरोधानेन परितप्यन्तमुदङ्कंप्रति तत्र
संनिहितेन कृष्णेनेन्द्रकृतवञ्चनानिवेदनपूर्वकं मरुप्रदेशे
जललाभरूपवरदानम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

उदङ्क उवाच ।
अभिजानामि जगतः कर्तारं त्वां जनार्दन ।
नूनं भवत्प्रसादोऽयमिति मे नास्ति संशयः ॥ १४-५५-१ (९३९६९)
चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत ।
विनिवृत्तश्च मे कोप इति विद्धि परंतप ॥ १४-५५-२ (९३९७०)
यदि त्वनुग्रहं कञ्चित्त्वत्तोऽर्हामि जनार्दन ।
द्रष्टुमिच्छामि ते रूपं वैष्णवं तन्निदर्शय ॥ १४-५५-३ (९३९७१)
वैशम्पायन उवाच। १४-५५-४क्ष् (७८७३)
ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः ।
शाश्वतं वैष्णवं धीमान्ददृशे यद्धनंजयः ॥ १४-५५-४ (९३९७२)
स ददर्श महात्मानं विश्वरूपं महाभुजम् ।
सहस्रसूर्यप्रतिमं दीप्तिमत्पावकोपमम् ।
सर्वमाकाशमावृत्य तिष्ठन्तं सर्वतोमुखम् ॥ १४-५५-५ (९३९७३)
तद्दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमद्भुतम् ।
विस्मयं च ययौ विप्रस्तं दृष्ट्वा परमेश्वरम् ॥ १४-५५-६ (९३९७४)
उदङ्क उवाच। १४-५५-७क्ष् (७८७४)
ग्नमोनमस्ते सर्वात्मन्नारायण परात्मक ।
परमात्मन्पद्मनाभ पुण्डरीकाक्ष माधव ॥ १४-५५-७ (९३९७५)
हिरण्यगर्भरूपाय संसारोत्तारणाय च ।
पुरुषाय पुराणाय शान्तश्यामाय ते नमः ॥ १४-५५-८ (९३९७६)

अविद्यातिमिरादित्यं भवव्याधिमहौषधिम् ।
संसारार्णवसारं त्वां प्रणमामि गतिर्भव ॥१४-५५-९ (९३९७७)
सर्ववेदैकवेद्याय सर्ववेदमयाय च ।
वासुदेवाय नित्याय नमो भक्तप्रियाय ते ॥१४-५५-१० (९३९७८)
दयया दुःखमोहान्मां सुमुद्धर्तुमिहार्हसि ।
कर्मभिर्बहुभिः पापैर्बद्धं पाहि जनार्दन ॥' १४-५५-११ (९३९७९)
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वकसम्भव ।
पद्भ्यां ते पृथिवी व्याप्ता शिरसा चावृतं नभः ॥१४-५५-१२ (९३९८०)
द्यावापृथिव्योर्यन्मध्यं जठरेण तवावृतम् ।
भुजाभ्यामावृताश्चाशास्त्वमिदं सर्वमच्युत ॥१४-५५-१३ (९३९८१)
संहरस्व पुनर्देव रूपमक्षय्यमुत्तमम् ।
पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतम् ॥१४-५५-१४ (९३९८२)
वैशम्पायन उवाच।१४-५५-१५क्ष् (७८७५)
तमुवाच प्रसन्नात्मा गोविन्दो जनमेजय ।
वरं वृणीष्वेति तदा तमुदङ्कोऽब्रवीदिदम्। १४-५५-१५ (९३९८३)
पर्याप्त एष एवाद्य वरस्त्वत्तो महाद्युते ।
यत्ते रूपमिदं कृष्ण पश्यामि प्रभवाप्ययम् ॥१४-५५-१६ (९३९८४)
तमब्रकवीत्पुनः कृष्णो मा त्वमत्र विचारय
।अवश्यमेतत्कर्तव्यममोघं दर्शनं मम ॥ १४-५५-१७ (९३९८५)
उदङ्कक उवाच।१४-५५-१८क्ष् (७८७६)
अवश्यं करणीयं च यद्येतन्मन्यसे विभो ।
तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि दुर्लभम् ॥१४-५५-१८ (९३९८६)
ततः संहृत्य तत्तेजः प्रोवाचोदङ्कमीश्वरः ।
एष्टव्ये सति चिन्त्योऽहमित्युक्त्वा द्वारकां ययौ ॥१४-५५-१९ (९३९८७)
ततः कदाचिद्भगवानुदङ्कस्तोयकाङ्क्षया ।
तृषितः परिचक्राम मरौ सस्मार चाच्युतम् ॥१४-५५-२० (९३९८८)
ततो दिग्वाससं धीमान्मातङ्गं मलपङ्किनम् ।
अपश्यत मरौ तस्मिञ्श्वयूथपरिवारितम् ॥१४-५५-२१ (९३९८९)
भीषणं बद्धनिस्त्रिंशं बाणकार्मुकधारिणम् ।
तस्याधःस्रोतसोऽपश्यद्वारि भूरि द्विजोत्तमः ॥१४-५५-२२ (९३९९०)
स्मरन्नेव च तं प्राह मातङ्गः प्रहसन्निव ।
एह्युदङ्क प्रतीच्छस्व मत्तो वारि भृगूद्वह ।
कृपा हि मे सुमहती त्वां दृष्ट्वा तृट्समाश्रितम् ॥ १४-५५-२३ (९३९९१)
इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनन्दन ।
चिक्षेप च स तं धीमान्वाग्भिरुग्राभिरच्युतम्। १४-५५-२४ (९३९९२)
पुनःपुनश्च मातङ्ग पिबस्वेति तमब्रवीत् ।

न चापिबत्स सक्रोधः क्षुभितेनान्तरात्मना ॥१४-५५-२५ (१३९९३)
स तथा निश्चयात्तेन प्रत्याख्यातो महात्मना ।
श्वभिः सह महाराज तत्रैवान्तरधीयत ॥१४-५५-२६ (१३९९४)
उदङ्कस्तं तथा दृष्ट्वा ततो व्रीडितमानसः ।
मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना ॥१४-५५-२७ (१३९९५)
अथ तेनैव मार्गेण शङ्खचक्रगदाधरः ।
आजगाम महाबाहुरुदङ्कश्चैनमब्रवीत् ॥१४-५५-२८ (१३९९६)
न युक्तं तादृशं दातुं त्वया पुरुषसत्तम ।
सलिलं विप्रमुख्येभ्यो मातङ्गस्रोतसा विभो ॥१४-५५-२९ (१३९९७)
इत्युक्तवचनं तं तु महाबुद्धिर्जनार्दनः ।
उदङ्कं श्लक्ष्णया वाचा सान्त्वयन्निदमब्रवीत् ॥१४-५५-३० (१३९९८)
यादृशेनेह रूपेण योग्यं दातुं धृतेन वै ।
तादृशं खलु ते दत्तं यच्च त्वं नावबुध्यथाः ॥१४-५५-३१ (१३९९९)
मया त्वदर्थमुक्तो वै वज्रपाणिः पुरंदरः ।
उदङ्कायामृतं देहि तोयरूपमिति प्रभुः ॥१४-५५-३२ (१४०००)
स मामुवाच देवेन्द्र न मर्त्योऽमर्त्यतां व्रजेत् ।
अन्यमस्मै वरं देहीत्यसकृद्भृगुनन्दन ॥१४-५५-३३ (१४००१)
अमृतं देयमित्येव मयोक्तः स शचीपतिः ।
स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत् ॥१४-५५-३४ (१४००२)
यदि देयमवश्यं वै मातङ्गोऽहं महामते ।
भूत्वाऽमृतं प्रदास्यामि भार्गवाय महात्मने ॥१४-५५-३५ (१४००३)
यद्येवं प्रतिगृह्णाति भार्गवोऽमृतमद्य वै ।
प्रदातुमेष गच्छामि भार्गवस्यामृतं विभो ।
प्रत्याख्यातस्त्वहं तेन दास्यामि न कथञ्चन ॥ १४-५५-३६ (१४००४)
स तथा समयं कृत्वा तेन रूपेण वासवः ।
उपस्थितस्त्वया चापि प्रत्याख्यातोऽमृतं ददत् ।
चाण्डालरूपी भगवान्सुमहांस्ते व्यतिक्रमः ॥ १४-५५-३७ (१४००५)
यत्तु शक्यं मया कर्तुं भूय एव तवेप्सितम् ।
तोयेप्सां तव दुर्धर्षां करिष्ये सफलामहम् ॥१४-५५-३८ (१४००६)
येष्वहःसु च ते ब्रह्मन्सलिलेप्सा भविष्यति ।
तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः ॥१४-५५-३९ (१४००७)
रसवच्च प्रदास्यन्ति तोयं ते भृगुनन्दन ।
उदङ्कमेघा इत्युक्ताः ख्यातिं यास्यन्ति चापि ते ॥१४-५५-४० (१४००८)
इत्युक्तः प्रीतिमान्विप्रः कृष्णेन स बभूव ह ।
अद्याप्युदङ्कमेघाश्च मरौ वर्षन्ति भारत ॥ ॥१४-५५-४१ (१४००९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५५-३ ते रूपमैश्वरमिति झ पाठः ॥
७-५५-१९ एष्टव्ये जलेऽपेक्षिते सति ॥
७-५५-२१ मातङ्गं चण्डालविशेषम् ॥
७-५५-२२ अधः पाददेशे स्रोतसो दृतेर्वारीति संबन्धः । ततः
शङ्कितमानस इति क ट थ पाठः ॥
७-५५-२४ चिक्षेप निन्दितवान् ॥
७-५५-२७ प्रलब्धं वञ्चितम् ॥

आश्वमेधिकपर्व - अध्याय ०५६
॥ श्रीः ॥
१४.५६. अध्यायः ५६

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

वैशम्पायनेन जनमेजयंप्रत्युदङ्कोपाख्यानकथनारम्भः ॥ १ ॥
उदङ्ककृतपरिचर्याविशेषतुष्टेन गौतमेन तस्मै प्रीत्यतिशयेन
चिरादपि गृहगमनायाभ्यननुज्ञानम् ॥ २ ॥
कदाचन गुरुशासनेन काष्ठभारमाहृतवतोदङ्केन
काष्ठलग्नजरापलितनिजकेशावलोकनेन परिदेवनम् ॥ ३ ॥
ततस्तदबोधितनिजरोदनहेतुना गुरुणा तस्मै निजतनयाप्रतिपादनम् ॥ ४ ॥
ततस्तेन गुरुपत्नीनिदेशेन कुण्डलयाचनाय सौदासंप्रति गमनम् ॥ ५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
उदङ्कः केन तपसा संयुक्तो वै महामनाः ।
यः शापं दातुकामोऽभूद्विष्णवे प्रभविष्णवे ॥ १४-५६-१ (९४०१०)
वैशम्पायन उवाच। १४-५६-२क्ष् (७८७७)
उदङ्को महता युक्तस्तपसा जनमेजय ।
गुरभक्तः स तेजस्वी नान्यत्किञ्चिदपूजयत् ॥ १४-५६-२ (९४०११)
सर्वेषामृषिपुत्राणामेष आसीन्मनोरथः ।
औदङ्कीं गुरुवृत्तिं वै प्राप्नुयामेति भारत ॥ १४-५६-३ (९४०१२)

गौतमस्य तु शिष्याणां बहूनां जनमेजय ।
उदङ्केऽभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा ॥ १४-५६-४ (९४०१३)
स तस्य दमशौचाभ्यां विक्रान्तेन च कर्मणा ।
सम्यक्चैवोपचारेण गौतमः प्रीतिमानभूत् ॥ १४-५६-५ (९४०१४)
अथ शिष्यसहस्राणि समनुज्ञाय गौतमः ।
उदङ्कं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत ॥ १४-५६-६ (९४०१५)
तं क्रमेण जरा तात प्रतिपेदे महामुनिम् ।
न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः ॥ १४-५६-७ (९४०१६)
ततः कदाचिद्राजेन्द्र काष्ठान्यानयितुं ययौ ।
उदङ्कः काष्ठभारं च महान्तं समुपानयत् ॥ १४-५६-८ (९४०१७)
स तद्भाराभिभूतात्मा काष्ठभारमरिंदम ।
निचिक्षेप क्षितौ राजन्परिश्रान्तो बुभुक्षितः ॥ १४-५६-९ (९४०१८)
तस्य काष्ठे विलग्नाऽभूज्जटा रूप्यसमप्रभा ।
ततः काष्ठैः सह तदा पपात धरणीतलम् ॥ १४-५६-१० (९४०१९)
ततः स भारनिष्पिष्टः क्षुधाविष्टश्च भारत ।
दृष्ट्वा तां वयसोऽवस्थां रुरोदार्तस्वरं तदा ॥ १४-५६-११ (९४०२०)
ततो गुरुसुता तस्य पद्मपत्रनिभानना ।
जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना ।
पितुर्नियोगाद्धर्मज्ञा शिरसाऽवनता तदा ॥ १४-५६-१२ (९४०२१)
तस्या निपेततुर्दग्धौ करौ तैरश्रुबिन्दुभिः ।
न हि तानश्रुपातांस्तु शक्ता धारयितुं मही ।
गौतमस्त्वब्रवीद्विप्रमुदङ्कं प्रीतमानसः ॥ १४-५६-१३ (९४०२२)
कस्मात्तात तवाद्येह शोकोत्तरमिदं मनः ।
स स्वैरं ब्रूहि विप्रर्षे श्रोतुमिच्छामि तत्त्वतः ॥ १४-५६-१४ (९४०२३)
उदङ्क उवाच। १४-५६-१५क्ष् (७८७८)
भवद्गतेन मनसा भवत्प्रियचिकीर्षया ।
भवद्भक्तिगतेनेह भवद्भावानुगेन च ॥ १४-५६-१५ (९४०२४)
जरेयं नाघबुद्धा मे नाभिज्ञातं सुखं च मे ।
शतवर्षोषितं मां हि न त्वमन्यनुजानिथाः ॥ १४-५६-१६ (९४०२५)
भवता त्वभ्यनुज्ञाताः शिष्याः प्रत्यवरा मम ।
उपपन्ना द्विजश्रेष्ठ शतशोऽथ सहस्रशः ॥ १४-५६-१७ (९४०२६)
गौतम उवाच। १४-५६-१८क्ष् (७८७९)
त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव ।
व्यतिक्रामन्महाकालो नावबुद्धो द्विजर्षभ ॥ १४-५६-१८ (९४०२७)
किं त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव ।
अनुज्ञां प्रतिगृह्य त्वं स्वगृहान्गच्छ माचिरम् ॥ १४-५६-१९ (९४०२८)

उदङ्क उवाच। १४-५६-२०क्ष् (७८८०)
गुर्वर्तं कं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम ।
तमुपाहृत्य गच्छेयमनुज्ञातस्त्वया विभो ॥ १४-५६-२० (९४०२९)
गौतम उवाच। १४-५६-२१क्ष् (७८८१)
दक्षिणापरितोषो वै गुरूणां सद्भिरुच्यते ।
तवि ह्याचरतो धर्मं तुष्टोऽहं वै न संशयः ।
इत्थं च परितुष्टं मां विजानीहि भृगूद्वह ॥ १४-५६-२१ (९४०३०)
युवा षोडशवर्षो हि यद्यद्य भविता भवान् ।
ददानि पत्नीं कन्यां च स्वां ते दुहितरं द्विज ।
एतामृतेऽङ्गना नान्या त्वत्तेजोऽर्हति सेवितुम् ॥ १४-५६-२२ (९४०३१)
ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीम् ।
गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत् ॥ १४-५६-२३ (९४०३२)
किं भवत्यै प्रयच्छामि गुर्वर्थं विनियुङ्क्ष माम् ।
प्रियं हितं च काङ्क्षामि प्राणैरपि धनैरपि ॥ १४-५६-२४ (९४०३३)
यद्दुर्लभं हि लोकेऽस्मिन्रत्नमत्यद्भुतं महत् ।
तदानयेयं तपसा न हि मेऽत्रास्ति संशयः ॥ १४-५६-२५ (९४०३४)
अहल्योवाच। १४-५६-२६क्ष् (७८८२)
परितुष्टाऽस्मि ते विप्र नित्यं भक्त्या तवानघ ।
पर्याप्तमेतद्भद्रं ते गच्छ तात यथेप्सितम् ॥ १४-५६-२६ (९४०३५)
वैशम्पायन उवाच। १४-५६-२७क्ष् (७८८३)
उदङ्कस्तु महाराज पुनरेवाब्रवीद्वचः ।
आज्ञापयस्व मां मातः कर्तव्यं च तव प्रियम् ॥ १४-५६-२७ (९४०३६)
अहल्योवाच। १४-५६-२८क्ष् (७८८४)
सौदासपत्न्या विधृते दिव्ये ये मणिकुण्डले ।
ते समानय भद्रं ते गुर्वर्थः सुकृतो भवेत् ॥ १४-५६-२८ (९४०३७)
वैशम्पायन उवाच। १४-५६-२९क्ष् (७८८५)
स तथेति प्रतिश्रुत्य जगाम जनमेजय ।
गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा ॥ १४-५६-२९ (९४०३८)
स जगाम ततः शीघ्रमुदङ्को ब्राह्मणर्षभः ।
सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले ॥ १४-५६-३० (९४०३९)
गौतमस्त्वब्रवीत्पत्नीमुदङ्को नात्र दृश्यते ।
इति पृष्टा तमाचष्ट कुण्डलार्थे गतं च सा ॥ १४-५६-३१ (९४०४०)
ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतम् ।
शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति ॥ १४-५६-३२ (९४०४१)
अहल्योवाच। १४-५६-३३क्ष् (७८८६)
अजानन्त्या नियुक्तः स भगवन्ब्राह्मणो मया ।

भवत्प्रसादान्न भयं किञ्चित्तस्य भविष्यति ॥ १४-५६-३३ (९४०४२)
इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः ।
उदङ्कोऽपि वने शून्ये राजानं तं ददर्श ह ॥ ॥ १४-५६-३४ (९४०४३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५६-११ निष्पिष्टः चूर्णीभूत इव । कवेरार्तस्य धीमत इति
क ट थ पाठः ॥
७-५६-१६ अभ्यनुजानिथाः अभ्यन्वजानीथा अभ्यनुज्ञातवानसि ॥
७-५६-२६ नित्यं भगवता सहेति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०५७
॥ श्रीः ॥
१४.५७. अध्यायः ५७

Mahabharata - Ashvamedhika Parva - Chapter Topics
शापाद्राक्षसत्वं गतेन सौदासेनोदङ्कभक्षणोद्यमे उदङ्केन पुनः
प्रत्यागमनप्रतिज्ञापूर्वकं तम्प्रति कुण्डलयाचनम् ॥ १ ॥
उदङ्केन सौदासवचसा तत्पत्नींप्रति कुण्डलयाचने तया तम्प्रति
मणिकुण्डलमहिमादिकथनपूर्वकं राजाभिज्ञानानयनचोदना ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
स तं दृष्ट्वा तथाभूतं राजानं घोरदर्शनम् ।
दीर्घश्मश्रुधरं नृणां शोणितेन समुक्षितम् ॥ १४-५७-१ (९४०४४)
चकार न व्यथां विप्रो राजा त्वेनमथाब्रवीत् ।
प्रत्युत्थाय महातेजा भयकर्ता यमोपमः ॥ १४-५७-२ (९४०४५)
दिष्ट्या त्वमसि कल्याण षष्ठे काले ममान्तिकम् ।
भक्ष्यं मृगयमाणस्य सम्प्राप्तो द्विजसत्तम ॥ १४-५७-३ (९४०४६)
उदङ्क उवाच। १४-५७-४क्ष् (७८८७)
राजन्गुर्वर्थिनं विद्धि चरन्तं मामिहागतम् ।
न च गुर्वर्थमुद्युक्तं हिंस्यमाहुर्मनीषिणः ॥ १४-५७-४ (९४०४७)
राजोवाच। १४-५७-५क्ष् (७८८८)

षष्ठे काले ममाहारो विहितो द्विजसत्तम ।
न शक्यस्त्वं समुत्स्रष्टुं क्षुधितेन मयाऽद्य वै ॥१४-५७-५ (९४०४८)
उदङ्क उवाच।१४-५७-६क्ष् (७८८९)
एवमस्तु महाराजि समयः क्रियतां तु मे ।
गुर्वर्थमभिनिर्वर्त्य पुनरेष्यामि ते वशम् ॥१४-५७-६ (९४०४९)
संश्रुतश्च मया योऽर्थो गुरवे राजसत्तम ।
त्वदधीनः स राजेन्द्र तं त्वां भिक्षे नरेश्वर ॥१४-५७-७ (९४०५०)
ददासि विप्रमुख्येभ्यस्त्वं हि रत्नानि नित्यदा ।
दाता च त्वं नरव्याघ्र पात्रभूतः क्षिताविह ।
पात्रं प्रतिग्रहे चापि विद्धि मां नृपसत्तम ॥ १४-५७-८ (९४०५१)
उपाहृत्य गुरोरर्थं त्वदायत्तमरिंदम ।
समयेनेह राजेन्द्र पुनरेष्यामि ते वशम् ॥१४-५७-९ (९४०५२)
सत्यं ते प्रतिजानामि नात्र मिथ्या कथञ्चन ।
अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा ॥१४-५७-१० (९४०५३)
सौदास उवाच।१४-५७-११क्ष् (७८९०)
यदि मत्तस्तवायत्तो गुर्वर्थः कृत एव सः ।
यदि चास्ति प्रतिग्राह्यं साम्प्रतं तद्वदस्व मे ॥१४-५७-११ (९४०५४)
उदङ्क उवाच।१४-५७-१२क्ष् (७८९१)
प्रतिग्राह्यो मतो मे त्वं सदैव पुरुषर्षभ ।
सोहं त्वामनुसम्प्राप्तो भिक्षितुं मणिकुण्डले ॥१४-५७-१२ (९४०५५)
सौदास उवाच।१४-५७-१३क्ष् (७८९२)
पत्न्यास्ते मम विप्रर्षे उचिते मणिकुण्डले ।
वरयार्थं त्वमन्यं वै तं ते दास्यामि सुव्रत ॥१४-५७-१३ (९४०५६)
उदङ्क उवाच।१४-५७-१४क्ष् (७८९३)
अलं ते व्यपदेशेन प्रमाणं यदि ते वयम् ।
प्रयच्छ कुण्डले मह्यं सत्यवाग्भव पार्थिव ॥१४-५७-१४ (९४०५७)
वैशम्पायन उवाच।१४-५७-१५क्ष् (७८९४)
इत्युक्तस्त्वब्रवीद्राजा तमुदङ्कं पुनर्वचः ।
गच्छ मद्वचनाद्देवीं ब्रूहि देहीति सत्तम ॥१४-५७-१५ (९४०५८)
सैवमुक्ता त्वया नूनं मद्वाक्येन शुचिव्रता ।
प्रदास्यति द्विजश्रेष्ठ कुण्डले ते न संशयः ॥१४-५७-१६ (९४०५९)
उदङ्क उवाच।१४-५७-१७क्ष् (७८९५)
क्व पत्नी भवतः शक्या मया द्रष्टुं नरेश्वर ।
स्वयं वाऽपि भवान्पत्नीं किमर्थं नोपसर्पति ॥१४-५७-१७ (९४०६०)
सौदास उवाच।१४-५७-१८क्ष् (७८९६)
तां द्रक्ष्यति भवानद्य कस्मिंश्चिद्वननिर्झरे ।

षष्ठे काले न हि मया सा शक्या द्रष्टुमद्य वै ॥१४-५७-१८ (९४०६१)
वैशम्पायन उवाच।१४-५७-१९क्ष् (७८९७)
उदङ्कस्तु तथोक्तः स जगाम भरतर्षभ ।
मदयन्तीं च दृष्ट्वा स ज्ञापयत्स्वप्रयोजनम् ॥१४-५७-१९ (९४०६२)
सौदासवचनं श्रुत्वा ततः सा पृथुलोचना ।
प्रत्युवाच महावुद्धिमुदङ्कं जनमेजय ॥१४-५७-२० (९४०६३)
एवमेतन्महाब्रह्मन्नानृतं वदसेऽनघ ।
अभिज्ञानं तु किञ्चित्त्वं समानयितुमर्हसि ॥१४-५७-२१ (९४०६४)
इमे हि दिव्ये मणिकुण्डले मे
देवाश्च यक्षाश्च महर्षयश्च ।
तैस्तैरुपायैरपहर्तुकामा-
श्छिद्रेषु नित्यं परितर्कयन्ति ॥ १४-५७-२२ (९४०६५)
निक्षिप्तमेतद्भुवि पन्नगास्तु
रत्नं समासाद्य परामृशेयुः ।
यक्षास्तथोच्छिष्टधृतं सुराश्च
निद्रावशाद्वा परिधर्षयेयुः ॥ १४-५७-२३ (९४०६६)
छिद्रेष्वेतेष्विमे नित्यं ह्रियते द्विजसत्तम ।
देवराक्षसनागानामप्रमत्तेनि धार्यते ॥१४-५७-२४ (९४०६७)
एते दिवापि भासेते रात्रौ च द्विजसत्तम ।
नक्तं नक्षत्रताराणां प्रभामाक्षिप्य वर्ततः ॥१४-५७-२५ (९४०६८)
एते ह्यामुच्य भगन्क्षुत्पिपासाभयं कुतः ।
विषाग्निश्वापदेभ्यश्च भयं जातु न विद्यते ॥१४-५७-२६ (९४०६९)
ह्रस्वेन चैते आमुक्ते भवतो ह्रस्वके तदा ।
अनुरूपेण चामुक्ते जायेते तत्प्रमाणके ॥१४-५७-२७ (९४०७०)
एवंविधे ममैते वै कुण्डले परमार्चिते ।
त्रिषु लोकेषु विज्ञाते तदभिज्ञानमानय ॥ ॥१४-५७-२८ (९४०७१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्तपञ्चाशोऽध्यायः ॥५७ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५७-२४ छिद्रेष्वेतेष्विमे इति पूर्वान्वयि ।नागानां नागैः ह्रियेत
इति सम्बन्धः ॥

आश्वमेधिकपर्व - अध्याय ०५८
॥ श्रीः ॥

१४.५८. अध्यायः ५८

Mahabharata - Ashvamedhika Parva - Chapter Topics

उदङ्केनाभिज्ञाननिवेदनेनि मदयन्तीतः कुण्डलग्रहणपूर्वकं प्रतिनिवर्तनम् ॥ १ ॥
मध्येमार्गं क्षुधाविष्टेन तेन बिल्वतरुमारुह्य शाखायां कुण्डलासञ्जनपूर्वकं फलपातनाय शाखाचालनम् ॥ २ ॥
तत्र पतत्फलघट्टनेन कुण्डलयोरधःपतने केनचिदुरगवरेण तदपहृत्य नागलोकगमनम् ॥ ३ ॥
तत इन्द्रसाहाय्याद्भूविदारणेन नागलोकंगतेनोदङ्केन तत्राश्ववचसा तदपानदेशधमने तन्निर्गतधूमपटलनिरुद्धैः सर्पैरुदङ्काय कुण्डलप्रत्यर्पणम् ॥ ४ ॥
तत उदङ्केन गुरुपत्न्यै कुण्डलप्रदानम् ॥ ५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
स मित्रसहमासाद्य अभिज्ञानमयाचत ।
तस्मै ददावभिज्ञानं स चेक्ष्वाकुवरस्तदा ॥ १४-५८-१ (९४०७२)
सौदास उवाच। १४-५८-२क्ष् (७८९८)
न चैवैषा गतिः क्षेम्या न चान्या विद्यते गतिः ।
एतन्मे तत्वमाज्ञाय प्रयच्छ मणिकुण्डले ॥ १४-५८-२ (९४०७३)
इत्युक्तस्तामुदङ्कस्तु भर्तुर्वाक्यमथाब्रवीत् ।
श्रुत्वा च सा तदा प्रादात्ततस्ते मणिकुण्डले ॥ १४-५८-३ (९४०७४)
अवाप्य कुण्डले ते तु राजानं पुनरब्रवीत् ।
किमेतद्गुह्यवचनं श्रोतुमिच्छामि पार्थिव ॥ १४-५८-४ (९४०७५)
सौदास उवाच। १४-५८-५क्ष् (७८९९)
प्रजाविसर्गाद्द्विप्रान्वै क्षत्रियाः पूजयन्ति ह ।
विप्रेभ्यश्चापि बहवो दोषाः प्रादुर्भवन्ति नः ॥ १४-५८-५ (९४०७६)
सोहं द्विजेभ्यः प्रणतो विप्राद्दोषमवाप्तवान् ।
गतिमन्यां न पश्यामि मदयन्तीसहायवान् ॥ १४-५८-६ (९४०७७)
न चान्यामपि पश्यामि गतिं गतिमतांवर ।
स्वर्गद्वारस्य गमने स्थाने चेह द्विजोत्तम ॥ १४-५८-७ (९४०७८)
न हि राज्ञा विशेषेण विरुद्धेन द्विजातिभिः ।
शक्यं हि लोके स्थातुं वै प्रेत्य वा सुखमेधितुम् ॥ १४-५८-८ (९४०७९)
तदिष्टे ते मया दत्ते एते स्वे मणिकुण्डले ।

यः कृतस्तेऽद्य समयः सफलं तं कुरुष्य मे ॥ १४-५८-९ (९४०८०)
उदङ्क उवाच। १४-५८-१०क्ष् (७९००)
राजंस्तथेह कर्तास्मि पुनरेष्यामि ते वशम् ।
प्रश्नं च कञ्चित्प्रष्टुं त्वां व्यवसिष्ये परंतप ॥ १४-५८-१० (९४०८१)
सौदास उवाच। १४-५८-११क्ष् (७९०१)
ब्रूहि विप्र यथाकामं प्रतिवक्तास्मि ते वचः ।
छेत्तास्मि संशयं तेऽद्य न मेऽत्राश्ति विचारणा ॥ १४-५८-११ (९४०८२)
उदङ्क उवाच। १४-५८-१२क्ष् (७९०२)
प्राहुर्वाक्संयतं विप्रं धर्मनैपुणदर्शिनः ।
मित्रेषु यश्च विषमः स्तेन इत्येव तं विदुः ॥ १४-५८-१२ (९४०८३)
स बवान्मित्रतामद्य सम्प्राप्तो मम पार्थिव ।
स मे बुद्धिं प्रयच्छस्व सम्मतां पुरुषर्षभ ॥ १४-५८-१३ (९४०८४)
अवाप्तार्थोऽहमद्येह भवांश्च पुरुषादकः ।
भवत्सकाशमागन्तुं क्षमं मम न वेति वै ॥ १४-५८-१४ (९४०८५)
सौदास उवाच। १४-५८-१५क्ष् (७९०३)
क्षमं चेदिह वक्तव्यं मया द्विजवरोत्तम ।
मत्समीपं द्विजश्रेष्ट नागन्तव्यं कथञ्चन ॥ १४-५८-१५ (९४०८६)
एवं तव प्रपश्यामि श्रेयो भृगुकुलोद्वह ।
आगच्छतो हि ते विप्रि भवेन्मृत्युन संशयः ॥ १४-५८-१६ (९४०८७)
वैशम्पायन उवाच। १४-५८-१७क्ष् (७९०४)
इत्युक्तः स तदा राजा क्षमं बुद्धिमता हितम् ।
अनुज्ञाप्य स राजानमहल्यां प्रति जग्मिवान् ॥ १४-५८-१७ (९४०८८)
गृहीत्वा कुण्डले दिव्ये गुरुपत्न्याः प्रियंकरः ।
जवेन महता प्रायाद्गौतमस्याश्रमं प्रति ॥ १४-५८-१८ (९४०८९)
यथा तयो रक्षणं च मदयन्त्याऽभिभाषितम् ।
तथा ते कुण्डले बध्वा तदा कृष्णाजिनेऽनयत् ॥ १४-५८-१९ (९४०९०)
स कस्मिंश्चित्क्षुधाविष्टः फलभारसमन्वितम् ।
बिल्वं ददर्श विप्रर्षिरारुरोह च तं ततः ॥ १४-५८-२० (९४०९१)
शाखास्वासज्य तस्यैव कृष्णाजिनमरिंदम ।
पातयामास बिल्वानि तदा स द्विजपुङ्गवः ॥ १४-५८-२१ (९४०९२)
अथ पातयमानस्य बिल्वापहृतचक्षुषः ।
न्यपतंस्तानि बिल्वानि तस्मिन्नेवाजिने विभो ॥ १४-५८-२२ (९४०९३)
यस्मिंस्ते कुण्डले बद्धे तदा द्विजवरेण वै ।
बिल्वप्रहारैस्तस्याथ व्यशीर्यद्बन्धनं ततः ॥ १४-५८-२३ (९४०९४)
सकुण्डलं तदजिनं पपात सहसा तरोः ।
विशीर्णबन्धने तस्मिन्गते कृष्णाजिने महीम् ॥ १४-५८-२४ (९४०९५)

अपश्यद्भुजगः कश्चित्ते तत्र मणिकुण्डले ।
ऐरावतकुलोद्भूतः शीघ्रो भूत्वा तदा हि सः ॥१४-५८-२५ (९४०९६)
विदश्यास्येन वल्मीकं विवेशाथ स कुण्डले ।
ह्रियमाणे तु दृष्ट्वा स कुण्डले भुजगेन ह ॥१४-५८-२६ (९४०९७)
पपात वृक्षात्सोद्विगो दुःखात्परमकोपनः ।
स दण्डकाष्ठमादाय वल्मीकमखनत्तदा ॥१४-५८-२७ (९४०९८)
श्अहानि त्रिंशदव्यग्रः पञ्च चान्यानि भारत ॥
क्रोधामर्षाभिसंतप्तस्तदा ब्राह्मणिसत्तमः ॥ १४-५८-२८ (९४०९९)
तस्य वेगमसह्यं तमसहन्ती वसुन्धरा ।
दण्डकाष्ठाभिनुन्नाङ्गी चचाल भृशमाकुला ।
ततः खनत एवाथ विप्रर्षेर्धरणीतलम्
नागलोकस्य पन्थानं कर्तुकामस्य निश्चयात् ॥ १४-५८-२९ (९४१००)
रथेन हरियुक्तेन तं देशमुपजग्मिवान् ।
वज्रपाणिर्महातेजास्तं ददर्श द्विजोत्तमम् ॥१४-५८-३० (९४१०१)
वैशम्पायन उवाच।१४-५८-३१क्ष् (७९०५)
स तु तं ब्राह्मणो भूत्वा तस्य दुःखेन दुःखितः ।
उदङ्कमब्रवीद्वाक्यं नैतच्छक्यं त्वयेति वै ॥१४-५८-३१ (९४१०२)
इतो हि नागलोको वै योजनानि सहस्रशः ।
न दण्डकाष्ठसाध्यं च मन्ये कार्यमिदं तव ॥१४-५८-३२ (९४१०३)
उदङ्क उवाच।१४-५८-३३क्ष् (७९०६)
नागलोके यदि ब्रह्मन्न शक्ये कुण्डले मया ।
प्राप्तुं प्राणान्विमोक्ष्यामि पश्यतस्ते द्विजोत्तम ॥१४-५८-३३ (९४१०४)
वैशम्पायन उवाच।१४-५८-३४क्ष् (७९०७)
यदा स नाशकत्तस्य निश्चयं कर्तुमन्यथा ।
वज्रपाणिस्तदा दण्डं वज्रास्त्रेण युयोज ह ॥१४-५८-३४ (९४१०५)
ततो वज्रप्रहारैस्तैर्दार्यमाणा वसुन्धर ।
नागलोकस्य पन्थानमकरोज्जनमेजय ॥१४-५८-३५ (९४१०६)
स तेन मार्गेण तदा नागलोकं विवेश ह ।
ददर्श नागलोकं च योजनानि सहस्रशः ॥१४-५८-३६ (९४१०७)
प्रकारनिचयैर्दिव्यैर्मणिमुक्तास्वलङ्कृतैः ।
उपपन्नं महाभाग शातकुम्भमयैस्तथा ॥१४-५८-३७ (९४१०८)
वापीः स्फटिकसोपाना नदीस्च विमलोदकाः ।
ददर्श वृक्षांश्च बहून्नानाद्विजगणायुतान् ॥१४-५८-३८ (९४१०९)
तस्य लोकस्य च द्वारं स ददर्श भृगूद्वहः ।
पञ्चयोजनविस्तारमायतं शतयोजनम् ॥१४-५८-३९ (९४११०)
नागलोकमुदङ्कस्तु प्रेक्ष्य दीनोऽभवत्तदा ।

निराशश्चाभवत्तत्र कुण्डलाहरणे पुनः ॥१४-५८-४० (९४१११)
तत्र प्रोवाच तुरगस्तं कृष्णश्वेतवालधिः ।
ताम्रास्यनेत्रः कौरव्यः प्रज्वलन्निव तेजसा ॥१४-५८-४१ (९४११२)
धमस्वापानमेतन्मे ततस्त्वं विप्र लप्स्यसे ।
ऐरावतसुतेनेहि तवानीते हि कुण्डले ॥१४-५८-४२ (९४११३)
मा जुगुप्सां कृथाः पुत्र त्वमत्रार्थे कथञ्चन ॥
त्वयैतद्धि समाचीर्णं गौतमस्याश्रमे तदा ॥१४-५८-४३ (९४११४)
उदङ्क उवाच।१४-५८-४४क्ष् (७९०८)
कथं भवन्तं जानीयामुपाध्यायाश्रमं प्रति ।
यन्मया चीर्णपूर्वं हि श्रोतुमिच्छामि तद्ध्यहम् ॥१४-५८-४४ (९४११५)
अश्व उवाच।१४-५८-४५क्ष् (७९०९)
गुरोर्गुरु मां जानीहि ज्वलन्तं जातवेदसम् ।
त्वया ह्यहं सदा विप्र गुरोरर्थेऽभिपूजितः ॥१४-५८-४५ (९४११६)
विधिवत्सततं विप्र शुचिना भृगुनन्दन ।
तस्माच्छ्रेयो विधास्यामि तवैवं कुरु माचिरम् ॥१४-५८-४६ (९४११७)
इत्युक्तस्तु तथाऽकार्षीदुदङ्कश्चित्रभानुना ।
ताम्रार्चिः प्रीतिमांश्चापि प्रजज्वाल दिधक्षया ॥१४-५८-४७ (९४११८)
ततोऽस्य रोमकूपेभ्यो ध्मायमानस्य भारत ।
घनः प्रादुरभूद्धूमो नागलोकभयावहः ॥१४-५८-४८ (९४११९)
तेन धूमेन महता वर्धमानेन भारत ।
नागलोके महाराज न प्राज्ञायत किञ्चन ॥१४-५८-४९ (९४१२०)
हाहाकृतमभूत्सर्वमैरावतनिवेशनम् ।
वासुकिप्रमुखानां च नागानां जनमेजय ॥१४-५८-५० (९४१२१)
न प्राकाशन्त वेश्मानि धूमरुद्धानि भारत ।
नीहारसंवृतानीव वनानि गिरयस्तथा ॥१४-५८-५१ (९४१२२)
ते धूमरक्तनयना वह्नितेजोभितापिताः ।
आजग्मुर्निश्चयं ज्ञातुं भार्गवस्य महात्मनः ॥१४-५८-५२ (९४१२३)
श्रुत्वा च निश्चयं तस्य महर्षेरतितेजसः ।
सम्भ्रान्तनयनाः सर्वे पूजां चक्रुर्यथाविधि ॥१४-५८-५३ (९४१२४)
सर्वे प्राञ्जलयो नागा वृद्धबालपुरोगमाः ।
शिरोभिः प्रणिपत्योचुः प्रसीद भगवन्निति ॥१४-५८-५४ (९४१२५)
प्रसाद्य ब्राह्मणं ते तु पाद्यमर्घ्यं निवेद्य च ।
प्रायच्छन्कुण्डले दिव्ये पन्नगाः परमार्चिते ॥१४-५८-५५ (९४१२६)
ततः स पूजितो नागैस्तदोदङ्कः प्रतापवान् ।
अग्निं प्रदक्षिणं कृत्वा जगाम गुरुसद्म तत् ॥१४-५८-५६ (९४१२७)
स गत्वा त्वरितो राजन्गौतमस्य निवेशनम् ।

प्रायच्छत्कुण्डले दिव्ये गुरुपत्न्यास्तदाऽनघ ॥१४-५८-५७ (९४१२८)
वासुकिप्रमुकानां च नागानां जनमेजय ।
सर्वं शशंस गुरेव यथावद्दिद्वजसत्तमः ॥१४-५८-५८ (९४१२९)
एवं महात्मना तेन त्रींलोकाञ्जनमेजय ।
परिक्रम्याहृते दिव्ये ततस्ते मणिकुण्डले ॥१४-५८-५९ (९४१३०)
एवंप्रभावः स मुनिरुदङ्को भरतर्षभ ।
परेण तपसा युक्तो यन्मां त्वं परिपृच्छसि। ॥ १४-५८-६० (९४१३१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टपञ्चासोऽध्यायः ॥ ५८ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५८-१ मित्रसहः सौदासः अभिज्ञानं श्लोकरूपं ज्ञापकम् । ७-५८-२
एषा रक्षोयोनिरूपा। अन्या इतो मुक्तिरूपा ॥
७-५८-१० ततोदंकाय वै प्रादात्तस्मै ते मणिकुण्डले इति क ट थ पाठः ॥
७-५८-१२ निवृत्तिस्मि परं तपेति झ पाठः ॥
७-५८-१६ प्राप्तवान्सङ्गतिं मित्रं धर्मनैपुण्यदर्शनादिति
क ट थ पाठः ॥
७-५८-१६ तत्रैव तु प्रवक्ष्यामि श्रेयो भृगुकुलोद्वहेति क ट थ पाठः ॥
७-५८-२६ आस्येन कुण्डले विदश्य धृत्वा वल्मीकं विवेशेति सम्बन्धः ॥

आश्वमेधिकपर्व - अध्याय ०५९
॥ श्रीः ॥
१४.५९. अध्यायः ५९

Mahabharata - Ashvamedhika Parva - Chapter Topics
उदङ्काय वरदानात्परं द्वारकामागच्छता कृष्णेन मध्ये
रैवतकप्रवेशः ॥ १ ॥
रैवतकोत्सववर्णनम् ॥ २ ॥
ततः कृष्णेन स्वभवनमेत्य मातापितृभ्यामभिवादनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
उदङ्कस्य वरं दत्त्वा गोविन्दो द्विजत्तम ।
अत ऊर्ध्वं महाबाहुः किं चकार महायशाः ॥१४-५९-१ (९४१३२)

वैशम्पायन उवाच। १४-५९-२क्ष् (७९१०)
उदङ्काय वरं दत्त्वा प्रायात्सात्यकिना सह ।
द्वारकामेव गोविन्दः शीघ्रवेगैर्महाहयैः ॥ १४-५९-२ (९४१३३)
सरांसि सरितश्चैव वनानि च गिरींस्तथा ।
अतिक्रम्याससादाथ रम्यां द्वारवतीं पुरीम् ॥ १४-५९-३ (९४१३४)
वर्तमाने महाराज महे रैवतकस्य च ।
उपायात्पुण्डरीकाक्षो युयुधानानुगस्तदा ॥ १४-५९-४ (९४१३५)
अलङ्कृतस्तु स गिरिर्नानारूपैर्विचित्रितैः ।
बभौ रत्नमयैः कोशैः संवृतः पुरुषर्षभ ॥ १४-५९-५ (९४१३६)
काञ्चनस्रग्भिरग्र्याभिः सुमनोभिस्तथैव च ।
वासोभिश्च महाशैलः कल्पवृक्षैस्तथैव च ॥ १४-५९-६ (९४१३७)
दीपवृक्षैश्च सौवर्णैरभीक्ष्णमुपशोभितः ।
गुहानिर्झरदेशेषु दिवाभूतो बभूव ह ॥ १४-५९-७ (९४१३८)
एताकाभिर्विचित्राभिः सघण्टाभिः समन्ततः ।
पुंभिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवत् ।
अतीव प्रेक्षणीयोऽभून्मेरुर्मुनिगणैरिव ॥ १४-५९-८ (९४१३९)
मत्तानां हृष्टरूपाणां स्त्रीणां पुंसां च भारत ।
गायतां पर्वतेन्द्रस्य दिविस्पृगिव निःस्वनः ॥ १४-५९-९ (९४१४०)
प्रमत्तमत्तसम्मत्तक्ष्वेडितोद्धुष्टसंकुलः ।
तथा किलकिलाशब्दैर्भूधरोऽभून्मनोहरः ॥ १४-५९-१० (९४१४१)
विपणापणवान्रम्यो भक्ष्यभोज्यविहारवान् ।
वस्त्रमाल्योत्करयुतो वीणावेणुमृदङ्गवान् ॥ १४-५९-११ (९४१४२)
सुरामैरेयमिश्रेण भक्ष्यभोज्येन चैव ह ।
दीनान्धकृपणादिभ्यो दीयमानेन चानिशम् ।
बभौ परमकल्याणो महस्तस्य महागिरेः ॥ १४-५९-१२ (९४१४३)
पुण्यावसथवान्वीरैः पुण्यकृद्भिर्निषेवितः ।
विहारो वृष्णिवीराणां महे रैवतस्य ह ॥ १४-५९-१३ (९४१४४)
स नानावेश्मसंकीर्णो देवलोक इवाबभौ ।
तदा च कृष्णसान्निध्यान्मुदा देवगणैर्युतः ॥ १४-५९-१४ (९४१४५)
ग्स्तुवन्त्यन्तर्हिता देवा गन्धर्वाश्च सहर्षिभिः ।
साधकः सर्वधर्माणामसुराणां विनाशकः ॥ १४-५९-१५ (९४१४६)
त्वं स्रष्टा सृज्यमाधारं कारणं धर्मवेदवित् ।
त्वया सत्क्रियते देव ज जानीमोऽत्र मायया ॥ १४-५९-१६ (९४१४७)
केवलं त्वाऽभिजानीमः शरणं परमेश्वरम् ।
ब्रह्मादीनां च गोविन्द सान्निध्वं शरणं नमः ॥ १४-५९-१७ (९४१४८)
इति स्तुते मानुषैश्च पूजिते देवकीसुते।'

शक्रसद्मप्रतीकाशो बभूव स हि शैलराट् ॥ १४-५९-१८ (९४१४९)
ततः सम्पूज्यमानः स विवेश भवनं शुभम् ।
गोविन्दः सात्यकिश्चैव जग्मतुर्भवनं स्वकम् ॥ १४-५९-१९ (९४१५०)
विवेश च प्रहृष्टात्मा चिरकालप्रवासतः ।
कृत्वा नसुकरं कर्म दानवेष्विव वासवः ॥ १४-५९-२० (९४१५१)
उपायान्तं तु वार्ष्णेयं भोजवृष्ण्यन्धकास्तथा ।
अभ्यगच्चन्महात्मानं देवा इव शतक्रतुम् ॥ १४-५९-२१ (९४१५२)
स तानभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा ।
अभ्यवादयत प्रीतः पितरं मातरं तदा ॥ १४-५९-२२ (९४१५३)
ताभ्यां स सम्परिष्वक्तः सान्त्वितश्च महाभुजः ।
उपोपविष्टैः सर्वैस्तैर्वृष्णिभिः परिवारितः ॥ १४-५९-२३ (९४१५४)
स विश्रान्तो महातेजाः कृतपादावनेजनः ।
कथयामास तत्सर्वं पृष्टः पित्रा महाहवम् ॥ ॥ १४-५९-२४ (९४१५५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-५९-४ महे उत्सवे ॥
७-५९-७ दीपभूतो बभूवहेति क थ पाठः ॥
७-५९-१० प्रमत्ताः क्रीडाद्यासक्तयानवहिताः । मत्ताः मद्यादिना। सम्मता
हृष्टाः ॥
७-५९-२३ सात्यकिश्च महाभुज इति क पाठः ॥

आश्वमेधिकपर्व - अध्याय ०६०
॥ श्रीः ॥
१४.६०. अध्यायः ६०

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन वसुदेवादीन्प्रति कुरुपाण्डवयुद्धप्रकारकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वसुदेव उवाच ।
श्रुतवानस्मि वार्ष्णेय सङ्ग्रामं परमाद्भुतम् ।
नराणां वदतां पुत्र कथोद्घातेषु नित्यशः ॥ १४-६०-१ (९४१५६)

त्वं तु प्रत्यक्षदर्शी च कार्यज्ञश्च महाभुजः ।
तस्मात्प्रब्रूहि सङ्ग्रामं याथातथ्येन मेऽनघ ॥१४-६०-२ (९४१५७)
यथा तदभवद्युद्धं पाण्डवानां महात्मनाम् ।
भीष्मकर्णकृपद्रोणशल्यादिभिरनुत्तमम् ॥१४-६०-३ (९४१५८)
अन्येषां क्षत्रियाणां च कृतास्त्राणामनेकशः ।
नानावेषाकृतिमतां नानादेशनिवासिनाम् ॥१४-६०-४ (९४१५९)
वैशम्पायन उवाच।१४-६०-५क्ष् (७९११)
इत्युक्तः पुण्डरीकाक्षः पित्रा मातुस्तदाऽन्तिके ।
शशंस कुरुवीराणां सङ्ग्रामे निधनं यथा ॥१४-६०-५ (९४१६०)
वासुदेव उवाच।१४-६०-६क्ष् (७९१२)
अत्यद्भुतानि कर्माणि क्षत्रियाणां महात्मनाम् ।
बहुलत्वान्न सङ्ख्यातुं शक्यान्यब्दशतैरपि ॥१४-६०-६ (९४१६१)
प्राधान्यतस्तु गदतः समासेनैव मे शृणु ।
कर्माणि पृथिवीशानां यथावदमरद्युते ॥१४-६०-७ (९४१६२)
भीष्मः सेनापतिरभूदेकादशचमूपतिः ।
कौरव्यः कौरवेन्द्राणां देवानामिव पावकिः ॥१४-६०-८ (९४१६३)
शिखण्डी पाण्डुपुत्राणां नेता सप्तचमूपतिः ।
बभूव रक्षितो धीमाञ्श्रीमता सव्यसाचिना ॥१४-६०-९ (९४१६४)
तेषां तदभवद्युद्धं दशाहानि महात्मनाम् ।
कुरूणां पाण्डवानां च सुमहद्रोमहर्षणम् ॥१४-६०-१० (९४१६५)
अयुध्यमानं गाङ्गेयं शिखण्डी तं महाद्युतिम् ।
जघान बहुभिर्बाणैः सह गाण्डीवधन्वना ॥१४-६०-११ (९४१६६)
अकरोत्स ततः कालं शरतल्पगतो मुनिः ।
अयनं दक्षिणं हित्वा सम्प्राप्ते चोत्तरायणे ॥१४-६०-१२ (९४१६७)
ततः सेनापतिरभूद्द्रोणोऽस्त्रविदुषांवरः ।
प्रवीरः कौरवेन्द्रस्य काव्यो दैत्यपतेरिव ॥१४-६०-१३ (९४१६८)
अक्षौहिणीभिः शिष्टाभिर्नवभिर्द्विजसत्तमः ।
संवृतः समरश्लाघी गुप्तः कृपसुतादिभिः ॥१४-६०-१४ (९४१६९)
धृष्टद्युम्नस्त्वभून्नेता पाण्डवानां महास्त्रवित् ।
गुप्तो भीमेन मेधावी मित्रेण वरुणो यथा ॥१४-६०-१५ (९४१७०)
स च सेनापरिवृतो द्रोणप्रेप्सुर्महामनाः ।
पितुर्निकारान्संस्मृत्य रणे कर्माकरोन्महत् ॥१४-६०-१६ (९४१७१)
तस्मिंस्ते पृथिवीपाला द्रोणपार्षतसङ्गरे ।
नानादिगागता वीराः प्रायशो निधनं गताः ॥१४-६०-१७ (९४१७२)
दिनानि पञ्च तद्युद्धमभूत्परमदारुणम् ।
ततो द्रोणः परिश्रान्तो धृष्टद्युम्नवशं गतः ॥१४-६०-१८ (९४१७३)

ततः सेनापतिरभूत्कर्णो दौर्योधने बले ।
अक्षौहिणीभिः शिष्टाभिर्वृतः पञ्चभिराहवे ॥ १४-६०-१९ (९४१७४)
तिस्रस्तु पाण्डुपुत्राणां चम्वो बीभत्सुपालिताः ।
हतप्रवीरभूयिष्ठा बभूवुः समवस्थिताः ॥ १४-६०-२० (९४१७५)
ततः पार्थं समासाद्य पतङ्ग इव पावकम् ।
पञ्चत्वमगमत्सौतिर्द्वितीयेऽहनि दारुणः ॥ १४-६०-२१ (९४१७६)
हते कर्णे तु कौरव्या निरुत्साहा हतौजसः ।
अक्षौहिणीभिस्तिसृभिर्मद्रेशं पर्यवारयन् ॥ १४-६०-२२ (९४१७७)
हतिवाहनभूयिष्ठाः पाण्डिवास्तु युधिष्ठिरम् ।
अक्षौहिण्या निरुत्साहाः शिष्टया पर्यवारयन् ॥ १४-६०-२३ (९४१७८)
अवधीन्मद्रराजानं कुरुराजो युधिष्ठिरः ।
तस्मिंस्तदाऽर्धदिवसे कृत्वा कर्म सुदुष्करम् ॥ १४-६०-२४ (९४१७९)
हते शल्ये तु शकुनिं सहदेवो महामनाः ।
आहर्तारं कलेस्तस्य जगानामितविक्रमः ॥ १४-६०-२५ (९४१८०)
निहते शकुनौ राजा धार्तराष्ट्रः सुदुर्मनाः ।
अपाक्रामद्गदापाणिर्हतभूयिष्ठसैनिकः ॥ १४-६०-२६ (९४१८१)
तमन्वधावत्संक्रुद्धो भीमसेनः प्रतापवान् ।
ह्रदे द्वैपायने चापि सलिलस्थं ददर्श तम् ॥ १४-६०-२७ (९४१८२)
इतशिष्टेन सैन्येन समन्तात्पर्यवार्य तम् ।
अथोपविविशुर्हृष्टा ह्रदस्थं पञ्च पाण्डवाः ॥ १४-६०-२८ (९४१८३)
विगाह्य सलिलं त्वाशु वाग्बाणैर्भृशविक्षतः ।
उत्थाय स गदापाणिर्युद्धाय समुपस्थितः ॥ १४-६०-२९ (९४१८४)
ततः स निहतो राजा धार्तराष्ट्रो महारणे ।
भीमसेनेन विक्रम्य पश्यतां पृथिवीक्षिताम् ॥ १४-६०-३० (९४१८५)
ततस्तत्पाण्डवं सैन्यं प्रसुप्तं शिबिरे निशि ।
निहतं द्रोणपुत्रेण पितुर्वधममृष्यता ॥ १४-६०-३१ (९४१८६)
हतपुत्रा हतबला हतमित्रा मया सह ।
युयुधानसहायेन पञ्च शिष्टास्तु पाण्डवाः ॥ १४-६०-३२ (९४१८७)
सहैव कृपभोजाभ्यां द्रौणिर्युद्धादमुच्यत ।
युयुत्सुश्चापि कौरव्यो मुक्तः पाण्डवसंश्रयात् ॥ १४-६०-३३ (९४१८८)
निहते कौरवेन्द्रे तु सानुबन्धे सुयोधने ।
विदुरः संजयश्चैव धर्मराजमुपस्थितौ ॥ १४-६०-३४ (९४१८९)
एवं तदभवद्युद्दमहान्यष्टादश प्रभो ।
यत्र ते पृथिवीपाला निहताः स्वर्गमावसन् ॥ १४-६०-३५ (९४१९०)
वैशम्पायन उवाच। १४-६०-३६क्ष् (७९१३)
शृण्वतां तु महाराज कथां तां रोमहर्षणीम् ।

दुःखशोकपरिक्लेशा वृष्णीनामभवंस्तदा ॥ ॥ १४-६०-३६ (९४१९१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६०-११ ततः शिखण्डी गाङ्गेयं युध्यमानं महाहवे । इति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०६१
॥ श्रीः ॥
१४.६१. अध्यायः ६१

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन सभायां वसुदेवंप्रति अभिमन्युनिधनाकथने सुभद्रया
तंप्रति तत्कथनचोदनापूर्वकं शोकान्मोहावेशेन भुवि निपतनम्
॥ १ ॥
ततः कृष्णेन वसुदेवपरिसान्त्वनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
कथयन्नेव तु तदा वासुदेवः प्रतापवान् ।
महाभारतयुद्धं तत्कथान्ते पितुरग्रतः ॥ १४-६१-१ (९४१९२)
अभिमन्योर्वधं वीरः सोत्यक्रामन्महामतिः ।
अप्रियं वसुदेवस्य माभूदिति महामनाः ॥ १४-६१-२ (९४१९३)
मा दौहित्रवधं श्रुत्वा वसुदेवो महात्ययम् ।
दुःखशोकाभिसंतप्तो भवेदिति महामतिः ॥ १४-६१-३ (९४१९४)
सुभद्रा तु तमुत्क्रान्तमात्मजस्य वधं रणे ।
आचक्ष्व कृष्ण सौभद्रवधमित्यपतद्भुवि ॥ १४-६१-४ (९४१९५)
तामपश्यन्निपतितां वसुदेवः क्षितौ तदा ।
दृष्ट्वैव च पपातोर्व्यां सोऽपि दुःखेन मूर्च्छितः ॥ १४-६१-५ (९४१९६)
तषः स दौहित्रवदाद्दुःखशोकसमाहतः ।
वसुदेवो महाराज कृष्णं वाक्यमथाब्रवीत् ॥ १४-६१-६ (९४१९७)
ननु त्वं पुण्डरीकाक्ष सत्यवाग्भुवि विश्रुतः ।
यद्दौहित्रवधं मेऽद्य न ख्यापयसि शत्रुहन् ॥ १४-६१-७ (९४१९८)
तद्भागिनेयनिधनं तत्त्वेनाचक्ष्व मे प्रभो ।

सदृशाक्षस्तव कथं शत्रुभिर्निहतो रणे। १४-६१-८ (९४१९९)
दुर्भरं बत वार्ष्णेय कालेऽप्राप्ते नृभिः सह ।
यत्र मे हृदयं दुःखाच्छतधा न विदीर्यते ॥१४-६१-९ (९४२००)
किमब्रवीत्त्वां सङ्ग्रामे सुभद्रां मातरं प्रति ।
मां चापि पुण्डरीकाक्षि चपलाक्षः प्रियो मम ॥१४-६१-१० (९४२०१)
आहवं पृष्ठतः कृत्वा कच्चिन्न निहतः परैः ।
कच्चिन्मुखं न गोविन्द तेनाजौ विकृतं कृतम् ॥१४-६१-११ (९४२०२)
स हि कृष्ण महातेजाः श्लाघन्निव ममाग्रतः ।
बालभावेन विजयमात्मनोऽकथयत्प्रभुः। १४-६१-१२ (९४२०३)
कच्चिन्न निकृतो बालो द्रोणकर्णाकृपादिभिः ।
धरण्यां निहतः शेते तन्ममाचक्ष्व केशव ॥१४-६१-१३ (९४२०४)
स हि द्रोणं च भीष्मं च कर्णं च बलीनां वरम् ।
स्पर्धते स्म रणे नित्यं दुहितुः पुत्रको मम ॥१४-६१-१४ (९४२०५)
एवंविधं बहु तदा विलपन्तं सुदुःखितम् ।
पितरं दुःखिततरं गोविन्दो वाक्यमब्रवीत् ॥१४-६१-१५ (९४२०६)
न तेनि विकृतं वक्त्रं कृतं सङ्ग्राममूर्धनि ।
न पृष्ठतः कृतश्चापि सङ्ग्रामस्तेन दुस्तरः ॥१४-६१-१६ (९४२०७)
निहत्य पृथिवीपालान्सहस्रशतसङ्घशः ।
खेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः ॥१४-६१-१७ (९४२०८)
एको ह्येकेन सततं युध्यमानो यदि प्रभो ।
न स शक्येत सङ्ग्रामे निहन्तुमपि वज्रिणा ॥१४-६१-१८ (९४२०९)
समाहूते च सङ्ग्रामे पार्थे संशप्तकैस्तदा ।
पर्यवार्यत संक्रुद्धैः स द्रोणादिभिराहवे ॥१४-६१-१९ (९४२१०)
ततः शत्रुवधं कृत्वा सुमहान्तं रेणे पितः ।
दौहित्रस्तव वार्ष्णेय दौःशासनिवशं गतः ॥१४-६१-२० (९४२११)
नूनं च स गतः स्वर्गं जहि शोकं महामते ।
न हि व्यसनमासाद्य सीदन्ति कृतबुद्धयः ॥१४-६१-२१ (९४२१२)
द्रोणकर्णप्रभृतयो येन प्रतिसमासिताः ।
रणे महेन्द्रप्रतिमाः स कथं नाप्नुयाद्दिवम् ॥१४-६१-२२ (९४२१३)
स शोकं जहि जुर्धर्ष मा च मन्युवशं गमः ।
शस्त्रपूतां हि स गतिं गतः परपुरंजयः ॥१४-६१-२३ (९४२१४)
तस्मिंस्तु निहते वीरे सुभद्रेयं स्वसा मम ।
दुःखार्ताऽथो सुतं प्राप्य कुररीव ननाद ह ॥१४-६१-२४ (९४२१५)
द्रौपदीं च समासाद्य पर्यतप्यत दुःखिता ।
आर्ये क्व दारकाः सर्वे द्रष्टुमिच्छामि तानहम् ॥१४-६१-२५ (९४२१६)
अस्यास्तु वचनं श्रुत्वा सर्वास्ताः कुरुयोषितः ।

भुजाभ्यां परिगृह्यैनां चुक्रुशुः परमार्तवत् ॥ १४-६१-२६ (९४२१७)
उत्तरां चाब्रवीद्भद्रे भर्ता स क्व नु ते गतः ।
क्षिप्रमागमनं मह्यं तस्य त्वं वेदयस्व ह ॥ १४-६१-२७ (९४२१८)
ननु नामाद्य वैराटि श्रुत्वा मम गिरं सदा ।
भवनान्निष्पतत्याशु कस्मान्नाभ्येति ते पतिः ॥ १४-६१-२८ (९४२१९)
अभिमन्योऽनुशयिनो मातुलास्ते महारथाः ।
कुशलं चाब्रुवन्सर्वे त्वां युयुत्सुमिहागतम् ॥ १४-६१-२९ (९४२२०)
आचक्ष्व मेऽद्य सङ्ग्रामं यथापूर्वमरिन्दम ।
कस्मादेवं विलपतीं नाद्येह प्रतिभाषसे। १४-६१-३० (९४२२१)
एवमादि तु वार्ष्णेय्यास्तस्यास्तत्परिदेवितम् ।
श्रुत्वा पृथा सुदुःखार्ता शनैर्वाक्यमथाब्रवीत् ॥ १४-६१-३१ (९४२२२)
सुभद्रे वासुदेवेन तथा सात्यकिना रणे ।
पित्रा च लालितो बालः स हतः कालधर्मणा ॥ १४-६१-३२ (९४२२३)
ईदृशो मर्त्यधर्मोऽयं मा शुचो यदुनन्दिनि ।
पुत्रो हि तव दुर्धर्षः सम्प्राप्तः परमां गतिम् ॥ १४-६१-३३ (९४२२४)
कुले महति जातासि क्षत्रियाणां महात्मनाम् ।
मा शुचश्चपलाक्षं त्वं पद्मपत्रनिभेक्षणे ॥ १४-६१-३४ (९४२२५)
उत्तरां त्वमवेक्षस्व गुर्विणीं मा शुचः शुभे ।
पुत्रमेषा हि तस्याशु जनयिष्यति भामिनी ॥ १४-६१-३५ (९४२२६)
एवमाश्वासयित्वैनां कुन्ती यदुकुलोद्वह ।
विहाय शोकं दुर्धर्ष श्राद्धमस्य ह्यकल्पयत् ॥ १४-६१-३६ (९४२२७)
समनुज्ञाप्य धर्मज्ञं राजानं भीममेव च ।
यमौ यमोपमौ चैव ददौ दानान्यनेकशः ॥ १४-६१-३७ (९४२२८)
ततः प्रदाय बह्वीर्गा ब्राह्मणेभ्यो यदूद्वह ।
समाहूय तु वार्ष्णेयी वैराटीमब्रवीदिदम् ॥ १४-६१-३८ (९४२२९)
वैराटि नेह संतापस्त्वया कार्यो ह्यनिन्दिते ।
भर्तारं प्रति सुश्रोणि गर्भस्थं रक्ष वै शिशुम् ॥ १४-६१-३९ (९४२३०)
एवमुक्त्वा ततः कुन्ती विरराम महाद्युते ।
तामनुज्ञाप्य चैवेमां सुभद्रां समुपानयम् ॥ १४-६१-४० (९४२३१)
एवं स निधनं प्राप्तो दौहित्रस्तव मानद ।
संतापं त्यज दुर्धर्ष मा च शोके मनः कृथाः ॥ ॥ १४-६१-४१ (९४२३२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६१-११ कच्चिद्दुःखेन गोविन्दि तत्राजौ विमुखीकृतः इति थ पाठः ॥
७-६१-१९ समाहृते च सङ्ग्रामादिति झ पाठः । पर्यवार्यत
सतुष्टैरिति थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०६२
॥ श्रीः ॥
१४.६२. अध्यायः ६२

Mahabharata - Ashvamedhika Parva - Chapter Topics
वसुदेवादिभिरभिमन्यवे श्राद्धदानम् ॥ १ ॥
व्यासेन हास्तिनपुरमेत्य उत्तरादिपरिसान्त्वपूर्वकं
युधिष्ठिरंप्रत्यश्वमेधसंचोदनेनि पुनरन्तर्धानम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एतच्छ्रुत्वा तु पुत्रस्य वचः शूरात्मजस्तदा ।
विहाय शोकं धर्मात्मा ददौ श्राद्धमनुत्तमम् ॥ १४-६२-१ (९४२३३)
तथैव वासुदेवश्च स्वस्त्रीयस्य महात्मनः ।
दयितस्यि पितुर्नित्यमकरोदौर्ध्वदेहिकम् ॥ १४-६२-२ (९४२३४)
षष्टिं शतसहस्राणि ब्राह्मणानां महौजसाम् ।
विधिवद्भोजयामास भोज्यं सर्वगुणान्वितम् ॥ १४-६२-३ (९४२३५)
आच्छाद्य च महाबाहुर्धनतृष्णामपानुदत् ।
ब्राह्मणानां तदा कृष्णस्तदभूद्रोमहर्षणम् ॥ १४-६२-४ (९४२३६)
सुवर्णं चैव गाश्चैव शयनाच्छादनानि च ।
दीयमानं तदा विप्रः प्रभूतमिति चाब्रुवन् ॥ १४-६२-५ (९४२३७)
वासुदेवोऽथ दाशार्हो बलेदेवः ससात्यकिः ।
अभिमन्योस्तदा श्राद्धमकुर्वन्सत्यकस्तदा ।
अतीव दुःखसंतप्ता न शमं चोपलेभिरे ॥ १४-६२-६ (९४२३८)
तथैव पाण्डवा वीरा नगरे नागसह्वये ।
नोपागच्छन्त वै शान्तिमभिमन्युविनाकृताः ॥ १४-६२-७ (९४२३९)
सुबहूनि च राजेन्द्र दिवसानि विराटजा ।
नाभुङ्क्त पतिदुःखार्ता तदभूत्करुणं महत् ॥ १४-६२-८ (९४२४०)
धियमाणे तु तस्मिंस्तु गर्भे कुक्षिस्थ एव च ।
आजगाम ततो व्यासो ज्ञात्वा दिव्येन चक्षुषा ॥ १४-६२-९ (९४२४१)
समागम्याब्रवीमान्पृथां पृथुललोचनाम् ।

उत्तरां च महातेजाःइ शोकः संत्यज्यतामयम् ॥१४-६२-१० (९४२४२)
जनिष्यते महातेजाः पुत्रस्तव यशस्विनि ।
प्रभावाद्वासुदेवस्य मम व्याहरणादपि ।
पाण्डवानामयं चान्ते पालयिष्यति मेदिनीम् ॥ १४-६२-११ (९४२४३)
धनञ्जयं च सम्प्रेक्ष्य धर्मराजस्य शृण्वतः ।
व्यासो वाक्यमुवाचेदं हर्षयन्निव भारत ॥१४-६२-१२ (९४२४४)
पौत्रस्तव महाभागो जनिष्यति महामनाः ।
पृथ्वीं सागरपर्यन्तां पालयिष्यति धर्मतः ॥१४-६२-१३ (९४२४५)
तस्माच्छोकं कुरुश्रेष्ठ जहि त्वमरिकर्शन ।
विचार्यमत्र न हि ते सत्यमेतद्भविष्यति ॥१४-६२-१४ (९४२४६)
यच्चापि वृष्णिवीरेणि कृष्णेन कुरुनन्दन ।
पुरोक्तं तत्तथा भावि मा तेऽत्रास्तु विचारणा ॥१४-६२-१५ (९४२४७)
विबुधानां गतो लोकानक्षयानात्मनिर्जितान् ।
न स शोच्यस्त्वया वीरो न चान्यैः कुरुभिस्तथा ॥१४-६२-१६ (९४२४८)
एवं पितामहेनोक्तो धर्मात्मा स धनञ्जयः ।
त्यक्त्वा शोकं महाराज हृष्टरूपोऽभवत्तदा ॥१४-६२-१७ (९४२४९)
पिताऽपि तव धर्मज्ञ गर्भे तस्मिन्महामते ।
अवर्धत यथाकामं शुक्लपक्षे यथा शसी ॥१४-६२-१८ (९४२५०)
ततः संचोदयामास व्यासो धर्मात्मजं नृपम् ।
अश्वमेधं प्रति तदा ततः सोऽन्तर्हितोऽभवत् ॥१४-६२-१९ (९४२५१)
धर्मराजोपि मेधावी श्रुत्वा व्यासस्य तद्वचः ।
वित्तोपनयने तात चकार गमने मतिम् ॥ ॥१४-६२-२० (९४२५२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

आश्वमेधिकपर्व - अध्याय ०६३
॥ श्रीः ॥
१४.६३. अध्यायः ६३

Mahabharata - Ashvamedhika Parva - Chapter Topics
युधिष्ठिरेण व्यासाज्ञया भीमादिभिः सहालोच्य यज्ञार्थं
धनाहरणाय सहभ्रात्रादिभिर्हिमवत्पार्श्वप्रति प्रस्थानम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
श्रुत्वैतद्वचनं ब्रह्मन्व्यासेनोक्तं महात्मना ।
अश्वमेधं प्रति तदा किं भूयः प्रचकार ह ॥१४-६३-१ (९४२५३)
रत्नं च यन्मरुत्तेनि निहितं वसुधातले ।
तदवाप कथं चेति तन्मे ब्रूहि द्विजोत्तम ॥१४-६३-२ (९४२५४)
वैशम्पायन उवाच।१४-६३-३क्ष् (७९१४)
श्रुत्वा द्वैपायनवचो धर्मिराजो युधिष्ठिरः ।
भ्रातॄन्सर्वान्समानाय्य काले वचनमब्रवीत् ॥१४-६३-३ (९४२५५)
अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि ।
श्रुतं वो वचनं वीराः सौहृदाद्यन्महात्मना ॥१४-६३-४ (९४२५६)
कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता ।
तपोवृद्धेनि महता सुहृदां भूतिमिच्छता ॥१४-६३-५ (९४२५७)
गुरुणा धर्मशीलेन व्यासेनाद्भुतकर्मणा ।
भीष्मेण च महाप्राज्ञ गोविन्देनि च धीमता ॥१४-६३-६ (९४२५८)
संस्मृत्य तदहं सम्यक्कर्तुमिच्छामि पाण्डवाः ।
आयत्यां च तदात्वे च सर्वेषां तद्धि नो हितम् ॥१४-६३-७ (९४२५९)
अनुबन्धे च कल्याणं यद्वचो ब्रह्मवादिनः ।
इयं हि वसुधा सर्वा क्षीणरत्ना कुरूद्वहाः ॥१४-६३-८ (९४२६०)
तच्चाचष्ट तदा व्यासो मरुत्तस्य धनं नृपाः ।
यद्येतद्वो बहुमतं मन्यध्वं वा क्षमं यदि ।
तदानयामहे सर्वे कतं वा भीम मन्यसे ॥ १४-६३-९ (९४२६१)
इत्युक्तवाक्ये नृपतौ तदा कुरुकुलोद्वह ।
भीमसेनो नृपश्रेष्ठं प्राञ्जलिर्वाक्यमब्रवीत् ॥१४-६३-१० (९४२६२)
रोचते मे महाबाहो यदिदं भाषितं त्वया ।
व्यासाख्यातस्य वित्तस्य समुपानयनं प्रति ॥१४-६३-११ (९४२६३)
तत्प्राप्नुयामहे धर्माद्यद्धनं काङ्क्षितं प्रभो ।
कृतमेव महाराज भवेदिति मतिर्मम ॥१४-६३-१२ (९४२६४)
ते वयं प्रणिपातेन गिरीशस्य महात्मनः ।
तदानयामि भद्रं ते समभ्यर्च्य कपर्दिनम् ॥१४-६३-१३ (९४२६५)
ग्तं विभुं देवदेवेशं शूलपाणिं त्रिलोचनम् ।
अनादिनिधनं शंभुं नमस्यामि महेश्वरम् ॥' १४-६३-१४ (९४२६६)
लोकनाथं गणाध्यक्षं तस्यैवानुचरांश्चि तान् ।
प्रसाद्यार्थमवाप्स्यामो नूनं वाग्बुद्धिकर्मभिः ॥१४-६३-१५ (९४२६७)
रक्षन्ते ये च तद्द्रव्यं किन्नरा रौद्रदर्शनाः ।
ते च वश्या भविष्यन्ति प्रसन्ने वृषभध्वजे ॥१४-६३-१६ (९४२६८)
ग्स हि देवः प्रसन्नात्मा भक्तानां परमेश्वरः ।

ददात्यमरतां चापि किं पुनः काञ्चनं प्रभुः ॥१४-६३-१७ (९४२६९)
वनस्थास्य पुरा जिष्णोरस्त्रं पाशुपतं महत् ।
रौद्रं ब्रह्मसिरश्चादात्प्रसन्नः किं पुनर्धनम् ॥१४-६३-१८ (९४२७०)
वयं सर्वे हि तद्भक्ताः स चास्माकं प्रसीदति ।
तत्प्रसादादिदं राज्यं प्राप्तं कौरवनन्दन ॥१४-६३-१९ (९४२७१)
अभिमन्योर्वधे वृत्ते प्रतिज्ञाते धनञ्जये ।
जयद्रथवधार्थाय स्वप्ने लोकगुरुर्निशि ।
प्रसाद्य लब्धवानस्त्रमर्जुनः सहकेशवः ॥ १४-६३-२० (९४२७२)
तत्र प्रभातां रजनीं फल्गुनस्याग्रतः प्रभुः ।
जघान सैन्यं शूलेन प्रत्यक्षं सव्यसाचिनः ॥१४-६३-२१ (९४२७३)
कस्तां सेनां महाराज मनसाऽपि प्रधर्षयेत् ।
द्रोणिकर्णबलैर्युक्तां महेष्वासैः प्रहारिभिः ।
ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् ॥ १४-६३-२२ (९४२७४)
तस्यैव च प्रसादेव निहतास्तव शत्रवः ।
अश्वमेधस्य संसिद्धिं तव सम्पादयिष्यति ।' १४-६३-२३ (९४२७५)
श्रुत्वैवं वदतस्तस्य वाक्यं भीमस्य भारत ।
प्रीतो धर्मात्मजो राजा बभूवातीव भारत ।
अर्जुनप्रमुखाश्चापि तथेत्येवाब्रुवन्वचः ॥ १४-६३-२४ (९४२७६)
कृत्वा तु पाण्डवाः सर्वे रत्नाहरणनिश्चयम् ।
सेनामाज्ञापयामासुर्नक्षत्रेऽहनि च ध्रुवे ॥१४-६३-२५ (९४२७७)
ततो ययुः पाण्डुसुता ब्राह्मणान्स्वस्ति वाच्य च ।
अर्चयित्वा सुरश्रेष्ठं पूर्वमेव महेश्वरम् ॥१४-६३-२६ (९४२७८)
मोदकैः पायसेनाथ मांसापूपैस्तथैव च ।
आशास्य च महात्मानं प्रययुर्मुदिता भृशम् ॥१४-६३-२७ (९४२७९)
तेषां प्रयास्यतां तत्र मङ्गलानि शुभान्यथ ।
प्राहुः प्रहृष्टमनसो द्विजाग्र्या नागराश्च ते ॥१४-६३-२८ (९४२८०)
ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च ।
ब्राह्मणानग्निसहितान्प्रययुः पाण्डुनन्दनाः ॥१४-६३-२९ (९४२८१)
समनुज्ञाप्य राजानं पुत्रशोकसमाहतम् ।
धृतराष्ट्रं सभार्यं वै पृथां च पृथुलोचनाम् ॥१४-६३-३० (९४२८२)
मूले निक्षिप्य कौरव्यं युयुत्सुं धृतराष्ट्रजम् ।
सम्पूज्यमानाः पौरैश्च ब्राह्मणैश्च मनीषिभिः ।
ग्प्रययुः पाण्डवा वीरा नियमस्थाः शुचिव्रताः' ॥ १४-६३-३१ (९४२८३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

आश्वमेधिकपर्व - अध्याय ०६४
॥ श्रीः ॥
१४.६४. अध्यायः ६४

Mahabharata - Ashvamedhika Parva - Chapter Topics
युधिष्ठिरेण हिमवद्गिरिमेत्य सेनानिवेशनम् ॥ १ ॥
तत्र ब्राह्मणचोदनया तैः सहोपवासादिव्रताचरणपूर्वकं निशायापनम्
॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
ततस्ते प्रययुर्हृष्टाः प्रहृष्टनरवाहनाः ।
रथघोषेण महता पूरयन्तो वसुन्धराम् ॥ १४-६४-१ (९४२८४)
संस्तूयमानाः स्तुतिभिः सूतमागधबन्दिभिः ।
स्वेन सैन्येन संवीता यथाऽऽदित्याः स्वरश्मिभिः ॥ १४-६४-२ (९४२८५)
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
बभौ युधिष्ठिरस्तत्र पौर्णमास्यामिवोडुराट् ॥ १४-६४-३ (९४२८६)
जयाशिषः प्रहृष्टानां नराणां पथि पाण्डवः ।
प्रत्यगृह्णाद्यथान्यायं यथावत्पुरुषर्षभः ॥ १४-६४-४ (९४२८७)
तथैव सैनिका राजन्राजानमनुयान्ति ये ।
तेषां हलहलाशब्दो दिवं स्तब्ध्वा व्यतिष्ठत ॥ १४-६४-५ (९४२८८)
सरांसि सरितश्चैव वनान्युपवनानि च ।
अत्यक्रामन्महाराजो गिरिं चाप्यन्वपद्यत ॥ १४-६४-६ (९४२८९)
स्मिन्देशे च राजेन्द्र यत्र तद्द्रव्यमुत्तमम् ।
चक्रे निवेशनं राजा पाण्डवः सहसैनिकैः ।
शिवे देशे समे चैव तदा भरतसत्तम ॥ १४-६४-७ (९४२९०)
अग्रतो ब्राह्मणान्कृत्वा तपोविद्यादमान्वितान् ।
पुरोहितं च कौरव्य वेदवेदाङ्गपारगम् ॥ १४-६४-८ (९४२९१)
आग्निवेश्यं च राजानो ब्राह्मणाः सपुरोधसः ।
कृत्वा शान्तिं यथान्यायं सर्वशः पर्यवारयन् ॥ १४-६४-९ (९४२९२)
कृत्वा तु मध्ये राजानममात्यांश्च यथाविधि ।
षट्पदं नवसङ्ख्यानं निवेशं चक्रिरे जनाः ॥ १४-६४-१० (९४२९३)
मत्तानां वारणेन्द्राणां निवेशं च यथाविधि ।
कारयित्वा स राजेन्द्रो ब्राह्मणानिदमब्रवीत् ॥ १४-६४-११ (९४२९४)

अस्मिन्कार्ये द्विजश्रेष्ठा नक्षत्रे दिवसे शुभे ।
यथा भवन्तो मन्यन्ते कर्तुमर्हन्ति तत्तथा ॥१४-६४-१२ (९४२९५)
न नः कालात्ययो वै स्यादिहैव परिलम्बताम् ।
इति निश्चित्य विप्रेन्द्राः क्रियतां यदनन्तरम् ॥१४-६४-१३ (९४२९६)
श्रुत्वैतद्वकककककककककककक ब्राह्मणाः सपुरोधसः ।
इदमूचुर्वचो हृष्टा धर्मराजप्रियेप्सवः ॥१४-६४-१४ (९४२९७)
अद्यैव नक्षत्रिमहश्च पुण्यं
यतामहे श्रेष्ठतमक्रियासु ।
तपोभिरद्येह वसाम राज-
न्नुपोष्यतां चापि भवद्भिरद्य ॥ १४-६४-१५ (९४२९८)
श्रुत्वा तु तेषां द्विजसत्तमानां
कृतोपवासा रजनीं नरेन्द्राः। १४-६४-१६ (९४२९९)
ऊषुः प्रतीताः कुशसंस्तरेषु
यथाऽध्वरे प्रज्वलिता हुताशाः ॥ १४-६४-१७ (९४३००)
ततो निशा सा व्यगमन्महात्मनां
संशृण्वतां विप्रसमीरिता गिरः ।
ततः प्रभाते विमले द्विजर्षभा
वचोऽब्रुवन्धर्मसुतं नराधिपम् ॥ ॥ १४-६४-१८ (९४३०१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
चतुःषष्टितमोऽध्यायः ॥६४ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६४-२५ ध्रुवे नक्षत्रे रोहिण्यामुत्तरात्रये च ।अहनि वारे ध्रुवे
रविवारे क उत्तरार्केऽमृतसिद्धयोगे इत्यर्थः ॥
७-६४-३१ मूले वंशस्याद्ये ।कुन्तीधृतराष्ट्रसमीपे इत्यर्थः ॥
७-६४-६३ त्रिषष्टितमोऽध्यायः ॥

आश्वमेधिकपर्व - अध्याय ०६५
॥ श्रीः ॥
१४.६५. अध्यायः ६५

Mahabharata - Ashvamedhika Parva - Chapter Topics
युधिष्ठिरेण विधिवन्नानाषलिहरणादिना
सपरिचरमहेश्वरपतितोषणेन विविधकनकभाण्डाहरणेन
पुनर्नगरंप्रत्यागमनम् ॥१ ॥

ब्राह्मणा ऊचुः ।
क्रियतामुपहारोऽद्य त्र्यम्बकस्य महात्मनः ।
दत्त्वोपहारं नृपते ततः स्वार्थं यतामहे ॥१४-६५-१ (९४३०२)
वैशम्पायन उवाच।१४-६५-२क्ष् (७९१५)
श्रुत्वा तु वचनं तेषां ब्राह्मणानां युधिष्ठिरः ।
गिरीशस्य यथान्यायमुपहारमुपाहरत् ॥१४-६५-२ (९४३०३)
आज्येन तर्पयित्वाऽग्निं विधिवत्संस्कृतेन च ।
मन्त्रसिद्धं चरुं कृत्वा पुरोधाः स ययै तदा ॥१४-६५-३ (९४३०४)
स गृहीत्वा सुमनसो मन्त्रपूता जनाधिप ।
मोदकैः पायसेनाथ मांसैश्चोपाहरद्बलिम् ॥१४-६५-४ (९४३०५)
सुमनोभिश्च चित्राभिर्लाजैरुच्चावचैरपि ।
सर्वं स्विष्टकृतं हुत्वा विधिवद्वेदपारगः ।
किंकराणां ततः पश्चाच्चकार बलिमुत्तमम् ॥ १४-६५-५ (९४३०६)
यक्षेन्द्राय कुबेराय माणिभद्राय चैव ह ।
तथाऽन्येषां च यक्षाणां भूतानां पतयश्च ये ॥१४-६५-६ (९४३०७)
कृसरेण च मांसेन निवापैस्तिलसंयुतैः ।
ओदनं कुम्भशः कृत्वा पुरोधाः समुपाहरत् ॥१४-६५-७ (९४३०८)
ब्राह्मणेभ्यः सहस्राणि गवां दत्वा तु भूमिपः ।
नक्तंचराणां भूतानां व्यादिदेश बलिं तदा ॥१४-६५-८ (९४३०९)
धूपगन्धनिरुद्धं तत्सुमनोभिश्च संवृतम् ।
शुशुभे स्थानमत्यर्थं देवदेवस्य पार्थिवः ॥१४-६५-९ (९४३१०)
कृत्वा पूजां तु रुद्रस्य गणानां चैव सर्वशः ।
ययौ व्यासं पुरस्कृत्य नृपो रत्ननिधिं प्रति ॥१४-६५-१० (९४३११)
पूजयित्वा धनाध्यक्षं प्रणिपत्याभिवाद्य च ।
सुमनोभिर्विचित्राभिरपूपैः कृसरेण च ॥१४-६५-११ (९४३१२)
शङ्खादींश्च निधीन्सर्वान्निधिपालांश्च सर्वशः ।
अर्चयित्वा द्विजाग्र्या स्वस्ति वाच्य च वीर्यवान् १४-६५-१२ (९४३१३)
तेषां पुण्याहघोषेण तेजसा समवस्थितः ।
प्रीतिमान्स कुरुश्रेष्ठः खानयामासं तं निधिम् ॥१४-६५-१३ (९४३१४)
ततः पात्री सकरका बहुरूपा मनोरमाः ।
भृङ्गाराणि कटाहानि कलशान्वर्धमानकान् ॥१४-६५-१४ (९४३१५)
बहूनि च विचित्राणि भाजनानि सहस्रशः ।
उद्धारयामास तदा धर्मराजो युधिष्ठिरः ॥१४-६५-१५ (९४३१६)

तेषां रक्षणमप्यासीन्महान्करपुटस्तथा ।
नद्धं च भाजनं राजंस्तुलार्धमभवन्नृप ॥ १४-६५-१६ (९४३१७)
वाहनं पाण्डुपुत्रस्य तत्रासीत्तु विशांपते ।
षष्टिरुष्ट्रसहस्राणि शतानि द्विगुणा हयाः ॥ १४-६५-१७ (९४३१८)
वारणाश्च महाराज सहस्रशतसंमिताः ।
शकटानि रथाश्चैव तावदेव करेणवः ।
स्वराणां पुरुषाणां च परिसङ्ख्या न विद्यते ॥ १४-६५-१८ (९४३१९)
एतद्वित्तं तदभवद्यदुद्दध्रे युधिष्ठिरः ।
षोडशाष्टौ चतुर्विंशत्सहस्रं भारलक्षणम् ॥ १४-६५-१९ (९४३२०)
एतेष्वादाय तद्द्रव्यं पुनरभ्यर्च्य पाण्डवः ।
महादेवं प्रति ययौ पुरं नागाहयं प्रति ॥ १४-६५-२० (९४३२१)
द्वैपायनाभ्यनुज्ञातः पुरस्कृत्य पुरोहितम् ।
गोरुते गोरुते चैव न्यवसत्पुरुषर्षभः ॥ १४-६५-२१ (९४३२२)
सा पुराऽभिमुखा राजन्नुवाह महती चमूः ।
कृच्छ्राद्द्रविणभारार्ता हर्षयन्ती कुरूद्वहान् ॥ ॥ १४-६५-२२ (९४३२३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६५-१४ पात्रीः महान्ति ओदनोद्धरणपात्राणि । करका
अल्पघटाः । भृङ्गाराणि गडुकान् । वर्धमानकान् शरावाणि ॥
७-६५-१६ करपटः करसंपुटाकारं द्विजलभाजनं उष्ट्रादिवाह्यम्
संदूख इति प्रसिद्धम् ॥

आश्वमेधिकपर्व - अध्याय ०६६
॥ श्रीः ॥
१४.६६. अध्यायः ६६

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन बलभद्द्रसुमद्रादिभिः सह यज्ञार्थं हास्तिनपुरं
प्रत्यागमनम् ॥ १ ॥
तत उत्तरायां परिक्षितो परिक्षितो जननम् ॥ २ ॥
भश्वत्थामास्त्रेण जननकालएव शवभूतस्य तस्योज्जीवनाय
कुन्त्यादिभिः श्रीकृष्णंप्रति प्रार्थना ॥ ३ ॥

वैशम्पायन उवाच ।
एतस्मिन्नेव काले तु वासुदेवोऽपि वीर्यवान् ।
उपायाद्वृष्णिभिः सार्दं पुरं वारणसाह्वयम् ॥१४-६६-१ (९४३२४)
समयं वाजिमेधस्य विदित्वा पुरुषर्षभः ।
यथोक्तो धर्मपुत्रेण प्रव्रजन्स्वपुरीं प्रति ॥१४-६६-२ (९४३२५)
रौक्मिणेयेन सहितो युयुधानेन चैव ह ।
चारुदेष्णेन सांबेनि गदेन कृतवर्मणा ॥१४-६६-३ (९४३२६)
सारणेन च वीरेण निशठेनोन्मुखेन च ।
बलदेवं पुरस्कृत्य सुभद्रासहितस्तदा ॥१४-६६-४ (९४३२७)
द्रौपदीमुत्तरां चैव पृथां चाप्यवलोककः ।
समाश्वासयितुं चापि क्षत्रिया निहतेश्वराः ॥१४-६६-५ (९४३२८)
तानागतान्समीक्ष्यैव धृतराष्ट्रो महीपतिः ।
प्रत्यगृह्णाद्यथान्यायं विदुरश्च महामनाः ॥१४-६६-६ (९४३२९)
तत्रैव न्यवसत्कृष्णः स्वर्चितः पुरुषोत्तमः ।
विदुरेणि महातेजास्तथैव च युयुत्सुना ॥१४-६६-७ (९४३३०)
वसत्सु वृष्णिवीरेषु तत्राथ जनमेजय ।
जज्ञे तव पिता राजन्परिक्षित्परवीरहा ॥१४-६६-८ (९४३३१)
स तु राजा महाराज ब्रह्मास्त्रेणावपीडितः ।
शवो बभूव निश्चेष्टो हर्षशोकविवर्धनः ॥१४-६६-९ (९४३३२)
हृष्टानां सिंहनादेन जनानां तत्र निःस्वनः ।
आविवश दिशःसर्वाः पुनरेवाभ्युपागमत् ॥१४-६६-१० (९४३३३)
ततः सोतित्वरः कृष्णो विवेशान्तःपुरं तदा ।
युयुधानद्वितीयो वै व्यथितेन्द्रियमानसः ॥१४-६६-११ (९४३३४)
ततस्त्वरितमायान्तीं ददर्श स्वां पितृष्वसाम् ।
क्रोशन्तीमभिधावेति वासुदेवं पुनःपुनः ॥१४-६६-१२ (९४३३५)
पृष्ठतो द्रौपदीं चैव सुभद्रां च यशस्विनीम् ।
विक्रोशन्त्यश्च करुणं पाण्डवानां स्त्रियो नृप ॥१४-६६-१३ (९४३३६)
ततः कृष्णं समासाद्य कुन्ती भोजसुता तदा ।
प्रोवाच राजशार्दूल बाष्पगद्गदया गिरा ॥१४-६६-१४ (९४३३७)
वासुदेव महाबाहो सुप्रजा देवकी त्वया ।
त्वं नो गतिः प्रतिष्ठा च त्वदायत्तमिदं कुलम् ॥१४-६६-१५ (९४३३८)
यदुप्रवीर योऽयं ते स्वस्त्रीयस्यात्मजः प्रभो ।
अश्वत्थाम्ना हतो जातस्तमुज्जीवय केशव ॥१४-६६-१६ (९४३३९)

त्वया ह्येतत्प्रतिज्ञातमैषीके यदुनन्दन ।
अहं संजीवयिष्यामि मृतं जातमिति प्रभो ॥ १४-६६-१७ (९४३४०)
सोयं जातो मृतस्तात पश्यैनं पुरुषर्षभ ।
उत्तरां च सुभद्रां च द्रौपदीं मां च माधव ॥ १४-६६-१८ (९४३४१)
धर्मपुत्रं च भीमं च फल्गुनं नकुलं तथा ।
सहदेवं च दुर्धर्षं सर्वान्नस्त्रातुमर्हसि ॥ १४-६६-१९ (९४३४२)
अस्मिन्प्राणाः समायत्ताः पाण्डवानां ममैव च ।
पाण्डोश्च पिण्डो दाशार्ह तथैव श्वशुरस्य मे ॥ १४-६६-२० (९४३४३)
अभिमन्योश्च भद्रं ते प्रियस्य सदृशस्य च ।
प्रियमुत्पादयाद्य त्वं प्रेतस्यापि जनार्दन ॥ १४-६६-२१ (९४३४४)
उत्तरा हि पुरोक्तं वै कथयत्यरिसूदन ।
अभिमन्योर्वचः कृष्ण प्रियत्वात्तन्न संशयः ॥ १४-६६-२२ (९४३४५)
अब्रवीत्किल दाशार्ह वैराTI.Ar जुनिस्तदा ।
मातुलस्य कुलं भद्रे तव पुत्रो गमिष्यति ॥ १४-६६-२३ (९४३४६)
गत्वा वृष्णयन्धककुलं धनुर्वेदं ग्रहीष्यति ।
अस्त्राणि च विचित्राणि नितीशास्त्रं च केवलं ॥ १४-६६-२४ (९४३४७)
इत्येतत्प्रणयात्तात सौभद्रः परवीरहा ।
कथयामास दुर्धर्षस्तथा चैतन्न संशयः ॥ १४-६६-२५ (९४३४८)
तास्त्वां वयं प्रणम्येह याचामो मधुसूदन ।
कुलस्यास्य हितार्तं च कुरु कल्याणमुत्तमम् ॥ १४-६६-२६ (९४३४९)
एवमुक्त्वा तु वार्ष्णेयं पृथा पृथुललोचना ।
उद्धृत्य बाहू दुःखार्ता ताश्चान्याः प्रापतन्भुवि ॥ १४-६६-२७ (९४३५०)
अब्रुवंश्च महाराज सर्वाः सास्राविलेक्षणाः ।
स्वस्त्रीयो वासुदेवस्य मृतो जात इति प्रभो ॥ १४-६६-२८ (९४३५१)
एवं गते ततः कुन्तीं पर्यगृह्णाज्जनार्दनः ।
भूमौ निपतितां चैनां सान्त्वयामास भारत ॥ ॥ १४-६६-२९ (९४३५२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

आश्वमेधिकपर्व - अध्याय ०६७
॥ श्रीः ॥
१४.६७. अध्यायः ६७

Mahabharata - Ashvamedhika Parva - Chapter Topics
सुभद्रया श्रीकृष्णंप्रति तन्महिमसंस्तवनपूर्वकं

परिक्षिदुज्जीवनप्रार्थना ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
उत्थितायां पृथायां तु सुभद्रा भ्रातरं तदा ।
दृष्ट्वा चुक्रोश दुःखार्ता वचनं चेदमब्रवीत् ॥ १४-६७-१ (९४३५३)
पुण्डरीकाक्ष पश्य त्वं पौत्रं पार्थस्य धीमतः ।
परिक्षीणेषु कुरुषु परिक्षीणां गतायुषम् ॥ १४-६७-२ (९४३५४)
इषीका द्रोणपुत्रेणि भीमसेनार्थमुद्यता ।
सोत्तरायां निपतिता विजये मयि चैव ह ॥ १४-६७-३ (९४३५५)
सेयं ज्वलन्ती हृदये मयि तिष्टति केशव ।
यन्न पश्यामि दुर्धर्ष सहपुत्रं तु तं प्रभो ॥ १४-६७-४ (९४३५६)
किंनु वक्ष्यति धर्मात्मा धर्मराजो युधिष्ठिरः ।
भीमसेनार्जुनौ चापि माद्रवत्याः सुतौ च तौ ॥ १४-६७-५ (९४३५७)
श्रुत्वाऽभिमन्योस्तनयं जातं च मृतमेव च ।
मुषिता इव वार्ष्णेय द्रोणपुत्रेण पाण्डवाः ॥ १४-६७-६ (९४३५८)
अभिमन्युः प्रियः कृष्ण पितॄणां नात्र संशयः ।
ते श्रुत्वा किंनु वक्ष्यन्ति द्रोणपुत्रास्त्रनिर्जिताः ॥ १४-६७-७ (९४३५९)
भविता नः परं दुःखं किंनु मन्ये जनार्दन ।
अभिमन्योः सुतं कृष्ण मृतं जातमरिंदम ॥ १४-६७-८ (९४३६०)
साऽहं प्रसादये कृष्ण त्वामद्य शिरसा नता ।
पृथेयं द्रौपदी चैव ताः पश्य पुरुषोत्तम ॥ १४-६७-९ (९४३६१)
यदा द्रोणसुतो गर्भान्पाण्डूनां हन्ति माधव ।
तदा किल त्वया द्रौणिः क्रुद्धेनोक्तोऽरिमर्दन ॥ १४-६७-१० (९४३६२)
अकामं त्वां करिष्यामि ब्रह्मबन्धो नराधम ।
अहं संजीवयिष्यामि किरीटितनयात्मजम् ॥ १४-६७-११ (९४३६३)
इत्येद्वचनं श्रुत्वा जानानाऽहं बलं तव ।
प्रसादये त्वां दुर्धर्ष जीवतामभिमन्युजः ॥ १४-६७-१२ (९४३६४)
यद्येतत्त्वं प्रतिश्रुत्य न करोषि वच शुभम् ।
सकलं वृष्णिशार्दूल मृतां मामवधारय ॥ १४-६७-१३ (९४३६५)
अभिमन्योः सुतो वीर न संजीवति यद्ययम् ।
जीवति त्वयि दुर्धर्ष किं करिष्याम्यहं त्वया ॥ १४-६७-१४ (९४३६६)
संजीवयैनं दुर्धर्ष मृतं त्वमभिमन्युजम् ।
सदृशाक्षसुतं वीर सस्यं वर्षन्निवांम्बुदः ॥ १४-६७-१५ (९४३६७)
त्वं हि केशव धर्मात्मा सत्यवान्सत्यविक्रमः ।

स तां वाचमृतां कर्तुमर्हसि त्वमरिंदम ॥ १४-६७-१६ (९४३६८)
इच्छन्नपि हि लोकांस्त्रीञ्जीवयेथा मृतानिमान् ।
किं पुनर्दयितं जातं स्वस्रीयस्यात्मजं मृतम् ॥ १४-६७-१७ (९४३६९)
प्रभावज्ञाऽस्मि ते कृष्ण तस्मात्त्वां याचयाम्यहम् ।
कुरुष्व पाण्डुपुत्राणामिमं परमनुग्रहम् ॥ १४-६७-१८ (९४३७०)
स्वसेति वा महाबाहो हतपुत्रेति वा पुनः ।
प्रपन्ना मामियं चेति दयां कर्तुमिहार्हसि ॥ ॥ १४-६७-१९ (९४३७१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६७-४ घृतेन सिक्तैरिति शेषः ॥

आश्वमेधिकपर्व - अध्याय ०६८
॥ श्रीः ॥
१४.६८. अध्यायः ६८

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन परिक्षित्सूतिकागृहप्रवेशनम् ॥ १ ॥
तत्रोत्तरया कृष्णसमीपे बहुधा विलापपूर्वकं पुत्रोज्जीवनप्रार्थना ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवमुक्तस्तु राजेन्द्र केशिहा दुःखमुर्च्छितः ।
तथेति व्याजहारोच्चैर्ह्लादयन्निव तं जनम् ॥ १४-६८-१ (९४३७२)
वाक्येनैतेन हि तदा तं जनं पुरुषर्षभः ।
ह्लादयामास स विभुर्घर्मार्तं सलिलैरिव ॥ १४-६८-२ (९४३७३)
ततः स प्राविशत्तूर्णं जन्मवेश्म पितुस्तव ।
अर्चितं पुरुषव्याघ्र सितैर्माल्यैर्यथाविधि ॥ १४-६८-३ (९४३७४)
अपां कुम्भैः सुपूर्णैश्च विन्यस्तैः सर्वतोदिशम् ।
घृतेन तिन्दुकालातैः सर्षपैश्च महाभुज ॥ १४-६८-४ (९४३७५)
अस्त्रैश्च विमलैर्न्यस्तैः पावकैश्च समन्ततः ।
वृद्धाभिश्चापि रामाभिः परिवारार्थमावृतः ।
दक्षैश्च परितो धीर भिषग्भिः कुशलैस्तथा ॥ १४-६८-५ (९४३७६)

ददर्श च स तेजस्वी रक्षोघ्नान्यपि सर्वशः ।
द्रव्याणि स्थापितानि स्म विधिवत्कुशलैर्जनैः ॥ १४-६८-६ (९४३७७)
तथायुक्तं च तद्दृष्ट्वा जन्मवेश्म पितुस्तव ।
हृष्टोऽभवद्धृषीकेशः साधुसाध्विति चाब्रवीत् ॥ १४-६८-७ (९४३७८)
तथा ब्रुवति वार्ष्णेये प्रहृष्टवदने तदा ।
द्रौपदी त्वरिता गत्वा वैराटीं वाक्यमब्रवीत् ॥ १४-६८-८ (९४३७९)
अयमायाति ते भर्तुर्मातुलो मधुसूदनः ।
पुराणर्षिरचिन्त्यात्मा समीपमपराजितः ॥ १४-६८-९ (९४३८०)
साऽपि बाष्पकलां वाचं निगृह्याश्रूपि चैव ह ।
असंवीताऽभवद्देवी देववत्कृष्णमीयुषी ॥ १४-६८-१० (९४३८१)
सा तथा दूयमानेन हृदयेन तपस्विनी ।
दृष्ट्वा गोविन्दमायान्तं कृपणं पर्यदेवयत् ॥ १४-६८-११ (९४३८२)
पुण्डरीकाक्ष पश्यावां बालेन हि विनाकृतौ ।
अभिमन्युं च मां चैव हठात्तुल्यं जनार्दन ॥ १४-६८-१२ (९४३८३)
वार्ष्णेयमधुहन्वीर शिरसा त्वां प्रसादये ।
द्रोणपुत्रास्त्रनिर्दग्धं जीवयैनं ममात्मजम् ॥ १४-६८-१३ (९४३८४)
यदि स्म धर्मराज्ञा वा भीमसेनेन वा पुनः ।
त्वया वा पुण्डरीकाक्ष वाक्यमुक्तमिदं भवेत् ॥ १४-६८-१४ (९४३८५)
अजानतीमिषीकेयं जनित्रीं हन्त्विति प्रभो ।
अहमेव विनष्टा स्यां नायमेवं गतो भवेत् ॥ १४-६८-१५ (९४३८६)
गर्भस्थस्यास्य बालस्य ब्रह्मास्त्रेण निपातनम् ।
कृत्वा नृशंसं दुर्बुद्धिर्द्रौणिः किं फलमश्नुते ॥ १४-६८-१६ (९४३८७)
सा त्वां प्रसाद्य शिरसा याचे शत्रुनिबर्हण ।
प्राणांस्त्यक्ष्यामि गोविन्द नायं संजीवते यदि ॥ १४-६८-१७ (९४३८८)
अस्मिन्हि बहवः साधो ये ममासन्मनोरथाः ।
ते द्रोणपुत्रेण हताः किंनु जीवामि केशव ॥ १४-६८-१८ (९४३८९)
आसीन्मम मतिः कृष्ण पूर्णोत्सङ्गा जनार्दन ।
अभिवादयिष्ये हृष्टेति तदिदं वितथीकृतम् ॥ १४-६८-१९ (९४३९०)
चपलाक्षस्य दायादे मृतेऽस्मिन्पुरुषर्षभ ।
विफला मे कृताः कृष्ण हृदि सर्वे मनोरथाः ॥ १४-६८-२० (९४३९१)
चपलाक्षः किलातीव प्रियस्ते मधुसूदन ।
सुतं पश्य त्वमस्यैनं ब्रह्मास्त्रेण निपातितम् ॥ १४-६८-२१ (९४३९२)
कृतघ्नोऽयं नृशंसोऽयं यथाऽस्य जनकस्तथा ।
यः पाण्डवीं श्रियं त्यक्त्वा गतोऽद्य यमसादनं ॥ १४-६८-२२ (९४३९३)
मया चैतत्प्रतिज्ञातं रणमूर्धनि केशव ।
अभिमन्यौ हते वीर त्वामेष्याम्यचिरादिति ॥ १४-६८-२३ (९४३९४)

तच्च नाकरवं कृष्ण नृशंसा जीवितप्रिया ।
इदानीं मां गतां तत्र किंनु वक्ष्यति फाल्गुनिः ॥ ॥ १४-६८-२४ (९४३९५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६८-१९ पुत्रोत्सङ्गा जनार्दनेति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०६९
॥ श्रीः ॥
१४.६९. अध्यायः ६९

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन सशपथं संस्पर्शनेन परिक्षितः समुज्जीवनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
सैवं विलप्य करुणं सोन्मादेव तपस्विनी ।
उत्तरा न्यपतद्भूमौ कृपणा पुत्रगृद्धिनी ॥ १४-६९-१ (९४३९६)
तां तु दृष्ट्वा निपतितां हतपुत्रपरिच्छदाम् ।
चुक्रोश कुन्ती दुःखार्ता सर्वाश्च भरतास्त्रियः ॥ १४-६९-२ (९४३९७)
मुहूर्तमिव राजेन्द्र पाण्डवानां निवेशनम् ।
अप्रेक्षणीयमभवदार्तस्वनविनादितम् ॥ १४-६९-३ (९४३९८)
सा मुहूर्तं च राजेन्द्र पुत्रशोकाभिपीडिता ।
कश्मलाभिहता वीर वैराटी त्वभवत्तदा ॥ १४-६९-४ (९४३९९)
प्रतिलभ्य तु सा संज्ञामुत्तरा भरतर्षभ ।
अङ्कमारोप्य तं पुत्रमिदं वचनमब्रवीत् ॥ १४-६९-५ (९४४००)
धर्मज्ञस्य सुतः संस्त्वं न धर्ममवबुध्यसे ।
यस्त्वं वृष्णिप्रवीरस्य कुरुषे नाभिवादनम् ॥ १४-६९-६ (९४४०१)
पुत्र गत्वा मम वचो ब्रूयास्त्वं पितरं त्विदम् ।
दुर्मरं प्राणिनां वीर काले प्राप्ते कथञ्चन ॥ १४-६९-७ (९४४०२)
याऽहं त्वया विनाऽद्येह पत्या पुत्रेण चैव ह ।
मरणं नाभिगच्छामि हतस्वस्तिरकिञ्चना ॥ १४-६९-८ (९४४०३)
अथवा धर्मराज्ञाऽहमनुज्ञाता महाभुजः ।

भक्षयिष्ये विषं घोरं प्रवेक्ष्ये वा हुताशनम् ॥१४-६९-९ (९४४०४)
अथवा दुर्भरं तात यदिदं मे सहस्रधा ।
पतिपुत्रविहीनाया हृदयं न विदीर्यते ॥१४-६९-१० (९४४०५)
उत्तिष्ठ पुत्र पस्येमां दुःखितां प्रपितामहीम् ।
आर्तामुपप्लुतां दीनां निमग्नां शोकसागरे ॥१४-६९-११ (९४४०६)
आर्यां च पश्य पाञ्चालीं सात्वतीं च तपस्विनीम् ।
मां च पश्य सुदुःखार्तां व्याधविद्धां मृगीमिव ॥१४-६९-१२ (९४४०७)
उत्तिष्ठ पश्य वदनं लोकनाथस्य धीमतः ।
पुण्डरीकपलाशाक्षं पुरेव चपलेक्षणः ॥१४-६९-१३ (९४४०८)
एवं विप्रलपन्तीं तु दृष्ट्वा निपतितां पुनः ।
उत्तरां तां स्त्रियः सर्वाः पुनरुत्थापयन्त्युत ॥१४-६९-१४ (९४४०९)
उत्थाय च पुनर्धैर्यात्तदा मत्स्यपतेः सुता ।
प्राञ्जलिः पुण्डरीकाक्षं भूमावेवाभ्यवादयत् ॥१४-६९-१५ (९४४१०)
श्रुत्वा स तस्या विपुलं विलापं पुरुषर्षभः ।
उपस्पृश्य ततः कृष्णो ब्रह्मास्त्रं प्रत्यसंहरत् ॥१४-६९-१६ (९४४११)
प्रतिजज्ञे च दाशार्हस्तस्य जीवितमच्युतः ।
अब्रवीच्च विशुद्धात्मा सर्वं विश्रावयज्जगत् ॥१४-६९-१७ (९४४१२)
न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भविष्यति ।
एष संजीवयाम्येनं पश्यतां सर्वदेहिनाम् ॥१४-६९-१८ (९४४१३)
नोक्तपूर्वं मया मिथ्या स्वैरेष्वपि कदाचन ।
न च युद्धात्परावृत्तस्तथा संजीवतामयम् ॥१४-६९-१९ (९४४१४)
यथा मे दयितो धर्मो ब्राह्मणश्च विशेषतः ।
अभिमन्योः सुतो जातो मृतो जीवत्वयं तथा ॥१४-६९-२० (९४४१५)
यथाऽहं नाभिजानामि विजये तु कदाचन ।
विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः ॥१४-६९-२१ (९४४१६)
यथा सत्यं च धर्मश्च मयि नित्यं प्रतिष्ठितौ ।
तथा मृतः शिशुरयं जीवतादभिमन्युजः ॥१४-६९-२२ (९४४१७)
यथा कंसश्च केशी च धर्मेण निहतौ मया ।
तेन सत्येन बालोऽयं पुनः संजीवतामिह ॥१४-६९-२३ (९४४१८)
इत्युक्त्वा वासुदेवोऽथ तं बालं भरतर्षभ ।
ग्पादेन कमलाभेन ब्रह्मरुद्रार्चितेन च ।
पस्पर्श पुण्डरीकाक्ष आपादतलमस्तकम् ॥ १४-६९-२४ (९४४१९)
स्पृष्टमात्रस्तु कृष्णेन स बालो भरतर्षभ ।
शनैःशनैर्महाराज प्रापद्यत स चेतनाम् ॥' १४-६९-२५ (९४४२०)
शनैःशनैर्महाराज प्रास्पन्दत सचेतनः ॥ ॥ १४-६९-२६ (९४४२१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-६९-६ धर्मजस्य सुत इति क थ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०७०
॥ श्रीः ॥
१४.७०. अध्यायः ७०

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेनाभिमन्युसुतस्य पदप्रवृत्तिनिमित्तकथनपूर्वकं नामकरणम्
॥ १ ॥
अत्रान्तरे युधिष्ठिरादीनां स्वर्णभारानयनेन
हस्तिनपुरंप्रत्यागमनश्रवणेन कृष्णादिभिस्तत्प्रत्युद्यानम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
ब्रह्मास्त्रं तु यदा राजन्कृष्णेन प्रतिसंहृतम् ।
तदा तद्वेश्म ते पित्रा तेजसाऽभिविदीपितम् ॥ १४-७०-१ (९४२२)
ततो रक्षांसि सर्वाणि नेशुस्त्यक्त्वा गृहं तु तत् ।
अन्तरिक्षे च वागासीत्साधु केशव साध्विति ॥ १४-७०-२ (९४२३)
तदस्त्रं ज्वलितं चापि पितामहमगात्तदा ।
ततः प्राणान्पुनर्लेभे पिता तव नरेश्वर ॥ १४-७०-३ (९४२४)
व्यचेष्टत च बालोसौ यथोत्साहं यताबलम् ।
बभूवुर्मुदिता राजंस्ततस्ता भरतस्त्रियः ॥ १४-७०-४ (९४२५)
ब्राह्मणा वाचयामासुर्गोविन्दस्यैव शासनात् ।
ततस्ता मुदिताः सर्वाः प्रशशंसुर्जनार्दनम् ॥ १४-७०-५ (९४२६)
स्त्रियो भरतसिंहानां नावं लब्ध्वेव पारगाः ।
कुन्ती द्रुपदपुत्री च सुभद्रा चोत्तरा तथा ।
स्त्रियश्चान्या नृसिंहानां बभूवुर्हृष्टमानसाः ॥ १४-७०-६ (९४२७)
तत्र मल्ला नटाश्चैव ग्रन्थिकाः सौख्यशायिकाः ।
सूतमागधसङ्घाश्चाप्यस्तुवंस्तं जनार्दनम् ॥ १४-७०-७ (९४२८)
कुरुवंशस्तवाख्याभिराशीर्भिर्भरतर्षभ ।
ग्सभाजयत संहृष्टो महाराज महाजनः ॥' १४-७०-८ (९४२९)

उत्थाय तु यथाकालमुत्तरा यदुनन्दनम् ।
अभ्यवादयत प्रीता सह पुत्रेण भारत ॥१४-७०-९ (९४४३०)
ततस्तस्यै ददौ प्रीतो बहुरत्नं विशेषतः ।
तथैव वृष्णिशार्दूलो नाम चास्याकरोत्प्रभुः ।
पितुस्तव महाराज सत्यसन्धो जनार्दनः ॥ १४-७०-१० (९४४३१)
परिक्षीणे कुले यस्माज्जातोऽयमभिमन्युजः ।
परिक्षिदिति नामास्य भवत्वित्यब्रवीत्तदा ॥१४-७०-११ (९४४३२)
सोऽवर्धत यथाकालं पिता तव जनाधिप ।
मनःप्रह्लादनश्चासीत्सर्वलोकस्य भारत ॥१४-७०-१२ (९४४३३)
मासजातस्तु ते वीर पिता भवति भारत ।
अथाजग्मुः सुबहुलं रत्नमादाय पाण्डवाः ॥१४-७०-१३ (९४४३४)
ग्मेरुकूटनिभान्भाण्डान्कलशान्भाजनानि च ।
कृताकृतं महद्गीममादाय पुरुषोत्तमाः ॥१४-७०-१४ (९४४३५)
भारतैर्वाहनैस्तत्र गोरुते गोरुते पथि ।
निवसन्तो ययुर्देवं स्मरन्तः परमेष्ठिनः ॥१४-७०-१५ (९४४३६)
नासीत्तत्र नृपः कश्चिदभारार्तो नृपं विना ।
भीमादयोऽपि यज्ञार्थं वहन्ते किं पुनर्जनाः ॥' १४-७०-१६ (९४४३७)
तान्समीपगताञ्श्रुत्वा निर्ययुर्वृष्णिपुङ्गवाः ।
अलञ्चक्रुश्च माल्यौघैर्नगरं नागसाह्वयम् ॥१४-७०-१७ (९४४३८)
पताकाभिर्विचित्राभिर्ध्वजैश्च विविधैरपि ।
वेश्मानि समलञ्चक्रुः पौराश्चापि जनेश्वरः ॥१४-७०-१८ (९४४३९)
देवतायतनानां च पूजाः सुविविधास्तथा ।
संदिदेशाथ विदुरः पाण्डुपुत्रप्रियेप्सया ॥१४-७०-१९ (९४४४०)
राजमार्गाश्च तत्रासन्सुमनोभिरलङ्कृताः ।
शुशुभे तत्पुरं चापि समुद्रौघनिभस्वनम् ॥१४-७०-२० (९४४४१)
नर्तकैश्चापि नृत्यद्भिर्गायकानां च निःस्वनैः ।
आसीद्वैश्रवणस्येव निवासस्तत्पुरं तदा ॥१४-७०-२१ (९४४४२)
बन्दिभिश्च नरै राजन्स्त्रीसहायैश्च सर्वशः ।
तत्रतत्र विविक्तेषु समन्तादुपशोभितम् ॥१४-७०-२२ (९४४४३)
पताका धूयमानाश्च समन्तान्मातरिश्वना ।
अदर्शयन्निव तदा कुरूनवै दक्षिणोत्तरान् ॥१४-७०-२३ (९४४४४)
अघोषयंस्तदा चाप पुरुषा राजमार्गतः ।
सर्वरात्रविहारोऽद्य रत्नाभरणलक्षणः ॥ ॥१४-७०-२४ (९४४४५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७-७०-५ वाचयामासुः स्वस्तीति शेषः ॥
७-७०-७ ग्रन्थिकाः दैवज्ञाः सुखावहं सौख्यं शयनं इति
पृच्छन्ति ते सौख्यशायिकाः ॥
७-७०-८ कुरुवंशस्य स्तवं आचक्षते ताभिः कुरुवंशस्तवाख्याभिः ॥
७-७०-९ उत्थाय तु यथाकाममिति क ट थ पाठः ॥
७-७०-१० तस्य कृष्णो ददौ हृष्टो बहुरत्नं विशेषतः । तथान्ये
वृष्णिशार्दूला इति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०७१
॥ श्रीः ॥
१४.७१. अध्यायः ७१

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णादिभिः प्रत्युद्गम्यमानैर्युधिष्ठिरादिभिः स्वर्णभारपुरस्कारेण
हास्तिनपुरप्रवेशः ॥ १ ॥
ततस्तत्रोपागतेन व्यासेन युधिष्ठिरंप्रत्यश्वमेधप्रशंसनपूर्वकं
तत्करणविधानम् ॥ २ ॥
युधिष्ठिरेणाश्वमेधे स्वयं दीक्षास्वीकारं प्रार्थितेन कृष्णेन
सहेतुकथनं तम्प्रत्येव दीक्षास्वीकारविधानम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
तान्समीपगताञ्श्रुत्वा पाण्डवाञ्शत्रुकर्शनः ।
वासुदेवः सहामात्यः प्रययौ ससुहृद्गणः ।
ते समेत्य यथान्यायं प्रत्युद्याता दिदृक्षया ॥ १४-७१-१ (९४४४६)
ते समेत्य तथाधर्मं पाण्डवा वृष्णिभिः सह ।
विविशुः सहिता राजन्पुरं वारणसाह्वयम् ॥ १४-७१-२ (९४४४७)
विशतस्तस्य सैन्यस्य खुरनेमिस्वनेन ह ।
द्यावापृथिव्यौ खं चैव सर्वमासीत्समावृतम् ॥ १४-७१-३ (९४४४८)
ते कोशानग्रतः कृत्वा विविशुः स्वं पुरं तदा ।
पाण्डवाः प्रीतमनसः सामात्याः ससुहृद्गणाः ॥ १४-७१-४ (९४४४९)
ते समेत्य यथान्यायं धृतराष्ट्रं जनाधिपम् ।
कीर्तयन्तः स्वनामानि तस्य पादौ ववन्दिरे ॥ १४-७१-५ (९४४५०)

धृतराष्ट्राभ्यनुज्ञाता गान्धारीं सुबलात्मजाम् ।
कुन्तीं च राजशार्दूल तदा भरतसत्तम ॥१४-७१-६ (९४४५१)
विदुरं पूजयित्वा च वैश्यापुत्रं समेत्य च ।
पूज्यमानाः स्म ते वीरा व्यरोचन्त विशाम्पते ॥१४-७१-७ (९४४५२)
ततस्तत्परमाश्चर्यं विचित्रं महदद्भुतम् ।
शुश्रुवुस्ते तदा वीराः पितुस्ते जन्म भारत ॥१४-७१-८ (९४४५३)
तदुपश्रुत्य तत्कर्म वासुदेवस्य धीमतः ।
पूजार्हं पूजयामासुः कृष्णं देवकीनन्दनम् ॥१४-७१-९ (९४४५४)
ततः कतिपयाहस्य व्यासः सत्यवतीसुतः ।
आजगाम महातेजा नगरं नागसाह्वयम् ॥१४-७१-१० (९४४५५)
तस्य सर्वे यथान्यायं पूजा चक्रुः कुरूद्वहाः ।
सह वृष्ण्यन्धकव्याघ्रैरुपासांचक्रिरे तदा ॥१४-७१-११ (९४४५६)
तत्र नानाविधाकाराः कथाः समभिकीर्त्य वै ।
युधिष्ठिरो धर्मसुतो व्यासं वचनमब्रवीत् ॥१४-७१-१२ (९४४५७)
भवत्प्रसादाद्भगवन्यदिदं रत्नमाहृतम् ।
उपयोक्तुं तदिच्छामि वाजिमेधे महाक्रतौ ॥१४-७१-१३ (९४४५८)
तमनुज्ञातुमिच्छामि भवता मुनिसत्तम ।
त्वदधीना वयं सर्वे कृष्णस्य च महात्मनः ॥१४-७१-१४ (९४४५९)
व्यास उवाच।१४-७१-१५क्ष् (७९१६)
अनुजानामि राजंस्त्वां क्रियतां यदनन्तरम् ।
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ॥१४-७१-१५ (९४४६०)
अश्वमेधो हि राजेन्द्र पावनः सर्वपाप्मनाम् ।
तेनेष्ट्वा त्वं विपात्मा वै भविता नात्र संशयः ॥१४-७१-१६ (९४४६१)
इत्युक्तः स तु धर्मात्मा कुरुराजो युधिष्ठिरः ।
अश्वमेधस्य कौरव्य चकाराहरणे मतिम् ॥१४-७१-१७ (९४४६२)
समनुज्ञाप्य तत्सर्वं कृष्मद्वैपायनं नृपः ।
वासुदेवमथाभ्येत्य वाग्मी वचनमब्रवीत् ॥१४-७१-१८ (९४४६३)
देवकी सुप्रजा देवी त्वया पुरुषसत्तम ।
यद्ब्रूयां त्वां महाबाहो तत्कृथास्त्वमिहाच्युत ॥१४-७१-१९ (९४४६४)
त्वत्प्रभावार्जितान्भोगानश्नीम यदुनन्दन ।
पराक्रमेण बुद्ध्या च त्वयेयं निर्जिता मही ॥१४-७१-२० (९४४६५)
दीक्षयस्व त्वमात्मानं त्वं हि नः परमो गुरुः ।
त्वयीष्टवति दाशार्ह विपाप्मा भविता ह्यहम् ॥१४-७१-२१ (९४४६६)
त्वं हि यज्ञो गुरुश्च त्वं धर्मज्ञस्त्वं प्रजापतिः ।
त्वं गतिः सर्वभूतानामिति मे निश्चिता मतिः ॥१४-७१-२२ (९४४६७)
वासुदेव उवाच।१४-७१-२३क्ष् (७९१७)

त्वमेवैतन्महाबाहो कर्तुमर्हस्यरिंदम ।
त्वं गतिः सर्वभूतानामिति मे निश्चिता मतिः ॥१४-७१-२३ (९४४६८)
त्वं चाद्य कुरुवीराणां धर्मेण हि विराजसे ।
गुणीभूताः स्म ते राजंस्त्वं नो राजन्गुरुर्मतः ।
यजस्व मदनुज्ञातः प्राप्य एष क्रतुस्त्वया ॥ १४-७१-२४ (९४४६९)
युनक्तु नो भवान्कार्ये यत्र वाञ्छसि भारत ।
सत्यं ते प्रतिजानामि सर्वं कर्तास्मि तेऽनघ ॥१४-७१-२५ (९४४७०)
भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ ।
इष्टवन्तो भविष्यन्ति त्वयीष्टवति पार्थिवे ॥ ॥१४-७१-२६ (९४४७१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७१-७ वैश्यापुत्रं युयुत्सुम् ॥
७-७१-१६ पावनः नाशकः ॥

आश्वमेधिकपर्व - अध्याय ०७२
॥ श्रीः ॥
१४.७२. अध्यायः ७२

Mahabharata - Ashvamedhika Parva - Chapter Topics
व्यासेन युधिष्ठिरंप्रति पृथिवीसंचाराय मेध्याश्वोत्सर्जनचोदना ॥ १ ॥
तथाऽश्वरक्षणेऽर्जुनस्य नियोजनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवमुक्तस्तु कृष्णेन धर्मपुत्रो युधिष्ठिरः ।
व्यासमामन्त्र्य् मेधावी ततो वाचनमब्रवीत् ॥१४-७२-१ (९४४७२)
यदा कालं भवान्वेत्ति हयमेधस्य तत्त्वतः ।
दीक्षयस्व तदा मां त्वं त्वय्यायत्तो हि मे क्रतुः ॥१४-७२-२ (९४४७३)
व्यास उवाच।१४-७२-३क्ष् (७९१८)
अयं पैलोथ कौन्तेय याज्ञवल्क्यस्तथैव च ।
विधानं यद्यथा कालं तत्कर्तारौ न संशयः ॥१४-७२-३ (९४४७४)
चैत्र्यां हि पौर्णमास्यां तु तव दीक्षा भविष्यति ।

सम्भाराः सम्भ्रियन्तां च यज्ञार्थं पुरुषर्षभ ॥१४-७२-४ (९४४७५)
अश्वविद्याविदश्चैव सूता विप्राश्च तद्विदः ।
मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये ॥१४-७२-५ (९४४७६)
तमुत्सृज यथाशास्त्रं पृथिवीं सागराम्बराम् ।
सपर्येतु यशो नाम्ना तव पार्थिव वर्धयन् ॥१४-७२-६ (९४४७७)
इत्युक्तः स तथेत्युक्त्वा पाण्डवः पृथिवीपतिः ।
चकार सर्वं राजेन्द्र यथोक्तं ब्रह्मवादिना ॥१४-७२-७ (९४४७८)
सम्भारश्चैव राजेन्द्र सर्वे सङ्कल्पितास्तता ॥ १४-७२-८ (९४४७९)
स सम्भारान्समाहृत्य नृपो धर्मसुतस्तदा ।
न्यवेदयदमेयात्मा कृष्णद्वैपायनाय वै ॥१४-७२-९ (९४४८०)
ततोऽब्रवीन्महातेजा व्यासो धर्मात्मजं नृपम् ।
यथाकालं यथायोगं सज्जाः स्म तव दीक्षणे ॥१४-७२-१० (९४४८१)
स्फ्यश्च कूर्चश्च सौवर्णो यच्चान्यदपि कौरव ।
यत्तु योग्यं भवेत्किञ्चिद्रौक्मं तत्क्रियतामिति ॥१४-७२-११ (९४४८२)
अश्वश्चोत्सृज्यतामद्य पृथ्व्यामथ यथाक्रमम् ।
सुगुप्तं चरतां चापि यथाशास्त्रं यथाविधि ॥१४-७२-१२ (९४४८३)
युधिष्ठिर उवाच।१४-७२-१३क्ष् (७९११)
अयमश्वो यता ब्रह्मन्नुत्सृष्टः पृथिवीमिमाम् ।
चरिष्यति यथाकामं तत्र वै संविदीयताम् ॥१४-७२-१३ (९४४८४)
पृथिवीं पर्यटन्तं हि तुरगं कामचारिणम् ।
कः पालयेदिति मुने तद्भवान्वक्तुमर्हति ॥१४-७२-१४ (९४४८५)
इत्युक्तः स तु राजेन्द्र कृष्णद्वैपायनोऽब्रवीत् ।
भीमसेनादवरजः श्रेष्ठः सर्वधनुष्मताम् ।
जिष्णुः सहिष्णुर्धृष्णुस्च स एनं पालयिष्यति ॥ १४-७२-१५ (९४४८६)
शक्तः स हि महीं जेतुं निवातकवचान्तकः ।
तस्मिन्ह्यस्त्राणि दिव्यानि दिव्यं संहननं तथा ।
दिव्यं धनश्चेषुधी च स एनमनुयास्यति ॥ १४-७२-१६ (९४४८७)
स हि धर्मार्थकुशलः सर्वविद्याविशारदः ।
यथाशास्त्रं नृपश्रेष्ठ चारयिष्यति ते हयम् ॥१४-७२-१७ (९४४८८)
राजपुत्रो महाबाहुः श्यामो राजीवलोचनः ।
अभिमन्योः पिता वीरः स एनमनुयास्यति ॥१४-७२-१८ (९४४८९)
भीमसेनोपि तेजस्वी कौन्तेयोऽमितविक्रमः ।
समर्थो रक्षितुं राष्ट्रं नकुलश्च विशाम्पते ॥१४-७२-१९ (९४४९०)
सहदेवस्तु कौरव्य समायास्यति बुद्धिमान् ।
कुटुम्बतन्त्रं विधिवत्सर्वमेव महायशाः ॥१४-७२-२० (९४४९१)
स तु सर्वं यथान्यायमुक्त कुरुकुलोद्वहः ।

चकार फल्गुनं चापि संदिदेश हयं प्रति ॥ १४-७२-२१ (९४४९२)
युधिष्ठिर उवाच। १४-७२-२२क्ष् (७९२०)
एह्यर्जुन त्वया वीर हयोऽयं परिपाल्यताम् ।
त्वमर्हो रक्षितुं ह्येनं नान्यः कश्चन मानवः ॥ १४-७२-२२ (९४४९३)
ये चापि त्वां महाबाहो प्रत्युद्यान्ति नराधिपाः ।
तैर्विग्रहो यथा न स्यात्तथा कार्यं त्वयाऽनघ ॥ १४-७२-२३ (९४४९४)
आख्यातव्यश्च भता यज्ञोऽयं मम सर्वशः ।
पार्थिवेभ्यो महाबाहो समये गम्यतामिति ॥ १४-७२-२४ (९४४९५)
वैशम्पायन उवाच। १४-७२-२५क्ष् (७९२१)
एवमुक्त्वा स धर्मात्मा भ्रातरं सव्यसाचिनम् ।
भीमं च नकुलं चैव पुरगुप्तौ समादधत् ॥ १४-७२-२५ (९४४९६)
कुटुम्बतन्त्रे च तदा सहदेवं युधांपतिम् ।
अनुमान्य महीपालं धृतराष्ट्रं युधिष्ठिरः ॥ ॥ १४-७२-२६ (९४४९७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७२-११ स्फ्यः काष्ठखङ्गः स चात्र सौवर्णः । कूर्च आसनार्थं
कुशमुष्टिः सोऽप्यत्र सौवर्णः ॥
७-७२-१२ सुगुप्तं सुरक्षितं यथा स्यात्तथा ॥

आश्वमेधिकपर्व - अध्याय ०७३
॥ श्रीः ॥
१४.७३. अध्यायः ७३

Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन युधिष्ठिरनियोगाद्ब्राह्मणैः क्षत्रियैश्च सह
प्रथममुत्तरदिश्यश्वसञ्चारणेन रक्षणाय तदनुसरणम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
दीक्षाकाले तु सम्प्राप्ते ततस्ते सुमहर्त्विजः ।
विधिवद्दीक्षयामासुरश्वमेधाय पार्थिवम् ॥ १४-७३-१ (९४४९८)
कृत्वा स पशुमेधांश्च दीक्षितः पाण्डुनन्दनः ।

धर्मराजो महातेजाः सहर्त्विग्भिर्व्यरोचत ॥१४-७३-२ (९४४९९)
हयश्च हयमेधार्थं स्वयं स ब्रह्मवादिना ।
उत्सृष्टः शास्त्रविधिना व्यासेनामिततेजसा ॥१४-७३-३ (९४५००)
स राजा राजधर्मेण दीक्षितो विबभौ तदा ।
हेममाली रुक्मकण्ठः प्रदीप्त इव पावकः ॥१४-७३-४ (९४५०१)
कृष्णाजिनी दण्डपाणिः क्षौमवासाः स धर्मजः ।
विबभौ द्युतिमान्भूयः प्रजापतिरिवाध्वरे ॥१४-७३-५ (९४५०२)
तथैवास्यर्त्विजः सर्वे तुल्यवेषा विशांपते ।
बभूवुरर्जुनश्चापि प्रदीप्त इव पावकः ॥१४-७३-६ (९४५०३)
श्वेताश्वः कपिकेतुश्च ससाराश्वं धनञ्जयः ।
विधिवत्पृथिवीपाल धर्मराजस्य शासनात् ॥१४-७३-७ (९४५०४)
क़क़क्षिपन्गाण्डिवं राजन्बद्धगोधाङ्गुलित्रवान् ।
तमश्वं पृथिवीपाल मुदा युक्तः ससार च ॥१४-७३-८ (९४५०५)
अनुमार्गं तदा राजन्नागमत्तत्पुरं विभो ।
द्रष्टुकामं कुरुश्रेष्ठं प्रयास्यनतं धनञ्जयम् ॥१४-७३-९ (९४५०६)
तेषामन्योन्यसम्मर्दादूष्मेव समाजायत ।
दिदृक्षूणां हयं तं च तं चैव हयसारिणम् ॥१४-७३-१० (९४५०७)
ततः शब्दो महाराज दिशः खं प्रतिपूरयन् ।
बभूव प्रेक्षतां नॄणां कुन्तीपुत्रं धनंजयम् ॥१४-७३-११ (९४५०८)
एष गच्छति कौन्तेयस्तुरगश्चैव दीप्तिमान् ।
समन्वेति महाबाहुः संस्पृशन्धनुरुत्तमम् ॥१४-७३-१२ (९४५०९)
एवं शुश्राव वदतां गिरो जिष्णुरुदारधीः ।
स्वस्ति तेऽस्तु व्रजारिष्टं पुनश्चैहीति भारत ॥१४-७३-१३ (९४५१०)
अथापरे मनुष्येन्द्र पुरुषा वाक्यमब्रुवन् ।
नैनं पश्याम सम्मर्दे धनुरेतत्प्रदृश्यते ॥१४-७३-१४ (९४५११)
एतद्धि भीमनिर्ह्रादं विश्रुतं गाण्डिवं धनुः ।
स्वस्ति गच्छत्वरिष्टो वै पन्थानमकुतोभयम् ।
निवृत्तमेनं द्रक्ष्यामः पुनरेष्यति च ध्रुवम् ॥ १४-७३-१५ (९४५१२)
एवमाद्या मनुष्याणां स्त्रीणां च भरतर्षभ ।
शुश्राव मधुरा वाचः पुनःपुनरुदारधीः ॥१४-७३-१६ (९४५१३)
याज्ञवल्क्यस्य शिष्यश्च कुशलो यज्ञकर्मणि ।
प्रायात्पार्थेन सहितः शान्त्यर्थं वेदपारगः ॥१४-७३-१७ (९४५१४)
ब्राह्मणाश्च महीपाल बहवो वेदपारगाः ।
अनुजग्मुर्महात्मानं क्षत्रियाश्च विशाम्पते ।
विधिवत्पृथिवीपाल धर्मराजस्य शासनात् ॥ १४-७३-१८ (९४५१५)
पाण्डवैः पृथिवीमश्वो निर्जितामस्त्रतेजसा ।

चचार स महाराज यथादेशं च सत्तम ॥ १४-७३-१९ (९४५१६)
तत्र युद्धानि वृत्तानि यान्यासन्पाण्डवस्य ह ।
तानि वक्ष्यामि ते वीर विचित्राणि महान्ति च ॥ १४-७३-२० (९४५१७)
स हयः पृथिवीं राजन्प्रदक्षिणमवर्तत ।
ससारेत्तरतः पूर्वं तन्निबोध महीपते ॥ १४-७३-२१ (९४५१८)
अवमृद्नन्स राष्ट्राणि पार्थिवानां हयोत्तमः ।
शनैस्तदा परिययौ श्वेताश्वश्च महारथः ॥ १४-७३-२२ (९४५१९)
तत्र सङ्गणना नास्ति राज्ञामयुतशस्तदा ।
येऽयुध्यन्त महाराज क्षत्रिया हतबान्धवाः ॥ १४-७३-२३ (९४५२०)
किराता यवना राजन्बहवोऽसिधनुर्धराः ।
म्लेच्छाश्चान्ये बहुविधाः पूर्वं ये निकृता रणे ॥ १४-७३-२४ (९४५२१)
आर्याश्च पृथिवीपालाः प्रहृष्टनरवाहनाः ।
समीयुः पाण्डुपुत्रेण बहवो युद्धदुर्मदाः ॥ १४-७३-२५ (९४५२२)
एवं वृत्तानि युद्धानि तत्रतत्र महीपते ।
अर्जुनस्य महीपालैर्नानादेशसमागतैः ॥ १४-७३-२६ (९४५२३)
यान्यत्र हयतो राजन्प्रवृत्तानि महान्ति च ।
तानि युद्धानि वक्ष्यामि कौन्तेयस्य तवानघ ॥ ॥ १४-७३-२७ (९४५२४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७३-९ आकुमारं तदा राजन् इति झ पाठः ॥
७-७३-१७ शिष्यः सोमश्रवाः ॥

आश्वमेधिकपर्व - अध्याय ०७४
॥ श्रीः ॥
१४.७४. अध्यायः ७४

Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन त्रैगर्तानां पराजयः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
त्रिगर्तैरभवद्युद्धं कृतवैरैः किरीटिनः ।

महारथसमाज्ञातैर्हतानां पुत्रनप्तृभिः ॥१४-७४-१ (९४५२५)
ते समाज्ञाय सम्प्राप्तं यज्ञियं तुरगोत्तमक़क़क़क़क़
विषयान्तं ततो वीरा दंशिताः पर्यवारयन् ॥ १४-७४-२ (९४५२६)
रथिनो बद्धतूणीराः सदश्वैः समलङ्कृतैः ।
परिवार्य हयं राजन्ग्रहीतुं सम्प्रचक्रमुः ॥१४-७४-३ (९४५२७)
ततः किरीटी सञ्चिन्त्य तेषां तत्र चिकीर्षितम् ।
वारयामास तान्वीरान्सान्त्वपूर्वमरिंदमः ॥१४-७४-४ (९४५२८)
तदनादृत्य ते सर्वे शरैरभ्यहनंस्तदा ।
तमोरजोभ्यां संछन्नांस्तान्किरीटी न्यवारयत् ॥१४-७४-५ (९४५२९)
तानब्रवीत्ततो जिष्णुः प्रहसन्निव भारत ।
निवर्तध्वमधर्मज्ञाः श्रेयो जीवितमेव च ॥१४-७४-६ (९४५३०)
स हि वीरः प्रयास्यन्वै धर्मराजेन वारितः ।
हतबान्धवा न ते पार्त हन्तव्याः पार्थिवा इति ॥१४-७४-७ (९४५३१)
स तदा तद्वचः श्रुत्वा धर्मराजस्य धीमतः ।
तान्निवर्तध्वमित्याह न न्यवर्तन्ति चापि ते ॥१४-७४-८ (९४५३२)
ततस्त्रिगर्तराजानं सूर्यवर्माणमाहवे ।
विनद्य शरजालेनि प्रजहास धनंजयः ॥१४-७४-९ (९४५३३)
ततस्ते रथघोपेण रथनेमिस्वनेन च ।
पूरयन्तो दिशः सर्वा धनंजयमुपाद्रवन् ॥१४-७४-१० (९४५३४)
सूर्यवर्मा ततः पार्ते शराणां नतपर्वणाम् ।
शतान्यमुञ्चद्राजेन्द्र लघ्वस्त्रमभिदर्शयन् ॥१४-७४-११ (९४५३५)
तथैवान्ये महेष्वासा ये च तस्यानुयायिनः ।
मुमुचुः शरवर्षाणि धनंजयवधैषिणः ॥१४-७४-१२ (९४५३६)
स ताञ्ज्यामुखनिर्मुक्तैर्बहुभिः सुबहूञ्शरान् ।
चिच्छेद पाण्डवो राजंस्ते भूमौ न्यपतंस्तदा ॥१४-७४-१३ (९४५३७)
केतुवर्मा तु तेजस्वी तस्यैवावरजो युवा ।
युयुधे भ्रातुरर्थाय पाण्डवेन यशस्विना ॥१४-७४-१४ (९४५३८)
तमापतन्तं सम्प्रेक्ष्य केतुवर्माणमाहवे ।
अभ्यघ्नन्निशितैर्बाणैर्बीभत्सुः परवीरहा ॥१४-७४-१५ (९४५३९)
केतुवर्मण्यभिहते धृतवर्मा महारथः ।
रथेनाशु समुत्पत्य शरैर्जिष्णुमवाकिरत् ॥१४-७४-१६ (९४५४०)
तस्य तां शीघ्रतामीक्ष्य तुतोषातीव वीर्यवान् ।
गुडाकेशो महादेजा बालस्य धृतवर्मणः ॥१४-७४-१७ (९४५४१)
न संदधानं ददृशे नाददानं च तं तदा ।
किरन्तमेवं स शरान्ददृशे पाकशासनिः ॥१४-७४-१८ (९४५४२)
स तु तं पूजयामास धृतवर्माणमाहवे ।

मनसा तु मुहूर्तं वै रणे समभिहर्षयन् ॥१४-७४-१९ (९४५४३)
ग्न विव्याध रणे क्रुद्धः कुन्तीपुत्रो हसन्निव ।
सौभद्रस्येव तत्कर्म दृष्ट्वा बालस्य विस्मितः ॥१४-७४-२० (९४५४४)
तं पन्नगमिव क्रुद्धं कुरुवीरः स्मयन्निव ।
प्रीतिपूर्वं महाबाहुः प्राणैर्न व्यपरोपयत् ॥१४-७४-२१ (९४५४५)
स तथा रक्ष्यमाणो वै पार्थेनामिततेजसा ।
धृतवर्मा शरं दीप्तं मुमोच विजये तदा ॥१४-७४-२२ (९४५४६)
स तेन विजयस्तूर्णमासीद्विद्धः करे भृशम् ।
मुमोच गाण्डिवं मोहात्तत्पपाताथ भूतले ॥१४-७४-२३ (९४५४७)
धनुषः पततस्तस्य सव्यसाचिकराद्विभो ।
बभूव सदृशं रूपं शक्रचापस्य भारत ॥१४-७४-२४ (९४५४८)
तस्मिन्निपतिते दिव्ये महाधनुषि पार्थिवः ।
चकार सस्वनं हासं धृतवर्मा महाहवे ॥१४-७४-२५ (९४५४९)
ततो रोषार्दितो जिष्णुः प्रमृज्य रुधिरं करात् ।
धनुरादत्त तद्दिव्यं शरवर्षैर्ववर्ष च ॥१४-७४-२६ (९४५५०)
ततो हलहलाशब्दो दिवस्पृगभवत्तदा ।
नानाविधानां भूतानां तत्कर्माणि प्रशंसताम् ॥१४-७४-२७ (९४५५१)
ततः सम्प्रेक्ष्य संक्रुद्धं कालान्तकयमोपमम् ।
जिष्णुं त्रैगर्तका योधाः परीताः पर्यवारयन् ॥१४-७४-२८ (९४५५२)
अभिसृत्य परीप्सार्थं ततस्ते धृतवर्मणः ।
परिवव्रुर्गुडाकेशं तत्राक्रुद्ध्यद्धनंजयः ॥१४-७४-२९ (९४५५३)
ततो योधाञ्जघानाशु तेषां स दश चाष्ट च ।
महेन्द्रवज्रप्रतिमैरायसैर्बहुभिः शरैः ॥१४-७४-३० (९४५५४)
तान्सम्प्रभग्नान्सम्प्रेक्ष्य त्वरमाणो धनंजयः ।
शरैराशीविषाकारैर्जघान स्वनवद्धसन् ॥१४-७४-३१ (९४५५५)
ते भग्नमनसः सर्वे त्रैगर्तकमहारथाः ।
दिशोऽभिदुद्रुवू राजन्धनंजयशरार्दिताः ॥१४-७४-३२ (९४५५६)
ग्हतावशिष्टा हि पराः पार्थं दृष्टपराक्रमाः।'
तमूचुः पुरुषव्याघ्रं संशप्तकनिषूदनम् ॥ १४-७४-३३ (९४५५७)
तवास्म किंकराः सर्वे सर्वे वै वशगास्तव ।
आज्ञापयस्वः नः पार्थ प्रह्वान्प्रेष्यानवस्थितान् ।
करिष्यामः प्रियं सर्वं तव कौरवनन्दन ॥ १४-७४-३४ (९४५५८)
एतदाज्ञाय वचनं सर्वांस्तानब्रवीत्तदा ।
जीवितं रक्षत नृपाः शासनं प्रतिगृह्यताम् ॥ ॥१४-७४-३५ (९४५५९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि

चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

आश्वमेधिकपर्व - अध्याय ०७५
॥ श्रीः ॥
१४.७५. अध्यायः ७५

Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन प्राग्ज्योतिषपुरमेत्याश्वरक्षणाय भगदत्तसुतेन यज्ञदत्तेन सहायोधनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
प्राग्ज्योतिषमथाभ्येत्य व्यचरत्स हयोत्तमः ।
भगदत्तात्मजस्तत्र निर्ययौ रणकर्कशः ॥ १४-७५-१ (९४५६०)
सहयं पाण्डुपुत्रं तु विषयान्तमुपागतम् ।
युयुधे भरतश्रेष्ठ यज्ञदत्तो महीपतिः ॥ १४-७५-२ (९४५६१)
सोभिनिर्याय नगराद्भगदत्तसुतो नृपः ।
अश्वमायान्तमुन्मथ्य नगराभिमुखो ययौ ॥ १४-७५-३ (९४५६२)
तमालक्ष्य महाबाहुः कुरूणामृषभस्तदा ।
गाण्डीवं विक्षिपंस्तूर्णं सहसा समुपाद्रवत् ॥ १४-७५-४ (९४५६३)
ततो गाण्डीवनिर्मुक्तैरिषुभिर्मोहितो नृपः ।
हयमुत्सृज्य तं वीरस्ततः पार्थमुपाद्रवत् ॥ १४-७५-५ (९४५६४)
पुनः प्रविश्य नगरं दंशितः स नृपोत्तमः ।
आरुह्य नागप्रवरं निर्ययौ युद्धकाङ्क्षया ॥ १४-७५-६ (९४५६५)
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
दोधूयता चामरेण श्वेतेन च महारथः ॥ १४-७५-७ (९४५६६)
ततः पार्थं समासाद्य पाण्डवानां महारथम् ।
आह्वयामास बीभत्सुं बाल्यान्मोहाच्च संयुगे ॥ १४-७५-८ (९४५६७)
स वारणं नगप्रख्यं प्रभिन्नकरटामुखम् ।
प्रेषयामास संक्रुद्धः श्वेताश्वं प्रति पार्थिवः ॥ १४-७५-९ (९४५६८)
विक्षरन्तं महामेघं परवारणवारणम् ।
शस्त्रवत्कल्पितं सङ्ख्ये विवशं युद्धदुर्मदम् ॥ १४-७५-१० (९४५६९)
प्रचोद्यमानः स गजस्तेन राज्ञा महाबलः ।
तदाऽङ्कुशेन विबभावुत्पतिष्यन्निवाम्बरम् ॥ १४-७५-११ (९४५७०)
तमापतन्तं सम्प्रेक्ष्य क्रुद्धो राजन्धनंजयः ।

भूमिष्ठो वारणगतं योधयामास भारत ॥ १४-७५-१२ (९४५७१)
यज्ञदत्तस्ततः क्रुद्धो मुमोचाशु धनंजये ।
तोमरानग्निसङ्काशाञ्शलभानिव वेगितान् ॥ १४-७५-१३ (९४५७२)
अर्जुनस्तानसम्प्राप्तान्गाण्डीवप्रभवैः शरैः ।
द्विधा त्रिधा च चिच्छेद खगमान्खगमैस्तदा ॥ १४-७५-१४ (९४५७३)
स तान्दृष्ट्वा तथा छिन्नांस्तोमरान्भगदत्तजः ।
इषूनसक्तांस्त्वरितः प्राहिणोत्पाण्डवं प्रति ॥ १४-७५-१५ (९४५७४)
ततोऽर्जुनस्तूर्णतरं रुक्मपुङ्खानजिह्मगान् ।
प्रेषयामास संक्रुद्धो भगदत्तात्मजं प्रति ॥ १४-७५-१६ (९४५७५)
स तैर्विद्धो महातेजा यज्ञदत्तो महामृधे ।
भृशाहतः पपातोर्व्यां न त्वेनमजहात्स्मृतिः ॥ १४-७५-१७ (९४५७६)
ततः स पुनरारुह्य वारणप्रवरं रणे ।
अव्यग्रः प्रेषयामास जयार्थी विजयं प्रति ॥ १४-७५-१८ (९४५७७)
तस्मै बाणांस्ततो जिष्णुर्निर्मुक्ताशीविषोपमान् ।
प्रेषयामास संक्रुद्धो ज्वलितज्वलनोपमान् ॥ १४-७५-१९ (९४५७८)
स तैर्विद्धो महानागो विस्रवन्रुधिरं बभौ ।
हिमवानिव शैलेन्द्रो बहुप्रस्रवणस्तदा ॥ ॥ १४-७५-२० (९४५७९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७५-२ वज्रदत्तो महीपतिरिति झ पाठः ॥
७-७५-२० गैरिकाक्तमिवाम्भोद्रिर्बहुप्रस्रवणं तदा इति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०७६
॥ श्रीः ॥
१४.७६. अध्यायः ७६

Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन भगदत्तात्मजपराजयः ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text
एवं त्रिरात्रमभवत्तद्युद्धं भरतर्षभ ।
अर्जुनस्य नरेन्द्रेण वृत्रेणेव शतक्रतोः ॥ १४-७६-१ (९४५८०)
ततश्चतुर्थे दिवसे यज्ञदत्तो महाबलः ।

जहास सस्वनं हासं वाक्यं चेदमताब्रवीत् ॥१४-७६-२ (९४५८१)
अर्जुनार्जुन तिष्ठस्व न मे जीवन्विमोक्ष्यसे ।
त्वां निहत्य करिष्यामि पितुस्तोयं यथाविधि ॥१४-७६-३ (९४५८२)
त्वया वृद्धो मम पिता भगदत्तः पितुः सखा ।
हतो वृद्धोऽपि बाधित्वा शिशुं मामद्य योधय ॥१४-७६-४ (९४५८३)
इत्येवमुक्त्वा संक्रुद्धो यज्ञदत्तो नराधिपः ।
प्रेषयामास कौरव्य वारणं पाण्डवं प्रति ॥१४-७६-५ (९४५८४)
सम्प्रेष्यमाणो नागेन्द्रो यज्ञदत्तेन धीमता ।
उत्पतिष्यन्निवाकाशमभिदुद्राव पाण्डवम् ॥१४-७६-६ (९४५८५)
अग्रहस्तसुमुक्तेन शीकरेण स नागराट् ।
समौक्षत गुडाकेशं शैलं नील इवाम्बुदः ॥१४-७६-७ (९४५८६)
स तेन प्रेषितो राज्ञा मेघवद्विनदन्मुहुः ।
मुखाडम्बरसंह्रादैरभ्यद्रवत फल्गुनम् ॥१४-७६-८ (९४५८७)
स नृत्यन्निव नागेन्द्रो यज्ञदत्तप्रचोदितः ।
आससाद द्रुतं राजन्कौरवाणां महारथम् ॥१४-७६-९ (९४५८८)
तमायान्तमथालक्ष्य यज्ञदत्तस्य वारणम् ।
गाण्डीवमाश्रित्य बली न व्यकम्पत शत्रुहा ॥१४-७६-१० (९४५८९)
चुक्रोध बलवच्चापि पाण्डवस्तस्य भूपतेः ।
कार्यविघ्नमनुस्मृत्यि पूर्ववैरं च भारत ॥१४-७६-११ (९४५९०)
ततस्तं वारणं क्रुद्धः शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥१४-७६-१२ (९४५९१)
स नागप्रवरः श्रीमानर्जुनेन निवारितः ।
तस्थौ शरैर्विनुन्नाङ्गः श्वाविच्छललितो यथा ॥१४-७६-१३ (९४५९२)
निवारितं गजं दृष्ट्वा भगदत्तसुतो नृपः ।
उत्ससर्ज शितान्बाणानर्जुने क्रोधमूर्छितः ॥१४-७६-१४ (९४५९३)
अर्जुनस्तु महाबाहुः शरैररिनिघातिभिः ।
वारयामास तान्बाणांस्तदद्भुतमिवाभवत् ॥१४-७६-१५ (९४५९४)
ततः पुनरभिक्रुद्धो राजा प्राग्ज्योतिषाधिपः ।
प्रेषयामास नागेन्द्रं बलवत्पर्वतोपमम् ॥१४-७६-१६ (९४५९५)
तमापतन्तं सम्प्रेक्ष्य बलवान्पाकशासनिः ।
नाराचमग्निसङ्काशं प्राहिणोद्वारणं प्रति ॥१४-७६-१७ (९४५९६)
स तेन वारणो राजन्मर्मस्वभिहतो भृशम् ।
पपात सहसा भूमौ वज्ररुग्ण इवाचलः ॥१४-७६-१८ (९४५९७)
स पतञ्शुशुभे नागो धनंजयशराहतः ।
विशन्निव महाशैलो महीं वज्रप्रपीडितः ॥१४-७६-१९ (९४५९८)
तस्मिन्निपतिते नागे यज्ञदत्तस्य पाण्डवः ।

तं न भेतव्यमित्याह ततो भूमिगतं नृपम् ॥१४-७६-२० (९४५९९)
अब्रवीद्धि महातेजाः प्रस्थितं मां युधिष्ठिरः ।
राजानस्ते न हन्तव्या धनंजय कथञ्चन ॥१४-७६-२१ (९४६००)
सर्वमेतन्नरव्याघ्र भवत्येतावता कृतम् ।
योधाश्चापि न हन्तव्या धनंजय रणे त्वया ॥१४-७६-२२ (९४६०१)
वक्तव्याश्चापि राजानः सर्वे सह सुहृज्जनैः ।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम् ॥१४-७६-२३ (९४६०२)
इति भ्रातृवचः श्रुत्वा न हन्मि त्वां नराधिप ।
उत्तिष्ठ न भयं तेऽस्ति स्वस्तिमान्गच्छ पार्थिव ॥१४-७६-२४ (९४६०३)
आगच्छेथा महाराज परां चैत्रीमुपस्थिताम् ।
तदाऽश्वमेधो भविता धर्मराजस्य धीमतः ॥१४-७६-२५ (९४६०४)
एवमुक्तः स राजा तु भगदत्तात्मजस्तदा ।
तथेत्येवाब्रवीद्वाक्यं पाण्डवेनाभिनिर्जितः ॥ ॥१४-७६-२६ (९४६०५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७६-१३ शललितः शलाकाप्रोतः ॥

आश्वमेधिकपर्व - अध्याय ०७७
॥ श्रीः ॥
१४.७७. अध्यायः ७७

Mahabharata - Ashvamedhika Parva - Chapter Topics

अश्वानुसरणवशास्सिन्धुदेशं गतेनार्जुनेन सैन्धवैःसह
महाऽऽयोधनम् ॥१ ॥
बाणगणावकीर्णस्यार्जुनस्य कराद्गाण्डीवस्या धःपतने
देवर्ष्यादिभिर्जपादिना तस्य तेजोदीपनम् ॥ २ ॥
ततः पुनरर्जुनेन तैः सक्रक्रकयोधनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
गजित्वा प्रसाद्य राजानं भगदत्तसुतं तदा ।
विसृज्य याते तुरगे सैन्धवान्प्रति भारत ॥' १४-७७-१ (९४६०६)

सैन्धवैरभवगद्युद्धं ततस्तस्य किरीटिनः ।
हतशेषैर्महाराज हतानां च सुतैरपि ॥ १४-७७-२ (९४६०७)
तेऽवतीर्णमुपश्रुत्य विषयं श्वेतवाहनम् ।
प्रत्युद्ययुरमृष्यन्ते राजानः पाण्डवर्षभम् ॥ १४-७७-३ (९४६०८)
अश्वं च तं परामृश्य विषयान्ते विषोपमात् ।
न भयं चक्रिरे पार्थाद्भीमसेनादनन्तरात् ॥ १४-७७-४ (९४६०९)
तेऽविदूराद्धनुष्पाणिं यज्ञियस्य हयस्य च ।
बीभत्सुं प्रत्यपद्यन्त् पदातिनमवस्थितम् ॥ १४-७७-५ (९४६१०)
ततस्ते तं महावीर्या राजानः पर्यवारयन् ।
जिगीषन्तो नरव्याघ्रं पूर्वं विनिकृता युधि ॥ १४-७७-६ (९४६११)
ते नामान्यपि गोत्राणि कर्मणि विविधानि च ।
कीर्तयन्तस्तदा पार्थं शरवर्षैरवाकिरन् ॥ १४-७७-७ (९४६१२)
ते किरन्तः शरव्रातान्वारणप्रतिवारणान् ।
रणे जयमभीप्सन्तः कौन्तेयं पर्यवारयन् ॥ १४-७७-८ (९४६१३)
ते समीक्ष्य च तं कृष्णमुग्रकर्माणमाहवे ।
सर्वे युयुधिरे वीरा रथस्थास्तं पदातिनम् ॥ १४-७७-९ (९४६१४)
ते तमाजघ्निरे वीरं निवातकवचान्तकम् ।
संशप्तकनिहन्तारं हन्तारं सैन्धवस्य च ॥ १४-७७-१० (९४६१५)
ततो रथसहस्रेण गजानामयुतेन च ।
क़क़क़ष्ठकीकृत्य बीभत्सुं प्रहृष्टमनसोऽभवन् ॥ १४-७७-११ (९४६१६)
क़क़ स्मरन्तो वधं वीराः सिन्धुराजस्य चाहवे ।
जयद्रथस्य कौरव्य समरे सव्यसाचिना ॥ १४-७७-१२ (९४६१७)
ततः पर्जन्यवत्सर्वे शरवृष्टीरवासृजन् ।
तैः कीर्णः शुशुभे पार्थो रविर्मेघान्तरे यथा ॥ १४-७७-१३ (९४६१८)
स शरैः समवच्छन्नश्चकाशे पाण्डवर्षभः ।
पञ्चरान्तरसञ्चारी शकुन्त इव भारत ॥ १४-७७-१४ (९४६१९)
ततो हाहाकृतं सर्वं कौन्तेय शरपीडिते ।
त्रैलोक्यमभवद्राजन्नविरासीद्रजोरुणः ॥ १४-७७-१५ (९४६२०)
ततो ववौ महाराज मारुतो रोमहर्षणः ।
राहुरग्रसदादित्यं पर्वणीव विशाम्पते ॥ १४-७७-१६ (९४६२१)
उल्काश्च जघ्निरे सूर्यं विकीर्यन्त्यः समन्ततः ।
वेपथुश्चाभवद्राजन्कैलासस्य महागिरेः ॥ १४-७७-१७ (९४६२२)
मुमुचुः श्वासमत्युष्णं दुःखशोकसमन्विताः ।
सप्तर्षयो जातभयास्तथा देवर्षयोपि च ॥ १४-७७-१८ (९४६२३)
शशं चाशु विनिर्भिद्य मण्डलं शशिनोऽपतन् ।
विपरीता दिशश्चापि सर्वा धूमाकुलास्तथा ॥ १४-७७-१९ (९४६२४)

रासभारुणसङ्काशा धनुष्मन्तः सविद्युतः ।
आवृत्य गगनं मेघा मुमुचुर्मांसशोणितम् ॥ १४-७७-२० (९४६२५)
एवमासीत्तदा वीरे शरवर्षेण संवृते ।
फल्गुने भरतश्रेष्ठ तदद्भुतमिवाभवत् ॥ १४-७७-२१ (९४६२६)
तस्य तेनावकीर्णस्य शरजालेन सर्वतः ।
मोहात्पपात गाण्डीवमावापश्च करादपि ॥ १४-७७-२२ (९४६२७)
तस्मिन्मोहमनुप्राप्ते शरजालं महत्तदा ।
सैन्धवा मुमुचुस्तूर्णं गतसत्वे महारथे ॥ १४-७७-२३ (९४६२८)
ततो मोहं समापन्नं ज्ञात्वा पार्थं द्विवौकसः ।
सर्वे वित्रस्तमनसस्तस्य शान्तिकृतोऽभवन् ॥ १४-७७-२४ (९४६२९)
ततो देवर्षयः सर्वे तथा सप्तर्षयोपि च ।
ब्रह्मर्षचस्च विजयं जेपुः पार्थस्य धीमतः ॥ १४-७७-२५ (९४६३०)
ततः प्रदीपिते देवैः पार्थतेजसि पार्थिव ।
तस्थावचलवद्धीमान्सङ्ग्रामे परमास्त्रवित् ॥ १४-७७-२६ (९४६३१)
विचकर्ष धनुर्दिव्यं ततः कौरवनन्दनः ।
यन्त्रस्येवेह शब्दोऽभून्महांस्तस्य पुनः पुनः ॥ १४-७७-२७ (९४६३२)
ततः स शरवर्षाणि प्रत्यमित्रान्प्रति प्रभुः ।
ववर्ष धनुषा पार्थो वर्षाणीव पुरंदरः ॥ १४-७७-२८ (९४६३३)
ततस्ते सैन्धवा योधाः सर्व एव सराजकाः ।
नादृश्यन्त शरैः कीर्णाः शलभैरिव पादपाः ॥ १४-७७-२९ (९४६३४)
तस्य शब्देन वित्रेसुर्भयार्ताश्च विदुद्रुवुः ।
मुमुचुस्चाश्रु शोकार्ताः शुशुचुश्चापि सैन्धवाः ॥ १४-७७-३० (९४६३५)
तांस्तु सर्वान्नरव्याघ्रः सैन्धवान्व्यचरद्बली ।
अलातचक्रवद्राजञ्शरजालैः समार्पयत् ॥ १४-७७-३१ (९४६३६)
तदिन्द्रजालप्रतिमं बाणजालममित्रहा ।
विसृज्य दिक्षु सर्वासु महेन्द्रि इव वज्रभृत् ॥ १४-७७-३२ (९४६३७)
मेघजालनिभं सैन्यं विदार्य शरवृष्टिभिः ।
विबभौ कौरवश्रेष्ठः शरदीव दिवाकरः ॥ ॥ १४-७७-३३ (९४६३८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्तसप्तत‍ितमोऽध्यायः ॥ ७७ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७७-१९ उत्काः शशं चन्द्रस्थं विनिर्भिद्य शशिनो मण्डलं प्रति
अपतन्निति अनुवृत्त्या सम्बन्धः ॥
७-७७-२० रासभारुणे वर्णविशेषः ॥

७-७७-२२ आवापो हस्तावापः ॥

आश्वमेधिकपर्व - अध्याय ०७८
॥ श्रीः ॥
१४.७८. अध्यायः ७८

Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनसमागमनश्रवणमात्रेण जयद्रथसुते मृते दुश्शलया
तत्सुतमानीयार्जुनंप्रत्यभियानम् ॥ १ ॥
ततोऽर्जुनेन दुश्शलाप्रार्थनया तस्यां बहुमानेन च युद्धादुपरमः ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
ततो गाण्डीवभृच्छूरो युद्धाय समुपस्थितः ।
विबभौ युधि दुर्धर्षो हिमवानचलो यथा ॥ १४-७८-१ (९४६३९)
ततस्ते सैन्धवा योधाः पुनरेव व्यवस्थिताः ।
व्यमुञ्चन्त सुसंरब्धाः शरवर्षाणि भारत ॥ १४-७८-२ (९४६४०)
तान्प्रहस्य महाबाहुः पुनरेव व्यवस्थितान् ।
ततः प्रोवाच कौन्तेयो मुमूर्षञ्श्लक्ष्णया गिरा ॥ १४-७८-३ (९४६४१)
युध्यध्वं परया शक्त्या यतध्वं विजये मम ।
कुरुध्वं सर्वकार्याणि महद्वो भयमागतम् ॥ १४-७८-४ (९४६४२)
एष योत्स्यामि सर्वांस्तु निवार्य शरवागुराम् ।
तिष्ठध्वं युद्धमनसो दर्पं शमयितास्मि वः ॥ १४-७८-५ (९४६४३)
एतावदुक्त्वा कौरव्यो रोषाद्गाण्डीवभृत्तदा ।
ततोऽथ वचनं स्मृत्वा भ्रातुर्ज्येष्ठस्य भारत ॥ १४-७८-६ (९४६४४)
न हन्तव्या रणे तात क्षत्रिया विजिगीषवः ।
जेतव्याश्चेति यत्प्रोक्तं धर्मराज्ञा महात्मना ।
चिन्तयामास स तदा फल्गुनः पुरुषर्षभः ॥ १४-७८-७ (९४६४५)
इत्युक्तोऽहं नरेन्द्रेण न हन्तव्या नृपा इति ।
कथितं न मृषेदं स्याद्धर्मराजवचः शुभम् ॥ १४-७८-८ (९४६४६)
न हन्येरंश्च राजानो राज्ञश्चाज्ञा कृता भवेत् ।
इति सञ्चिन्त्य स तदा फल्गुनः पुरुषर्षभः ॥ १४-७८-९ (९४६४७)
प्रोवाच वाक्यं धर्मज्ञः सैन्धवान्युद्धदुर्मदान् ।
बालांस्त्रियो वा युष्माकं न हनिष्ये व्यवस्थितान् ॥ १४-७८-१० (९४६४८)
यश्च वक्ष्यति सङ्ग्रामे तवास्मीति पराजितः ।

एतच्छ्रुत्वा वचो मह्यं कुरुध्वं हितमात्मनः ॥१४-७८-११ (९४६४९)
ततोऽन्यथा कृच्छ्रगता भविष्यथ मयाऽर्दिताः ।
एवमुक्त्वा तु तान्वीरान्युयुधे कुरुपुङ्गवः ॥१४-७८-१२ (९४६५०)
अत्वरावानसम्भ्रान्तः संक्रुद्धैर्विजिगीषुभिः ।
शतं शतसहस्राणि शराणां नतपर्वणाम् ॥१४-७८-१३ (९४६५१)
मुमुचुः सैन्धवा राजंस्तदा गाण्डीवधन्वनि ।
शरानापततः क्रूरानाशीविषविषोपमान् ।
चिच्छेद निशितैर्बाणैरन्तरा स धनंजयः ॥ १४-७८-१४ (९४६५२)
छित्त्वा तु तानाशु चैव कङ्कपत्राञ्शिलाशितान् ।
एकैकमेषां समरे बिभेद निशितैः शरैः ॥१४-७८-१५ (९४६५३)
ततः प्रासांश्च शक्तीस्च पुनरेव धनंजये ।
जयद्रथं हतं स्मृत्वा चिक्षिपुः सैन्धवा नृपाः ॥१४-७८-१६ (९४६५४)
तेषां किरीटी सङ्कल्पं मोघं चक्रे महाबलः ।
सर्वांस्तानन्तरा च्छित्त्वा तदा चुक्रोश पाण्डवः ।
तथैवापततां तेषां योधानां जयगृद्धिनाम्। १४-७८-१७ (९४६५५)
तथैवापततां तेषां योधानां यजगृद्धिनाम् ।
शिरांसि पातयामास भल्लैः सन्नतपर्वभिः ॥१४-७८-१८ (९४६५६)
तेषां प्रद्रवतां चापि पुनरेवाभिधावताम् ।
निवर्ततां च शब्दोऽभूत्पूर्णस्येव महोदधेः ॥१४-७८-१९ (९४६५७)
ते वध्यमानास्तु तदा पार्थेनामिततेजसा ।
यथाप्राणं यथोत्साहं योधयामासुरर्जुनम् ॥१४-७८-२० (९४६५८)
ततस्ते फल्गुनेनाजौ शरैः सन्नतपर्वभिः ।
कृता विसंज्ञा भूयिष्ठा क्लान्तवाहनसैनिकाः ॥१४-७८-२१ (९४६५९)
तांस्तु सर्वान्परिग्लानान्विदित्वा धृतराष्ट्रजा ।
दुःशला बालमादाय नप्तारं प्रययौ तदा ॥१४-७८-२२ (९४६६०)
सुरथस्य सुतं वीरं रथेनाथागमत्तदा ।
शान्त्यर्थं सर्वयोधानामभ्यगच्छत पाण्डवम् ॥१४-७८-२३ (९४६६१)
सा धनंजयमासाद्य रुरोदार्तस्वरं तदा ।
धनंजयोपि तां दृष्ट्वा धनुर्विससृजे प्रभुः ॥१४-७८-२४ (९४६६२)
समुत्सृज्य धनुः पार्थो विधिवद्भगिनी तदा ।
प्राह किं करवाणीति सा च तं प्रत्युवाच ह ॥१४-७८-२५ (९४६६३)
एष ते भरतश्रेष्ठ स्वस्त्रीयस्यात्मजः शिशुः ।
अभिवादयते पार्थ तं पश्य पुरुषर्षभ ॥१४-७८-२६ (९४६६४)
इत्युक्तस्तस्य पितरं स पप्रच्छार्जुनस्तथा ।
क्वासाविति ततो राजन्दुःशला वाक्यमब्रवीत् ॥१४-७८-२७ (९४६६५)
पितृशोकाभिसंतप्तो विषादार्तोऽस्य वै पिता ।

पञ्चत्वमगमद्वीरो यथा तन्मे निशामय ॥१४-७८-२८ (९४६६६)
स पूर्वं पितरं श्रुत्वा हतं युद्धे त्वयाऽनघ ।
त्वामागतं च संश्रुत्य युद्धाय हयसारिणम् ।
पितुश्च मृत्युदुःखार्तोऽजहात्प्राणान्धनंजय ॥ १४-७८-२९ (९४६६७)
प्राप्तो बीभत्सुरित्येव नाम श्रुत्वैव तेऽनघ ।
विषादार्तः पपातोर्व्यां ममार च ममात्मजः ॥१४-७८-३० (९४६६८)
तं दृष्ट्वा पतितं तत्र ततस्तस्यात्मजं प्रभो ।
गृहीत्वा समनुप्राप्ता त्वामद्य शरणैपिणी ॥१४-७८-३१ (९४६६९)
इत्युक्त्वाऽऽर्तस्वरं सा तु मुमोच धृतराष्ट्रजा ।
दीना दीनं स्थितं पार्थमब्रवीच्चाप्यधोमुखम् ॥१४-७८-३२ (९४६७०)
स्वसारं समवेक्षस्व स्वस्रीयात्मजमेव च ।
कर्तुमर्हसि धर्मज्ञ दयां कुरुकुलोद्वह ।
विस्मृत्य कुरुराजानं तं च मन्दं जयद्रथम् ॥ १४-७८-३३ (९४६७१)
अभिमन्योर्यथा जातः परिक्षित्परवीरहा ।
तथाऽयं सुरथाज्जातो मम पौत्रो महाभुज ॥१४-७८-३४ (९४६७२)
तमादाय नरव्याघ्र सम्प्रप्तास्मि तवान्तिकम् ।
शमार्थं सर्वयोधानां शृणु चेदं वचो मम ॥१४-७८-३५ (९४६७३)
आगतोऽयं महाबाहो तस्य मन्दस्य पुत्रकः ।
प्रसादमस्य बालस्य तस्मात्त्वं कर्तुमर्हसि ॥१४-७८-३६ (९४६७४)
एष प्रसाद्य शिरसा प्रशमार्थमरिंदम ।
याचते त्वां महाबाहो शमं गच्छ धनंजय ॥१४-७८-३७ (९४६७५)
बालस्य हतबन्धोश्च पार्थ किञ्चिदजानतः ।
प्रसादं कुरु धर्मज्ञ मा मन्युवशमन्वगाः ॥१४-७८-३८ (९४६७६)
तमनार्थं नृशंसं च विस्मृत्यास्य पितामहम् ।
आगस्कारिणमत्यर्तं प्रसादं कर्तुमर्हसि ॥१४-७८-३९ (९४६७७)
एवं ब्रुवत्यां करुणं दुःशलायां धनंजयः ।
संस्मृत्य देवीं गान्धारीं धृतराष्ट्रं च पार्थिवम् ।
उवाच दुःखशोकार्तः क्षत्रधर्मं व्यगर्हयत् ॥ १४-७८-४० (९४६७८)
गधिक्तं दुर्योधनं क्षुद्रं राज्यलुब्धं च मानिनम्।'
यत्कृते बान्धवाः सर्वे मया नीता यमक्षयम् ॥ १४-७८-४१ (९४६७९)
इत्युक्त्वा बहु सान्त्वादि प्रसादमकरोज्जयः ।
परिष्वज्य च तां प्रीतो विससर्ज गृहान्प्रति ॥१४-७८-४२ (९४६८०)
दुःशला चापि तान्योधान्निवार्य महतो रणात् ।
सम्पूज्य पार्थं प्रययौ गृहानेव शुभानना ॥१४-७८-४३ (९४६८१)
एवं निर्जित्य तान्वीरान्सैन्धवान्स धनंजयः ।
अन्वधावत धावन्तं हयं कामविचारिणम् ॥१४-७८-४४ (९४६८२)

ततो मृगमिवाकाशे यथा देवः पिनाकधृक् ।
ससार तं तथा वीरो विधिवद्यज्ञियं हयम् ॥ १४-७८-४५ (९४६८३)
स च वाजी यथेष्टेन तांस्तान्देशान्यथाक्रमम् ।
विचचार यथाकामं कर्म पार्थस्य वर्धयन् ॥ १४-७८-४६ (९४६८४)
क्रमेण स हयस्त्वेवं विचरन्पुरुषर्षभ ।
मणलूरपतेर्देशमुपायात्सहपाण्डवः ॥ ॥ १४-७८-४७ (९४६८५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७८-४७ भणिपूरपतेरिति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०७९
॥ श्रीः ॥
१४.७९. अध्यायः ७९

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन मणलूरपुरं प्रति गमनम् ॥ १ ॥
तथा पितृभक्त्या विनयेनागतं चित्राङ्गदायां जातं स्वात्मजं
बभ्रुवाहनंप्रति क्षत्रधर्मपरित्यागजरोषादुपालम्भः ॥ २ ॥
तमसहमानया उलूप्या नागलोकादेत्य बभ्रुवाहनस्यार्जुनेन सह
युद्धप्रोत्साहनम् ॥ ३ ॥
बभ्रुवाहनेन स्वशरागाढाभिधातेन निपतिते पार्थे पितृमारणशोकेन
मोहाधिगमः ॥ ४ ॥
ततश्चित्राङ्गदया रणाङ्गणमेत्य बहुधा विलापः ॥ ५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः ।
निर्ययौ विनयेनाथ ब्राह्मणार्यपुरःसरः ॥ १४-७९-१ (९४६८६)
मणलूरेश्वरं त्वेवमुपयातं धनंजयः ।
नाभ्यनन्दत्स मेधावी क्षत्रधर्ममनुस्मरन् ॥ १४-७९-२ (९४६८७)
उवाच च स धर्मात्मा समन्युः फल्गुनस्तदा ।

प्रक्रियेयं न ते युक्ता बहिस्त्वं क्षत्रधर्मतः ॥१४-७९-३ (९४६८८)
संरक्ष्यमाणं तुरगं यौधिष्ठिरमुपागतम् ।
यज्ञियं विषयान्ते मां नायोत्सीः किंनु पुत्रक ॥१४-७९-४ (९४६८९)
धिक्त्वामस्तु सुदुर्बुद्धिं क्षत्रधर्माविशारदम् ।
यो मां युद्धाय सम्प्राप्तं साम्नैव प्रत्यगृह्णथाः ॥१४-७९-५ (९४६९०)
न त्वया पुरुषार्थो हि कश्चिदस्तीह जीवता ।
यस्त्वं स्त्रीवद्युधा प्राप्तं मां साम्ना प्रत्यगृह्णथाः ॥१४-७९-६ (९४६९१)
यद्यहं न्यस्तशस्त्रस्त्वामागच्छेयं सुदुर्मते ।
प्रक्रियेयं भवेद्युक्ता तावतव नराधम ॥१४-७९-७ (९४६९२)
तमेवमुक्तं भर्त्रा तु विदित्वा पन्नगात्मजा ।
अमृष्यमाणा भित्त्वोर्वीमुलूपी समुपागमत् ॥१४-७९-८ (९४६९३)
सा ददर्श तत पुत्रं विमृशन्तमधोमुखम् ।
संतर्ज्यमानमसकृत्पित्रा युद्धार्थिना विभो ॥१४-७९-९ (९४६९४)
ततः सा चारुसर्वाङ्गी समुपेत्योरगात्मजा ।
उलूपी प्राह वचनं क्षत्रधर्मविशारद ॥१४-७९-१० (९४६९५)
उलूपीं मां निबोध त्वं मातरं पन्नगात्मजाम् ।
कुरुष्व वचनं पुत्र धर्मस्ते भविता परः ॥१४-७९-११ (९४६९६)
युध्यस्वैनं कुरुश्रेष्ठं धनंजयमरिन्दमम् ॥
एवमेष हि ते प्रीतो भविष्यति न संशयः ॥१४-७९-१२ (९४६९७)
एवमुद्धार्षितो राजा स मात्रा बभ्रुवाहनः ।
मनश्चक्रे महातेजा युद्धाय भरतर्षभ ॥१४-७९-१३ (९४६९८)
सन्नह्य काञ्चनं वर्म शिरस्त्राणं च भानुमत् ।
तूणीरशतसंबाधमारुरोह रथोत्तमम् ॥१४-७९-१४ (९४६९९)
सर्वोपकरणोपेतं युक्तमश्वैर्मनोजवैः ।
सचक्रोपस्करं श्रीमान्हेमभाण्डपरिष्कृतम् ॥१४-७९-१५ (९४७००)
परमार्चितमुच्छ्रित्य ध्वजं हंसं हिरण्मयम् ।
प्रययौ पार्थमुद्दिश्य स राजा बभ्रुवाहनः ॥१४-७९-१६ (९४७०१)
ततोऽभ्योत्य हयं वीरो यज्ञियं पार्थरक्षितम् ।
ग्राहयामास पुरुषैर्हयशिक्षाविशारदैः ॥१४-७९-१७ (९४७०२)
गृहीतं वाजिनं दृष्ट्वा प्रीतात्मा स धनंजयः ।
पुत्रं रथस्थं भूमिष्ठः संन्यवारयदाहवे ॥१४-७९-१८ (९४७०३)
स तत्र राजा तं वीरं शरसङ्घैरनेकशः ।
अर्दयामास निशितैराशीविषविषोपमैः ॥१४-७९-१९ (९४७०४)
तयोः समभवद्युद्धं पितुः पुत्रस्यक चातुलम् ।
देवासुररणप्रख्यमुभयोः प्रीयमाणयोः ॥१४-७९-२० (९४७०५)
किरीटिनं प्रविव्याघ शरेणानतपर्वणा ।

जत्रुदेशे नरव्याघ्रं प्रहसन्बभ्रुवाहनः ॥१४-७९-२१ (९४७०६)
सोभ्यगात्सहपुङ्खेन वल्मीकमिव पन्नगः ।
विनिर्भद्य च कौन्तेयं प्रविवेशि महीतलम् ॥१४-७९-२२ (९४७०७)
स गाढवेदनो धीमानालम्ब्य धनुरुत्तमम् ।
दिव्यं तेजः समाविश्य प्रमीत इव सोभवत् ॥१४-७९-२३ (९४७०८)
स संज्ञामुपलभ्याथ प्रशस्य पुरुषर्षभः ।
पुत्रं शक्रात्मजो वाक्यमिदमाह महाद्युतिः ॥१४-७९-२४ (९४७०९)
साधुसाधु महाबाहो वत्स चित्राङ्गदात्मज ।
सदृशं कर्म ते दृष्ट्वा प्रीतिमानस्मि पुत्रक ॥१४-७९-२५ (९४७१०)
विमुञ्चाम्येष ते बाणान्पुत्र युद्धे स्थिरो भव ।
इत्येवमुक्त्वा नाराचैरभ्यवर्षदमित्रहा ॥१४-७९-२६ (९४७११)
तान्स गाण्डीवनिर्मुक्तान्वज्राशनिसमप्रभान् ।
नाराचानच्छिनद्राज भल्लैः सर्वांस्त्रिधा द्विधा ॥१४-७९-२७ (९४७१२)
तस्य पार्थः शरैर्दिव्यैर्ध्वजं हेमपरिष्कृतम् ।
सुवर्णतालप्रतिमं क्षुरेणापाहरद्रथात् ॥१४-७९-२८ (९४७१३)
हयांश्चास्य महाकायान्महावेगानरिंदम ।
चकार राजन्निर्जावान्प्रहसन्निव पाण्डवः ॥१४-७९-२९ (९४७१४)
स रथादवतीर्याथ राजा परमकोपनः ।
पदातिः पितरं क्रुद्धो योधयामास पाण्डवम् ॥१४-७९-३० (९४७१५)
सम्प्रीयमाणः पार्थानामृषभः पुत्रविक्रमात् ।
नात्यर्थं पीडयामास पुत्रं वज्रधरात्मजः ॥१४-७९-३१ (९४७१६)
स हन्यमानोऽभिमुखं पितरं बभ्रुवाहनः ।
शरैराशीविषाकारैः पुनरेवार्दयद्बली ॥१४-७९-३२ (९४७१७)
ततः स बाल्यात्पितरं विव्याध हृदि पत्रिणा ।
निशेतेन सुपुङ्खेन बलवद्बभ्रुवाहनः ॥१४-७९-३३ (९४७१८)
स बाणस्तेजसा दीप्तो ज्वलन्निव हुताशनः ।
विवेश पाण्डवं राजन्मर्म भित्त्वाऽतिदुःखकृत् ॥१४-७९-३४ (९४७१९)
स तेनातिभृशं विद्धः पुत्रेण कुरुनन्दनः ।
महीं जगाम मोहार्तस्ततो राजन्धनंजयः ॥१४-७९-३५ (९४७२०)
तस्मिन्निपतिते वीरे कौरवाणां धुरंधरे ।
सोपि मोहं जगामाथ ततश्चित्राङ्गदासुतः ष १४-७९-३६ (९४७२१)
व्यायम्य संयुगे राजा दृष्ट्वा च पितरं हतम् ।
पूर्वमेव स बाणौघैर्गाढविद्धोऽर्जुनेन ह ।
पपात सोपि धरणीमालिङ्ग्य रणमूर्धनि ॥ १४-७९-३७ (९४७२२)
भर्तारं निहतं दृष्ट्वा पुत्रं च पतितं भुवि ।
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरे ॥१४-७९-३८ (९४७२३)

शोकसंतप्तहृदया रुदती वेपती भृशम्। १४-७९-३९ (९४७२४)
मणलूरपतेर्माता ददर्श निहतं पतिम् ॥ ॥ १४-७९-४० (९४७२५)

इति श्रीमन्महाभारते आश्वमेधकपर्वणि अनुगीतापर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-७९-२३ प्रमीतइव मृतइव ॥
७-७९-२५ पुत्रं प्रशस्येति संबन्धः ॥
७-७९-३९ पतिमर्जुनम् ॥

आश्वमेधिकपर्व - अध्याय ०८०
॥ श्रीः ॥
१४.८०. अध्यायः ८०

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
चित्राङ्गदया रणाङ्गणनिपतितपतिपुत्रदर्शनजशोकातिरेकेण
मोहाधिगमः ॥ १ ॥
तथा संज्ञोपलम्भे उलूपींप्रत्युपालम्भ गर्भवचनम् ॥ २ ॥
ततश्चिराल्लुब्धसंज्ञेन बभ्रुवाहनेनात्मोपालम्भनपूर्वकं
प्रायोपवेशनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
ततो बहुतरं भीरुर्विलप्य कमलेक्षणा ।
मुमोह दुःखसंतप्ता पपात च महीतले ॥ १४-८०-१ (९४७२६)
प्रतिलभ्य च सा संज्ञां देवी दिव्यवपुर्धरा ।
उलूपीं पन्नगसुतां दृष्ट्वेदं वाक्यमब्रवीत् ॥ १४-८०-२ (९४७२७)
उलूपि पश्य भर्तारं शयानं नितं रणे ।
त्वत्कृते मम पुत्रेण बाणेन समितिंजयम् ॥ १४-८०-३ (९४७२८)
ननु त्वमार्यधर्मज्ञा ननु चासि पतिव्रता ।
यत्त्वत्कृतेऽयं पतितः पतिस्ते निहतो रणे ॥ १४-८०-४ (९४७२९)
किंनु मन्देऽपकराद्धोऽयं यदि तेऽद्य धनंजयः ।
क्षमस्व याच्यमाना वै जीवयस्व धनंजयम् ॥ १४-८०-५ (९४७३०)

ननु त्वमार्ये धर्मज्ञे त्रैलोक्यविदिता शुभे ।
यद्घातयित्वा पुत्रेण भर्तारं नानुशोचसि ॥१४-८०-६ (९४७३१)
नाहं शोचामि तनयं हतं पन्नगनन्दिनि ।
पतिमेव तु शोचामि यस्यातिथ्यमिदं कृतम् ॥१४-८०-७ (९४७३२)
इत्युक्त्वा सा तदा देवीमुलूपीं पन्नगात्मजाम् ।
भर्तारमभिगम्येदमित्युवाच यशस्विनी ॥१४-८०-८ (९४७३३)
उत्तिष्ठ कुरुमुख्यस्य प्रियमुख्य मम प्रिय ।
अयमश्वो महाबाहो मयो ते परिमोक्षितः ॥१४-८०-९ (९४७३४)
ननु त्वया नाम विभो धर्मराजस्य यज्ञियः ।
अयमश्वोऽनुसर्तव्यः स शेषे किं महीतले ॥१४-८०-१० (९४७३५)
त्वयि प्राणा ममायत्ताः कुरूणां कुरुनन्दन ।
स कस्मात्प्राणदोऽन्येषां प्राणान्संत्यक्तवानसि ॥१४-८०-११ (९४७३६)
उलूपि साधु पश्येमं पतिं निपतितं भुवि ।
पुत्रं चेमं समुत्साद्य घातयित्वा न शोचसि ॥१४-८०-१२ (९४७३७)
कामं स्वपितु बालोऽयं भूमौ मृत्युवशं गतः ।
लोहिताक्षो गुडाकेशो विजयः साधु जीवतु ॥१४-८०-१३ (९४७३८)
नापराधोऽस्ति सुभगे नराणां बहुभार्यता ।
प्रमदानां भवत्येष मा ते भूद्बुद्धिरीदृशी ॥१४-८०-१४ (९४७३९)
सख्यं चैतत्कृतं धात्रा शश्वदव्ययमेव तु ।
सख्यं समभिजानीहि सत्यं सङ्गतमस्तु ते ॥१४-८०-१५ (९४७४०)
पुत्रेम घातयित्वैनं पतिं यदि न मेऽद्य वै ।
जीवन्तं दर्शयस्यद्य परित्यक्ष्यामि जीवितम् ॥१४-८०-१६ (९४७४१)
साऽहं दुःखान्विता देवि पतिपुत्रविनाकृता ।
इहैव प्रायमाशिष्ये प्रेक्षन्त्यास्ते न संशयः ॥१४-८०-१७ (९४७४२)
इत्युक्त्वा पन्नगसुतां सपत्नी चैत्रवाहनी ।
ततः प्रायमुपासीना तूष्णीमासीज्जनाधिप ॥१४-८०-१८ (९४७४३)
ततो विलप्य विरता भर्तुः पादौ प्रगृह्य सा ।
उपविष्टा भवद्दीना सोच्छ्वासं पुत्रमीक्षती ॥१४-८०-१९ (९४७४४)
ततः संज्ञां पुनर्लब्ध्वा स राजा बभ्रुवाहनः ।
मातरं तामथालोक्य रणभूमावथाब्रवीत् ॥१४-८०-२० (९४७४५)
इतो दुःखतरं किंनु यन्मे माता सुखैधिता ।
भूमौ निपतितं वीरमनुशेते मृतं पतिम् ॥१४-८०-२१ (९४७४६)
निहन्तारं रणेऽरीणां सर्वशस्त्रभृतां वरम् ।
मया विनिहतं सङ्ख्ये प्रेक्षते दुर्मरं बत ॥१४-८०-२२ (९४७४७)
अहोऽस्या हृदयं देव्या दृढं यन्न विदीर्यते ।
व्यूढोरस्कं महाबाहुं प्रेक्षन्त्या निहतं पतिम् ॥१४-८०-२३ (९४७४८)

दुर्मरं पुरुषेणेह मन्ये काले ह्यनागते ।
यत्र नाहं न मे माता न वियुक्तौ स्वजीवितात् ॥१४-८०-२४ (९४७४९)
हाहा धिक्कुरुवीरस्य किरीटं काञ्चनं भुवि ।
अपविद्धं हतस्येह मया पुत्रेम पश्यत ॥१४-८०-२५ (९४७५०)
भोभो पश्यत मे वीरं पितरं ब्राह्मणा भुवि ।
शयानं वीरशयने मया पुत्रेण पातितम् ॥१४-८०-२६ (९४७५१)
ब्राह्मणाः कुरुमुख्यस्य ये मुक्ता हयसारिणः ।
कुर्वन्ति शान्तिं कामस्य रणे योऽयं मया हतः ॥१४-८०-२७ (९४७५२)
व्यादिशन्तु च किं विप्राः प्रायश्चित्तमिहाद्य मे ।
आनृशंसस्य पापस्य पितृहन्तू रणाजिरे ॥१४-८०-२८ (९४७५३)
दुश्चरा द्वादश समा हत्वा पितरमद्य वै ।
ममेह सुनृशंसस्य संवीतस्यास्य चर्मणा ॥१४-८०-२९ (९४७५४)
शिरःकपाले चास्यैव भुञ्जतः पितुरद्य मे ।
प्रायश्चित्तं हि नास्त्यन्यद्धत्वाऽद्य पितरं मम ॥१४-८०-३० (९४७५५)
पश्य नागोत्तमसुते भर्तारं निहतं मया ।
कृतं प्रियं मया तेऽद्य निहत्य समरेऽर्जुनम् ॥१४-८०-३१ (९४७५६)
सोऽहमद्य गमिष्यामि गतिं पितृनिषेविताम् ।
न शक्नोम्यात्मनाऽऽत्मानमहं दारयितुं शुभे ॥१४-८०-३२ (९४७५७)
सा त्वं मयि मृते मातस्तथा गाण्डीवधन्वनि ।
भव प्रीतिमती देवि सत्येनात्मानमालभे ॥१४-८०-३३ (९४७५८)
इत्युक्त्वा स ततो राजा दुःखशोकसमाहतः ।
उपस्पृश्य महाराज दुःखाद्वचनमब्रवीत् ॥१४-८०-३४ (९४७५९)
शृण्वन्तु सर्वभूतानि स्थावराणि चराणि च ।
त्वं च मातर्यथा सत्यं ब्रवीमि भुजगोत्तमे ॥१४-८०-३५ (९४७६०)
यदि नोत्तिष्ठति जयः पिता मे नरसत्तमः ।
अस्मिन्नेव रणोद्देशे शोषयिष्ये कलेवरम् ॥१४-८०-३६ (९४७६१)
नहि मे पितरं हत्वा निष्कृतिर्विद्यते क्वचित् ।
नरकं प्रतिपत्स्यामि ध्रुवं गुरुवधार्दितः ॥१४-८०-३७ (९४७६२)
वीरं हि क्षत्रियं हत्वा गोशतेन प्रमुच्यते ।
पितरं तु निहत्यैवं दुर्लभा निष्कृतिर्मम ॥१४-८०-३८ (९४७६३)
एत एको महातेजाः पाण्डुपुत्रो धनंजयः ।
पिता च मम धर्मात्मा तस्य मे निष्कृतिः कुतः ॥१४-८०-३९ (९४७६४)
इत्येवमुक्त्वा नृपते धनंजयसुतो नृपः ।
उपस्पृश्याभवत्तूष्णीं प्रायोपेतो महामतिः ॥ ॥१४-८०-४० (९४७६५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि

अशीतितमोऽध्यायः ॥ ८० ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-८०-२७ कामस्यति कां अस्येति च्छेदः ॥

आश्वमेधिकपर्व - अध्याय ०८१
॥ श्रीः ॥
१४.८१. अध्यायः ८१

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
बभ्रुवाहने प्रायोपविष्टे उलूप्या
स्मरणमात्रसंनिहितसंजीवनमणिनार्जुनस्य समुद्बोधनम् ॥ १ ॥
ततः सुप्तोत्थितेनेव तेन बभ्रुवाहनंप्रति चित्राङ्गदादीनां
रणाङ्गणागमने कारणप्रश्ने तेनोलूपींप्रति प्रश्नचोदना ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
प्रायोपविष्टे नृपतौ मणलूरेश्वरे तदा ।
पितृशोकसमाविष्टे सह मात्रा परंतप ॥ १४-८१-१ (९४७६६)
उलूपी चिन्तयामास तदा संजीवनं मणिम् ।
स चोपातिष्ठत तदा पन्नगानां परायणम् ॥ १४-८१-२ (९४७६७)
तं गृहीत्वा तु कौरव्य नागराजपतेः सुता ।
मनःप्रह्लादनीं वाचं सैनिकानामथाब्रवीत् ॥ १४-८१-३ (९४७६८)
उत्तिष्ठ मा शुचः पुत्र नैव जिष्णुस्त्वया हतः ।
अजेयः पुरुषैरेष तथा देवैः सवासवैः ॥ १४-८१-४ (९४७६९)
मया तु मोहनी नाम मायैषा सम्प्रदर्शिता ।
प्रियार्थं पुरुषेन्द्रस्य पितुस्तेऽद्य यशस्विनः ॥ १४-८१-५ (९४७७०)
जिज्ञासुर्ह्येष पुत्रस्य बलस्य तव कौरव ।
सङ्ग्रामे युद्ध्यतो राजन्नागतः परवीरहा ॥ १४-८१-६ (९४७७१)
तस्मादसि मया पुत्र युद्धाय परिचोदितः ।
मा पापमात्मनः पुत्र शङ्केथा ह्यण्वपि प्रभो ॥ १४-८१-७ (९४७७२)
ऋषिरेष महानात्मा पुराणः शाश्वतोऽक्षरः ।
नैनं शक्तो हि सङ्ग्रामे जेतुं शक्रोऽपि पुत्रक ॥ १४-८१-८ (९४७७३)
अयं तु मे मणिर्दिव्यः समानीतो विशांपते ।

मृतान्मृतान्पन्नगेन्द्रान्यो जीवयति नित्यदा ॥ १४-८१-९ (९४७७४)
एनमस्योरसि त्वं च स्थापयस्व पितुः प्रभो ।
संजीवितं तदा पार्थं स त्वं द्रष्टासि पाण्डवम् ॥ १४-८१-१० (९४७७५)
इत्युक्तः स्थापयामास तस्योरसि मणिं तदा ।
पार्थस्यामिततेजाः स पितुः स्नेहादपापकृत् ॥ १४-८१-११ (९४७७६)
तस्मिन्न्यस्ते मणौ वीरो जिष्णुरुज्जीवितः प्रभुः ।
चिरसुप्त इवोत्तस्थौ मृष्टलोहितलोचनः ॥ १४-८१-१२ (९४७७७)
तमुत्थितं महात्मानं लब्धसंज्ञं मनस्विनम् ।
समीक्ष्य पितरं स्वस्थं ववन्दे बभ्रुवाहनः ॥ १४-८१-१३ (९४७७८)
उत्थिते पुरुषव्याघ्रे पुनर्लक्ष्मीवति प्रभो ।
दिव्याः सुमनसः पुण्या ववृषे पाकशासनः ॥ १४-८१-१४ (९४७७९)
अनाहता दुन्दुभयो विनेदुर्मेघनिःस्वनाः ।
साधुसाध्विति चाकाशे बभूव सुमहान्स्वनः ॥ १४-८१-१५ (९४७८०)
उत्थाय च महाबाहुः पर्याश्वस्तो धनंजयः ॥
बभ्रुवाहनमालिङ्ग्य समाजिघ्रत मूर्धनि ॥ १४-८१-१६ (९४७८१)
ददर्श चापि दूरेऽस्य मातरं शोककर्शिताम् ।
उलूप्या सह तिष्ठन्तीं ततोऽपृच्छद्धनंजयः ॥ १४-८१-१७ (९४७८२)
किमिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत् ।
रणाजिरममित्रघ्न यदि जानासि शंस मे ॥ १४-८१-१८ (९४७८३)
जननी च किमर्थं ते रणभूमिमुपागता ।
नागेन्द्रदुहिता चेयमुलूपी किमिहागता ॥ १४-८१-१९ (९४७८४)
जानाम्यहमिदं युद्धं त्वया मद्वचनात्कृतम् ।
स्त्रीणामागमने हेतुमहमिच्छामि वेदितुम् ॥ १४-८१-२० (९४७८५)
तमुवाच तथा पृष्टो मणलूरपतिस्तदा ।
प्रसाद्य शिरसा विद्वानुलूपी पृच्छ्यतामिति ॥ ॥ १४-८१-२१ (९४७८६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

आश्वमेधिकपर्व - अध्याय ०८२
॥ श्रीः ॥
१४.८२. अध्यायः ८२

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
उलूप्यार्जुनंप्रति चित्राङ्गदादीनां समराङ्गणागमने कारणाभिधानम् ॥ १ ॥

तथा बभ्रुवाहनेन तस्य पराजये विस्तरेण हेतुकथनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

अर्जुन उवाच ।
किमागमनकृत्यं ते कौरव्यकुलनन्दिनि ।
मणलूरपतेर्मातुस्तथैव च रणाजिरे ॥१४-८२-१ (९४७८७)
कच्चित्कुशलकामासि राज्ञोऽस्य भुजगात्मजे ।
मम वा चपलापाङ्गि कच्चित्त्वं शुभमिच्छसि ॥१४-८२-२ (९४७८८)
कच्चित्ते पृथुलश्रोणि नाप्रियं प्रियदर्शने ।
अकार्षमहमज्ञानादयं वा बभ्रुवाहनः ॥१४-८२-३ (९४७८९)
कच्चिन्नु राजपुत्री ते सपत्नी चैत्रवाहनी ।
चित्राङ्गदा वरारोहा नापराध्यति किञ्चन ॥१४-८२-४ (९४७९०)
तमुवाचोरगपतेर्दुहिता प्रहसन्त्यथ ।
न मे त्वमपराद्धोसि न हि मे बभ्रुवाहनः ।
न जनित्री तथाऽस्येयं मम यो प्रेष्यवत्थिता ॥ १४-८२-५ (९४७९१)
श्रूयतां यद्यथा चेदं मया सर्वं विचेष्टितम् ।
न मे कोपस्त्वया कार्यः शिरसा त्वां प्रसादये ॥१४-८२-६ (९४७९२)
त्वत्प्रियार्थं हि कौरव्य कृतमेतन्मया विभो ।
यत्तच्छृणु महाबाहो निखिलेन धनंजय ॥१४-८२-७ (९४७९३)
महाभारतयुद्धे यत्त्वया शान्तनवो नृपः ।
अधर्मेण हतः पार्थ तस्यैषा निष्कृतिः कृता ॥१४-८२-८ (९४७९४)
न हि भीष्मस्त्वया वीर युद्ध्यमानो हि पातितः ।
शिखण्डिना तु संयुक्तस्तमाश्रित्य हतस्त्वया ॥१४-८२-९ (९४७९५)
तस्य शान्तिमकृत्वा त्वं त्यजेथा यदि जीवितम् ।
कर्मणा तेन पापेन पतेथा निरये ध्रुवम् ।
एषा तु विहिता शान्तिः पुत्राद्यां प्राप्तवानसि ॥ १४-८२-१० (९४७९६)
वसुभिर्वसुधापाल गङ्गया च महामते ।
पुरा हि श्रुतमेतत्ते वसुभिः कथितं मया ॥१४-८२-११ (९४७९७)
गङ्गायास्तीरमाश्रित्य हते शान्तनवे नृप ।
आप्लुत्य देवा वसवः समेत्य च महानदीम् ।
इदमूचुर्वचो घोरं भागीरथ्या मते तदा ॥ १४-८२-१२ (९४७९८)
एष शान्तनवो भीष्मो निहतः सव्यसाचिना ।
अयुद्ध्यमानः सङ्ग्रामे संसक्तोऽन्येन भामिनि ॥१४-८२-१३ (९४७९९)
तदनेनानुषङ्गेण वयमद्य धनञ्जयम् ।
शापेन योजयामेति तथाऽस्त्विति च साऽब्रवीत् ॥१४-८२-१४ (९४८००)

तदहं पितुरावेद्य प्रविश्य व्यथितेन्द्रिया ।
अभवं स च तच्छ्रुत्वा विषादमगमत्परम् ॥१४-८२-१५ (९४८०१)
पिता तु मे वसून्गत्वा त्वदर्थे समयाचत ।
पुनः पुनः प्रसाद्यैतांस्त एनमिदमब्रुवन् ॥१४-८२-१६ (९४८०२)
पुत्रस्तस्य महाभाग मणलूरेश्वरो युवा ।
स एनं रणमध्यस्थः शरैः पातयिता भुवि ॥१४-८२-१७ (९४८०३)
एवं कृते स नागेन्द्र मुक्तशापो भविष्यति ।
गच्छेति वसुभिश्चोक्तो मम चेदं शशंस सः ॥१४-८२-१८ (९४८०४)
तच्छ्रुत्वा त्वं मया तस्माच्छापादसि विमोक्षितः ।
न हि त्वां देवराजोऽपि समरेषु पराजयेत् ॥१४-८२-१९ (९४८०५)
आत्मा पुत्रः स्मृतस्तस्मात्तेनेहासि पराजितः ।
न हि दोषो मम मतः कथं वा मन्यसे विभो ॥१४-८२-२० (९४८०६)
इत्येवमुक्तो विजयः प्रसन्नात्माऽब्रवीदिदम् ।
सर्वं मे सुप्रियं देवि यदेतत्कृतवत्यसि ॥१४-८२-२१ (९४८०७)
इत्युक्त्वा सोऽब्रवीत्पुत्रं मणलूरपतिं जयः ।
चित्राङ्गदायाः शृण्वन्त्याः कौरव्यदुहितुस्तदा ॥१४-८२-२२ (९४८०८)
युधिष्ठिरस्याश्वमेधः परिचैत्रीं भविष्यति ।
तत्रागच्छेः सहामात्यो मातृभ्यां सहितो नृप ॥१४-८२-२३ (९४८०९)
इत्येवमुक्तः पार्थेन स राजा बभ्रुवाहनः ।
उवाच पितरं धीमानिदमस्राविलेक्षणः ॥१४-८२-२४ (९४८१०)
उपयास्यामि धर्मज्ञ भवतः सासनादहम् ।
अश्वमेधे महायज्ञे द्विजातिपरिवेषकः ॥१४-८२-२५ (९४८११)
मम त्वनुग्रहार्थाय प्रविशस्व पुरं स्वकम् ।
भार्याभ्यां सह धर्मज्ञ माभूत्तेऽत्र विचारणा ॥१४-८२-२६ (९४८१२)
उषित्वेह निशामेकां सुखं स्वभवने प्रभो ।
पुनरश्वानुगमनं कर्तासि जयतांवर ॥१४-८२-२७ (९४८१३)
इत्युक्ताः स तु प्रत्रेण तदा वानरकेतनः ।
स्मयन्प्रोवाच कौन्तेयस्तदा चित्राङ्गदासुतम् ॥१४-८२-२८ (९४८१४)
विदितं ते महाबाहो यथा दीक्षां चराम्यहम् ।
न स तावत्प्रवेक्ष्यामि पुरं ते पृथुलोचन ॥१४-८२-२९ (९४८१५)
यथाकामं व्रजत्येष यज्ञियाश्वो नरर्षभ ।
स्वस्ति तेऽस्तु गमिष्यामि न स्थानं विद्यते मम ॥१४-८२-३० (९४८१६)
वैशम्पायन उवाच।१४-८२-३१क्ष् (७९२२)
स तत्र विधिवत्तेन पूजितः पाकशासनिः। १४-८२-३१ (९४८१७)
भार्याभ्यामभ्यनुज्ञातः प्रायाद्भरतसत्तमः ॥ ॥ १४-८२-३२ (९४८१८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

आश्वमेधिकपर्व - अध्याय ०८३
॥ श्रीः ॥
१४.८३. अध्यायः ८३

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेनास्वानुसरणवशान्मगधदेशगमनम् ॥ १ ॥
तत्र जरासंधपौत्रस्य मेघसंधेः पराजयपूर्वकं तत्रतत्र
म्लेच्छादिपराजयः ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
स तु वाजी समुद्रान्तां पर्येत्य वसुधामिमाम् ।
निवृत्तोऽभिमुखो राजन्येन वारणसाह्वयम् ॥ १४-८३-१ (९४८१९)
अनुगच्छंश्च तुरगं निवृत्तोऽथ किरीटभृत् ।
यदृच्छया समापेदे पुरं राजगृहं तदा ॥ १४-८३-२ (९४८२०)
तमभ्याशगतं दृष्ट्वा सहदेवात्मजः प्रभो ।
क्षत्रधर्मे स्थितो वीरः समरायाजुहाव ह ॥ १४-८३-३ (९४८२१)
ततः पुरात्स निष्क्रम्य रथी धन्वी शरी तली ।
मेघसन्धिः पदातिं तं धनंजयमुपाद्रवत् ॥ १४-८३-४ (९४८२२)
आसाद्य च महातेजा मेघसन्धिर्धनंजयम् ।
बालभावान्महाराज प्रोवाचेदं न कौशलात् ॥ १४-८३-५ (९४८२३)
किमयं चार्यते वाजी सित्रीमध्य इव भारत ।
हयमेनं हरिष्यामि प्रयतस्व विमोक्षणे ॥ १४-८३-६ (९४८२४)
अदत्तानुनयो युद्धे यदि त्वं पितृभिर्मम ।
करिष्यामि तवातिथ्यं प्रहर प्रहरामि च ॥ १४-८३-७ (९४८२५)
इत्युक्तः प्रत्युवाचैनं प्रहसन्निव पाण्डवः ।
विघ्नकर्ता मया वार्य इति मे व्रतमाहितम् ॥ १४-८३-८ (९४८२६)
भ्रात्रा ज्येष्ठेन नृपते तवापि विदितं ध्रुवम् ।
प्रहरस्व यथाशक्ति न मन्युर्विद्यते मम ॥ १४-८३-९ (९४८२७)
इत्युक्तः प्राहरत्पूर्वं पाण्डवं मगधेस्वरः ।
किरञ्शरसहस्राणि वर्षाणीव सहस्रदृक् ॥ १४-८३-१० (९४८२८)

ततो गाण्डीवभृच्छूरो गाण्डीवप्रहितैः शरैः ।
चकार मोघांस्तान्बाणान्सयत्नान्भरतर्षभ ॥१४-८३-११ (९४८२९)
स मोघं तस्य बाणौघं कृत्वा वानरकेतनः ।
शरात्मुमोच ज्वलितान्दीप्तास्यानिव पन्नगान् ॥१४-८३-१२ (९४८३०)
ध्वजे पताकादण्डेषु रथे यन्त्रे हयेषु च ।
अन्येषु च रथाङ्गेषु न शरीरे न सारथौ ॥१४-८३-१३ (९४८३१)
संरक्ष्यमाणः पार्थेन शरीरे सव्यसाचिना ।
मन्यमानः स्ववीर्यं तन्मागधः प्राहिणोच्छरान् ॥१४-८३-१४ (९४८३२)
ततो गाण्डीवधन्वा तु मागधेन भृशाहतः ।
बभौ वसन्तसमये पलासः पुष्पितो यथा ॥१४-८३-१५ (९४८३३)
अवध्यमानः सोऽभ्यघ्नन्मागधः पाण्डवर्षभम् ।
तेन तस्थौ स कौरव्य लोकवीरस्य दर्शने ॥१४-८३-१६ (९४८३४)
सव्यसाची तु संक्रुद्धो विकृष्य बलवद्धनुः ।
हयांश्चकार निर्जीवान्सारथेश्च शिरोऽहरत् ॥१४-८३-१७ (९४८३५)
धनुश्चास्य महच्चित्रं क्षुरेण प्रचकर्त ह ।
हस्तावापं पताकां च ध्वजं चास्यन्यपातयत् ॥१४-८३-१८ (९४८३६)
स राजा व्यथितो व्यश्वो विधनुर्हतसारथिः ।
गदामादाय कौन्तेयमभिदुद्राव वेगवान् ॥१४-८३-१९ (९४८३७)
तस्यापतत एवाशु गदां हेमपरिष्कृताम् ।
शरैश्चकर्त बहुधा बहुभिर्गृध्रवाजितैः ॥१४-८३-२० (९४८३८)
सा गदा शकलीभूता विशीर्णमणिबन्धना ।
व्याली विमुच्यमानेन पपात धरणीतले ॥१४-८३-२१ (९४८३९)
विरथं विधनुष्कं च गदया परिवर्जितम् ।
नैच्छत्ताडयितुं धीमानर्जुनः समराग्रणीः ॥१४-८३-२२ (९४८४०)
तत एनं विमनसं क्षत्रधर्मे व्यवस्थितम् ॥
सान्त्वपूर्वमिदं वाक्यमब्रवीत्कपिकेतनः ॥ १४-८३-२३ (९४८४१)
पर्याप्तः क्षत्रधर्मोऽयं दर्शितः पुत्र गम्यताम् ।
बह्वेतत्समरे कर्म तव बालस्य पार्थिव ॥१४-८३-२४ (९४८४२)
युधिष्ठिरस्य संदेशो न हन्तव्या नृपा इति ।
तेन जीवसि राजंस्त्वमपराद्धोऽपि मे रणे ॥१४-८३-२५ (९४८४३)
इति मत्वा तदाऽऽत्मानं प्रत्यादिष्टं स्म मागधः ।
तथ्यमित्यभिगम्यैनं प्राञ्जलिः प्रत्यपूजयत् ॥१४-८३-२६ (९४८४४)
परिजितोस्मि भद्रं ते नाहं योद्धुमिहोत्सहे ।
यद्यत्कृत्यं मया तेऽद्य तद्ब्रूहि कृतमेव तु ॥१४-८३-२७ (९४८४५)
तमर्जुनः समाश्वास्य पुनरेवेदमब्रवीत् ।
आगन्तव्यं परां चैत्रीमश्वमेधे नृपस्य नः ॥१४-८३-२८ (९४८४६)

इत्युक्तः स तथेत्युक्त्वा पूजयमास तं हयम् ।
फल्गुनं च युधिश्रेष्ठं विदिवत्सहदेवजः ॥१४-८३-२९ (९४८४७)
ततो यथेष्टमगमत्पुनरेव स कौरवः ।
ततः समुद्रतीरेण वङ्गान्पुण्ड्रान्सकेरलान् ॥१४-८३-३० (९४८४८)
तत्रतत्र च भूरीणि म्लेच्छसैन्यान्यनेकशः ।
विजिग्ये धनुषा राजन्गाण्डीवेन धनंजयः ॥ ॥१४-८३-३१ (९४८४९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-८३-७ अदत्तानुनयः अशिक्षितः ॥
७-८३-२० गृध्रवाजितैः गृध्रपक्षयुतैः ॥

आश्वमेधिकपर्व - अध्याय ०८४
॥ श्रीः ॥
१४.८४. अध्यायः ८४

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
दक्षिणां दिशमुपागतेनार्जुनेन चेदीशितुः शिशुपालात्मजस्य
पूजापरिग्रहणम् ॥ १ ॥
तथा काशिकोसलादिदेशाधिपतिपराजयपूर्वकं गान्धारदेशगमनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
मागधेनार्चितो राजन्पाण्डवः श्वेतवाहनः ।
दक्षिणां दिशमास्थाय चारयामास तं हयम् ॥१४-८४-१ (९४८५०)
ततः स पुनरावर्त्य हयः कामचरो बली ।
आससाद पुरीं रम्यां चेदीनां शुक्तिसाह्वयाम् ॥१४-८४-२ (९४८५१)
शरभेणार्चितस्तत्र शिशुपालसुतेन सः ।
युद्धपूर्वं तदा तेन पूजया च महाबलः ॥१४-८४-३ (९४८५२)
ततोऽर्चितो ययौ राजंस्तदा स तुरगोत्तमः ।
काशीनङ्गान्कोसलांश्च किरातानाथ तङ्गणात् ॥१४-८४-४ (९४८५३)
पूजां तत्र यथान्यायं प्रतिगृह्य धनंजयः ।

पुनरावृत्त्य कौन्तेयो दशार्णानगमत्तदा ॥१४-८४-५ (९४८५४)
तत्र चित्राङ्गदो नाम बलवानरिमर्दनः ।
तेन युद्धमभूत्तस्य विजयस्यातिभैरवम् ॥१४-८४-६ (९४८५५)
तं चापि वशमानीय किरीटी पुरुषर्षभः ।
निषादराज्ञो विषयमेकलव्यस्य जग्मिवान् ॥१४-८४-७ (९४८५६)
एकलव्यसुतश्चैनं युद्धेनि जगृहे तदा ।
तत्र चक्रे निषादैः स सग्रामं रोमहर्षणम् ॥१४-८४-८ (९४८५७)
ततस्तमपि कौन्तेयः समरेष्वपराजितः ॥
जिगाय युधि दुर्धर्षो यज्ञविघ्नार्थमागतम् ॥१४-८४-९ (९४८५८)
स तं जित्वा महाराज नैषादिं पाकशासनिः ।
अर्चितः प्रययौ भूयो दक्षिणं सलिलार्णवम् ॥१४-८४-१० (९४८५९)
तत्रापि द्रवीडैरान्ध्रै रौद्रैर्माहिषकैरपि ।
तथा कोल्लगिरेयैश्च युद्धमासीन्किरीटिनः ॥१४-८४-११ (९४८६०)
तांश्चापि विजयो जित्वा नातितीव्रेण कर्मणा ।
तुरङ्गमवशेनाथ सुराष्ट्रानभितो ययौ ।
गोकर्णमथ चासाद्य प्रभासमपि जग्मिवान् ॥ १४-८४-१२ (९४८६१)
ततो द्वारवतीं रम्यां वृष्णिवीराभिपालिताम् ।
आससाद हयः श्रीमान्कुरुराजस्य यज्ञियः ॥१४-८४-१३ (९४८६२)
तमुन्मथ्य हयश्रेष्ठं यादवानां कुमारकाः ।
प्रययुस्तांस्तदा राजन्नुग्रसेनो न्यवारयत् ॥१४-८४-१४ (९४८६३)
ततः पुराद्विनिष्क्रम्य वृष्ण्यन्धकपतिस्तदा ।
सहितो वासुदेवेन मातुलेन किरीटिनः ॥१४-८४-१५ (९४८६४)
तौ समेत्य कुरुश्रेष्ठं विधिवत्प्रीतिपूर्वकम् ।
परया भारतश्रेष्ठं पूजया समवस्थितौ ।
ततस्ताभ्यामनुज्ञातो यतयौ येन हयो गतः ॥ १४-८४-१६ (९४८६५)
ततः स पश्चिमं देशं समुद्रस्य तदा हयः ।
क्रमेणि व्यचरत्स्फीतं ततः पञ्चनदं ययौ ॥१४-८४-१७ (९४८६६)
तस्मादपि स कौरव्य गन्धारविषयं हयः ।
विचचार यथाकामं कौन्तेयानुगतस्तदा ॥१४-८४-१८ (९४८६७)
ततो गान्धारराजेन युद्धमासीत्किरीटिनः ।
घोरं शकुनिपुत्रेण पूर्ववैरानुसारिणा ॥ ॥१४-८४-१९ (९४८६८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
चतुरशीतितमोऽध्यायः ॥८४ ॥

आश्वमेधिकपर्व - अध्याय ०८५

॥ श्रीः ॥
१४.८५. अध्यायः ८५

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
अर्जुनेन शकुनितनयपराजयपूर्वकं तत्सेनावमर्दनम् ॥ १ ॥
ततः शकुनिभार्यया तेन स्वसुतवधसंभावनया
रणाङ्गणमेत्यार्जुनस्य प्रसादनम् ॥ २ ॥
अर्जुनेन गान्धारीगौरवात्तत्संमाननपूर्वकं तत्तनयसमाश्वासनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
शकुनस्तनयो वीरो गान्धाराणां महारथः ।
प्रत्युद्ययौ गुडाकेशं सैन्येन महता वृतः ।
हस्त्यश्वरथयुक्तेन पताकाध्वजमालिना ॥ १४-८५-१ (९४८६९)
अमृष्यमाणास्ते योधा नृपस्य शकुनेर्वधम् ।
अभ्ययुः सहिताः पार्थं प्रगृहीतशरासनाः ॥ १४-८५-२ (९४८७०)
स तानुवाच धर्मात्मा बीभत्सुरपराजितः ।
युधिष्ठिरस्य वचनं न च ते जगृहुर्हितम् ॥ १४-८५-३ (९४८७१)
वार्यमाणास्तु पार्थेन सान्त्वपूर्वममर्षिताः ।
परिवार्य हयं जग्मुस्ततश्चुक्रोध पाण्डवः ॥ १४-८५-४ (९४८७२)
ततः शिरांसि दीप्ताग्रैस्तेषां चिच्छेद पाण्डवः ।
क्षुरैर्गाण्डीवनिर्मुक्तैर्नातियत्नादिवार्जुनः ॥ १४-८५-५ (९४८७३)
ते वध्यमानाः पार्थेनि हयमुत्सृज्य संप्रमात् ।
न्यवर्तन्त महाराज शरवर्षार्दिता भृशम् ॥ १४-८५-६ (९४८७४)
वितुद्यमानस्तैश्चापि गान्धारैः पाण्डुनन्दनः ।
आदिस्यादिश्य तेजस्वी परानेतानवारयत् ॥ १४-८५-७ (९४८७५)
वध्यमानेषु तेष्वाजौ गान्धारेषु समन्ततः ।
स राजा शकुनेः पुत्रः पाण्डवं प्रत्यवारयत् ॥ १४-८५-८ (९४८७६)
तं युध्यमानं राजानं क्षत्रधर्मे व्यवस्थितम् ।
पार्थोऽब्रवीन्न मे वध्या राजानो राजसासनात् ॥ १४-८५-९ (९४८७७)
अलं युद्धेन ते वीर न तेऽस्त्वद्य पराजयः ।
इत्युक्तस्तदनादृत्य वाक्यमज्ञानमोहितः ।
स शक्रसमकर्माणं समावाकिरदाशुगैः ॥ १४-८५-१० (९४८७८)
तस्य् पार्थः शिरस्त्राणमर्धचन्द्रेण पत्रिणा ।

अपाहरदमेयात्मा जयद्रथशिरो यथा ॥१४-८५-११ (९४८७९)
तं दृष्ट्वा विस्मयं जग्मुर्गान्धाराः सर्व एव ते ।
इच्छता तेन न हतो राजेत्यपि च ते विदुः ॥१४-८५-१२ (९४८८०)
गान्धारराजपुत्रस्तु पलायनकृतक्षणः ।
ययौ तैरेव सहितस्त्रस्तैः क्षुद्रमृगैरिव। १४-८५-१३ (९४८८१)
तेषां तु तरसा पार्थस्तत्रैव परिदावताम् ।
प्रजहारोत्तमाङ्गानि भल्लैः सन्नतपर्वभिः ॥१४-८५-१४ (९४८८२)
उच्छ्रितांस्तु भुजान्केचिन्नाबुध्यन्त शरैर्हृतान् ।
शरैर्गाण्डीवनिर्मुक्तैः पृथुभिः पार्थचोदितैः ॥१४-८५-१५ (९४८८३)
सम्भ्रान्तनरनागाश्वमपतद्विद्रुतं बलम् ।
हतविद्रुतभूयिष्ठमावर्तत मुहुर्मुहुः ॥१४-८५-१६ (९४८८४)
नाभ्यदृस्यन्त वीरस्य केचिदग्रेऽग्र्यकर्मणः ।
रिपवः पात्यमाना वै ये सहेरन्महाशरान् ॥१४-८५-१७ (९४८८५)
ततो गान्धारराजस्य मन्त्रिवृद्धपुरःसरा ।
जननी निर्ययौ भीता पुरस्कृत्यार्घ्यमुत्तमम् ॥१४-८५-१८ (९४८८६)
सा न्यवारयदव्यग्रा तं पुत्रं युद्धदुर्मदम् ।
प्रसादयामास च तं जिष्णुमक्लिष्टकारिणम् ॥१४-८५-१९ (९४८८७)
तां पूजयित्वा बीभत्सुः प्रसादमकरोत्प्रभुः ।
शकुनेश्चापि तनयं सान्त्वयन्निदमब्रवीत् ॥१४-८५-२० (९४८८८)
न मे प्रियं महाबाहो यत्ते बुद्धिरियं कृता ।
प्रतियोद्धुममित्रघ्न भ्रातैव त्वं ममानघ ॥१४-८५-२१ (९४८८९)
गान्धारीं मातरं स्मृत्वा धृतराष्ट्रकृतेन च ।
तेन जीवसि राजंस्त्वं निहतास्त्वनुगास्तव ॥१४-८५-२२ (९४८९०)
मैवं भूः शाम्यतां वैरं मा तेऽभूद्बुद्धिरीदृशी
आगन्तव्यं परां चैत्रीमश्वमेधे नृपस्य नः ॥ १४-८५-२३ (९४८९१)
इत्युक्त्वाऽनुययौ पार्थो हयं तं कामचारिणम् ।
ते न्यवर्तन्त गान्धारा हतशिष्टाः स्वकं पुरम् ॥ ॥१४-८५-२४ (९४८९२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

आश्वमेधिकपर्व - अध्याय ०८६
॥ श्रीः ॥
१४.८६. अध्यायः ८६

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

चारमुखादर्जुनस्य तुरगसंचारणात्पुनर्नगरं
प्रत्यागमनश्रवणहृष्टस्य युधिष्ठिरस्य निदेशाद्भीमेन
यज्ञशालादिनिर्मापणम् ॥ १ ॥
तथा नानादेशेभ्यो ब्राह्मणाद्यानयनपूर्वकं
तेषामन्नदानादिव्यवस्थाकरणम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
न्यवर्तत ततो वाजी येन नागाह्वयं पुरम् ।
तं निवृत्तं तु शुश्राव चारेणैव युधिष्ठिरः ।
श्रुत्वाऽर्जुनं कुशलिनं स च हृष्टमनाऽभवत् ॥ १४-८६-१ (९४८९३)
विजयस्य च तत्कर्म गान्धारविषये तदा ।
श्रुत्वा चान्येषु देशेषु स सुप्रीतोऽभवत्तदा ॥ १४-८६-२ (९४८९४)
एतस्मिन्नेव काले तु द्वादशीं माघमासिकीम् ।
इष्टं गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः ॥ १४-८६-३ (९४८९५)
समानीय महातेजाः सर्वान्भ्रातॄन्महीपतिः ।
भीमं च नकुलं चैव सहदेवं च कौरव ॥ १४-८६-४ (९४८९६)
प्रोवाचेदं वचः काले तदा धर्मभृतांवरः ।
आमन्त्र्य वदतां श्रेष्ठो भीमं प्रहरतां वरम् ॥ १४-८६-५ (९४८९७)
आयाति भीमसेनासौ सहाश्वेन तवानुजः ।
यथा मे पुरुषाः प्राहुर्ये धनंजयसारिणः ॥ १४-८६-६ (९४८९८)
उपस्थितश्च कालोऽयमभितो वर्तते हयः ।
माघी च पौर्णमासीयं मासः शेषो वृकोदर ॥ १४-८६-७ (९४८९९)
तत्प्रस्थाप्यन्तु विद्वांसो ब्राह्मणा वेदपारगाः ।
वाजिमेधार्थसिद्ध्यर्थं देशं पश्यन्तु यज्ञियम् ॥ १४-८६-८ (९४९००)
इत्युक्तः स तु तच्चक्रे भीमो नृपतिशासनम् ।
हृष्टः श्रुत्वा गुडोकेशमायान्तं पुरुषर्षभम् ॥ १४-८६-९ (९४९०१)
ततो ययौ भीमसेनः प्राज्ञैः स्थपतिभिः सह ।
ब्राह्मणानग्रतः कृत्वा कुशलान्यज्ञकर्मणि ॥ १४-८६-१० (९४९०२)
तं ससालचयं श्रीमत्सप्रतोलीसुघट्टितम् ।
मापयामास कौरव्यो यज्ञवाटं यताविधि ॥ १४-८६-११ (९४९०३)
प्रासादशतसम्बन्धं मणिप्रवरकुट्टिमम् ।
ग्सदः स पत्नीसदनं साग्नीध्रमपि चोत्तरम्।'
कारयामास विदिवद्धेमरत्नविभूषितम् ॥ १४-८६-१२ (९४९०४)

स्तंभान्कनकचित्रांश्च तोरणानि बृहन्ति च ।
यज्ञायतनदेशेशु दत्त्वा शुद्धं च काञ्चनम् ॥१४-८६-१३ (९४९०५)
अन्तःपुराणां राज्ञां च नानादेशसमीयुषाम् ।
कारयामास धर्मात्मा तत्रतत्र यथाविधि ॥१४-८६-१४ (९४९०६)
ब्राह्मणानां न वेश्मानि नानादेशसमीयुषाम् ।
कारयामास कौन्तेयो विधिवत्तान्यनेकशः ॥१४-८६-१५ (९४९०७)
तथा सम्प्रेषयामास दूतान्नृपतिशासनात् ।
भीमसेनो महाबाहो राज्ञामक्लिष्टकर्मणाम् ॥१४-८६-१६ (९४९०८)
ते प्रियार्थं कुरुपतेराययुर्नृपसत्तम ।
रत्नान्यनेकान्यादाय स्त्रियोऽश्वानायुधानि च ॥१४-८६-१७ (९४९०९)
तेषां निर्विशतां तेषु शिबिरेषु महात्मनाम् ।
नर्दतः सागरस्येव दिवस्पृगभवत्स्वनः ॥१४-८६-१८ (९४९१०)
ग्प्रत्युद्गम्य नमस्कृत्य ब्राह्मणांश्च न्यवेदयत् ॥' १४-८६-१९ (९४९११)
तेषामभ्यागतानां च स राजा कुरुवर्धनः ।
व्यादिदेशान्नपानानि शय्याश्चाप्यतिमानुषाः ॥१४-८६-२० (९४९१२)
वाहनानां च विविधाः शालाः शालीक्षुगोरसैः ।
उपेता भरतश्रेष्ठो व्यादिदेश स धर्मराट् ॥१४-८६-२१ (९४९१३)
ग्वर्णाः पृथक्सन्निविष्टा ह्युत्तरोत्तरपूजिताः'।
तथा तस्मिन्महायज्ञे धर्मराजस्य धीमतः ।
समाजग्मुर्मुनिगणा बहवो ब्रह्मवादिनः ॥ १४-८६-२२ (९४९१४)
ये च द्विजातिप्रवरास्तत्रासन्पृथिवीपते ।
समाजग्मुः सशिष्यांस्तान्प्रतिजग्राह कौरवः ॥१४-८६-२३ (९४९१५)
सर्वांश्चताननुययौ यावदावसथान्प्रति ।
स्वयमेव महातेजा दंभं त्यक्त्वा युधिष्ठिरः ॥१४-८६-२४ (९४९१६)
ततः कृत्वा स्थपतयः शिल्पिनोऽन्ये च ये तदा ।
कृत्स्नं यज्ञविधिं राजन्धर्मराजे न्यवेदयन ॥१४-८६-२५ (९४९१७)
तच्छ्रुत्वा धर्मराजस्तु कृतं सर्वमतन्द्रितः ।
हृष्टरूपोऽभवद्राजन्सह भ्रातृभिरादृतः ॥१४-८६-२६ (९४९१८)
तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः ।
हेतुवादान्बहूनाहुः परस्परजिगीषवः ॥१४-८६-२७ (९४९१९)
ददृशुस्तं नृपतयो यज्ञस्य विधिमुत्तमम् ।
देवेन्द्रस्येव विहितं भीमसेनेन भारत ॥१४-८६-२८ (९४९२०)
ददृशुस्तोरणान्यत्र शातकुंभमयानि ते ।
शय्यासनविहारांश्च सुबहून्रत्नसंचयान् ॥१४-८६-२९ (९४९२१)
घटान्पात्रीः कटाहानि कलशान्वर्धमानकान् ।
न हि किञ्चिदसौवर्णमपश्यन्वसुधाधिपाः ॥१४-८६-३० (९४९२२)

यूपांश्च शास्त्रपठितान्दारवान्हेमभूषितान् ।
उपक्लृप्तान्यथाकालं विधिवद्भूरिवर्चसः ॥ १४-८६-३१ (९४९२३)
स्थलजाक जलजा ये च पशवः केचन प्रभो ।
सर्वानेव समानीतानपश्यंस्तत्र ते नृपाः ॥ १४-८६-३२ (९४९२४)
गाश्चैव महिषीश्चैव तथा वृद्धस्त्रियोपि च ।
औदकानि च सत्वानि श्वापदानि वयांसि च ॥ १४-८६-३३ (९४९२५)
जरायुजाण्डजातानि स्वेदजान्युद्भिदानि च ।
पर्वतानूपजातानि भूतानि ददृशुश्च ते ॥ १४-८६-३४ (९४९२६)
एवं प्रमुदितं सर्वं पशुगोधनधान्यतः ।
यज्ञवाटं नृपा दृष्ट्वा परं विस्मयमागताः ॥ १४-८६-३५ (९४९२७)
'अनिशं दीयते च स्म तत्र भोज्यं पृथग्विधम् ॥'
ब्राह्मणानां विशां चैव बहुमृष्टान्नमृद्धिमत् ॥ १४-८६-३६ (९४९२८)
पूर्णे शतसहस्रे तु विप्राणां तत्रि भुञ्जताम् ।
दुन्दुभिर्मेघनिर्घोषो मुहुर्मुहुरताड्यत ।
विननादासकृच्चापि दिवसेदिवसे गते ॥ १४-८६-३७ (९४९२९)
एवं स ववृते यज्ञो धर्मराजस्य धीमतः ।
अन्नस्य सुबहून्राजन्नुत्सर्गान्पर्वतोपमान् ।
दधिकुल्याशाच ददृशुः सर्पिषश्च ह्रदाञ्जनाः ॥ १४-८६-३८ (९४९३०)
जंबूद्वीपो हि सकलो नानजनपदायुतः ।
राजन्नदृस्यतैकस्थो राज्ञस्तस्य महामखे ॥ १४-८६-३९ (९४९३१)
तत्र जातिसहस्राणि पुरुषाणां ततस्ततः ।
गृहीत्वा धमाजग्मुर्बहूनि भरतर्षभ ॥ १४-८६-४० (९४९३२)
स्रग्विणश्तापि ते सर्वे सुमुष्टमणिकुण्डलाः ।
पर्यवेषन्द्विजातींस्ताञ्शतशोऽथ सहस्रशः ॥ १४-८६-४१ (९४९३३)
विविधान्यन्नपानानि पुरुषा येऽनुयायिनः ।
ते वै नृपोपभोज्यानि ब्राह्मणानां ददुश्च ह ॥ ॥ १४-८६-४२ (९४९३४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-८६-३ इष्टं नक्षत्रं पुष्यम् ॥
७-८६-८ प्रस्थाप्यन्तु प्रस्थापयन्तु । स्वार्थे णिच् । प्रतिष्ठन्त्वित्यर्थः ॥

आश्वमेधिकपर्व - अध्याय ०८७
॥ श्रीः ॥

१४.८७. अध्यायः ८७

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन बलरामादिभिः सह युधिष्ठिराश्वमेधाय
हास्तिनपुरंप्रत्यागमनम् ॥ १ ॥
तथा युधिष्ठिरंप्रति नानादेशेभ्य आगमिष्यतां राज्ञामप्रमादेन
यथोचितपूजाया मणलूरादागमिष्यतो बभ्रुवाहनस्य संमाननस्य च
कर्तव्यताप्रतिपादकार्जुनसंदेशनिवेदनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
समागतान्वेदविदो राज्ञश्च पृथिवीश्वरान् ।
दृष्ट्वा युधिष्ठिरो राजा भीमसेनमभाषत ॥ १४-८७-१ (९४९३५)
उपयाता नरव्याघ्रा य एते पृथिवीश्वराः ।
एतेषां क्रियतां पूजा पूजार्हा हि नराधिपाः ॥ १४-८७-२ (९४९३६)
इत्युक्तः स तथा चक्रे नरेन्द्रेण यशस्विना ।
भीमसेनो महातेजा यमाभ्यां सह पाण्डवः ॥ १४-८७-३ (९४९३७)
अथाभ्यगच्छद्गोविन्दो वृष्णिभिः सह धर्मजम् ।
बलदेवं पुरस्कृत्य सर्वप्राणभृतां वरः ॥ १४-८७-४ (९४९३८)
युयुधानेन सहितः प्रद्युम्नेन गदेन च ।
निशठेनाथ सांबेन तथैव कृतवर्मणा ॥ १४-८७-५ (९४९३९)
तेषामपि परां पूजां चक्रे भीमो महारथः ।
विविशुस्ते च वेश्मानि रत्नवन्ति च सर्वशः ॥ १४-८७-६ (९४९४०)
युधिष्ठिरसमीपे तु कथान्ते मधुसूदनः ।
अर्जुनं कथयामास बहुसङ्ग्रामकर्शितम् ॥ १४-८७-७ (९४९४१)
स तं प्रपच्छ कौन्तेयः पुनःपुनररिंदमम् ।
धर्मजः शक्रजं जिष्णुं समाचष्ट जगत्पतिः ॥ १४-८७-८ (९४९४२)
आगमद्द्वारकावासी समाप्तः पुरुषो नृप ।
योऽद्राक्षीत्पाण्डवश्रेष्ठ बहुसङ्ग्रामकर्शितम् ॥ १४-८७-९ (९४९४३)
समीपे च महाबाहुमाचष्ट च मम प्रभो ।
कुरु कार्याणि कौन्तेय हयमेधार्थसिद्धये ॥ १४-८७-१० (९४९४४)
इत्युक्तः प्रत्युवाचैनं धर्मराजो युधिष्ठिरः ।
दिष्ट्या स कुशली जिष्णुरुपायाति च माधव ॥ १४-८७-११ (९४९४५)
यदिदं संदिदेशास्मिन्पाण्डवानां बलाग्रणीः ।

तदाख्यातमिहेच्छामि भवता यदुनन्दन ॥ १४-८७-१२ (९४९४६)
इत्युक्तो धर्मराजेन वृष्ण्यन्धकपतिस्तदा ।
प्रोवाचेदं वचो वाग्मी धर्मात्मानं युधिष्ठिरम् ॥ १४-८७-१३ (९४९४७)
इदमाह महाराज पार्थवाक्यं नरेश्वरः ।
वाच्यो युधिष्ठिरः कृष्ण काले वाक्यमिदं मम ॥ १४-८७-१४ (९४९४८)
आगमिष्यन्ति राजानः सर्वे वै कौरवर्षभ ।
प्राप्तानां महतां पूजा कार्या ह्येतत्क्षमं हि नः ॥ १४-८७-१५ (९४९४९)
इत्येतद्वचनाद्राजा विज्ञाप्यो मम मानद ।
तथा चात्ययिकं न स्याद्यदर्घाहरणेऽभवत् ॥ १४-८७-१६ (९४९५०)
कर्तुमर्हति तद्राजा भवांश्चाप्यनुमन्यताम् ।
राजद्वेषान्न नश्येयुरिमा राजन्पुनः प्रजाः ॥ १४-८७-१७ (९४९५१)
इदमन्यच्च कौन्तेय वचः स पुरुषोऽब्रवीत् ।
धनंजयस्य नृपते तन्मे निगदतः शृणु ॥ १४-८७-१८ (९४९५२)
उपयास्यति यज्ञं नो मणलूरपतिर्नृपः ।
पुत्रो मम महातेजा दयितो बभ्रुवाहनः ॥ १४-८७-१९ (९४९५३)
तं भवान्मदपेक्षार्थं विधिवत्प्रतिपूजयेत् ।
स तु भक्तोऽनुरक्तश्च मम नित्यमिति प्रभो ॥ १४-८७-२० (९४९५४)
इत्येतद्वचनं श्रुत्वा धर्मराजो युधिष्ठिरः ।
अभिनन्द्यास्य तद्वाक्यमिदं वचनमब्रवीत् ॥ ॥ १४-८७-२१ (९४९५५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-८७-७ भोजराजन्यानां वर्धनः ॥
७-८७-८ जानुनोरधस्थः पश्चाद्भागीयो मांसलः प्रदेशः पिण्डिका
। ते उभे अस्याधिके स्वदेशादधोभागपर्यन्तं बहुलमालम्बमाने ॥

आश्वमेधिकपर्व - अध्याय ०८८
॥ श्रीः ॥
१४.८८. अध्यायः ८८

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

युधिष्ठिरेणि पाण्डवेषु चतुर्भ्योऽर्जुनस्यैव
विशेषतोऽध्वसंचारादिपरिक्लेशसूचकशारीरालक्षणप्रश्ने

कृष्णेन तंप्रति तत्कथनम् ॥ १ ॥
मेध्याश्वस्य पृथ्वीसंचारणाय गतेनार्जुनेन सहाश्वेन पुनर्नगरं
प्रत्यागमनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
श्रुतं प्रियमिदं कृष्ण यत्त्वमर्हसि भाषितुम् ।
तन्मेऽमृतरसं पुण्यं मनो ह्लादयति प्रभो ॥ १४-८८-१ (९४९५६)
बहूनि किल युद्धानि विजयस्य नराधिपैः ।
पुनरासन्हृषीकेश तत्रतत्रेति न श्रुतम् ॥ १४-८८-२ (९४९५७)
किंनिमित्तं स नित्यं हि पार्थः सुखविवर्जितः ।
अतीव विजयो धीमानिति मे दूयते मनः ॥ १४-८८-३ (९४९५८)
संचिन्तयामि कौन्तेयं रहो जिष्णुं जनार्दन ।
अतीव दुःखभागी स सततं पाण्डुनन्दनः ॥ १४-८८-४ (९४९५९)
किंनु तस्य शरीरेऽस्ति सर्वलक्षणपूजिते ।
अनिष्टं लक्षणं कृष्ण येन दुःखान्युपाश्नुते ॥ १४-८८-५ (९४९६०)
अतीवासुखभोगी स सततं कुन्तिनन्दनः ।
न हि पश्यामि बीभत्सोर्निन्द्यं गात्रेषु किंचन ।
श्रोतव्यं चेन्मयैतद्वै तन्मे व्याख्यातुमर्हसि ॥ १४-८८-६ (९४९६१)
इत्युक्तः स हृषीकेशो ध्यात्वा सुमहदन्तरम् ।
राजानं भोजराजन्यवर्धनो विष्णुरब्रवीत् ॥ १४-८८-७ (९४९६२)
न ह्यस्य नृपते किञ्चिदनिष्टमुपलक्षये ।
ऋते पुरुषसिंहस्य पिण्डिकेऽस्याधिके यतः ॥ १४-८८-८ (९४९६३)
स ताभ्यां पुरुषव्याघ्रो नित्यमध्वसु वर्तते ।
न चान्यदनुपश्यामि येनासौ दुःखभाजनम् ॥ १४-८८-९ (९४९६४)
इत्युक्तः पुरुषश्रेष्ठस्तदा कृष्णेन धीमता ।
प्रोवाच वृष्णिशार्दूलमेवमेतदिति प्रभो ॥ १४-८८-१० (९४९६५)
कृष्णा तु द्रौपदी कृष्णं तिर्यक्सासूयमैक्षत
प्रतिजग्राह तस्यास्तं प्रणयं चापि केशिहा ।
प्रख्युः सखा हृषीकेशः साक्षादिव धनंजयः ॥ १४-८८-११ (९४९६६)
तत्र भीमादयस्ते तु करवो याजकाश्च ये ।
रेमुः श्रुत्वा विचित्रां तां धनंजयकथां शुभाम् ॥ १४-८८-१२ (९४९६७)
तेषां कथयतामेव पुरुषोऽर्जुनसंकथाः ।
उपायाद्वचनाद्दूतो विजयस्य महात्मनः ॥ १४-८८-१३ (९४९६८)
सोभिगम्य कुरुश्रेष्ठं नमस्कृत्य च बुद्धिमान् ।

उपायातं नरव्याघ्रं फल्गुनं प्रत्यवेदयत् ॥१४-८८-१४ (९४९६९)
तच्छ्रुत्वा नृपतिस्तस्य हर्षबाष्पाकुलेक्षणः ।
प्रियाख्यानिमित्तं वै ददौ बहुधनं तदा ॥१४-८८-१५ (९४९७०)
ततो द्वितीये दिवसे महाञ्शब्दो व्यवर्धत ।
आगच्छति नरव्याघ्रे कौरवाणां धुरंधरे ॥१४-८८-१६ (९४९७१)
ततो रेणुः समुद्भूतो विबभौ तस्य वाजिनः ।
अभितो वर्तमानस्य यथोच्चैःश्रवसस्तथा ॥१४-८८-१७ (९४९७२)
तत्र हर्षकरीर्वाचो नराणां शुश्रुवेऽर्जुनः ।
दिष्ट्याऽसि पार्थ कुशली धन्यो राजा युधिष्ठिरः ॥१४-८८-१८ (९४९७३)
कोन्योहि पृथिवीं कृत्स्नां जित्वाहि युधि पार्थिवान्
चारयित्वा हयश्रेष्ठमुपागच्छेदृतेऽर्जुनात् ॥ १४-८८-१९ (९४९७४)
ये व्यतीता महात्मानो राजानः सगरादयः ।
तेषामपीदृशं कर्म न कदाचन शुश्रुम ॥१४-८८-२० (९४९७५)
नैतदन्ये करिष्यन्ति भविष्या वसुधाधिपाः ।
यत्त्वं कुरुकुलश्रेष्ठ दुष्करं कृतवानसि ॥१४-८८-२१ (९४९७६)
इत्येवं वदतां तेषां पुंसां कर्णसुखा गिरः ।
शृण्वन्विवेश धर्मात्मा फल्गुनो यज्ञसंस्तरम् ॥१४-८८-२२ (९४९७७)
ततो राजा सहामात्यः कृष्णश्च यदुनन्दनः ।
धृतराष्ट्रं पुरस्कृत्य तं प्रत्युद्ययतुस्तदा ॥१४-८८-२३ (९४९७८)
सोऽभिवाद्य पितुः पादौ धर्मराजस्य धीमतः ।
भीमादींश्चापि संपूज्य पर्यष्वजत केशवम् ॥१४-८८-२४ (९४९७९)
तैः समेत्यार्चितस्तांश्च प्रत्यर्च्याथ यथाविधि ।
विशश्राम महाबाहुस्तीरं लब्ध्वेव पारगः ॥ ॥१४-८८-२५ (९४९८०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

आश्वमेधिकपर्व - अध्याय ०८९
॥ श्रीः ॥
१४.८९. अध्यायः ८९

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
बभ्रुवाहनेनोलूपीचित्राङ्गदाभ्यां सह यागदिदृक्ष्या हास्तिनपुरं
प्रत्यागमनम् ॥ १ ॥
ततः स्वयं समागतव्यासाज्ञय युधिष्ठिरेण ऋत्विग्भिः

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एतस्मिन्नेव काले तु स राजा बभ्रुवाहनः ।
मातृभ्यां सहितो धीमान्कुरूनभ्याजगाम ह ॥ १४-८९-१ (९४९८१)
तत्र वृद्धान्यथावत्स कुरूनन्यांश्च पार्थिवान् ।
अभिवाद्य महाबाहुस्तैश्चापि प्रतिनन्दितः ।
प्रविवेश पितामह्याः कुन्त्या भवनमुत्तमम् ॥ १४-८९-२ (९४९८२)
स प्रविश्य महाबाहुः पाण्डवानां निवेशनम् ।
पितामहीमभ्यवन्दत्साम्ना परमवल्गुना ॥ १४-८९-३ (९४९८३)
तथा चित्राङ्गदा देवी कौरवस्यात्मजाऽपि च ।
पृथां कृष्णां च सहिते विनयेनोपजग्मतुः ।
सुभद्रां च यथान्यायं याश्चान्याः कुरुयोषितः ॥ १४-८९-४ (९४९८४)
ददौ कुन्ती ततस्ताभ्यां रत्नानि विविधानि च ।
द्रौपदी च सुभद्रा च याश्चाप्यन्या यदुस्त्रियः ॥ १४-८९-५ (९४९८५)
ऊषतुस्तत्र ते देव्यौ महार्ङशयनासने ।
सुपूजिते स्वयं कुन्त्या पार्थस्य हितकाम्यया ॥ १४-८९-६ (९४९८६)
स च राजा महातेजाः पूजितो बभ्रुवाहनः ।
धृतराष्ट्रं महीपालमुपतस्थे यताविधि ॥ १४-८९-७ (९४९८७)
युधिष्ठिरं च राजानं भीमदींश्चापि पाण्डवान् ।
उपागम्य महातेजा विनयेनाभ्यवादयत् ॥ १४-८९-८ (९४९८८)
स तैः प्रेम्या परिष्वक्तः पूजितश्च यथाविधि ।
धनं चास्मै ददुर्भूरि प्रीयमाणा महारथाः ॥ १४-८९-९ (९४९८९)
तथैव च महीपालः कृष्णं चक्रगदाधरम् ।
प्रद्युम्न इव गोविन्दं विनयेनोपतस्थिवान् ॥ १४-८९-१० (९४९९०)
तस्मै कृष्णो ददौ राज्ञे महार्हमतिपूजितम् ।
रथं हेमपरिष्कारं दिव्याश्वयुजमुत्तमम् ॥ १४-८९-११ (९४९९१)
धर्मराजश्च भीमश्च फल्गुनश्च यमौ तथा ।
पृथक्पृथक् च ते चैनं मानार्थाभ्यामयोजयन् ॥ १४-८९-१२ (९४९९२)
ततस्तृतीये दिवसे सत्यवत्यात्मजो मुनिः ।
युधिष्ठिरं समभ्येत्य वाग्मी वचनमब्रवीत् ॥ १४-८९-१३ (९४९९३)
अद्यप्रभृति कौन्तेय यज्ञस्य समयो हि ते ।
मुहूर्तो यज्ञियः प्राप्तश्चोदयन्तीह याजकाः ॥ १४-८९-१४ (९४९९४)
अहीनो नाम राजेन्द्र क्रतुस्तेऽयं विकल्पवान् ।

बहुत्वात्काञ्चनस्यास्य ख्यातो बहुसुवर्णकः ॥१४-८९-१५ (९४९९५)
एवमत्र महाराज दक्षिणाभिर्गुणीकुर ।
श्रीस्त्वां व्रजतु ते राजन्ब्राह्मणा ह्यत्र कारणम् ॥१४-८९-१६ (९४९९६)
त्रीनश्वमेधानत्र त्वं सम्प्राप्य बहुदक्षिणान् ।
ज्ञातिवध्याकृतं पापं प्रहास्यति नराधिप ॥१४-८९-१७ (९४९९७)
पवित्रं परमं चैतत्पावनानां च पावनम् ।
यदश्वमेधावभृथं प्राप्स्यसे कुरुनन्दन ॥१४-८९-१८ (९४९९८)
इत्युक्तः स तु तेजस्वी व्यासेनामितबुद्धिना ।
दीक्षां विवेश धर्मात्मा वाजिमेधाप्तये ततः ॥१४-८९-१९ (९४९९९)
ततो यज्ञं महाबाहुर्वाजिमेधं महाक्रतुम् ।
बह्वन्नदक्षिणं राजा सर्वकामगुणान्वितम् ॥१४-८९-२० (९५०००)
तत्र वेदविदो राजंश्चक्रुः कर्माणि याजकाः ।
परिक्रामन्ति शास्त्रज्ञा यतावद्द्विजसत्तमाः ॥१४-८९-२१ (९५००१)
न तेषां स्खलितं किञ्चिदासीदपहुतं तथा ।
क्रमयुक्तं च युक्तं च चक्रुस्तत्र द्विजर्षभाः ॥१४-८९-२२ (९५००२)
कृत्वा प्रवर्ग्यं धर्मज्ञा यथावद्द्विजसत्तमाः ।
चक्रस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः ॥१४-८९-२३ (९५००३)
अभिषूय ततो राजन्सोमं सोमपसत्तमाः ।
सवनान्यानुपूर्व्येण चक्रुः सास्त्रानुसारिणः ॥१४-८९-२४ (९५००४)
न तत्र कृपणः कश्चिन्न दरिद्रो बभूव ह ।
क्षुधितो दुःखितो वाऽपि प्राकृतो वाऽपि मानवः ॥१४-८९-२५ (९५००५)
भोजनं भोजनार्थिभ्यो दापयामास शत्रुहा ।
भीमसेनो महातेजाः सततं राजशासनात् ॥१४-८९-२६ (९५००६)
संस्तरे कुशलाश्चापि सर्वकार्याणि याजकाः ।
दिवसेदिवसे चक्रुर्यथाशास्त्रानुदर्शात् ॥१४-८९-२७ (९५००७)
नाषडङ्गविदत्रासीत्सदस्यस्तस्य धीमतः ।
नाव्रतो नानुपाध्यायो न च वादाविचक्षणः ॥१४-८९-२८ (९५००८)
ततो यूपोच्छ्रये प्राप्ते षड् बैल्वान्भरतर्षभ ।
खादिरान्बिल्वसमितांस्तावतः सर्ववर्णिनः ॥१४-८९-२९ (९५००९)
देवदारुमयौ द्वौ तु यूपौ कुरुपतेर्मखे ।
श्लेष्मातकमयं चैकं याजकाः समकल्पयन् ॥१४-८९-३० (९५०१०)
ग्सर्वानेतान्यथाशास्त्रं याजकाः समकारयन्।'
शोभार्थं चापरान्यूपान्काञ्चनान्भरतर्षभ ।
स भीमः कारयामास धर्मराजस्य शासनात् ॥ १४-८९-३१ (९५०११)
ते व्यराजन्त राजर्षे वासोभिरुपशोभिताः ।
महेन्द्रानुगता देवा यथा सप्तर्षिभिर्दिवि ॥१४-८९-३२ (९५०१२)

इष्टकाः काञ्चनीश्चात्र चयनार्तं कृता विभो ।
शुशुभे चयनं तच्च दक्षस्येव प्रजापतेः ॥ १४-८९-३३ (९५०१३)
चतुश्चित्यश्च तस्यासीदष्टादशकरात्मकः ।
स रुक्मपक्षो निचितस्त्रिकोणो गरुडाकृतिः ॥ १४-८९-३४ (९५०१४)
ततो नियुक्ताः पशवो यथाशास्त्रं मनीषिभिः ।
तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये ॥ १४-८९-३५ (९५०१५)
ऋषभाः शास्त्रपठितास्तथा जलचराश्च ये ।
सर्वांस्तानभ्ययुञ्जंस्ते तत्राग्निचयकर्मणि ॥ १४-८९-३६ (९५०१६)
यूपेषु नियता चासीत्पशूनां त्रिशती तथा ।
अश्वरत्नोत्तरा यज्ञे कौन्तेयस्य महात्मनः ॥ १४-८९-३७ (९५०१७)
स यज्ञः शुशुभे तस्य साक्षाद्देवर्षिसंकुलः ।
गन्धर्वगणसंकीर्णः शोभितोऽप्सरसां गणैः ॥ १४-८९-३८ (९५०१८)
स किंपुरुषसंकीर्णः किंनरैश्चोपशोभितः ।
सिद्धविप्रनिवासैश्च समन्तादभिसंवृतः ॥ १४-८९-३९ (९५०१९)
तस्मिन्सदसि नित्यास्तु व्यासशिष्या द्विजर्षभाः ।
सर्वशास्त्रप्रणेतारः कुशला यज्ञकर्मसु ॥ १४-८९-४० (९५०२०)
नारदश्च बभूवात्र तुंबुरुश्च महाद्युतिः ।
विश्वावसुश्चित्रसेनस्तथाऽन्ये गीतकोविदाः ॥ १४-८९-४१ (९५०२१)
गन्धर्वा गीतकुशला नृत्येषु च विशारदाः ।
रमयन्ति स्म तान्विप्रान्यज्ञकर्मान्तरेषु वै ॥ ॥ १४-८९-४२ (९५०२२)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-८९-१५ अहीनः अह्नां सोमयागानां बहूनां समूहोऽहीनः । न हीनः द्रव्यादिना इति वा ॥
७-८९-२३ अभिषव सोमवल्ल्याः कण्डनम् ॥
७-८९-२४ सोमं सोमवल्लीरसम् । सवनानि प्रातःसवनादीनि ॥
७-८९-२७ संस्तरे इष्टकानां चयनाख्ये स्थण्डिलरचने ॥
७-८९-२९ वर्णिनः पलाशकाष्ठमयाः ॥

आश्वमेधिकपर्व - अध्याय ०९०
॥ श्रीः ॥
१४.९०. अध्यायः ९०

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

युधिष्ठिरेणाश्वमेधसमापनानन्तरं राज्ञां यथोचितं
संमानपूर्वकं स्वस्वदेशान्प्रति प्रस्थापनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
श्रपयित्वा पशूनन्यान्विधिवद्द्विजसत्तमाः ।
तं तुरङ्गं यथाशास्त्रमालभन्त द्विजातयः ॥ १४-९०-१ (९५०२३)
ततः संज्ञप्य तुरगंक विधिवद्याजकर्षभाः ।
उपसंवेशयांचक्रुस्ततस्तां द्रुपदात्मजाम् ।
कलाभिस्तिसृभी राजन्यथाविधि मनस्विनीम् ॥ १४-९०-२ (९५०२४)
उद्धृत्य तु वपां तस्य यथाशास्त्रं द्विजातयः ।
श्रपयामासुरव्यग्रा विधिवद्भरतर्षभ ॥ १४-९०-३ (९५०२५)
तं वपाधूमगन्धं तु धर्मराजः सहानुजैः ।
उपाजिघ्रद्यथासास्त्रं सर्वपापापहं तदा ॥ १४-९०-४ (९५०२६)
शिष्टान्यङ्गानि यान्यासंस्तस्याश्वस्य नराधिप ।
तान्यग्रौ जुहुवुर्धीराः समस्ताः षोडशर्त्विजः ॥ १४-९०-५ (९५०२७)
संस्थाप्यैवं तस्य राज्ञस्तं यज्ञं शक्रतेजसः ।
व्यासः सशिष्यो भगवान्वर्धयामास तं नृपम् ॥ १४-९०-६ (९५०२८)
ततो युधिष्ठिरः प्रादात्सदस्येभ्यो यथाविधि ।
कोटीः सहस्रं निष्काणां व्यासाय तु वसुंधराम् ॥ १४-९०-७ (९५०२९)
प्रतिगृह्य धरां राजन्व्यासः सत्यवतीसुतः ।
अब्रवीद्भरतश्रेष्टं धर्मराजं युधिष्ठिरम् ॥ १४-९०-८ (९५०३०)
वसुधा भवतस्त्वेषां संन्यस्ता राजसत्तम ।
निष्क्रयो दीयतां मह्यं ब्राह्मणा हि धनार्थिना ॥ १४-९०-९ (९५०३१)
युधिष्ठिरस्तु तान्विप्रान्प्रत्युवाच महामनाः ।
भ्रातृभिः सहितो धीमान्मध्ये राज्ञां महात्मनाम् ॥ १४-९०-१० (९५०३२)
अश्वमेधे महायज्ञे पृथिवी दक्षिणा स्मृता ।
अर्जुनेन जिता चेयमृत्विग्भ्यः प्रापिता मया ॥ १४-९०-११ (९५०३३)
वनं प्रवेक्ष्ये विप्राग्र्या विभजध्वं महीमिमाम् ।
चतुर्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः ॥ १४-९०-१२ (९५०३४)
नाहमादातुमिच्छामि ब्रह्मस्वं द्विजसत्तमाः ॥
इदं नित्यं मनो विप्रा भ्रातॄणां चैव मे सदा ॥ १४-९०-१३ (९५०३५)
इत्युक्तवति तस्मिंस्तु भ्रातरो द्रौपदी च सा ।

एवमेतदिति प्राहुस्तदभूद्रोमहर्षणम् ॥१४-९०-१४ (९५०३६)
ततोऽन्तरिक्षे वागासीत्साधुसाध्विति भारत ।
तथैव द्विजसङ्घानां शंसतां विबभौ स्वनः ॥१४-९०-१५ (९५०३७)
द्वैपायनस्तथा कृष्णः पुनरेव युधिष्ठिरम् ।
प्रोवाच मध्ये विप्राणामिदं सम्पूजयन्मुनिः ॥१४-९०-१६ (९५०३८)
दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहम् ।
हिरण्यं दीयतामेभ्यो ब्राह्मणेभ्यो धराऽस्तु ते ॥१४-९०-१७ (९५०३९)
ततोऽब्रवीद्वासुदेवो धर्मराजं युधिष्ठिरम् ।
यथाऽऽह भगवान्व्यासस्तथा त्वं कर्तुमर्हसि ॥१४-९०-१८ (९५०४०)
इत्युक्तः स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिः सह ।
कोटिं कोटिं गवां प्रादाद्दक्षिणां त्रिगुणीकृताम् ॥१४-९०-१९ (९५०४१)
न करिष्यति तल्लोके कश्चिदन्यो नराधिपः ।
यत्कृतं कुरुराजेन मरुत्तस्यानुकुर्वता ॥१४-९०-२० (९५०४२)
प्रतिगृह्य तु तद्द्रव्यं कृष्णद्वैपायनो मुनिः ।
ऋत्विग्भ्यः प्रददौ विद्वांश्चतुर्धा व्यभजंश्च ते ॥१४-९०-२१ (९५०४३)
धरण्या निष्क्रयं दत्त्वा तद्धिरण्यं युधिष्ठिरः ।
दूतपापो जितस्वर्गो मुमुदे भ्रातृभिः सह ॥१४-९०-२२ (९५०४४)
ऋत्विजस्तमपर्यन्तं सुवर्णनिचयं तथा ।
व्यभजन्त द्विजातिभ्यो यथोत्साहं यथासुखम् ॥१४-९०-२३ (९५०४५)
यज्ञवाटे च यत्किञ्चिद्धिरण्यं सवि भूषणम् ।
तोरणानि च यूपांश्च घटान्पात्रीस्तथेष्टकाः ।
युधिष्ठिराभ्यनुज्ञाताः सर्वं तद्व्यभजन्द्विजाः ॥ १४-९०-२४ (९५०४६)
अनन्तरं द्विजातिभ्यः क्षत्रिया जह्रिरे वसु ।
तथा विट्शूद्रसङ्घाश्च तथाऽन्ये म्लेच्छजातयः ।
ग्कालेन महता जह्रुस्तत्सुवर्णं ततस्ततः ॥' १४-९०-२५ (९५०४७)
ततस्ते ब्राह्मणाः सर्वे मुदिता जग्मुरालयान् ।
तर्पिता वसुना तेन धर्मिराजेन धीमिता ॥१४-९०-२६ (९५०४८)
स्वमंशं भगवान्व्यासः कुन्त्यै पादाभिवादितः ।
प्रददौ तस्य महतो हिरण्यस्य महाद्युतिः ॥१४-९०-२७ (९५०४९)
श्वशुरात्प्रीतिदायं तं प्राप्य सा प्रीतमानसा ।
चकार पुण्यकं तेन सुमहत्सङ्घशः पृथा ॥१४-९०-२८ (९५०५०)
गत्वा त्ववभृथं राजा विपाप्मा भ्रातृभिः सह ।
सभाज्यमानः शुशुभे महेन्द्रस्त्रिदशैरिव ॥१४-९०-२९ (९५०५१)
पाण्डवाश्च महीपालैः समेतैरभिसंवृताः ।
अशोभन्त महाराज ग्रहस्तारागणैरिव ॥१४-९०-३० (९५०५२)
राजभ्योपि ततः प्रादाद्रत्नानि विविधानि च ।

गजानश्वानलङ्कारान्स्त्रियो वासांसि काञ्चनम् ॥१४-९०-३१ (९५०५३)
तद्धनौघमपर्यन्तं पार्थः पार्थिवमण्डले ।
विसृजञ्शुशुभे राजन्यथा वैश्रवणस्तथा ॥१४-९०-३२ (९५०५४)
आनीय च तथा वीरं राजानं बभ्रुवाहनम् ।
प्रदाय विपुलं वित्तं गृहात्प्रास्थापयनत्तदा ॥१४-९०-३३ (९५०५५)
दुःशलायाश्च तं पौत्रं बालकं भरतर्षभ ।
स्वराज्येऽथ पितुर्धामान्स्वसुः प्रीत्या न्वयेशयत् ॥१४-९०-३४ (९५०५६)
नृपतींश्चैव तान्सर्वान्सुविभक्तान्सुपूजितान् ।
प्रस्थापयामास वशी कुरुराजो युधिष्ठिरः ॥१४-९०-३५ (९५०५७)
गोविन्दं च महात्मानं बलदेवं महाबलम् ।
तथाऽन्यान्वृष्णिवीरांश्च प्रद्युम्नाद्यान्सहस्रशः ॥१४-९०-३६ (९५०५८)
पूजयित्वा महाराज यथाविधि महाद्युतिः ।
भ्रातृभिः सहितो राजा प्रास्थापरयदरिंदमः ॥१४-९०-३७ (९५०५९)
एवं बभूव यज्ञः स धर्मिराजस्य धीमतः ।
बह्वन्नधनरत्नौघः सुरामैरेयसागरः ॥१४-९०-३८ (९५०६०)
सर्पिःपङ्का ह्रदा यत्र बभूवुश्चान्नपर्वताः ।
रसालकर्दमा नद्यो बभूवुर्भरतर्षभ ॥१४-९०-३९ (९५०६१)
भक्ष्यखाण्डवरागाणां क्रियतां भुज्यतां तथा ।
पशूनां वध्यतां चैव नान्तं ददृशिरे जनाः ॥१४-९०-४० (९५०६२)
मत्तप्रमत्तमुदितं सुप्रीतयुवतीजनम् ।
मृदङ्गशङ्खनादैस्च मनोरममभूत्तदा। १४-९०-४१ (९५०६३)
दीयतां भुज्यतां चापि तत्र शब्दो महानभूत् ।
दीयतां दीयतां चेति दिवारात्रमवारितम् ॥१४-९०-४२ (९५०६४)
तं महोत्सवसंकाशं हृष्टपुष्टजनाकुलम् ।
कथयन्ति स्म पुरुषा नानादेशनिवासिनः ॥१४-९०-४३ (९५०६५)
वर्षित्वा धनधाराभिः कामै रत्नै रसैस्तथा ।
विपाप्मा भरतश्रेष्ठः कृतार्थः प्राविशत्पुरम् ॥ ॥१४-९०-४४ (९५०६६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९०-२ संज्ञप्य हिंसित्वा तुरगम् । तस्य समीपे तिसृभिः कलाभिः
कलनाभिः मन्त्रद्रव्यश्रद्धाख्याभिरुपेतां द्रौपदीं उपसंवेशयां
चक्रुः ॥
७-९०-५ अङ्गानि हृदयजिह्वावक्षआदीनी ॥

७-९०-६ संस्थाप्य समाप्य ॥
७-९०-७ तुशब्दश्चार्थे ।तेन सर्वेभ्यो वसुधरां ददावित्यर्थः ॥
७-९०-२५ अनन्तरं द्विजातिभ्यः विप्रेषु गृहीत्वा निवृत्तेषु शिष्टात् क्षत्रियादयो गहीतवन्त इत्यर्थः ॥
७-९०-३८ मैरेयं वृक्षजं मद्यम् ॥
७-९०-४० पिप्पलीशुण्ठीयुक्तो मुद्गयूषः खाण्डवः स एव शर्करायुक्तो रागः

आश्वमेधिकपर्व - अध्याय ०९१
॥ श्रीः ॥
१४.९१. अध्यायः ९१

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
वैशम्पायनेन जनमेजयंप्रति नकुलाख्यानकथनारम्भः ॥ १ ॥
अश्वमेधावसाने बिलान्निस्सृतेन कनकपार्श्वेन केनचिन्नकुलेन सदस्यान्प्रति उञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानप्रशंसनपूर्वकं युधिष्ठिराश्वमेधगार्हणम् ॥ २ ॥
।तथा सदस्यचोदनया तत्कथनोपक्रमः ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
पितामहस्य मे यज्ञे धर्मराजस्य धीमतः ।
यदाश्चर्यमभूत्किञ्चित्तद्भवान्वक्तुमर्हति ॥ १४-९१-१ (९५०६७)
वैशम्पायन उवाच।१४-९१-२क्ष् (७९२३)
श्रूयतां राजशार्दूल महदाश्चर्यमुत्तमम् ।
अश्वमेधे महायज्ञे निवृत्ते यदभूत्प्रभो ॥ १४-९१-२ (९५०६८)
तर्पितेषु द्विजाग्र्येषु ज्ञातिसम्बन्धिबन्धुषु ।
दीनान्धकृपणे वाऽपि तदा भरतसत्तम ॥ १४-९१-३ (९५०६९)
घुष्यमाणे महादाने दिक्षु सर्वासु भारत ।
पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्धनि ॥ १४-९१-४ (९५०७०)
बिलान्निस्सृत्य नकुलो रुक्मपार्श्वस्तदाऽनघः ।
वज्राशनिसमं नादममुञ्चद्वसुधाधिप ॥ १४-९१-५ (९५०७१)
सकृदुत्सृज्य तन्नादं त्रासयानो मृगद्विजान् ।
मानुषं वचनं प्राह पुष्पोपरिशयो महान् ॥ १४-९१-६ (९५०७२)
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः ।

उच्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥१४-९१-७ (९५०७३)
तस्य तद्वचनं श्रुत्वा नकुलस्य विशांपते ।
विस्मयं परमं जग्मुः सर्वे ते ब्राह्मणर्षभाः ॥१४-९१-८ (९५०७४)
ततः समेत्य नकुलं पर्यपृच्छन्त ते द्विजाः ॥
कुतस्त्वं समनुप्राप्तो यज्ञं साधुसमागमम् ॥१४-९१-९ (९५०७५)
किं बलं परमं तुभ्यं श्रुतं किं परायणम् ।
कथं भवन्तं विद्याम यो नो यज्ञं विगर्हसे ॥१४-९१-१० (९५०७६)
अविलुप्यागमं कृत्स्नं विविधैर्यज्ञियैः कृतम् ।
यथागमं यथान्यायं कर्तव्यं च तथा कृतम् ॥१४-९१-११ (९५०७७)
पूजार्हाः पूजिताश्चात्र विधिवच्छास्त्रदर्शात् ।
मन्त्राहुतिहुतश्चाग्निर्दत्तं देयममत्सरम् ॥१४-९१-१२ (९५०७८)
तुष्टा द्विजातयश्चात्र दानैर्बहुविधैरपि ।
क्षत्रियाश्चि सुयुद्धेन श्राद्धैश्चापि पितामहाः ॥१४-९१-१३ (९५०७९)
पालनेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः ।
अनुक्रोशैस्तता शूद्रा दानशेषैः पृथग्जनाः ॥१४-९१-१४ (९५०८०)
ज्ञातिसम्बन्धिनस्तुष्टाः शौचेन च नृपस्य नः ।
देवा हविर्भिः पुण्यैस्च रक्षणैः शरणागताः ॥१४-९१-१५ (९५०८१)
यदत्र तथ्यं तदब्रूहि सत्यंसत्यं द्विजातिषु ।
यथाश्रुतं यथादृष्टं पृष्टो ब्राह्मणकाम्यया ॥१४-९१-१६ (९५०८२)
श्रद्धेयवाक्यः प्राज्ञस्त्वं दिव्यं रूपं बिभर्षि च ।
समागतश्च विप्रैस्त्वं तद्भवान्वक्तुमर्हति ॥१४-९१-१७ (९५०८३)
इति पृष्टो द्विजैस्तैः स प्रहसन्नकुलोऽब्रवीत् ।
नैषा मृषामया वाणी प्रोक्ता दर्पेण वा द्विजाः ॥१४-९१-१८ (९५०८४)
यन्मयोक्तमिदं वाक्यं युष्माभिश्चाप्युपश्रुतम् ।
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो द्विजर्षभाः ॥१४-९१-१९ (९५०८५)
इत्यवश्यं मयैतद्वो वक्तव्यं द्विजसत्तमाः ।
शृणुताव्यग्रमनसः शंसतो मे यथातथम् ॥१४-९१-२० (९५०८६)
अनुभूतं च दृष्टं च यन्मयाऽद्भुतमुत्तमम् ।
उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥१४-९१-२१ (९५०८७)
स्वर्गं येन द्विजाः प्राप्तः सभार्यः ससुतस्नुषः ।
यथा चार्धं शरीरस्य ममेदं काञ्चनीकृतम् ॥ ॥१४-९१-२२ (९५०८८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
एकनवतितमोऽध्यायः ॥९१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९१-५ नीलाक्षस्तत्र नकुल इति झ पाठः ॥
७-९१-६ धृष्टो बिलशयो महान् इति झ पाठः ॥
७-९१-२२ ममेदं यत्रेति शेषः ॥

आश्वमेधिकपर्व - अध्याय ०९२
॥ श्रीः ॥
१४.९२. अध्यायः ९२

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
नकुलेन युधिष्ठिरादीन्प्रति
सकुटुम्बस्योञ्छवृत्तेर्ब्राह्मणस्य धर्मपुरुषाय
सक्तुप्रस्तदानमहिमवर्णनपूर्वकंपुनस्तत्रैवान्तर्धानम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

नकुल उवाच ।
हन्त वः कथयिष्यामि दानस्य फलमुत्तमम् ।
न्यायलब्धस्य सूक्ष्मस्य विप्रदत्तस्य यद्द्विजाः ॥ १४-९२-१ (९५०८९)
धर्मक्षेत्रे कुरुक्षेत्रे धर्मज्ञैर्बहुभिर्वृते ।
उञ्छवृत्तिर्द्विजः कश्चित्कापोतिरभवत्पुरा ॥ १४-९२-२ (९५०९०)
सभार्यः सहपुत्रेण सस्नुषस्तपसि स्थितः ।
बभूव शुक्लवृत्तः स धर्मात्मा नियतेन्द्रियः ॥ १४-९२-३ (९५०९१)
षष्ठे काले सदा विप्रो भुङ्क्ते तैः सह संवृतः ॥ १४-९२-४ (९५०९२)
षष्ठे काले कदाचित्तु तस्याहारो न विद्यते ।
भुङ्क्तेऽन्यस्मिन्कदाचित्स षष्ठे काले द्विजोत्तमः ॥ १४-९२-५ (९५०९३)
कपोतधर्मिणस्तस्य दुर्भिक्षे सति दारुणे ।
नाविद्यत तदा विप्राः संचयस्तन्निबोधत ॥ १४-९२-६ (९५०९४)
क्षीणाषैदिसमावापो द्रव्यहीनोऽभवत्तदा ।
कालेकालेऽस्य सम्प्राप्ते नैव विद्येत भोजनम् ॥ १४-९२-७ (९५०९५)
क्षुधापरिगताः सर्वे प्रातिष्ठन्त तदा तु ते ।
उञ्छं तदा शुक्लपक्षे मध्यं तपति भास्करे ॥ १४-९२-८ (९५०९६)
उष्णार्तश्च क्षुधार्तश्च विप्रस्तपसि संस्थितः ।
उञ्छमप्राप्तवानेव ब्राह्मणः क्षुच्छ्रमान्वितः ॥ १४-९२-९ (९५०९७)
स तथैव क्षुधाविष्टः सार्धं परिजनेन ह ।
क्षपयामास तं कालं कृच्छ्रप्राणो द्विजोत्तमः ॥ १४-९२-१० (९५०९८)

अथ षष्ठे गते काले यवप्रस्थमुपार्जयन् ।
यवप्रस्थं तु तं सक्तूनकुर्वन्त तपस्विनः ॥१४-९२-११ (९५०९९)
कृतजप्याह्निकास्ते तु हुत्वा चाग्निं यथाविधि ।
कुडवंकुडवं सर्वे व्यभजन्त तपस्विनः ॥१४-९२-१२ (९५१००)
अथागच्छद्द्विजः कश्चिदतिथिर्भुञ्जतां तदा ।
ते तं दृष्ट्वाऽतिथिं प्राप्तं प्रहृष्टमनसोऽभवन् ॥१४-९२-१३ (९५१०१)
तेऽभिवाद्य सुखप्रश्नं पृष्ट्वा तमतिथिं तदा ।
विशुद्धमनसो दान्ताः श्रद्धादमसमन्विताः ॥१४-९२-१४ (९५१०२)
अनसूया गतक्रोधाः साधवो वीतमत्सराः ।
त्यक्तमानमदक्रोधा धर्मज्ञा द्विजसत्तमाः ॥१४-९२-१५ (९५१०३)
सब्रह्मचर्यं गोत्रं ते तस्य ख्यात्वा परस्परम् ।
कुटीं प्रवेशयामासुः क्षुधार्तमतिथिं तदा ॥१४-९२-१६ (९५१०४)
इदमर्घ्यं च पाद्यं च बृसी चेयं तवानघ ।
शुचयः सक्तवश्चेमे नियमोपार्जिताः प्रभो ।
प्रतिगृह्णीष्व भद्रं ते मया दत्ता द्विजर्षभ ॥ १४-९२-१७ (९५१०५)
इत्युक्तः प्रतिगृह्याथ सक्तूनां कुडवं द्विजः ।
भक्षयामास राजेन्द्र न च तुष्टिं जगाम सः ॥१४-९२-१८ (९५१०६)
स उञ्छवृत्तिस्तं प्रेक्ष्य क्षुधापरिगतं द्विजम् ।
आहारं चिन्तयामास कथं तुष्टो भवेदिति ॥१४-९२-१९ (९५१०७)
तस्य भार्याऽब्रवीद्वाक्यं मद्भागो दीयतामिति ।
गच्छत्वेष यथाकामं परितुष्टो द्विजोत्तमः ॥१४-९२-२० (९५१०८)
इति ब्रुवन्तीं तां साध्वीं भार्यां स द्विजसत्तमः ।
क्षउधापरिगतां ज्ञात्वा तान्सक्तून्नाभ्यनन्दत ॥१४-९२-२१ (९५१०९)
आत्मानुमानतो विद्वान्स तु विप्रर्षभस्तदा ।
जानन्वृद्धां क्षुधार्तां च श्रान्तां ग्लानां तपस्विनीम् ।
त्वगस्थिभूता वेपन्तीं ततो भार्यामुवाच ह ॥ १४-९२-२२ (९५११०)
अपि कीटपतङ्गानां मृगाणां चैव शोभने ।
स्त्रियो रक्ष्याश्च पोष्याश्च न त्वेवं वक्तुमर्हसि ॥१४-९२-२३ (९५१११)
अनुकंप्यो नरः पत्न्या पुष्टो रक्षित एव च ।
प्रपतेद्यशसो दीप्तात्स च लोकान्न चाप्नुयात् ॥१४-९२-२४ (९५११२)
धर्मकामार्थकार्याणि शुश्रूषाकुलसंततिः ।
दारेष्वदीनो धर्मस्च पितॄणामात्मनस्तथा ॥१४-९२-२५ (९५११३)
न वेत्ति कर्मतो भार्यारक्षणे योऽक्षमः पुमान् ।
अयशो महदाप्नोति नारकांश्चैव गच्छति ॥१४-९२-२६ (९५११४)
इत्युक्ता सा ततः प्राह धर्मार्थौ नौ समौ द्विज ।
सक्तुप्रस्थचतुर्भागं गृहाणेमं प्रसीद मे ॥१४-९२-२७ (९५११५)

सत्यं रतिश्च धर्मश्च स्वर्गश्च गुणनिर्जितः ।
स्त्रीणां पतिसमाधीनं काङ्क्षितं च द्विजर्षभ ॥१४-९२-२८ (९५११६)
ऋतुर्मातु पितुर्बीजं दैवतं परमं पतिः ।
भर्तुः प्रसादान्नारीणां रतिपुत्रफलं तथा ॥१४-९२-२९ (९५११७)
पालनाद्धि पतिस्त्वं मे भर्ताऽसि भरणाच्च मे ।
पुत्रप्रदानाद्वरदस्तस्मात्सक्तून्प्रयच्छ मे ॥१४-९२-३० (९५११८)
जरापरिगतो वृद्धः क्षुधार्तो दुर्बलो भृशम् ।
उपवासपरिश्रान्तो यदा त्वमपि कर्शितः ॥१४-९२-३१ (९५११९)
इत्युक्तः स तया सक्तून्प्रगृह्येदं वचोऽब्रवीत् ।
द्विजि सक्तूनिमान्भूयः प्रतिगृह्णीष्व सत्तम ॥१४-९२-३२ (९५१२०)
स तान्प्रगृह्य भुक्त्वा च न तुष्टिमगमद्द्विजः ।
तमुञ्छवृत्तिरालक्ष्य ततश्चिन्तापरोऽभवत् ॥१४-९२-३३ (९५१२१)
पुत्र उवाच।१४-९२-३४क्ष् (७९२४)
सक्तूनिमान्प्रगृह्य त्वं देहि विप्राय सत्तम ।
इत्येव सुकृतं मन्ये तस्मादेतत्करोम्यहम् ॥१४-९२-३४ (९५१२२)
भवान्हि परिपाल्यो मे सर्वदैव प्रयत्नतः ।
साधूनां काङ्क्षितं यस्मात्पितुर्वृद्धस्य पालनम् ॥१४-९२-३५ (९५१२३)
पुत्रार्थो विहितो ह्येष वार्धके परिपालनम् ॥
श्रुतिरेषा हि विप्रर्षे त्रिषु लोकेषु शाश्वती ॥१४-९२-३६ (९५१२४)
प्राणाधारणमात्रेण शक्यं कर्तुं तपस्त्वया ।
प्राणो हि परमो धर्मः स्थितो देहेषु देहिनाम् ॥१४-९२-३७ (९५१२५)
पितोवाच।१४-९२-३८क्ष् (७९२५)
अपि वर्षसहस्री त्वं बाल एव मतो मम ।
उत्पाद्य पुत्रं हि पिता कृतकृत्यो भवेत्सुतात् ॥१४-९२-३८ (९५१२६)
बालानां क्षुद्बलवती जानाम्येतदहं प्रभो ।
वृद्धोऽहं धारयिष्यामि त्वं बली भव पुत्रक ॥१४-९२-३९ (९५१२७)
जीर्णेन वयसा पुत्र न मां क्षुद्बाधतेऽपि च ।
दीर्घकालं तपस्तप्तं न मे मरणतो भयम् ॥१४-९२-४० (९५१२८)
पुत्र उवाच।१४-९२-४१क्ष् (७९२६)
अपत्यमस्मि ते पुंसस्त्राणात्पुत्र इति स्मृतः ।
आत्मा पुत्रः स्मृतस्तस्मात्त्राह्यात्मानमिहात्मना ॥१४-९२-४१ (९५१२९)
पितोवाच।१४-९२-४२क्ष् (७९२७)
रूपेण सदृशस्त्वं मे शीलेन च दमेन च ।
परीक्षितश्च बहुधा सक्तूनादद्मि ते सुत ॥१४-९२-४२ (९५१३०)
इत्युक्त्वाऽऽदाय तान्सक्तून्प्रीतात्मा द्विजसत्तमः ।
प्रहसन्निव विप्राय स तस्मै प्रददौ तदा ॥१४-९२-४३ (९५१३१)

भुक्त्वा तानपि सक्तून्स नैव तुष्टो बभूव ह ।
उच्छवृत्तिस्तु धर्मात्मा व्रीडामनुजगाम ह ॥१४-९२-४४ (९५१३२)
तं वै वधूः स्थिता साध्वी ब्राह्मणिप्रियकाम्यया ।
सक्तूनादाय संहृष्टा श्वशुरं वाक्यमब्रवीत् ॥१४-९२-४५ (९५१३३)
संतानात्तव संतानं मम विप्र भविष्यति ।
सक्तूनिमानतिथये गृहीत्वा सम्प्रयच्छ मे ॥१४-९२-४६ (९५१३४)
तव प्रसादान्निर्वृत्ता मम लोकाः किलाक्षयाः ।
पुत्रेण तानवाप्नोति यत्र गत्वा न शोचति ॥१४-९२-४७ (९५१३५)
धर्माद्या हि यथा त्रेता वह्नित्रेता तथैव च ।
तथैव पुत्रपौत्राणां स्वर्गस्त्रेता किलाक्षयः ॥१४-९२-४८ (९५१३६)
पितॄणात्तारयति पुत्र इत्यनुशुश्रुम ।
पुत्रपौत्रैश्च नियतं सादुलोकानुपाश्नुते ॥१४-९२-४९ (९५१३७)
श्वशुर उवाच।१४-९२-५०क्ष् (७९२८)
वातातपविशीर्णाङ्गीं त्वां विवर्णां निरीक्ष्य वै ।
कर्शितां सुव्रताचारे क्षुधाविह्वलचेतसम् ॥१४-९२-५० (९५१३८)
कथं सक्तून्ग्रहीष्यामि भूत्वा धर्मोपघातकः ।
कल्याणवृत्ते कल्याणि नैव त्वं वक्तुमर्हसि ॥१४-९२-५१ (९५१३९)
षष्ठे काले व्रतवतीं शौचशीलतपोन्विताम् ।
कृच्छ्रवृत्तिं निराहारां द्रक्ष्यामि त्वां कथं शुभे ॥१४-९२-५२ (९५१४०)
बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया ।
उपवासपरिश्रान्ता त्वं हि बान्धवनन्दिनी ॥१४-९२-५३ (९५१४१)
स्नुषोवाच।१४-९२-५४क्ष् (७९२९)
गुरोर्मम गुरुस्त्वं वै यतो दैवतदैवतम् ।
देवातिदेवस्तस्मात्त्वं सक्तूनादत्स्व मे प्रभो ॥१४-९२-५४ (९५१४२)
देहः प्राणश्च धर्मश्च शुश्रूषार्थमिदं गुरोः ।
तव विप्र प्रसादेन लोकान्प्राप्स्यामहे शुभान् ॥१४-९२-५५ (९५१४३)
अवेक्ष्या इति कृत्वाऽहं दृढभक्तेति वा द्विज ।
चिन्त्या ममेयमिति वा सक्तूनादानुमर्हसि ॥१४-९२-५६ (९५१४४)
श्वशुर उवाच।१४-९२-५७क्ष् (७९३०)
अनेन नित्यं साध्वी त्वं शीलवृत्तेन शोभसे ।
या त्वं धर्मव्रतोपेता गुरुवृत्तिमवेक्षसे ॥१४-९२-५७ (९५१४५)
तस्मात्सक्तून्ग्रहीष्यामि वधु नार्हसि वञ्चनाम् ।
गणयित्वा महाभागे त्वां हि धर्मभृतां वरे ॥१४-९२-५८ (९५१४६)
इत्युक्त्वा तानुपादाय सक्तून्प्राददाद्द्विजातये ।
ततस्तुष्टोऽभवद्विप्रस्तस्य साधोर्महात्मनः ॥१४-९२-५९ (९५१४७)
प्रीतात्मा स तु तं वाक्यमिदमाह द्विजर्षभम् ।

वाग्मी तदा द्विजश्रेष्टो धर्मः पुरुषविग्रहः ॥१४-९२-६० (९५१४८)
शुद्धेनि तव दानेन न्यायोपात्तेन धर्मतः ।
यथाशक्ति विसृष्टेन प्रीतोस्मि द्विजसत्तम ॥१४-९२-६१ (९५१४९)
अहो दानं घुष्यते ते स्वर्गे स्वर्गनिवासिभिः ।
गगनात्पुष्पवर्षं च पश्येदं पतितं भुवि ॥१४-९२-६२ (९५१५०)
सुरर्षिदेवगन्धर्वा ये च देवपुरःसराः ।
स्तुवन्तो देवदूताश्च स्थिता दानेन विस्मिताः ॥१४-९२-६३ (९५१५१)
ब्रह्मर्षयो विमानस्था ब्रह्मलोकचरश्च ये ।
काङ्क्षन्ते दर्शनं तुभ्यं दिवं व्रज द्विजर्षभ ॥१४-९२-६४ (९५१५२)
पितृलोकगताः सर्वे तारिताः पितरस्त्वया ।
अनागताश्च बहवः सुबहूनि युगान्युत ॥१४-९२-६५ (९५१५३)
ब्रह्मचर्येण दानेन यज्ञेनि तपसा तथा ।
अगह्वरेण धर्मेण तस्माद्गच्च दिवं द्विज ॥१४-९२-६६ (९५१५४)
श्रद्धया परया यरत्वं तपश्चरसि सुव्रत ।
तस्माद्देवास्तवानेन प्रीता ब्राह्मणसत्तम ॥१४-९२-६७ (९५१५५)
सर्वमेतद्धि यस्मात्ते दत्तं शुद्धेन चेतसा ।
कृच्छ्रकाले ततः स्वर्गो विजितः कर्मणा त्वया ॥१४-९२-६८ (९५१५६)
क्षुधा निर्णुदति प्रज्ञां धर्मबुद्धिं व्यपोहति ।
क्षुधापरिगतज्ञानो धृतिं त्यजति चैव ह ॥१४-९२-६९ (९५१५७)
बुभुक्षां जयते यस्तु स स्वर्गं जयते ध्रुवम् ।
यदा दानरुचिः स्याद्वि तदा धर्मो न सीदति ॥१४-९२-७० (९५१५८)
अनवेक्ष्य सुतस्नेहं कलत्रस्नेहमेव च ।
धर्ममेव गुरं ज्ञात्वा तृष्णा न गणिता त्वया ॥१४-९२-७१ (९५१५९)
द्रव्यागमो नृणां सूक्ष्मः पात्रे दानं ततः परम् ।
कालः परतरो दानाच्छ्रद्धा चैव ततः परा ॥१४-९२-७२ (९५१६०)
स्वर्गद्वारं सुसूक्ष्मं हि नरैर्माहान्नि दृश्यते ।
सङ्गर्गलं लोभकीलं रागगुप्तं दुरासदम् ॥१४-९२-७३ (९५१६१)
तं तु पश्यन्ति पुरुषा जितदक्रोधा जितेन्द्रियाः ।
ब्राह्मणास्तपसा युक्ता यथाशक्ति प्रदायिनः ॥१४-९२-७४ (९५१६२)
सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च ।
दद्यादपश्च यः शक्त्या सर्वे तुल्यफलाः स्मृताः ॥१४-९२-७५ (९५१६३)
रन्तिदेवो हि नृपतिरपः प्रादादकिंचनः ।
शुद्धेन मनसा विप्र नाकपृष्ठं ततो गतः ॥१४-९२-७६ (९५१६४)
न धर्मः प्रीयते तात दानैर्दत्तैर्महाफलैः ।
न्यायलब्धैर्यथा सूक्ष्मैः श्रुद्धापूतैः स तुष्यति ॥१४-९२-७७ (९५१६५)
गोप्रदानसहस्राणि द्विजेभ्योऽदान्नृगो नृपः ।

एकां दत्त्वा स पारक्यां नरकं समपद्यत ॥१४-९२-७८ (९५१६६)
आत्ममांसप्रदानेन शिबोरौशीनरो नृपः ।
प्राप्य पुण्यकृताँल्लोकान्मोदत दिवि सुव्रतः ॥१४-९२-७९ (९५१६७)
विभवेन नृणां पुण्यं यच्छत्त्या स्वार्जितं न तत् ।
न यज्ञैर्विविधैर्विप्र यथान्यायेन संचितैः ॥१४-९२-८० (९५१६८)
क्रोधाद्दानफलं हन्ति लोभात्स्वर्गं न गच्छति ।
न्यायवृत्तिर्हि तपसा दानवित्स्वर्गमश्नुते ॥१४-९२-८१ (९५१६९)
न राजसूयैर्बहुभिरिष्टा विपुलदक्षिणैः ॥
न चाश्वमेधैर्बहुभिः फलं सममिदं तव ॥१४-९२-८२ (९५१७०)
सक्तुप्रस्थेन विजितो ब्रह्मलोकस्त्वयाऽक्षयः ।
विरजो ब्रह्मसदनं गच्छ विप्र यतासुखम् ॥१४-९२-८३ (९५१७१)
सर्वेषां वो द्विजश्रेष्ठ दिव्यं यानमुपस्थितम् ।
आरोहत यथाकामं धर्मोस्मि द्विज पश्य माम् ॥१४-९२-८४ (९५१७२)
बाधितो हि त्वया देहो लोके कीर्तिः स्थिरा च ते ।
सभार्यः सहपुत्रश्च सस्नुषश्च दिवं व्रज ॥१४-९२-८५ (९५१७३)
इत्युक्तवाक्ये धर्मे तु यानमारुह्य स द्विजः ।
सदारः ससुतश्चैव सस्नुषश्च दिवं गतः ॥१४-९२-८६ (९५१७४)
तस्मिन्विपरे गते स्वर्गं ससुते सस्नुषे तदा ।
भार्याचतुर्थे धर्मज्ञे ततोऽहं निःसृतो बिलात् ॥१४-९२-८७ (९५१७५)
ततस्तु सक्तुगन्धेन क्लेदेन सलिलस्य च ।
दिव्यपुष्पविमर्दाच्च साधोर्दानलवैश्च तैः ॥१४-९२-८८ (९५१७६)
विप्रस्य तपसा तस्य शिरो मे काञ्चनीकृतम् ।
तस्य सत्याभिसन्धस्य सक्तुदानेन चैव ह ॥१४-९२-८९ (९५१७७)
शरीरार्धं च मे विप्राः शातकुंभमयं कृतम् ।
पश्यतेमं सुविपुलं तपसा तस्य धीमतः ॥१४-९२-९० (९५१७८)
कथमेवंविधं स्याद्वि पार्श्वमन्यदिति द्विजाः ।
तपोवनानि यज्ञांश्च हृष्टोऽभ्योमि पुनः पुनः। १४-९२-९१ (९५१७९)
यज्ञं त्वहमिमं श्रुत्वा रुरुराजस्य धीमतः ।
आशया परया प्राप्तो न चाहं काञ्चनीकृतः ॥१४-९२-९२ (९५१८०)
ततो मयोक्तं तद्वाक्यं प्रहस्य ब्राह्मणर्षभाः ।
सक्तुप्रस्थेन यज्ञोऽयं संमितो नेति सर्वथा ॥१४-९२-९३ (९५१८१)
सक्तुप्रस्थलवैस्तैर्हि तदाऽहं काञ्चनीकृतः ।
न हि यज्ञो महानेष सदृशस्तैर्मतो मम ॥१४-९२-९४ (९५१८२)
इत्युक्त्वा नकुलः सर्वान्यज्ञे द्विजवरांस्तदा ।
जगामादर्सनं तेषां विप्रास्ते च ययुर्गृहान् ॥१४-९२-९५ (९५१८३)
एतत्ते सर्वमाख्यातं मया परपुरंजय ।

यदाश्चर्यमभूत्तत्र वाचिमेधे महाक्रतौ ॥ १४-९२-९६ (९५१८४)
न विस्मयस्ते नृपते यज्ञे कार्यः कथञ्चन ।
ऋषिकोटिसहस्राणि तपोभिर्ये दिवं गताः ॥ १४-९२-९७ (९५१८५)
अद्रोहः सर्वभूतेषु संतोषः शीलमार्जवम् ।
तपो दमश्च सत्यं च प्रदानं चेति संमितम् ॥ ॥ १४-९२-९८ (९५१८६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९२-२ कपोतवदेकैकं कणमादत्ते स कापोतिः ॥
७-९२-८ उंछं कणश आदानं कर्तुमिति शेषः । शुक्लस्य ज्येष्ठस्य पक्षे ॥
७-९२-५६ अवेक्ष्या पालनीया । चिन्त्या परीक्षणीया ॥
७-९२-५८ हे वरे श्रेष्ठे महाभागे त्वां धर्मभृतां मध्ये गणयित्वा सक्तून् ग्रहीष्यामीत्यन्वयः ॥
७-९२-८४ तारितो हि त्वयेति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०९३
॥ श्रीः ॥
१४.९३. अध्यायः ९३

Mahabharata - Ashvamedhika Parva - Chapter Topics

जनमेजयेन नकुलेन यज्ञनिन्दाकारणं पृष्टेन वैशम्पायनेन तंप्रति सत्यदानतपोभिरेव स्वर्गादिसिद्धौ पशुहिंसाहेतुयज्ञस्य नातिप्रशस्ततरत्वमिति नकुलाभिप्रायवर्णनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
यज्ञे सक्ता नृपतयस्तपःसका महर्षयः ।
शान्तिव्यवस्थिता विप्राः शमे दम इति प्रभो ॥ १४-९३-१ (९५१८७)
तस्माद्यज्ञफलैस्तुल्यं न किञ्चिदिह दृश्यते ।
इति मे वर्तते बुद्धिस्तथा चैतदसंशयम् ॥ १४-९३-२ (९५१८८)
यज्ञैरिष्ट्वा तु बहवो राजानो द्विजसत्तमाः ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमितो गताः ॥ १४-९३-३ (९५१८९)

देवराजः सहस्राक्षः क्रतुभिर्भूरिदक्षिणैः ।
देवराज्यं महातेजाःक प्राप्तवानखिलं विभुः ॥१४-९३-४ (९५१९०)
अतो युधिष्ठिरो राजा भीमार्जुनपुरःसरः ।
सदृशो देवराजेन समृद्ध्या विक्रमेण च ॥१४-९३-५ (९५१९१)
अथ कस्मात्स नकुलो गर्हयामास तं क्रतुम् ।
अश्वमेधं महायज्ञं राज्ञस्तस्य महात्मनः ॥१४-९३-६ (९५१९२)
वैशम्पायन उवाच।१४-९३-७क्ष् (७९३१)
यज्ञस्य विधिमग्र्यं वै फलं चापि नराधिप ।
गदतः शृणु मे राजन्यथावदिह भारत ॥१४-९३-७ (९५१९३)
पुरा शक्रस्य यजतः सर्व ऊचुर्महर्षयः ।
ऋत्विक्षु कर्मव्यग्रेषु वितते यज्ञकर्मणि ॥१४-९३-८ (९५१९४)
हूयमाने तथा वह्नौ होत्रा गुणसमन्विते ।
देवष्वाहूयमानेषु स्थितेषु परमर्षिषु ॥१४-९३-९ (९५१९५)
सुप्रतीतैस्तथा विप्रैः स्वागमैः सुस्वरैर्नृप ।
अश्रान्तैश्चापि लघुभिरध्वर्युवृषभैस्तथा ॥१४-९३-१० (९५१९६)
आलम्भसमये तस्मिन्गृहीतेषु पशुष्वथ ।
महर्षयो महाराज बभूवुः कृपयाऽन्विताः ॥१४-९३-११ (९५१९७)
ततो दीनान्पशून्दृष्ट्वा ऋषयस्ते तपोधनाः ।
ऊचुः शक्रं समागम्य नायं यज्ञविधिः शुभः ॥१४-९३-१२ (९५१९८)
अपरिज्ञानमेतत्ते महान्तं धर्ममिच्छतः ।
सन्ति यज्ञे बहुगुणा विधिदृष्टाः पुरंदर ॥१४-९३-१३ (९५१९९)
धर्मोपघातकस्त्वेष समारंभस्तव प्रभो ।
नायं धर्मकृतो यज्ञो न हिंसा धर्म उच्यते ॥१४-९३-१४ (९५२००)
आगमेनैव ते यज्ञं कुर्वन्तु यदि चेच्छसि ।
विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान्भवेत् ॥१४-९३-१५ (९५२०१)
यज्ञं बीजैः सहस्राक्ष त्रिवर्षपरमोषितैः ।
एष धर्मो महाञ्शक्र चिन्तयानोसि गम्यते ॥१४-९३-१६ (९५२०२)
शतक्रतुस्तु तद्वाक्यमृषिभिस्तत्त्वदर्शिभिः ।
उक्तं न प्रतिजग्राह मानमोहवशं गतः ॥१४-९३-१७ (९५२०३)
तेषां विवादः सुमहाञ्शक्रयज्ञे तपस्विनाम् ।
जङ्गमैः स्थावरैर्वाऽपि यष्टव्यमिति भारत ॥१४-९३-१८ (९५२०४)
ते तु खिन्ना विवादेन ऋषयस्तत्त्वदर्शिनः ।
अभिसंधाय शक्रेण पप्रच्छुर्नृपतिं वसुम् ॥१४-९३-१९ (९५२०५)
धर्मसंशयमापन्नान्सत्यं ब्रूहि महामते ।
महाभाग कथं यज्ञेष्वागमो नृपसत्तम ।
यष्टव्यं पशुभिर्मेध्यैरथो बीजैरजैरिति ॥ १४-९३-२० (९५२०६)

तच्छ्रुत्वा तु वसुस्तेषामविचार्य बलाबलम् ।
यथोपनीतैर्यष्टव्यमिति प्रोवाच पार्थिवः ॥ १४-९३-२१ (९५२०७)
एवमुक्त्वा स नृपतिः प्रविवेश रसातलम् ।
उक्त्वेह वितथं राजंश्चेदीनामीश्वरः प्रभुः ॥ १४-९३-२२ (९५२०८)
तस्मान्नि वाच्यं ह्येकेन बहुज्ञेनापि संशये ।
प्रजापतिमपाहाय स्वयंभुवमृते प्रभुम् ॥ १४-९३-२३ (९५२०९)
तेन दत्तानि दानानि पापेनाशुद्धबुद्धिना ।
तानि सर्वाण्यनादृत्य नश्यन्ति विपुलान्यपि ॥ १४-९३-२४ (९५२१०)
तस्याधर्मप्रवृत्तस्य हिंसकस्य दुरात्मनः ।
दानेन कीर्तिर्भवति न प्रेत्येह च दुर्मतेः ॥ १४-९३-२५ (९५२११)
अन्यायोपगतं द्रव्यमभीक्ष्णं यो ह्यपण्डितः ।
धर्माभिकाङ्क्षी त्यजति न स धर्मफलं लभेत् ॥ १४-९३-२६ (९५२१२)
धर्मवैतंसिको यस्तु पापात्मा पुरुषाधमः ।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम् ॥ १४-९३-२७ (९५२१३)
पापेन कर्मणा विप्रो धनं प्राप्य निरङ्कुशः ।
रागमोहान्वितः सोन्ते कलुषां गतिमश्नुते ॥ १४-९३-२८ (९५२१४)
अपि संचयबुद्धिर्हि लोभमोहवशं गतः ।
यज्ञं करोति भूतानि पापेनाशुद्धबुद्धिना ॥ १४-९३-२९ (९५२१५)
एवं लब्ध्वा धनं मोहाद्यो हि दद्याद्यजेत वा ।
न तस्य स फलं प्रेत्य भुंक्ते पापधनागमात् ॥ १४-९३-३० (९५२१६)
उञ्छं मूलं फलं शाकमुदपात्रं तपोधनाः ।
दानं विभवतो दत्त्वा नराः स्वर्यान्ति धार्मिकाः ॥ १४-९३-३१ (९५२१७)
एष धर्मो महायोगो दानं भूतदया तथा ।
ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा ॥ १४-९३-३२ (९५२१८)
सनातनस्य धर्मस्य फलमेतत्सनातनम् ।
श्रूयन्ते हि पुरावृत्ता विश्वामित्रादयो नृपाः ॥ १४-९३-३३ (९५२१९)
विश्वामित्रोसितश्चैवं जनसश्च महीपतिः ।
कक्षसेनार्ष्टिसेनौ च सिन्धुद्वीपश्च पार्थिवः ॥ १४-९३-३४ (९५२२०)
एते चान्ये च बहवः सिद्धिं परमिकां गताः ।
नृपाः सत्यैश्च दानैश्च न्यायलब्धैस्तपोधनाः ॥ १४-९३-३५ (९५२२१)
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चाश्रितास्तपः ।
दानधर्माग्निना शुद्धास्ते स्वर्गं यान्ति भारत ॥ १४-९३-३६ (९५२२२)
॥ इती श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
त्रिनवतितमोऽध्यायः ॥ ९३ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९३-१३ नहि यज्ञे पशुगणाः इति झ पाठः ॥
७-९३-१६ त्रिवर्षपरमोषितैः पुराणैः ॥
७-९३-२० बीजै रसैरिति झ । पाठः ॥

आश्वमेधिकपर्व - अध्याय ०९४
॥ श्रीः ॥
१४.९४. अध्यायः ९४

अश्वमेधपर्व ॥ १ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
वैशम्पायनेन जनमेजयंप्रति पशुहिंसां विनैव ध्यानदानादिभिरेव यज्ञफलसंसिद्धौ दृष्टान्ततयाऽगस्त्ययज्ञप्रकारकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
धर्मागतेन त्यागेन भगवन्सर्वमस्ति चेत् ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि भाषितुम् ॥ १४-९४-१ (९५२२३)
तस्योञ्छवृत्तेर्यद्वृत्तं सक्तुदाने फलं महत् ।
कथितं तु मम ब्रह्मंस्तथ्यमेतदसंशयम् ॥ १४-९४-२ (९५२२४)
कथं हि सर्वयज्ञेषु निश्चयः परमो भवेत् ।
एतदर्हसि मे वक्तुं निखिलेन द्विजर्षभ ॥ १४-९४-३ (९५२२५)
वैशम्पायन उवाच । १४-९४-४क्ष् (७९३२)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अगस्त्यस्य महायज्ञे पुरावृत्तमरिंदम ॥ १४-९४-४ (९५२२६)
पुराऽगस्त्यो महातेजा दीक्षां द्वादशवार्षिकीम् ।
प्रविवेश महाराज सर्वभूतहिते रतः ॥ १४-९४-५ (९५२२७)
तत्राग्निकल्पा होतार आसन्सत्रे महात्मनः ।
मूलाहाराः फलाहाराश्चाश्मकुट्टा मरीचिपाः ॥ १४-९४-६ (९५२२८)
परिपृष्टिका वैघसिकाः प्रसङ्ख्यानास्तथैव च ।
यतयो भिक्षवश्चात्र बभूवुः पर्यवस्थिताः ॥ १४-९४-७ (९५२२९)
सर्वे प्रत्यक्षधर्माणो जितक्रोधा जितेन्द्रियाः ।
दमे स्थिताश्च सर्वे ते हिंसादंभविवर्जिताः ॥ १४-९४-८ (९५२३०)
वृत्ते शुद्धे स्थिता नित्यमिन्द्रियैश्चाप्यबाधिताः ।
उपातिष्ठन्त तं यज्ञं यजन्तस्ते महर्षयः ॥ १४-९४-९ (९५२३१)
यथाशक्त्या भगवता तदन्नं समुपार्जितम् ।

तस्मिन्सत्रे तु यद्वृत्तं यद्योग्यं च तदाऽभवत् ॥१४-९४-१० (९५२३२)
तथा ह्यनेकैर्मुनिभिर्महान्तः क्रतवः कृताः ।
एवंविधे त्वगस्त्यस्य वर्तमाने तथाऽध्वरे ।
न ववर्ष सहस्राक्षस्तदा भरतसत्तम ॥ १४-९४-११ (९५२३३)
ततः कर्मान्तरे राजन्नगस्त्यस्य महात्मनः ।
कथेयमभिनिर्वृत्ता मुनीनां भावितात्मनाम् ॥१४-९४-१२ (९५२३४)
अगस्त्यो यजमानोसौ ददात्यन्नं विमत्सरः ।
न च वर्षति पर्जन्यः कथमन्नं भविष्यति ॥१४-९४-१३ (९५२३५)
सत्रं चेदं महद्विप्रा मुनेर्द्वादशवार्षिकम् ।
न वर्षिष्यति देवश्च वर्षाण्येतानि द्वादश ॥१४-९४-१४ (९५२३६)
एतद्भवन्तः संचिन्त्य महर्षेरस्य धीमतः ।
अगस्त्यस्यातितपसः कर्तुमर्हन्त्यनुग्रहम् ॥१४-९४-१५ (९५२३७)
इत्येवमुक्ते वचने ततोऽगस्त्यः प्रतापवान् ।
प्रोवाच वाक्यं स तदा प्रसाद्य शिरसा मुनीन् ॥१४-९४-१६ (९५२३८)
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः ।
चिन्तायज्ञं करिष्यामि विधिरेष सनातनः ॥१४-९४-१७ (९५२३९)
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः ।
स्पर्शयज्ञं करिष्यामि विधिरेष सनातनः ॥१४-९४-१८ (९५२४०)
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः ।
व्यायामेनाहरिष्यामि यज्ञानेतान्यतव्रतः ॥१४-९४-१९ (९५२४१)
बीजयज्ञो मयाऽयं वै बहुवर्षसमाचितः ।
बीजैर्हितं करिष्यामि नात्र विघ्नो भविष्यति ॥१४-९४-२० (९५२४२)
नेदं शक्यं वृथा कर्तुं मम सत्रं कथञ्चन ।
वर्षिष्यतीह वा देवो नवा वर्षं भविष्यति ॥१४-९४-२१ (९५२४३)
अथवाऽभ्यर्थनामिन्द्रो न करिष्यति कामतः ।
स्वयमिन्द्रो भविष्यामि जीवयिष्यामि च प्रजाः ॥१४-९४-२२ (९५२४४)
यो यदाहारजातश्च स तथैव भविष्यति ।
विशेषं चैव कर्तास्मि पुनः पुनरतीव हि ॥१४-९४-२३ (९५२४५)
अद्येह स्वर्णमभ्येतु यच्चान्यद्वसु दुर्लभम् ।
त्रिषु लोकेषु यच्चास्ति तदिहागम्यतां स्वयम् ॥१४-९४-२४ (९५२४६)
दिव्याश्चाप्सरसां सङ्घा गन्धर्वाश्च सकिन्नराः ।
विश्वावसुश्च ये चान्ये तेऽप्युपासन्तु मे मखम् ॥१४-९४-२५ (९५२४७)
उत्तरेभ्यः कुरुभ्यश्च यत्किंचिद्वसु विद्यते ।
सर्वं तदिह यज्ञेषु स्वयमेवोपतिष्ठतु ॥१४-९४-२६ (९५२४८)
स्वर्गः स्वर्गसदश्चैवक धर्मश्च स्वयमेव तु ।
इत्युक्ते सर्वमेवैतदभवत्तपसा मुनेः ।

तस्य दीप्ताग्निमहसस्त्वगस्त्यस्याततितेजसः ॥ १४-९४-२७ (९५२४९)
ततस्ते मुनयो हृष्टा ददृशुस्तपसो बलम् ।
विस्मिता वचनं प्राहुरिदं सर्वे महार्थवत् ॥१४-९४-२८ (९५२५०)
प्रीताः स्म तव वाक्येन न त्विच्छामस्तपोवनम् ।
तैरेव यज्ञैस्तुष्टाः स्य न्यायेनेच्छामहे वयम् ॥१४-९४-२९ (९५२५१)
यज्ञं दीक्षां तथा होमान्यच्चान्यन्मृगयामहे ।
ग्तयोस्संधर्षितैर्यज्ञैर्नान्यतो मृगयामहे ॥' १४-९४-३० (९५२५२)
न्यायेनोपार्जिताहाराः स्वकर्माभिरता वयम् ।
वेदांश्च ब्रह्मचर्येण न्यायतः प्रार्थयामहे ॥१४-९४-३१ (९५२५३)
न्यायेनोत्तरकालं च गृहेभ्यो निःसृता वयम् ।
धर्मदृष्टैर्विधिद्वारैस्तपस्तप्स्यामहे वयम् ॥१४-९४-३२ (९५२५४)
भवतः सम्यगिष्टा तु बुद्धिर्हिंसाविवर्जिता ।
एतामहिंसा यज्ञेषु ब्रूयास्त्वं सततं प्रभो ॥१४-९४-३३ (९५२५५)
प्रीतास्ततो भविष्यामो वयं तु द्विजसत्तम ।
विसर्जिताः समाप्तौ च सत्रादस्माद्व्रजामहे ॥१४-९४-३४ (९५२५६)
तथा कथयतां तेषां देवराजः पुरंदरः ।
ववर्ष सुमहातेजा दृष्ट्वा तस्य तपोबलम् ॥ १४-९४-३५ (९५२५७)
आसमाप्तेश्च यज्ञस्य तस्यामितपराक्रमः ।
निकामवर्षी पर्जन्यो बभूव जनमेजय ॥१४-९४-३६ (९५२५८)
प्रसादयामास च तमगस्त्यं त्रिदशेश्वरः ।
स्वयमभ्येत्य राजर्षे पुरस्कृत्य बृहस्पतिम् ॥१४-९४-३७ (९५२५९)
ततो यज्ञसमाप्तौ तान्विससर्ज महामुनीन् ।
अगस्त्यः परमप्रीतः पूजयित्वा यथाविधि ॥ ॥१४-९४-३८ (९५२६०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वि
चतुर्नवतितमोऽध्यायः ॥९४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९४-६ मरीचिपाश्चन्द्रमरीचिपानमातृप्ताः ॥
७-९४-७ परिपृष्टं चेदेव गृह्णन्ति नान्यथा मे परिपृष्टिकाः
।प्रसंख्यानास्तत्कालमात्रसंग्रहाः ॥
७-९४-१७ चिन्तायज्ञं मानसं यज्ञम् ।संकल्पमात्रेणैव
देवानृषींश्च तर्पयिष्यामीत्यर्थ ॥
७-९४-१८ स्पर्शयज्ञं उपाहृतद्रव्यस्य व्ययमकृत्वा तत्स्पर्शेनैव
तांस्तर्पयिष्यामि ।एवं दृष्टियज्ञोपि ज्ञेयः ॥
७-९४-१९ व्यायामेन शरीरक्लेशेन ।ध्येयात्मना हरिष्यामि हति झ पाठः ॥

७-९४-२९ न त्विच्छामस्तपोव्ययमिति झ पाठः ॥

आश्वमेधिकपर्व - अध्याय ०९५

॥ श्रीः ॥

१४.९५. अध्यायः ९५

अश्वमेधपर्व ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Topics

वैशम्पायनेन जनमेजयंप्रति नकुलस्य निजस्वरूपकथनपूर्वकं
तस्य नकुलत्वप्राप्तिविमोक्षकारणाभिधानम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

नमेजय उवाच ।
कोसौ नकुलरूपेण शिरसा काञ्चनेन वै ।
प्राह मानुषवद्वाचमेतत्पृष्टो वदस्व मे ॥ १४-९५-१ (९५२६१)
वैशम्पायन उवाच। १४-९५-२क्ष् (७९३३)
एतत्पूर्वं न पृष्टोऽहं न चास्माभिः प्रभाषितम् ।
श्रूयतां नकुलो योसौ यथा वाक्तस्य मानुषी ॥ १४-९५-२ (९५२६२)
श्राद्धं संकल्पयामास जमदग्निः पुरा किल ।
होमधेनुस्तमागाच्च स्वयमेव दुदोह ताम् ॥ १४-९५-३ (९५२६३)
तत्पयः स्थपयामास नवे भाण्डे दृढे शुचौ ।
क्रोधो नकुलरूपेण पिठरं पर्यकर्षयत् ॥ १४-९५-४ (९५२६४)
जिज्ञासुस्तमृषिश्रेष्टं किं कुर्याद्विप्रिये कृते ।
इति सञ्चिन्त्य दुर्मेधा धर्षयामास तत्पयः ॥ १४-९५-५ (९५२६५)
तमाज्ञाय मुनिः क्रोधं नैवास्य स चुकोप ह ।
स तु क्रोधस्ततो राजन्ब्राह्मणीं मूर्तिमास्थितः ॥ १४-९५-६ (९५२६६)
जितोस्मीति भृगुश्रेष्ठ भृगवो ह्यतिरोषणाः ।
लोके मिथ्याप्रवादोयं यत्त्वयाऽस्मि विनिर्जितः ॥ १४-९५-७ (९५२६७)
वशे स्थितोऽहं त्वय्यद्य क्षमावति महात्मनि ।
बिभेमि तपसः साधो प्रसादं कुरु मे प्रभो ॥ १४-९५-८ (९५२६८)
जमदग्निरुवाच। १४-९५-९क्ष् (७९३४)
साक्षाद्दृष्टोसि मे क्रध गच्छ त्वं विगतज्वरः ।
न त्वयापकृतं मेऽद्य न च मे मन्युरस्ति वै ॥ १४-९५-९ (९५२६९)
यान्समुद्दिश्य संकल्पः पयसोस्य कृतो मया ।
पितरस्ते महाभागास्तेभ्यो बुद्ध्यस्व गम्यताम् ॥ १४-९५-१० (९५२७०)

इत्युक्तो जातसंत्रासस्तत्रैवान्तरधीयत ।
पितॄणामभिषङ्गाच्च नकुलत्वमुपागतः ॥ १४-९५-११ (९५२७१)
स तान्प्रसादयामास शापस्यान्तो भवेदिति ।
तैश्चाप्युक्तः क्षिपन्धर्मं सापस्यान्तमवाप्स्यति ॥ १४-९५-१२ (९५२७२)
तैश्चोक्तो यज्ञियान्देशान्धर्मारण्यं तथैव च ।
जुगुप्समानो धावन्स तं यज्ञं समुपासदत् ॥ १४-९५-१३ (९५२७३)
धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः ।
मुक्तः सापात्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः ॥ १४-९५-१४ (९५२७४)
एवमेतत्तदा वृत्तं यज्ञे तस्य महात्मनः ।
पश्यतां चापि नस्तत्र नकुलोऽन्तर्हितस्तदा। ॥ १४-९५-१५ (९५२७५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि अनुगीतापर्वणि
पञ्चनवतितमोऽध्यायः। । ९५ ॥ समाप्तमनुगीतापर्व। -------
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९५-४ पिठरं पात्रं । तत्पयः पीतवानित्यर्थः। तच्च
क्रोधस्वरूपेण पिठरं धर्मं आविशदिति झ। पाठः ॥

आश्वमेधिकपर्व - अध्याय ०९६
॥ श्रीः ॥
१४.९६. अध्यायः ९६

अथ वैष्णवधर्मपर्व ॥ ३ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
युधिष्ठिरेण कृष्णंप्रति वैष्णवधर्मप्रशंसनपूर्वकं
तत्कथनप्रार्थना ॥ १ ॥
वसिष्ठादिभिस्तच्छुश्रूषया तत्समीपोपसर्पणम् ॥ २ ॥
कृष्णेन युधिष्ठिरादीन्प्रति वैष्णवधर्मप्रशंसनपूर्वकं
स्वमहिमानुबोधनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

जनमेजय उवाच ।
अश्वमेधे पुरावृत्ते केशवं केशिसूदनम् ।
धर्मसंशयमुद्दिश्य किमपृच्छत्पितामहः ॥ १४-९६-१ (९५२७६)
वैशम्पायन उवाच। १४-९६-२क्ष् (७९३५)

पश्चिमेनाश्वमेधेन यदा स्नातो युधिष्ठिरः ।
तदा राजा नमस्कृत्य केशवं पुनरब्रवीत् ॥१४-९६-२ (९५२७७)
भववन्वैष्णवा धर्माः किंफलाः किंपरायणाः ।
किं धर्ममधिकृत्याथ भवतोत्पादिताः पुरा ॥१४-९६-३ (९५२७८)
यदि तेहमनुग्राह्यः प्रियोस्मि मधुसूदन ।
श्रोतव्या यदि मे कृष्ण तन्मे कथय सुव्रत ॥१४-९६-४ (९५२७९)
पवित्रा किल ते धर्माः सर्वपापप्रणाशनाः ।
सर्वधर्मोत्तमाः पुण्या भगवंस्त्वन्मुखोद्गताः ॥१४-९६-५ (९५२८०)
याञ्श्रुत्वा ब्रह्महा गोघ्नो मातृहा गुरुतल्पगः ।
पाकर्भेदी कृतघ्नश्च सुरापो ब्रह्मविक्रयी ॥१४-९६-६ (९५२८१)
मित्रविश्वासघाती च वीरहा भ्रूणहा तथा ।
तपोविक्रयिणश्चैव दानविक्रयिणस्तथा ॥१४-९६-७ (९५२८२)
आत्मविक्रमयिणो मूढा जीवेद्यश्च विकर्मभिः ।
पापाः शठा नैकृतिका डांभिका दूषकास्तथा ॥१४-९६-८ (९५२८३)
रसभेदकरा ये च ये च स्युर्ब्रह्मघातकाः ।
शूद्रप्रेष्यकराश्चोरा विप्रा ये च पुरोहिताः ॥१४-९६-९ (९५२८४)
निक्षेपहारिणः स्त्रीघ्नास्तथा ये पारदारिकाः ।
एते चान्ये च पापा ये मुच्यन्तेतेऽपि किल्बिषात् ॥१४-९६-१० (९५२८५)
तानाचक्ष्व सुरश्रेष्ठ त्वद्भक्तस्य ममाच्युत ॥ १४-९६-११ (९५२८६)
वैशम्पायन उवाच।१४-९६-१२क्ष् (७९३६)
इत्येवं कथिते देवे धर्मपुत्रेण संसदि ।
वसिष्ठाद्यास्तपोयुक्ता मुनयस्तत्वदर्शिनः ॥१४-९६-१२ (९५२८७)
श्रोतुकामाः परं गुह्यं वैष्णवं धर्ममुत्तमम् ।
तथा भागवताश्चैव ततस्तं पर्यवारयन् ॥१४-९६-१३ (९५२८८)
युधिष्ठिर उवाच।१४-९६-१४क्ष् (७९३७)
तत्वतस्तव भावेन पादमूलमुपागतम् ।
यदि जानासि मां भक्तं स्निग्धं वा भक्तवत्सल ॥१४-९६-१४ (९५२८९)
धर्मगुह्यानि सर्वाणि वेत्तुमिच्छामि तत्वतः ।
धर्मान्कथय मे देव यद्यनुग्रहभागहम् ॥१४-९६-१५ (९५२९०)
श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा ।
गार्गीया गौतमीयाश्च तथा गोपालकस्य च ॥१४-९६-१६ (९५२९१)
पराशरकृताः पूर्वा मैत्रेयस्य च धीमतः ।
औमा माहेश्वराश्चैव नन्दिधर्माश्च पावनाः ॥१४-९६-१७ (९५२९२)
ब्रह्मणा कथिता ये च कौमाराश्च श्रुता मया ।
धूमायनकृता धर्माः काण्डवैश्वानरा अपि ॥१४-९६-१८ (९५२९३)
भार्गवा याज्ञवल्क्याश्च मार्कण्डेयकृता अपि ।

भारद्वाजकृता ये च बृहस्पतिकृताश्च ये ॥१४-९६-१९ (९५२९४)
कुणेश्च कुणिबाहोश्च विश्वामित्रकृताश्च ये ।
सुमन्तुजैमिनिकृताः शाकुनेयास्तथैव च ॥१४-९६-२० (९५२९५)
पुलस्त्यपुलहोद्गीताः पावकीयास्तथैव च ।
अगस्त्यगीता मौद्गल्याः शाण्डिल्याः शलभायनाः ॥१४-९६-२१ (९५२९६)
वालखिल्यकृता ये च ये च सप्तर्षिभिस्तथा ।
आपस्तंबकृता धर्माः शङ्खस्य लिखितस्य च ॥१४-९६-२२ (९५२९७)
प्राजापत्यास्तथा याम्या माहेन्द्राश्च श्रुता मया ।
वैयाघ्रव्यासकीयाश्च विभण्डककृताश्च ये ॥१४-९६-२३ (९५२९८)
नारदीयाः श्रुता धर्माः कापोताश्च श्रुता मया ।
तथा विदुरवाक्यानि भृगोरङ्गिरसस्तथा ॥१४-९६-२४ (९५२९९)
क्रौञ्चा मृदङ्गगीताश्च सौर्या हारीतकाश्च ये ।
ये पिशङ्गकृताश्चापि कातपायाः सुवालकाः ॥१४-९६-२५ (९५३००)
उद्दालककृता धर्मा औशनस्यास्तथैव च ।
वैशम्पायनगीताश्च ये चान्येऽप्येवमादितः ॥१४-९६-२६ (९५३०१)
एतेभ्यः सर्वधर्मेभ्यो देव त्वन्मुखनिस्सृताः ।
पावनात्वात्पवित्रत्वाद्विशिष्टा इति मे मतिः ॥१४-९६-२७ (९५३०२)
तस्माद्धि त्वां प्रपन्नस्य त्वद्भक्तस्य च केशव ।
युष्मदीयान्वरान्धर्मान्पुण्यान्कथय मेच्युत ॥१४-९६-२८ (९५३०३)
वैशम्पायन उवाच।१४-९६-२९क्ष् (७९३८)
एवं पृष्टस्तु धर्मज्ञो धर्मपुत्रेण केशवः ।
उवाच धर्मान्सूक्ष्मार्थान्धर्मपुत्रस्य हर्षितः ॥१४-९६-२९ (९५३०४)
एवं ते यस्य कौन्तेय यत्नो धर्मेषु सुव्रत ।
तस्य ते दुर्लभो लोके न कश्चिदपि विद्येत ॥१४-९६-३० (९५३०५)
धर्मः श्रुतो वा दृष्टो वा कथितो वा कृतोपि वा ।
अनुमोदितो वा राजेन्द्र नयतीन्द्रपदं नरम् ॥१४-९६-३१ (९५३०६)
धर्मः पिता च माता च धर्मो नाथः सुहृत्तथा ।
धर्मो भ्राता सखा चैव धर्मः स्वामी परंतप ॥१४-९६-३२ (९५३०७)
धर्मादर्थश्च कामश्च धर्माद्भोगाः सुखानि च ।
धर्मादैश्वर्यमेवाग्र्यं धर्मात्स्वर्गगतिः परा ॥१४-९६-३३ (९५३०८)
धर्मोयं सेवितः शुद्धस्त्रायते महतो भयात् ।
धर्माद्द्विजत्वं देवत्वं धर्मः पावयते नरम् ॥१४-९६-३४ (९५३०९)
यदा च क्षीयते पापं कालेन पुरुषस्य तु ।
तदा संजायते बुद्धिर्धर्मं कर्तुं युधिष्ठिर ॥१४-९६-३५ (९५३१०)
जन्मान्तरसहस्रैस्तु मनुष्यत्वं हि दुर्लभम् ।
तद्गत्वापीह यो धर्मं न करोति स्ववञ्चितः ॥१४-९६-३६ (९५३११)

कुत्सिता ये दरिद्राश्च विरूपा व्याधितास्तथा ।
परद्वेष्याश्च मूर्खाश्च न तैर्धर्मः कृतः पुरा ॥१४-९६-३७ (९५३१२)
ये च दीर्घायुषः शूराः पण्डिता भोगिनस्तथा ॥
नीरोगा रूपसंपन्नास्तैर्धर्मः सुकृतः पुरा ॥१४-९६-३८ (९५३१३)
एवं धर्मः कृतः शुद्धो नयते गतिमुत्तमाम् ।
अधर्मं सेवते यस्तु तिर्यग्योन्यां पतत्यसौ ॥१४-९६-३९ (९५३१४)
इदं रहस्यं कौन्तेय शृणु धर्ममनुत्तमम् ।
कथयिष्ये परं धर्मं तव भक्तस्य पाण्डव ॥१४-९६-४० (९५३१५)
इष्टस्त्वमसि मेऽत्यर्थं प्रपन्नश्चापि मां सदा ।
परमार्थमपि ब्रूयां किं पुनर्धर्मसंहिताम् ॥१४-९६-४१ (९५३१६)
इदं मे मानुषं जन्म कृतमात्मनि मायया ।
धर्मसंस्थापनार्थाय दुष्टानां नाशनाय च ॥१४-९६-४२ (९५३१७)
मानुष्यं भावमापन्नं ये मां गृह्णन्त्यवज्ञया ।
संसारान्तर्हिं ते मूढास्तिर्यग्योनिष्वनेकशः ॥१४-९६-४३ (९५३१८)
ये च मां सर्वभूतस्थं पश्यन्ति ज्ञानचक्षुषा ।
मद्भक्तांस्तान्सदा युक्तान्मत्समीपं नयाम्यहम् ॥१४-९६-४४ (९५३१९)
मद्भक्ता न विनश्यन्ति मद्भक्ता वीतकल्मषाः ।
मद्भाक्तानां तु मानुष्ये सफल जन्म पाण्डवा ॥१४-९६-४५ (९५३२०)
अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन ।
मुच्यन्ते पातकैः सर्वैः पद्मपत्रमिवांभसा ॥१४-९६-४६ (९५३२१)
जन्मान्तरसहस्रेषु तपसा भावितात्मनाम् ।
भक्तिरुत्पद्यते तात मनुष्याणां न संशयः ॥१४-९६-४७ (९५३२२)
यच्च रूपं परं गुह्यं कूटस्तमचलं ध्रुवम् ।
न दृश्यते तता देवैर्मद्भक्तैर्दृश्यते यथा ॥१४-९६-४८ (९५३२३)
अपरं यच्च मे रूपं पर्रादुर्भावेषु दृश्यते ।
तदर्चयन्ति सर्वार्थैः सर्वभूतानि पाण्डव ॥१४-९६-४९ (९५३२४)
कल्पकोटिसहस्रेषु व्यतीतेष्वागते च ।
दर्शयामीह तद्रूपं यच्च पश्यन्ति मे सुराः ॥१४-९६-५० (९५३२५)
स्तित्युत्पत्त्यव्ययकरं यो मां ज्ञात्वा प्रपद्यते ।
अनुगृह्णाम्यहं तं वै संसारान्मोचयामि च ॥१४-९६-५१ (९५३२६)
अहमादिर्हि देवानां सृष्टा ब्रह्मादयो मया ।
प्रकृतिं स्वामवष्टभ्य जगत्सर्वं सृजाम्यहम् ॥१४-९६-५२ (९५३२७)
तमोमूलोहमव्यक्तो रजोमध्ये प्रतिष्ठितः ।
ऊर्ध्वं सत्त्वं विना लोभं ब्रह्मादिस्तंबपर्यतः ॥१४-९६-५३ (९५३२८)
मूर्धानं मे विद्धि दिवं चन्द्रादित्यौ च लोचने ।
गावोग्निर्बाह्मणो वक्त्रं मारुतः श्वसनं च मे ॥१४-९६-५४ (९५३२९)

दिशो मे बाहवश्चाष्टौ नक्षत्राणि च भूषणम् ।
अन्तरिक्षमुरो विद्धि सर्वभूतावकाशकम् ।
मार्गो मेघानिलाभ्यां तु यन्ममोदरमव्ययम् ॥ १४-९६-५५ (९५३३०)
पृथिवीमण्डलं यद्वै द्वीपार्णवनगैर्युतम् ।
सर्वसंधारणोपेतं पादौ मम युधिष्ठिर ॥१४-९६-५६ (९५३३१)
स्थितो ह्येकगुणः खेऽहं द्विगुणश्चास्मि मारुते ।
त्रिगुणोग्नौ स्थितोहं वै सलिले च चतुर्गुणः ॥१४-९६-५७ (९५३३२)
शब्दाद्या ये गुणाः पञ्च महाभूतेषु पञ्चसु ।
तन्मात्रासंस्थितः सोहं पृथिव्यां पञ्चधास्थितः ॥१४-९६-५८ (९५३३३)
अहं सहस्रसीर्षस्तु सहस्रवदनेक्षणः ।
सहस्रबाहूदरधृक्सहस्रोरुः सहस्रपात् ॥१४-९६-५९ (९५३३४)
धृत्वोर्वीं सर्वतः सम्यगत्यतिष्ठं दशांगुलम् ।
सर्वभूतात्मभूतस्थः सर्वव्यापी ततोस्म्यहम् ॥१४-९६-६० (९५३३५)
अचिन्त्योहमनन्तोहमजरोहमजो ह्यहम् ।
अनाद्योऽहमवध्योहमप्रमेयोहमव्ययः ॥१४-९६-६१ (९५३३६)
निर्गुणोहं निगूढात्मा निर्द्वन्द्वो निर्ममो नृप ।
निष्कलो निर्विकारोहं निदानममृतस्य तु ॥१४-९६-६२ (९५३३७)
सुधा चाहं स्वधा चाहं स्वाहा चाहं नराधिप ।
तेजसा तपसा चाहं भूतग्रामं चतुर्विधम् ॥१४-९६-६३ (९५३३८)
स्नेहपाशैर्गुणबद्ध्वा धारयाम्यात्ममायया ।
चातुराश्रमधर्मेहं चातुर्होत्रफलाशनः ।
चतुर्मूर्तिश्चतुर्यज्ञश्चतुराश्रमभावनः ॥ १४-९६-६४ (९५३३९)
संहृत्याहं जगत्सर्वं कृत्वा वै गर्भमात्मनः ।
शयामि दिव्ययोगेन प्रलयेषु युधिष्ठिर ॥१४-९६-६५ (९५३४०)
सहस्रयुगपर्यन्तां ब्राह्मीं रात्रिं महार्णवे ।
स्थित्वा सृजामि भूतानि जङ्गमानि स्थिराणि च ॥१४-९६-६६ (९५३४१)
कल्पे कल्पे च भूतानि संहरामि सृजामि च ।
न च मां तानि जानन्ति मायया मोहितानि मे ॥१४-९६-६७ (९५३४२)
मम चैवान्धकारस्य मार्गितव्यस्य नित्यशः ।
प्रशान्तस्येव दीपस्य गतिर्नैपोपलभ्यते ॥१४-९६-६८ (९५३४३)
न तदस्ति क्वचिद्राजन्यत्राहं न प्रतिष्ठितः ।
न च तद्विद्यते भूतं मयि यन्न प्रतिष्ठितम् ॥१४-९६-६९ (९५३४४)
यावन्मित्रं भवेद्भूतं स्थूलं सूक्ष्ममिदं जगत् ।
दीवभूतो ह्यहं तस्मिंस्तावन्मात्रं प्रतिष्ठितः ॥१४-९६-७० (९५३४५)
किंचात्र बहुनोक्तेन सत्यमेतद्ब्रवीमि ते ।
यद्भूतं यद्भविष्यच्च तत्सर्वमहमेव तु ॥१४-९६-७१ (९५३४६)

मया सृष्टानि भूतानि मन्मयानि च भारत ।
मामेव न विजानन्ति मायया मोहितानि वै ॥ १४-९६-७२ (९५३४७)
एवं सर्वं जगदिदं सदेवासुरमानुषम् ।
मत्तः प्रभवते राजन्मय्येव प्रविलीयते ॥ ॥ १४-९६-७३ (९५३४८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥
Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-९६-१क्ष् एतदारभ्यापर्वसमाप्ति विद्यमानास्त्रयोविंशत्यध्याया
दाक्षिणात्यकोशेष्वेव दृश्यन्ते नत्वौत्तराहपाठे। ७-९६-२
पञ्चमेनाश्वमेधेनेति ट पाठः। ।
७-९६-१८ शूद्रायनकृता धर्मा इति क पाठः ॥
७-९६-२३ वैभीतककृताश्च ये इति ट पाठः ॥
७-९६-३१ राजेन्द्र पुनाति ह नरं सदेति ट पाठः ॥

आश्वमेधिकपर्व - अध्याय ०९७
॥ श्रीः ॥
१४.९७. अध्यायः ९७

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति चातुर्वर्ण्यधर्मनिरूपणम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवमात्मोद्भवं सर्वं यगदुद्दिश्य केशवः ।
धर्मान्धर्मात्मजस्याथ पुण्यानकथयत्प्रभुः ॥ १४-९७-१ (९५३४९)
शृणु पाण्डव तत्वेन पवित्रं पापनाशनम् ।
कथ्यमानं मया पुण्यं धर्मशास्त्रफलं महत् ॥ १४-९७-२ (९५३५०)
यः शृणोति शुचिर्भूत्वा एकचित्तस्तपोयुतः ।
स्वर्ग्यं यशस्यामायुष्यं धर्मं ज्ञेयं युधिष्ठिर ॥ १४-९७-३ (९५३५१)
श्रद्दधानस्य तस्येह यत्पापं पूर्वसंचितम् ।
विनश्यत्याशु तत्सर्वं मद्भक्तस्य विशेषतः ॥ १४-९७-४ (९५३५२)
वैशम्पायन उवाच। १४-९७-५क्ष् (७९३९)
एवं श्रुत्वा वचः पुण्यं सत्यं केशवभाषितम् ।

प्रहृष्टमनसो भूत्वा चिन्तयन्तोऽद्भुतं परम् ॥१४-९७-५ (९५३५३)
देवब्रह्मर्षयः सर्वे गन्धर्वाप्सरसस्तथा ।
भूता यक्षग्रहाश्चैव गुह्यका भुजगास्तथा ॥१४-९७-६ (९५३५४)
वालखिल्या महात्मानो योगिनस्तत्वदर्शिनः ।
तथा भागवताश्चापि पञ्चकालमुपासकाः ॥१४-९७-७ (९५३५५)
कौतूहलसमाविष्टाः प्रहृष्टेन्द्रियमानसाः ।
श्रोतुकामाः परं धर्मं वैष्णवं धर्मशासनम् ।
हृदि कर्तुं च तद्वाक्यं प्रणेमुः शिरसा नताः ॥ १४-९७-८ (९५३५६)
ततस्तान्वासुदेवेन दृष्टान्दिव्येन चक्षुषा ।
विमुक्तपापानालोक्य प्रणम्य शिरसा हरिम् ।
पप्रच्छ केशवं धर्मं धर्मपुत्रः प्रतापवान् ॥ १४-९७-९ (९५३५७)
युधिष्ठिर उवाच।१४-९७-१०क्ष् (७९४०)
कीदृशी ब्राह्मणस्याथ क्षत्रियस्यापि कीदृशी ।
वैश्यस्य कीदृशी देव गतिः शूद्रस्य कीदृशी ॥१४-९७-१० (९५३५८)
कथं बध्येत पाशेन ब्राह्मणस्तु यमालये ।
क्षत्रियो वाथ वैश्यो वा शूद्रो वा बध्यते कथम् ।
एतत्कर्मफलं ब्रूहि लोकनाथ नमोस्तु ते ॥ १४-९७-११ (९५३५९)
वैशम्पायन उवाच।१४-९७-१२क्ष् (७९४१)
पृष्टोऽथ केशवो ह्येवं धर्मपुत्रेण धीमता ।
उवाच संसारगतिं चातुर्वर्ण्यस्य कर्मजाम् ॥१४-९७-१२ (९५३६०)
भगवानुवाच।१४-९७-१३क्ष् (७९४२)
शृणु वर्णक्रमेणैव धर्मं धर्मभृतां वर ।
नास्ति किंचिन्नरश्रेष्ठ ब्राह्मणस्य तु दुष्कृतम् ॥१४-९७-१३ (९५३६१)
शिखांयज्ञोपवीता ये सन्ध्यां ये चाप्युपासते ।
यैश्च पूर्णाहुतिः प्राप्ता विधिवज्जुह्वते च ये ॥१४-९७-१४ (९५३६२)
वैश्वदेवं च ये चक्रुः पूजयन्त्यतिथींश्च ये ।
नित्यं स्वाध्यायशीलाश्च जपयज्ञपराश्च ये ॥१४-९७-१५ (९५३६३)
सायंप्रातर्हुताशाश्च शूद्रभोजनवर्जिताः ।
डंभानृतविमुक्ताश्च स्वदारनिरताश्च ये ।
पञ्चयज्ञपरा ये च येऽग्निहोत्रमुपासते ॥ १४-९७-१६ (९५३६४)
दहन्ति दुष्कृतं येषां हूयमानास्त्रयोऽग्नयः ।
नष्टदुष्कृतकर्माणो ब्रह्मलोकं व्रजन्ति ते ॥१४-९७-१७ (९५३६५)
ब्रह्मलोके पुनः कामं गन्धर्वैर्ब्रह्मगायकैः ।
उद्गीयमानाः प्रयतैः पूज्यमानाः स्वयंभुवा ।
ब्रह्मिलोके प्रमोदन्ते यावदाभूतसंप्लुवम् ॥ १४-९७-१८ (९५३६६)
क्षत्रियोपि स्थितो राज्ये स्वधर्मपरिपालकः ।

सम्यक्प्रजाः पालयिता षड्भागनिरतः सदा ॥१४-९७-१९ (९५३६७)
यज्ञदानरतो धीरः स्वदारनिरतः सदा ।
शास्त्रानुसारी तत्वज्ञः प्रजाकार्यपरायणः ॥१४-९७-२० (९५३६८)
विप्रेभ्यः कामदो नित्यं भृत्यानां भरणे रतः ।
सत्यसन्धः शुचिर्नित्यं लोभडंभविवर्जितः ।
क्षत्रियोप्युत्तमां याति गतिं देवनिषेविताम् ॥ १४-९७-२१ (९५३६९)
तत्र दिव्याप्सरोभिस्तु गन्धर्वैश्च विशेषतः ।
सेव्यमानो महातेजाः क्रीडते शक्रपूजितः ॥१४-९७-२२ (९५३७०)
चतुर्थगानि वै त्रिंशत्क्रीडित्वा तत्र देववत् ।
इह मानुष्यलोके तु चतुर्वेदी द्विजो भवेत् ॥१४-९७-२३ (९५३७१)
कृषिगोपालनिरतो धर्मानवेषणतत्परः। १४-९७-२४ (९५३७२)
दानधर्मेपि निरतो विप्रशुश्रूषकस्तथा ॥ १४-९७-२४ (९५३७३)
सत्यसन्धः शुचिर्नित्यं लोभडंभविवर्जितः ।
ऋजुः स्वदारनिरतो हिंसाद्रोहविवर्जितः ॥१४-९७-२५ (९५३७४)
वणिग्धर्मान्नमुञ्चन्वै देवब्राह्मणपूजकः ।
वैश्यः स्वर्गतिमाप्नोति पूज्यमानोप्सरोगणैः ॥१४-९७-२६ (९५३७५)
चतुर्युगानि वै त्रिंशत्क्रीडित्वा दश पञ्च च ।
इह मानुष्यलोके च राजा भवति वीर्यवान् ॥१४-९७-२७ (९५३७६)
सुवर्णकोट्यः पञ्चाशद्रत्नानां च शतं तथा ।
हस्त्यश्वरश्वसंयुक्तो महाभोगांश्च सेवते ॥१४-९७-२८ (९५३७७)
त्रयाणामपि वर्णानां शुश्रूषानिरतः सदा ।
विशेषतस्तु विप्राणां दासवद्यस्तु तिष्टति ॥१४-९७-२९ (९५३७८)
अयाचितप्रदाता च सत्यशौचसमन्वितः ।
गुरुदेवार्चनरतः परदारविवर्जितः ॥१४-९७-३० (९५३७९)
परपीडामकृत्वैव भत्यवर्गं बिभर्ति यः ।
शूद्रोपि स्वर्गमाप्नोति जीवानामभयप्रदः ॥१४-९७-३१ (९५३८०)
स स्वर्गकलोके क्रीडित्वा वर्षकोटिं महातपाः ।
इह मानुषलोके तु वैश्यो धनपतिर्भवेत् ॥१४-९७-३२ (९५३८१)
एवं धर्मात्परं नास्ति महत्संसारमोक्षणम् ।
न च धर्मात्पर किंचित्पापकर्मव्यपोहनम् ॥१४-९७-३३ (९५३८२)
तस्माद्धर्मः सदा कार्यो मानुष्यं प्राप्य दुर्लभम् ।
न हि धर्मानुरक्तानां लोके किंचन दुर्लभम् ॥१४-९७-३४ (९५३८३)
स्वयंभुविहितो धर्मो यो यस्येह नरेश्वर ।
स तेन क्षपयेत्पापं सम्यगाचरितेन च ॥१४-९७-३५ (९५३८४)
सहजं यद्भवेत्कर्म न तत्त्याज्यं हि केनचित् ।
स एव तस्य धर्मो हि तेन सिद्धिं स गच्छति ॥१४-९७-३६ (९५३८५)

विगुणोपि स्वधर्मस्तु पापकर्म व्यपोहति ।
एवमेव तु धर्मोपि क्षीयते पापवर्धनात् ॥१४-९७-३७ (९५३८६)
युधिष्ठिर उवाच।१४-९७-३८क्ष् (७९४३)
भगवन्देवदेवेश श्रोतुं कौतूहलं हि मे ।
शुभस्याप्यशुभस्यापि क्षयवृद्धी यथाक्रमम् ॥१४-९७-३८ (९५३८७)
भगवानुवाच।१४-९७-३९क्ष् (७९४४)
शृणु पार्थिव तत्सर्वं धर्मसूक्ष्मं सनातनम् ।
दुर्विज्ञेयतमं नित्यं यत्र मग्ना महाजनाः ॥१४-९७-३९ (९५३८८)
यथैव शीतमुदकमुष्णेन बहुना वृतम् ।
भवेत्तु तत्क्षणादुष्णं शीतत्वं च विनश्यति ॥१४-९७-४० (९५३८९)
यथोष्णं वा भवेदल्पं शीतेन बहुना वृतम् ।
शीतलं च भवेत्सर्वमुष्णत्वं च विनश्यति ॥१४-९७-४१ (९५३९०)
एवं च यद्भवेद्भूरि सुकृतं वाऽपि दुष्कृतम् ।
तदल्पं क्षपयेच्छीघ्रं नात्र कार्या विचारणा ॥१४-९७-४२ (९५३९१)
समत्वे सति राजेन्द्र तयोः सुकृतपापयोः ।
गूहितस्य भवेद्वृद्धिः कीर्तितस्य भवेत्क्षयः ॥१४-९७-४३ (९५३९२)
ख्यापनेनानुतापेन प्रायः पापं विनश्यति ।
तथा कृतस्तु राजेन्द्र धर्मो नश्यति मानद ॥१४-९७-४४ (९५३९३)
तावुभौ गूहितौ सम्यग्वृद्धिं यातो न संशयः ।
तस्मात्सर्वप्रयत्नेन न पापं गूहयेद्बुधः ॥१४-९७-४५ (९५३९४)
तस्मादेतत्प्रयत्नेनि कीर्तयेत्क्षयकारणात् ।
तस्मात्संकीर्तयेत्पापं नित्यं धर्मं च गूहयेत् ॥ ॥१४-९७-४६ (९५३९५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
सप्तनवतितमोऽध्यायः ॥९७ ॥

आश्वमेधिकपर्व - अध्याय ०९८
॥ श्रीः ॥
१४.९८. अध्यायः ९८

अश्वमेधपर्व ॥१ ॥
Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति जन्मदानजीवितानां
वैयर्थ्यापादकाधर्मकथनम् ॥१ ॥
तथा दानानां सात्विकत्वादिकथनपूर्वं तत्तत्फलानां
त्रैविध्यादिप्रतिपादनम् ॥२ ॥

तथा दानपात्रलक्षणनिरूपणम् ब्राह्मणमहिमानुवर्णनं च ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवं श्रुत्वा वचस्तस्य धर्मपुत्रोऽच्युतस्य तु ।
पप्रच्छ पुनरप्यन्यं धर्मं धर्मात्मजो हरिम् ॥ १४-९८-१ (९५३९६)
वृथा च कति जन्मानि वृथा दानानि कानि च ।
वृथा च जीवितं केषां नराणां पुरुषोत्तम ॥ १४-९८-२ (९५३९७)
कीदृशासु ह्यवस्थासु दानं दत्तं जनार्दन ।
इह लोकेऽनुभवति पुरुषः पुरुषोत्तम ॥ १४-९८-३ (९५३९८)
गर्भस्थः किं समश्नाति किं बाल्ये वाऽपि केशव ।
यौवनस्थेऽपि किं कृष्ण वार्धके वाऽपि किं भवेत् ॥ १४-९८-४ (९५३९९)
सात्विकं कीदृशं दानं राजसं कीदृशं भवेत् ।
तामसं कीदृशं देव तर्पयिष्यति किं प्रभो ॥ १४-९८-५ (९५४००)
उत्तमं कीदृशं दानं तेषां वा किं फलं भवेत् ।
किं दानं नयति ह्यूर्ध्वं किं गतिं मध्यमां नयेत् ।
गतिं जघन्यामथवा देवदेव ब्रवीहि मे ॥ १४-९८-६ (९५४०१)
एतदिच्छामि विज्ञातुं परं कौतूहलं हि मे ।
त्वदीयं वचनं सत्यं पुण्यं च मधुसूदन ॥ १४-९८-७ (९५४०२)
वैशम्पायन उवाच। १४-९८-८क्ष् (७९४५)
एवं धर्मं प्रयत्नेन पृष्टः पाण्डुसुतेन वै ।
उवाच वासुदेवोऽथ धर्मान्धर्मात्मजस्य तु ॥ १४-९८-८ (९५४०३)
भगवानुवाच। १४-९८-९क्ष् (७९४६)
शृणु राजन्यथान्यायं वचनं तथ्यमुत्तमम् ।
कथ्यमानं मया पुण्यं सर्वपापव्यपोहनम् ॥ १४-९८-९ (९५४०४)
वृथा च दश जन्मानि चत्वारि च नराधिप ।
वृथा दानानि पञ्चाशत्पञ्चैव च यथाक्रमम् ॥ १४-९८-१० (९५४०५)
वृथा च जीवितं येषां ते च षट् परिकीर्तिताः ।
अनुक्रमेण वक्ष्यामि तानि सर्वाणि पार्थिव ॥ १४-९८-११ (९५४०६)
धर्मघ्नानां वृथा जन्म लुब्धानां पापिनां तथा ।
वृथा पाकं च येऽश्नन्ति परदाररताश्च ये ।
पाकभेदकरा ये च ये च स्युः सत्यवर्जिताः ॥ १४-९८-१२ (९५४०७)
मृष्टमश्नाति यश्चैकः क्लिस्यमानैस्तु बान्धवैः ।
पितरं मातरं चैव उपाध्यायं गुरुं तथा ।
मातुलं मातुलानीं च यो निहन्याच्छपेत वा ॥ १४-९८-१३ (९५४०८)

ब्राह्मणश्चैव यो भूत्वा सन्ध्योपासनवर्जितः ।
निस्स्वाहो निस्स्वधश्चैव शूद्राणामन्नभुग्द्विजः ॥१४-९८-१४ (९५४०९)
मम वा शंकरस्याथ ब्रह्मणो वा युधिष्ठिर ।
अथवा ब्राह्मणानां तु ये न भक्ता नराधमाः ।
वृथाजन्मान्यथैतेषां पापिनां विद्धि डव ॥ १४-९८-१५ (९५४१०)
अश्रद्धयाऽपि यद्दत्तमवामानेन वाऽपि यत् ।
डंभार्थमपि यद्दत्तं यत्पाषण्डिहृतं नृप ॥१४-९८-१६ (९५४११)
शूद्राचाराय यद्दत्तं यद्दत्त्वा चानुकीर्तितम् ।
रोषयुक्तं तु यद्दत्तं यद्दत्तमनुशोचितम् ॥१४-९८-१७ (९५४१२)
डंभार्जितं च यद्दत्तं यच्च वाऽप्यनृतार्जितम् ।
ब्राह्मणस्वं च यद्दत्तं चौर्येणाप्यार्जितं च यत् ॥१४-९८-१८ (९५४१३)
अभिशास्ताहृतं यत्तु यद्दत्तं पतिते द्विजे ।
निर्ब्रह्माभिहृतं यत्तु यद्दत्तं सर्वयाचकैः ॥१४-९८-१९ (९५४१४)
व्राप्यैस्तु यद्धृतं दानमारूढपतितैश्च यत् ।
यद्दत्तं स्वैरिणीभर्तुः श्वशुराननुवर्तिने ॥१४-९८-२० (९५४१५)
यद्ग्रामयाचकहृतं यत्कृतघ्नहृतं तथा ।
उपपातकिने दत्तं देवविक्रयिणे च यत् ॥१४-९८-२१ (९५४१६)
स्त्रीजिताय च यद्दत्तं यद्दत्तं राजसेविने ।
गणकाय च यद्दत्तं यच्च कारणिकाय च ॥१४-९८-२२ (९५४१७)
वृषलीपतये दत्तं यद्दत्तं शस्त्रजीविने ।
भृतकाय च यद्दत्तं व्यालग्राहिहृतं च यत् ॥१४-९८-२३ (९५४१८)
पुरोहिताय यद्दत्तं चिकित्सकहृतं च यत् ।
यद्वणिक्कर्मिणे दत्तं क्षुद्रमन्त्रोपजीविने ॥१४-९८-२४ (९५४१९)
यच्छूद्रजीविने दत्तं यच्च देवलकाय च ।
देवद्रव्याशिने यच्च यद्दत्तं चित्रकर्मिणे ॥१४-९८-२५ (९५४२०)
रङ्गोपजीविने दत्तं यच्च मांसोपजीविने ।
सेवकाय च यद्दत्तं यद्दत्तं ब्राह्मणब्रुवे ॥१४-९८-२६ (९५४२१)
अदेशिने च यद्दत्तं दत्तं वार्धुषिकाय च ।
यदनाचारिणे दत्तं यत्तु दत्तमनग्नये ॥१४-९८-२७ (९५४२२)
असन्ध्योपासिने दत्तं यच्छूद्रग्रामवासिने ।
यन्मिथ्यालिङ्गिने दत्तं दत्तं सर्वाशिने च यत् ॥१४-९८-२८ (९५४२३)
नास्तिकाया च यद्दत्तं धर्मविक्रयिणे च यत् ।
वराकाय च यद्दत्तं यद्दत्तं कूटसाक्षिणे ॥१४-९८-२९ (९५४२४)
ग्रामकूटाय यद्दत्तं दानं पार्तिवपुङ्गव ।
वृथा भवति तत्सर्वं नात्र कार्या विचारणा ॥१४-९८-३० (९५४२५)
विप्राणामधरा एते लोलुपा ब्राह्मणाधमाः ।

नात्मानं तारयन्त्येते न दातारं युधिष्ठिर ॥१४-९८-३१ (९५४२६)
एतेभ्यो दत्तमात्राणि दानानि सुबहून्यपि ।
वृथा भवन्ति राजेन्द्र भस्मन्याज्याहुतिर्यथा ॥१४-९८-३२ (९५४२७)
एतेषु यत्फलं किंचिद्भविष्यति कथंचन ।
राक्षसाश्च पिशाचाश्च तद्विलुंपन्ति हर्षिताः ॥१४-९८-३३ (९५४२८)
वृथा ह्येतानि दत्तानि कथितानि समासतः ।
जीवितं तु वृथा येषां तच्छृणुष्व युधिष्ठिर ॥१४-९८-३४ (९५४२९)
ये मां न प्रतिपद्यन्ते शङ्करं वा नराधमाः ।
ब्राह्मणान्वा महीदेवान्वृथा जीवन्ति ते नराः ॥१४-९८-३५ (९५४३०)
हेतुशास्त्रेषु ये सक्ताः कुदृष्टिपथमाश्रिताः ।
देवान्निन्दन्त्यनाचारा वृथा जीवन्ति ते नराः ॥१४-९८-३६ (९५४३१)
कुशलैः कृतशास्त्राणि पठित्वा ये नराधमाः ।
विप्रान्निन्दन्ति यज्ञांश्च वृथा जीवन्ति ते नराः ॥१४-९८-३७ (९५४३२)
ये दुर्गां वा कुमारं वा वायुमग्निं जलं रविम् ।
पितरं मातरं चैव गुरुमिन्द्रं निशाकरम् ।
मूढा निन्दन्त्यनाचारा वृथा जीवन्ति ते नराः ॥ १४-९८-३८ (९५४३३)
विद्यमाने धने यस्तु दानधर्मविवर्जितः ।
मृष्टमश्नाति यश्चैको वृथा जीवति सोपि च ॥१४-९८-३९ (९५४३४)
वृथा जीवितमाख्यातं दानकालं ब्रवीमि ते ॥ १४-९८-४० (९५४३५)
तमोनिविष्टचित्तेन दत्तं दानं तु यद्भवेत् ।
तदस्य फलमश्नाति नरो गर्भगतो नृप ॥१४-९८-४१ (९५४३६)
ईर्ष्यामत्सरसंयुक्तो डंभार्थं चार्थकारणात् ।
ददाति दानं यो मर्त्यो बालभावे तदश्नुते ॥१४-९८-४२ (९५४३७)
भोक्तुं भोगमशक्तस्तु व्याधिभिः पीडितो भृशम् ।
ददाति दानं यो मर्त्यो वृद्धभावे तदश्नुते ॥१४-९८-४३ (९५४३८)
श्रद्धायुक्तः शुचिः स्नातः प्रसन्नेन्द्रियमानसः ।
ददाति दानं यो मर्त्यो यौवने स तदश्नुते ॥१४-९८-४४ (९५४३९)
स्वयं नीत्वा तु यद्दानं भक्त्या पात्रे प्रदीयते ।
तत्सार्वकालिकं विद्धि दानमामरणान्तिकम् ॥१४-९८-४५ (९५४४०)
राजसं सात्विकं चापि तामसं च युधिष्ठिर ।
दानं दानफलं चैव गतिं च त्रिविधां शृणु ॥१४-९८-४६ (९५४४१)
दानं दातव्यमित्येव मतिं कृत्वा द्विजाय वै ।
उपकारवियुक्ताय यद्दत्तं तद्धि सात्विकम् ॥१४-९८-४७ (९५४४२)
श्रोत्रियाय दरिद्राय बहुभृत्याय पाण्डव ।
दीयते यत्प्रहृष्टेन तत्सात्विकमुदाहृतम् ॥१४-९८-४८ (९५४४३)
वेदाक्षरविहीनाय यत्तु पूर्वोपकारिणे ।

समृद्धाय च यद्दत्तं तद्दानं राजसं स्मृतम् ॥१४-९८-४९ (९५४४४)
संबन्धिने च यद्दत्तं प्रमत्ताय च पाण्डव ।
फलार्थिभिरपात्राय तद्दानं राजसं स्मृतम् ॥१४-९८-५० (९५४४५)
वैश्वदेवविहीनाय दानमश्रोत्रियाय च ।
दीयते तस्करायापि तद्दानं तामसं स्मृतम् ॥१४-९८-५१ (९५४४६)
सरोषमवधूतं च क्लेशयुक्तमवज्ञया ।
सेवकाय च यद्दत्तं तत्तामसमुदाहृतम् ॥१४-९८-५२ (९५४४७)
देवाः पितृगणाश्चैव मुनयश्चाग्नयस्तथा ।
सात्विकं दानमश्नन्ति तुष्यन्ति च नरेश्वर ॥१४-९८-५३ (९५४४८)
दानवा दैत्यसङ्घाश्च ग्रहा यक्षाः सराक्षसाः ।
राजसं दानमश्नन्ति वर्जितं पितृदैवतैः ॥१४-९८-५४ (९५४४९)
पिशाचाः प्रेतसङ्घाश्च कश्मला ये मलीमसाः ।
तामसं दानमश्नन्ति गतिं च त्रिविधां शृणु ॥१४-९८-५५ (९५४५०)
सात्विकानां तु दानानामुत्तमं फलमश्नुते ।
मध्यमं राजसानां तु तामसानां तु पश्चिमम् ॥१४-९८-५६ (९५४५१)
अभिगम्योपनीतानां दानानामुत्तमं फलम् ।
मध्यमं तु समाहूय जघन्यं याचते फलम् ॥१४-९८-५७ (९५४५२)
अयाचितप्रदाता यः स याति गतिमुत्तमाम् ।
समाहूय तु यो दद्यान्मध्यमां स गतिं व्रजेत् ।
याचितो यश्च वै दद्याज्जघन्यां स गतिं व्रजेत् ॥ १४-९८-५८ (९५४५३)
उत्तमा दैविकी ज्ञेया मध्यमा मानुषी गतिः ।
गतिर्जघन्या तिर्यक्षु गतिरेषा त्रिधा स्मृता ॥१४-९८-५९ (९५४५४)
पात्रभूतेषु विप्रेषु संस्थितेष्वाहिताग्निषु ।
यत्तु निक्षिप्यते दानमक्षयं संप्रकीर्तितम् ॥१४-९८-६० (९५४५५)
श्रोत्रियाणां दरिद्राणां भरणं कुरु पार्थिव ।
समृद्धानां द्विजातीनां कुर्यास्तेषां तु रक्षणम् ॥१४-९८-६१ (९५४५६)
दरिद्रान्वित्तहीनांश्च प्रदानैः सुष्ठु पूजय ।
आतुरस्यैषधैः कार्यं नीरुजस्य किमौषधैः ॥१४-९८-६२ (९५४५७)
पापं प्रतिग्रहीतारं प्रदातुरपगच्छति ।
प्रतिग्रहीतुर्यत्पुण्यं प्रदातारमुपैति तत् ।
तस्माद्दानं सदा कार्यं परत्र हितमिच्छता ॥ १४-९८-६३ (९५४५८)
वेदविद्यावदातेषु सदा शूद्रान्नवर्जिषु ।
प्रयत्नेन विधातव्यो महादानमयो निधिः ॥१४-९८-६४ (९५४५९)
येषां दाराः प्रतीक्षन्ते सहस्रस्येव लम्भनम् ।
भुक्तशेषस्य भक्तस्य तान्निमन्त्रय पाण्डव ॥१४-९८-६५ (९५४६०)
आमन्त्र्य तु निराशानि न कर्तव्यानि भारत ।

कुलानि सुदरिद्राणि तेषामाशा हता भवेत् ॥ १४-९८-६६ (९५४६१)
मद्भक्ता ये नरश्रेष्ठ मद्गता मत्परायणाः ।
मद्याजिनो मन्नियमास्तान्प्रयत्नेन पूजयेत् ॥ १४-९८-६७ (९५४६२)
तेषां तु पावनायाहं नित्यमेव युधिष्ठिर ।
उभे सन्ध्येऽधितिष्ठामि ह्यस्कन्नं तद्व्रतं मम ॥ १४-९८-६८ (९५४६३)
तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीतकल्मषैः ।
सन्ध्याकाले तु जप्तव्यं सततं चात्मशुद्धये ॥ १४-९८-६९ (९५४६४)
अन्येषामपि विप्राणां किल्बिषं हि विनश्यति ।
उभे सन्ध्येप्युपासीत तस्माद्विप्रो विशुद्धये। १४-९८-७० (९५४६५)
दैवे श्राद्धेपि विप्रः स नियोक्तव्योऽजुगुप्सया ।
जुगुप्सितस्तु यः श्राद्धं दहत्यग्निरिवेन्धनम् ॥ १४-९८-७१ (९५४६६)
भारतं मानवो धर्मो वेदाः साङ्गाश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥ १४-९८-७२ (९५४६७)
न ब्राह्मणान्परीक्षेत दैवे कर्मणि धर्मवित् ।
महान्भवेत्परीवादो ब्राह्मणानां परीक्षणे ॥ १४-९८-७३ (९५४६८)
ब्राह्मणानां परीवादं यः कुर्यात्स नराधमः ।
रासभानां शुनां योनिं गच्छेत्पुरुषदूषकः ॥ १४-९८-७४ (९५४६९)
श्वत्वं प्राप्नोति निन्दित्वा परीवादात्खरो भवेत् ।
कृमिर्भवत्यभिभवात्कीटो भवति मत्सरात् ॥ १४-९८-७५ (९५४७०)
दुर्वृत्ता वा सुवृत्ता वा प्राकृता वा सुसंस्कृताः ।
ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ॥ १४-९८-७६ (९५४७१)
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत मेधावी कृशानपि कदाचन ॥ १४-९८-७७ (९५४७२)
एतत्त्रयं हि पुरुषं निर्दहेदवमानितम् ।
तस्मादेतत्प्रयत्नेन नावमन्येत बुद्धिमान् ॥ १४-९८-७८ (९५४७३)
यथा सर्वास्ववस्थासु पावको दैवतं महत् ।
तथा सर्वास्ववस्थासु ब्राह्मणो दैवतं महत् ॥ १४-९८-७९ (९५४७४)
व्यङ्गाः काणाश्च कुब्जाश्च वामनाङ्गास्तथैव च ।
सर्वे दैवे नियोक्तव्या व्यामिश्रा वेदपारगैः ॥ १४-९८-८० (९५४७५)
मन्युं नोत्पादयेत्तेषां न चारिष्टं समाचरेत् ।
मन्युप्रहरणा विप्रा न विप्राः शस्त्रपाणयः ॥ १४-९८-८१ (९५४७६)
मन्युना घ्नन्ति ते शत्रून्वज्रेणेन्द्र इवासुरान् ।
ब्राह्मणो हि महद्दैवं जातिमात्रेण जायते ॥ १४-९८-८२ (९५४७७)
ब्राह्मणः सर्वभूतानां धर्मकोशस्य गुप्तये ।
किं पुनर्ये च कौन्तेय सन्ध्यां नित्यमुपासते ॥ १४-९८-८३ (९५४७८)
यस्यास्येन समश्नन्ति हव्यानि त्रिदिवौकसः ।

कव्यानि चैव पितरः किं भूतमधिकं ततः ॥१४-९८-८४ (९५४७९)
उत्पत्तिरेव विप्रस्य मूर्तिधर्मस्य शाश्वती ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥१४-९८-८५ (९५४८०)
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः ।
तस्मात्ते नावमन्तव्या मद्भक्ता हि द्विजाः सदा ॥ १४-९८-८६ (९५४८१)
आरण्यकोपनिषदि ये तु पश्यन्ति मां द्विजाः ।
निगूढं निष्कलावस्थं तान्प्रयत्नेन पूजय ॥१४-९८-८७ (९५४८२)
स्वगृहे वा प्रवासे वा दिवारात्रमथापि वा ।
श्रद्धया ब्राह्मणाः पूज्या मद्भक्ता ये च पाण्डव ॥१४-९८-८८ (९५४८३)
नास्ति विप्रसमं दैवं नास्ति विप्रसमो गुरुः ।
नास्ति विप्रात्परो बन्धुर्नास्ति विप्रात्परो निधिः ।
नास्ति विप्रात्परं तीर्थं न पुण्यं ब्राह्मणात्परम्। १४-९८-८९ (९५४८४)
न पवित्रं परं विप्रान्न द्विजात्पावनं परम् ।
नास्ति विप्राप्तरो धर्मो नास्ति विप्रात्परा गतिः ॥१४-९८-९० (९५४८५)
पापकर्मसमाक्षिप्तं पतन्तं नरके नरम् ।
त्रायते पात्रमप्येकं पात्रभूते तु तद्द्विजे ॥१४-९८-९१ (९५४८६)
बालाहिताग्नयो ये च शान्ताः शूद्रान्नवर्जिताः ।
मामर्चयन्ति तद्भक्तास्तेभ्यो दत्तमिहाक्षयम् ॥१४-९८-९२ (९५४८७)
प्रदानैः पूजितो विप्रो वन्दितो वापि संस्कृतः ।
सम्भाषितो वा दृष्टो वा मद्भक्तो दिवमुन्नयेत् ॥१४-९८-९३ (९५४८८)
ये पठन्ति नमस्यन्ति ध्यायन्ति पुरुषास्तु माम् ।
स तान्स्पृष्ट्वा च दृष्ट्वा च नरः पापैः प्रमुच्यते ॥१४-९८-९४
(९५४८९)
मद्भक्ता मद्गतप्राणा मद्गीता मत्परायणाः ।
बीजयोनिविशुद्धा यै श्रोत्रियाः संयतेन्द्रियाः ।
शूद्रान्नविरता नित्यं ते पुनन्तीह दर्शनात् ॥ १४-९८-९५ (९५४९०)
स्वंय नीत्वा विशेषेण दानं तेषां गृहेष्वथ ।
निवापयेत्तु यद्भक्त्या तद्दानं कोटिसंमितम् ॥१४-९८-९६ (९५४९१)
जाग्रतः स्वपतो वापि प्रवासेषु गृहेष्वथ ।
हृदये न प्रणश्यामि यस्य विप्रस्य भावतः ॥१४-९८-९७ (९५४९२)
स पूजितो वा दृष्टो वा स्पृष्टो वापि द्विजोत्तमः ।
सम्भाषितो वा राजेन्द्र पुनात्येव नरं सदा ॥१४-९८-९८ (९५४९३)
एवं सर्वास्ववस्थासु सर्वदानानि पाण्डव ।
मद्भक्तेभ्यः प्रदत्तानि स्वर्गमार्गप्रदानि वै ॥ ॥१४-९८-९९ (९५४९४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
अष्टनवतितमोऽध्यायः ॥ ९८ ॥

आश्वमेधिकपर्व - अध्याय ०९९
॥ श्रीः ॥
१४.९९. अध्यायः ९९

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति बीजयोन्योः शुद्ध्यशुद्धिनिरूपणम् ॥ १ ॥
तथा गायत्रीमहिमानुवर्णनम् ॥ २ ॥
ब्राह्मणमहिमप्रशंसनम् । ब्राह्मणावमन्तॄणां नारकयातनानुवर्णनं
च ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
श्रुत्वैवं सात्विकं दानं राजसं तामसं तथा ।
पृथक्पृथक्त्वेन गतिं फलं चापि पृथक्पृथक् ॥ १४-९९-१ (९५४९५)
अवितृप्तः प्रहृष्टात्मा पुण्यं धर्मामृतं पुनः ।
युधिष्ठिरो धर्मरतः केशवं पुनरब्रवीत् ॥ १४-९९-२ (९५४९६)
बीजयोनिविशुद्धानां लक्षणानि वदस्व मे ।
बीजदोषेण लोकेश जायन्ते च कथं नराः ॥ १४-९९-३ (९५४९७)
आचारदोषं देवेशं वक्तुगर्हस्यशेषतः ॥
ब्राह्मणानां विशेषं च गुणदोषौ च केशव ॥ १४-९९-४ (९५४९८)
चातुर्वर्ण्यस्य कुत्स्नस्य वर्तमानाः प्रतिग्रहे ।
केन विप्रा विशेषेण तरन्ते तारयन्ति च ।
एतान्कथय देवेश त्वद्भक्तस्य नमोस्तु ते ॥ १४-९९-५ (९५४९९)
भगवानुवाच। १४-९९-६क्ष् (७९४७)
शृणु राजन्यथावृत्तं बीजयोनिं शुभाशुभम् ।
येन तिष्ठति लोकोयं विनश्यति च पाण्डव ॥ १४-९९-६ (९५५००)
अविप्लुतब्रह्मचर्यो यस्तु विप्रो यथाविधि ।
स बीजं नाम विज्ञेयं तस्य बीजं शुभं भवेत् ॥ १४-९९-७ (९५५०१)
कन्या चाक्षतयोनिः स्यात्कुलीना पितृमातृतः ।
ब्राह्मणादिषु विवाहेषु परिणीता यथाविधि ।
सा प्रशस्ता वरारोहा तस्या योनिः प्रशस्यते ॥ १४-९९-८ (९५५०२)
मनसा कर्मणा वाचा या गच्छेत्परपूरुषम् ।

योनिस्तस्या नरश्रेष्ठ गर्भाधानं न चार्हति ॥१४-९९-९ (९५५०३)
स्वैरिण्या यस्तु पापात्मा संतानार्थमिहेच्छति ।
स कुलान्पातयत्याशु दशपूर्वान्दशापरान् ॥१४-९९-१० (९५५०४)
दुष्टयोनौ तु यो मोहाद्रेतः सिञ्चति मूढधीः ।
तद्रेतसा समुत्पन्नः षडङ्गविदपि द्विजः ।
साधुभिः स बहिष्कार्यः श्वापाक इव पार्थिवा ॥ १४-९९-११ (९५५०५)
कर्मणा मनसा वाचा या भवेत्स्वैरचारिणी ।
सा कुलघ्नीति विज्ञेया तस्यां जातः श्वपाचकः ॥१४-९९-१२ (९५५०६)
दैवे पित्र्ये तथा दाने भोजने सहभाषणे ।
शयने सहसंबन्धे न योग्या दृष्टयोनिजाः ॥१४-९९-१३ (९५५०७)
न तस्माद्दुष्टयोन्यां तु गर्भमुत्पादयेद्बुधः ।
मोहेन कुरुते यस्तु कुलं हन्ति त्रिपूरुषम् ॥१४-९९-१४ (९५५०८)
कानीकनश्च सहोजश्च तथोभौ कुण्डगोलकै ।
आरूढपतिताज्जातः परितस्यापि यः सुतः ।
षडेते विप्रचण्डाला निकृष्टाः श्वपचादपि ॥ १४-९९-१५ (९५५०९)
यो यत्र तत्र वा रेतः सिक्त्वा शूद्रासु वा चरेत् ।
कामचारी स पापात्मा बीजं तस्याशुभं भवेत् ॥१४-९९-१६ (९५५१०)
अशुद्धं तद्भवेद्बीजं शुद्धां योनि न चार्हति ।
दूषयत्यपि तां योनिं शुना लीढं हविर्यथा ॥१४-९९-१७ (९५५११)
शूद्रयोनौ पतेद्बीजं हाहाशब्दं द्विजन्मनः ।
कुर्यात्पुरीषगर्तेषु पतितोऽस्मीति दुःखितः ॥१४-९९-१८ (९५५१२)
मामधःपातयन्नेष पापात्मा काममोहितः ।
अधोगतिं प्रजोत्क्षिप्रमिति शप्त्वा पतेत्तु तत् ॥१४-९९-१९ (९५५१३)
आत्मा हि शुक्लमुद्दिष्टं दैवतं परमं महत् ।
तस्मात्सर्वप्रयत्नेन निरुन्ध्याच्छुक्लमात्मनः ॥१४-९९-२० (९५५१४)
आयुस्तेजो बलं वीर्यं प्रज्ञा श्रीश्च महद्यशः ।
पुण्यं च मत्प्रियत्वं च लभते ब्रह्मचर्यया ॥१४-९९-२१ (९५५१५)
अविप्लुतब्रह्मचर्यैर्गृहस्थश्रममाश्रितैः ।
पञ्चयज्ञपरैर्धर्मः स्थाप्यते पृथिवीतले ॥१४-९९-२२ (९५५१६)
सायंप्रातस्तु ये सन्ध्यां सम्यङ्नित्यमुपासते ।
नावं वेदमयीं कृत्वा तरन्ते तारयन्ति च ॥१४-९९-२३ (९५५१७)
यो जपेत्पावनीं देवीं गायत्रीं वेदमातरम् ।
न सीदेत्प्रतिगृह्णानः पृथिवीं च ससागराम् ॥१४-९९-२४ (९५५१८)
ये चास्य दुःस्थिताः केचिद्ग्रहाः सूर्यादयो दिवि ।
ते चास्य सौम्या जायन्ते शिवाः शुभकरास्तथा ॥१४-९९-२५ (९५५१९)
यत्र यत्र स्थिताश्चैव दारुणाः पिशिताशनाः ।

घोररूपा महाकाया धर्षयन्ति न तं द्विजम् ॥१४-९९-२६ (९५५२०)
पुनन्तीह पृथिव्यां च चीर्णवेदव्रता नराः ।
चतुर्णामपि वेदानां सा हि राजन्गरीयसी ॥१४-९९-२७ (९५५२१)
अचीर्णिव्रतवेदा ये विकर्मफलमाश्रिताः ।
ब्राह्ममा नाममात्रेण तेऽपि पूज्या युधिष्ठिर ।
किं पुनर्यस्तु सन्ध्ये द्वे नित्यमेवोपतिष्ठते ॥ १४-९९-२८ (९५५२२)
शीलमध्ययनं दानं शौचं मार्दवमार्जवम् ।
तस्माद्वेदाद्विशिष्टानि मनुराह प्रजापतिः ॥१४-९९-२९ (९५५२३)
भूर्भुवस्स्वरिति ब्रह्म यो वेदनिरतो द्विजः ।
स्वदारनिरतो दान्तः स विद्वान्स च भूसुरः ॥१४-९९-३० (९५५२४)
सन्ध्यामुपासते ये वै नित्यमेव द्विजोत्तमाः ।
ते यान्ति नरशार्दूल ब्रह्मलोकं न संशयः ॥१४-९९-३१ (९५५२५)
सावित्रीमात्रसारोपि वरो विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥१४-९९-३२ (९५५२६)
सावित्रीं चैव वेदांश्च तुलयाऽतोलयन्पुरा ।
सदेवर्षिगणाश्चैव सर्वे ब्रह्मपुरस्सराः ।
चतुर्णामपि वेदानां सा हि राजन्गरीयसी ॥ १४-९९-३३ (९५५२७)
यथा विकसिते पुष्पे मधु गृह्णन्ति षट्पदाः ।
एवं गृहीता सावित्री सर्ववेदे च पाण्डवः ॥१४-९९-३४ (९५५२८)
तस्मात्तु सर्ववेदानां सावित्री प्राण उच्यते ।
निर्जीवा हीतरे वेदा विना सावित्रिया नृपः ॥१४-९९-३५ (९५५२९)
नायन्त्रितश्चतुर्वेदी शीलभ्रष्टः स कुत्सितः ।
शीलवृत्तसमायुक्तः सावित्रीपाठको वरः ॥१४-९९-३६ (९५५३०)
सहस्रपरमां देवीं शतमध्यां दशावराम् ।
सावित्रीं जप कौतेय सर्वपापप्रणाशिनीम् ॥१४-९९-३७ (९५५३१)
युधिष्ठिर उवाच।१४-९९-३८क्ष् (७९४८)
त्रैलोक्यनाथ हे कृष्ण सर्वभूतात्मको ह्यसि ।
नानायोगपर श्रेष्ठ तुष्यसे केन कर्मणा ॥१४-९९-३८ (९५५३२)
भागवानुवाच।१४-९९-३९क्ष् (७९४९)
यदि भारसहस्रं तु गुग्गुल्वादि प्रधूपयेत् ।
करोति चेन्नमस्कारमुपहारं च कारयेत् ॥१४-९९-३९ (९५५३३)
स्तौति यः स्तुतिभिर्मां च ऋग्यजुस्सामभिः सदा ।
न तोषयति चेद्विप्रान्नाहं तुष्यामि भारत ॥१४-९९-४० (९५५३४)
ब्राह्मणे पूजिते नित्यं पूजितोस्मि न संशयः ।
आक्रुष्टे चाहमाक्रुष्टो भवामि भरतर्षभ ॥१४-९९-४१ (९५५३५)
परा मयि गतिस्तेषां पूजयन्ति द्विजं हि ये ।

यदहं द्विजरूपेण वसामि वसुधातले ॥१४-९९-४२ (९५५३६)
यस्तान्पूजयति प्राज्ञो मद्गतेनान्तरात्मना ।
तमहं स्वेन रूपेण पश्यामि नरपुङ्गव ॥१४-९९-४३ (९५५३७)
कुब्जाः काणा वामनाश्च दरिद्रा व्याधितास्तथा ।
नावमान्या द्विजाः प्राज्ञैर्मम रूपा हि ते द्विजाः ॥१४-९९-४४ (९५५३८)
ये केचित्सागरान्तायां पृथिव्यां द्विजसत्तमाः ।
मम रूपं हि तेष्वेवमर्चितेष्वर्चितोऽस्म्यहम् ॥१४-९९-४५ (९५५३९)
बहवस्तु न जानन्ति नरा ज्ञानबहिष्कृताः ।
यदहं द्विजरूपेण वसामि वसुधातले ॥१४-९९-४६ (९५५४०)
अवमन्यन्ति ये विप्रान्स्वधर्मान्पातयन्ति ते ।
प्रेषणैः प्रेषयन्ते च शुश्रूषां कारयन्ति च ॥१४-९९-४७ (९५५४१)
मृतांश्चात्र परत्रेमान्यमदूता महाबलाः ।
निकृन्तन्ति यथाकामं सूत्रमार्गेण शिल्पिनः ॥१४-९९-४८ (९५५४२)
आक्रोशपरिवादाभ्यां ये रमन्ते द्विजातिषु ।
तान्मृतान्यमलोकस्थान्निपात्य पृथिवीतले ॥१४-९९-४९ (९५५४३)
आक्रम्योरसि पादेन क्रूरः संरक्तलोचनः ।
अग्निवर्णैस्तु संदंशैर्यमो जिह्वां समुद्धरेत् ॥१४-९९-५० (९५५४४)
ये च विप्रान्निरीक्षन्ते पापाः पापेन चक्षुषा ।
अब्रह्मण्याः श्रुतेर्बाह्या नित्यं ब्रह्मद्विषो नराः ॥१४-९९-५१ (९५५४५)
तेषां घोरा महाकाया वक्रतुण्डा महाबलाः ।
उद्धरन्ति मुहूर्तेन स्वगाश्चक्षुर्यमाज्ञया ॥१४-९९-५२ (९५५४६)
यः प्रहारं द्विजेन्द्राय दद्यात्कुर्याच्च शोणितम् ।
अस्थिभङ्गं च यः कुर्यात्प्राणैर्वा विप्रयोजयेत् ।
सोनुपूर्व्येण यातीमान्नरकानेकविंशतिम् ॥ १४-९९-५३ (९५५४७)
शूलमारोप्यते पश्चाज्ज्वलने परिपच्यते ।
बहुवर्षसहस्राणि पच्यमानस्त्ववाक्छिराः ।
नावमुच्येत दुर्मेदा न तस्य क्षीयते गतिः ॥ १४-९९-५४ (९५५४८)
ब्राह्मणान्वा विचार्यैव व्रजन्तै वधकाङ्क्षया ।
शतवर्षसहस्राणि तामिस्रे परिपच्यते ॥१४-९९-५५ (९५५४९)
उत्पाद्य शोणितं गात्रात्संरंभमतिपूर्वकम् ।
सपर्ययेण यातीमान्नरकानेकविंशतिम् ॥१४-९९-५६ (९५५५०)
तस्मान्नाकुशलं ब्रूयान्न शुष्कां गतिमीरयेत् ।
न ब्रूयात्परुषां वाणीं न चैवैनानतिक्रमेत् ॥१४-९९-५७ (९५५५१)
ये विप्राञ्श्लक्ष्णया वाचा पूजयन्ति नरोत्तमाः ।
अर्चितश्च स्तुतश्चैव तैर्भवामि न संशयः ॥१४-९९-५८ (९५५५२)
तर्जयन्ति च ये विप्रान्क्रोशयन्ति च भारत ।

आक्रुष्टस्तर्जितश्चाहं तैर्भवामि न संशयः ॥१४-९९-५९ (९५५५३)
यश्चन्दनैश्चागरुधूपदीपै-
रभ्यर्चयेत्काष्ठमयीं ममार्चाम् ।
तेनार्चितो नैव भवामि सम्य-
ग्विप्रार्चनादस्मि समर्चितोऽहम् ॥ १४-९९-६० (९५५५४)
विप्रप्रसादाद्धरणीधरोऽहं
विप्रप्रसादादसुराञ्जयामि ।
विप्रप्रसादाच्च सदक्षिणोऽहं
विप्रप्रसादादजितोऽहमस्मि ॥ ॥ १४-९९-६१ (९५५५५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
एकोनशततमोऽध्यायः ॥ ९९ ॥

आश्वमेधिकपर्व - अध्याय १००
॥ श्रीः ॥
१४.१००. अध्यायः १००

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति
सुकृतिदुष्कृतिजनप्राप्यवैवस्वतपुरमार्गादिप्रतिपादनपूर्वकं
तेषां तद्गमनप्रकारानुवर्णनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
देवदेवेश दैत्यघ्नि परं कौतूहलं हि मे ।
एतत्कथय सर्वज्ञ त्वद्भक्तस्य च केशव ।
मानुषस्य च लोकस्य धर्मलोकस्य चान्तरम् ॥ १४-१००-१ (९५५५६)
कीदृशं किंप्रमाणं वा किमधिष्ठानमेव च ।
तरन्ति मानुषा देव केनोपायेन माधव ॥१४-१००-२ (९५५५७)
त्वगस्थिमांसनिर्मुक्ते पञ्चभूतविवर्जिते ।
कथयस्व महादेव सुखदुःखमशेषतः ॥१४-१००-३ (९५५५८)
जीवस्य कर्मलोकेषु कर्मभिस्तु शुभाशुभैः ।
अनुबद्धस्य तैः पाशैर्नीयमानस्य दारुणैः ॥१४-१००-४ (९५५५९)
मृत्युदूतैर्दुराधर्षैर्घोरैर्घोरपरक्रमैः ।
वध्यस्याक्षिप्यमाणस्य विद्रुतस्य यमाज्ञया ॥१४-१००-५ (९५५६०)

पुण्यपापकृदातिष्ठेत्सुखदुःखमशेषतः ।
यमदूतैर्दुराधर्षैर्नीयते वा कथं पुनः ।
किं वा तत्र गता देव कर्म कुर्वन्ति मानवाः ॥ १४-१००-६ (९५५६१)
कथं धर्मपरा यान्ति देवताद्विजपूजकाः ।
कतं वा पापकर्माणो यान्ति प्रेतपुरं नराः ॥१४-१००-७ (९५५६२)
किं रूपं किं प्रमाणं वा वर्णः को वाऽस्य केशव ।
जीवस्य गच्छतो नित्यं यमलोकं ब्रवीहि मे ॥१४-१००-८ (९५५६३)
भगवानुवाच।१४-१००-९क्ष् (७९५०)
शृणु राजन्यथावृतं यन्मां त्वं परिपृच्छसि ।
तत्तेऽहं कथयिष्यामि मद्भक्तस्य नरेश्वर ॥१४-१००-९ (९५५६४)
षडशीतिसहस्राणि योजनानां युधिष्ठिर ।
मानुष्यस्य च लोकस्य यमलोकस्य चान्तरम् ॥१४-१००-१० (९५५६५)
न तत्र वृक्षच्छाया वा न तटाकं सरोपि वा ।
न वाप्यो दीर्घिका वाऽपि न कूपो वा युधिष्ठिर ॥१४-१००-११ (९५५६६)
न मण्टपं सभा वाऽपि न प्रपा न निकेतनम् ।
न पर्वतो नदी वाऽपि न भूमेर्विवरं क्वचित् ॥१४-१००-१२ (९५५६७)
न ग्रामो नाश्रमो वाऽपि नोद्यानं वा वनानि च ।
न किंचिदाश्रयस्थानं पथि तस्मिन्युधिष्ठिर ॥१४-१००-१३ (९५५६८)
जन्तोर्हि प्राप्तकालस्य वेदनार्तस्य वै भृशम् ।
कारणैस्त्यक्तदेहस्य प्राणैः कण्ठगतैः पुनः ॥१४-१००-१४ (९५५६९)
शरीराच्चाल्यते जीवो ह्यवशो मातरिश्वना ।
निर्गतो वायुभूतस्तु षट्कोशात्तु कलेवरात् ॥१४-१००-१५ (९५५७०)
शरीरमन्यत्तद्रूपं तद्वर्णं तत्प्रमाणतः ।
अदृश्यं तत्प्रविष्टस्तु सोप्यदृष्टोऽथ केनचित् ॥१४-१००-१६ (९५५७१)
सोन्तरात्मा देहवतामष्टाङ्गो यस्तु संचरेत् ।
छेदनाद्भेदनाद्दाहात्ताडनाद्वा न नश्यति। १४-१००-१७ (९५५७२)
नाना रूपधरैर्घोरैः प्रचण्डेश्चण्डसाधनैः ।
नीयमानो दुराधर्षैर्यमदूतैर्यमाज्ञया ॥१४-१००-१८ (९५५७३)
पुत्रदारमयैः पाशैः संनिरुद्धोऽवशो बलात् ।
स्वकर्मभिश्चानुगतः कृतैः सुकृतदुष्कृतैः ॥१४-१००-१९ (९५५७४)
आक्रन्दमानः करुणं बन्धुभिर्दुःखपीडितैः ।
त्यक्त्वा बन्धुजनं सर्वं निरपेक्षस्तु गच्छति ॥१४-१००-२० (९५५७५)
मातृभिः पितृभिश्चैव भ्रातृभिर्मातुलैस्तथा ।
दारैः पुत्रैर्वयस्यैश्च रुदद्भिस्त्यज्यते पुनः ॥१४-१००-२१ (९५५७६)
अदृश्यमानस्तैर्दीनैरश्रुपूर्णमुखेक्षणैः ।
स्वशरीरं परित्यज्य वायुभूतस्तु गच्छति ॥१४-१००-२२ (९५५७७)

अन्धकारमपारं तं महाघेरं तमोवृतम् ।
दुःखान्तं दुष्प्रतारं च दुर्गमं पापकर्मणाम् ॥ १४-१००-२३ (९५५७८)
दुःसहायं दुरन्तं च दुर्निरीक्षं दुरासदम् ।
दुरापमतिदुःखं च पापिष्ठानां नरोत्तम ॥ १४-१००-२४ (९५५७९)
ऋषिभिः कथ्यमानं तत्पारंपर्येण पार्थिव ।
त्रासं जनचति प्रायः श्रूयमाणं कथास्वपि ॥ १४-१००-२५ (९५५८०)
अवश्यं चैव गन्तव्यं तदध्वानं युधिष्ठिर ।
प्राप्तकालेन संत्यज्य बन्धून्भोगान्धनानि च ॥ १४-१००-२६ (९५५८१)
जरायुजैरण्डजैश्च स्वेदजैरुद्भिदैस्तथा ।
जङ्गमैः स्थिरसंज्ञैश्च गन्तव्यं यमसादनम् ॥ १४-१००-२७ (९५५८२)
देवासुरैर्मनुष्याद्यैर्वैवस्वतवशानुगैः ।
स्त्रीपुंनपुंसकैश्चापि पृथिव्यां जीवसंज्ञितैः ॥ १४-१००-२८ (९५५८३)
मध्यमैर्युवभिर्वाऽपि बालैर्वृद्धैस्तथैव च ।
जातमात्रैश्च गर्भस्थैर्गन्तव्यः स महापथः ॥ १४-१००-२९ (९५५८४)
पूर्वाह्णे वाऽपराह्णे वा सन्ध्याकालेऽथवा पुनः ।
प्रदोषे वाऽर्धरात्रे वा प्रत्युषे वाऽप्युपस्थिते ॥ १४-१००-३० (९५५८५)
प्रवासस्थैर्वनस्थैर्वा पर्वतस्थैर्जले स्थितैः ।
क्षेत्रस्थैर्वा नभःस्थैर्वा गृहमध्यगतैरपि ॥ १४-१००-३१ (९५५८६)
भुञ्जद्भिर्वा पिबद्भिर्वा खादद्भिर्वा नरोत्तम ।
आसीनैर्वा स्थितैर्वापि शयनीयगतैरपि ।
जाग्रद्भिर्वा प्रसुप्तैर्वा गन्तव्यः स महापथः ॥ १४-१००-३२ (९५५८७)
मृत्युदूतैर्दुराधर्षैः प्रचण्डैश्चण्डसासनैः ।
आक्षिप्यमाणा ह्यवशाः प्रयान्ति यमसादनम् ॥ १४-१००-३३ (९५५८८)
क्वचिद्भीतैः क्वचिन्मत्तैः प्रस्खलद्भिः क्वचित्क्वचित् ।
क्रन्दद्भिर्वेदनार्तैस्तु गन्तव्यं यमसादनम् ॥ १४-१००-३४ (९५५८९)
निर्भर्त्स्यमानैरुद्विग्नैर्विधूतैर्भयविह्वलैः ।
तुद्यमानशरीरैश्च गन्तव्यं तर्जितैस्तथा ॥ १४-१००-३५ (९५५९०)
कण्टकाकीर्णमार्गेण तप्तवालुकपांसुना ।
दह्यमानैस्तु गन्तव्यं नरैर्दानविवर्जितैः ॥ १४-१००-३६ (९५५९१)
काष्ठोपलशिलाघातैर्दण्डोल्मुककशाङ्कुशैः ।
हन्यमानैर्यमपुरं गन्तव्यं धर्मवर्जितैः ॥ १४-१००-३७ (९५५९२)
मेदःशोणितपूयाद्यैर्वक्त्रैर्गात्रैश्च सव्रणैः ।
दग्धक्षतजकीर्णैश्च गन्तव्यं जीवघातकैः ॥ १४-१००-३८ (९५५९३)
वेदनार्तैस्च कूजद्भिर्विक्रोशद्भिश्च विस्वरम् ।
वेदनार्तैः पतद्भिश्च गन्तव्यं जीवघातकैः ॥ १४-१००-३९ (९५५९४)
भग्नपादोरुहस्तङ्गैर्भग्नजङ्घाशिरोधरैः ।

छिन्नकर्णोष्ठनासैश्च गन्तव्यं जीवघातकैः ॥ १४-१००-४० (९५५९५)
शक्तिभिर्भिण्डिपालैश्च शङ्कुतोमरसायकैः ।
तुद्यमानैस्तु शूलाग्रैर्गन्तव्यं जीवघातकैः ॥ १४-१००-४१ (९५५९६)
श्वभिर्व्याघ्रैर्वृकैः काकैर्भक्ष्यमाणाः समन्ततः ।
तुद्यमानाश्च गच्छन्ति राक्षसैर्मांसघातिभिः ॥ १४-१००-४२ (९५५९७)
महिषैश्च मृगैश्चापि सूकरैः पृषतैस्तथा ।
भक्ष्यमाणैस्तदध्वानं गन्तव्यं मांसखादिभिः ॥ १४-१००-४३ (९५५९८)
सूचीसुतीक्ष्णतुण्डाभिर्मक्षिकाभिः समन्ततः ।
तुद्यमानैश्च गन्तव्यं पापिष्ठैर्बालघातकैः ॥ १४-१००-४४ (९५५९९)
विस्रब्धं स्वामिनं मित्रं स्त्रियं वा घ्नन्ति ये नराः ।
शस्त्रैर्निर्भिद्यमानैश्च गन्तव्यं यमसादनम् ॥ १४-१००-४५ (९५६००)
खादयन्ति च ये जीवान्दुःखमापादयन्ति च ।
राक्षसैश्च श्वभिश्चैव भक्ष्यमाणा व्रजन्ति च ॥ १४-१००-४६ (९५६०१)
ये हरन्ति च वस्त्राणि शय्यां प्रावरणानि च ।
ते यान्ति विद्रुता नग्नाः पिशाचा इव तत्पथं ॥ १४-१००-४७ (९५६०२)
गाश्च धान्यं हिरण्यं वा बलात्क्षेत्रं गृहं तथा ।
ये हरन्ति दुरात्मानः परस्वं पापकारिणः ॥ १४-१००-४८ (९५६०३)
पाषाणैरुल्मुकैर्दण्डैः काष्ठघातैश्च चर्झरैः ।
हन्यमानैः क्षताकीर्णैर्नन्तव्यं तैर्यमालयम् ॥ १४-१००-४९ (९५६०४)
ब्रह्मस्वं ये हरन्तीह नरा नरकनिर्भयाः ।
आक्रोशन्तीह ये नित्यं प्रहरन्ति च ये द्विजान् ॥ १४-१००-५० (९५६०५)
शुष्ककण्ठा निबद्धास्ते छिन्नजिह्वाक्षिनासिकाः ।
पूयशोणितदुर्गन्धा भक्ष्यमाणाश्च जंबुकैः ॥ १४-१००-५१ (९५६०६)
चण्डालैर्भीषणैश्चण्डैस्तुद्यमानाः समन्ततः ।
क्रोशन्तः करुणं घोरं गच्छन्ति यमासादनम् ॥ १४-१००-५२ (९५६०७)
तत्र चापि गताः पापा विष्ठाकूपेष्वनेकशः ।
जीवन्तो वर्षकोटीस्तु क्लिश्यन्ते वेदनात्ततः ॥ १४-१००-५३ (९५६०८)
ततश्च मुक्ताः कालेन लोके चास्मिन्नराधमाः ।
विष्ठाक्रिमित्वं गच्छन्ति जन्मकोटिशतं नृप ॥ १४-१००-५४ (९५६०९)
विद्यमानधनैर्यैस्तु लोभडंभानृतान्वितैः ।
श्रोत्रियेभ्यो न दत्तानि दानानि कुरुपुङ्गव ॥ १४-१००-५५ (९५६१०)
ग्रीवापाशनिबद्धास्ते हन्यमानाश्च राक्षसैः ।
क्षुत्पिपासाश्रमार्तास्तु यान्ति प्रेतपुरं नराः ॥ १४-१००-५६ (९५६११)
अदत्तदाना गच्छन्ति शुष्ककण्ठास्यतालुकाः ।
अन्नं पानीयसहितं प्रार्थयन्तः पुनःपुनः ॥ १४-१००-५७ (९५६१२)
स्वामिन्बुभक्षातृष्णार्ता गन्तुं नैवाद्य शक्नुमः ।

ममान्नं दीयतां स्वामिन्पानीयं दीयतां मम ।
इति ब्रुवन्तस्तैर्दूतैः प्राप्यन्ते वै यमालयम् ॥ १४-१००-५८ (९५६१३)
वैशम्पायन उवाच। १४-१००-५९क्ष् (७९५१)
तच्छ्रुत्वा वचनं विष्णोः पपात भुवि पाण्डवः ।
निस्संज्ञो भयसंत्रस्तो मूर्छया समभिप्लुतः ॥ १४-१००-५९ (९५६१४)
ततो लब्ध्वा शनैः संज्ञां समाश्वस्तोच्युतेन सः ।
नेत्रे प्रक्षाल्य तोयेन भूयः केशवमब्रवीत् ॥ १४-१००-६० (९५६१५)
भीतोस्म्यहं महादेव श्रुत्वा मार्गस्य विस्तरम् ।
केनोपायेन तं मार्गं तरन्ति पुरुषाः सुखम् ॥ १४-१००-६१ (९५६१६)
भगवानुवाच। १४-१००-६२क्ष् (७९५२)
इह ये धार्मिका लोके जीवगातविवर्जिताः ।
गुरुशुश्रूषणे युक्ता देवब्राह्मणपूजकाः ॥ १४-१००-६२ (९५६१७)
अस्मान्मानुष्यलोकात्ते समार्याः सहबान्धवाः ।
यमध्वानं तु गच्छन्ति यथावत्तं निबोध मे ॥ १४-१००-६३ (९५६१८)
ब्राह्मणेभ्यः प्रदानानि नानारूपाणि पाण्डव ।
ये प्रयच्छन्ति विप्रेभ्यस्ते सुखं यान्ति तत्फलम् ॥ १४-१००-६४ (९५६१९)
अन्नं ये च प्रयच्छन्ति ब्राह्मणेभ्यः सुसंस्कृतम् ।
क्षोत्रियेभ्यो विशेषेण प्रीत्या परमया युताः ॥ १४-१००-६५ (९५६२०)
ते विमानैर्महात्मानो यान्ति चित्रैर्यमालयम् ।
सेव्यमाना वरस्त्रीभिरप्सरोभिर्महापथम् ॥ १४-१००-६६ (९५६२१)
ये च नित्यं प्रभाषन्ते सत्यं निष्कल्मषं वचः ।
ते च यान्त्यमलाभ्राभैर्विमानैर्वृषयोजितैः ॥ १४-१००-६७ (९५६२२)
कपिलाद्यानि पुण्यानि गोप्रदानानि ये नराः ।
ब्राह्मणेभ्यः प्रयच्छन्ति श्रोत्रियेभ्यो विशेषतः ॥ १४-१००-६८ (९५६२३)
ते यान्त्यमलवर्णाभैर्विमानैर्वृषयोजितैः ।
वैवस्वतपुरं प्राप्य ह्यप्सरोभिर्निषेविताः ॥ १४-१००-६९ (९५६२४)
उपानहौ च च्छत्रं च शयनान्यासनानि च ।
विप्रेभ्यो ये प्रयच्छन्ति वस्त्राण्याभरणानि च ॥ १४-१००-७० (९५६२५)
ते यान्त्यश्वैर्वृषैर्वाऽपि कुञ्जरैरप्यलङ्कृताः ।
धर्मराजपुरं रम्यं सौवर्णच्छत्रशोभिताः ॥ १४-१००-७१ (९५६२६)
ये च भक्ष्याणि दास्यन्ति भोज्यं पेयं तथैव च ।
स्निग्धान्नान्यापि विप्रेभ्यः श्रद्धया परया युताः ॥ १४-१००-७२ (९५६२७)
ते यान्ति काञ्चनार्यानैः सुखं वैवस्वतालयम् ।
वरस्त्रीभिर्यथाकामं सेव्यमानाः सहस्रशः ॥ १४-१००-७३ (९५६२८)
ये च क्षीरं प्रयच्छन्ति घृतं दधि गुडं मधु ।
ब्राह्मणेभ्यः प्रयत्नेन श्रद्दधानाः सुसंस्कृताः ॥ १४-१००-७४ (९५६२९)

चक्रवाकप्रयुक्तैस्तु यानै रुक्ममयैः शुभैः ।
यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥ १४-१००-७५ (९५६३०)
ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च ।
हंसयुक्तैर्विमानैस्तु यान्ति धर्मपुरं नराः ॥ १४-१००-७६ (९५६३१)
ये प्रयच्छन्ति विप्रेभ्यो विचित्रान्नं घृताप्लुतम् ।
ते व्रजनत्यमलाभ्राभैर्विमानैर्वायुवेगिभिः ।
पुरं तत्प्रेतनाथस्य नानाजनसमाकुलम्। १४-१००-७७ (९५६३२)
पानीयं ये प्रयच्छन्ति सर्वभूतप्रजीवनम् ।
ते सुतृप्ताः सुखं यान्ति भवनैर्हंसचोदितैः ॥ १४-१००-७८ (९५६३३)
ये तिलं तिलधेनुं वा धृतधेनुमथापि च ।
श्रोत्रियेभ्यः प्रयच्छन्ति सौम्यभावसमन्विताः ॥ १४-१००-७९ (९५६३४)
सूर्यमण्डलसंकाशैर्यानैस्ते यान्ति निर्मलैः ।
गीयमानैस्तु गन्धर्वैर्वैवस्वतपुरं नृप ॥ १४-१००-८० (९५६३५)
येषां वाप्यश्च कूपाश्च तटाकानि सरांसि च ।
दीर्घिकाः पुष्करिण्यश्च सजलाश्च जलाशयाः ॥ १४-१००-८१ (९५६३६)
यानैस्ते यान्ति चन्द्राभैर्दिव्यघण्टानिनादितैः ।
चामरैस्तालवृन्तैश्च वीज्यमाना महाप्रभाः ।
नित्यतृप्ता महात्मानो गच्छन्ति यमसादनम् ॥ १४-१००-८२ (९५६३७)
येषां देवगृहाणीह चित्राण्यायतनानि च ।
मनोहराणि कान्तानि दर्शनीयानि भान्ति च ॥ १४-१००-८३ (९५६३८)
ते व्रजन्त्यमलाभ्राभैर्विमानैर्वायुवेगिभिः ।
पुरं तत्प्रेतनाथस्य नानाजनपदाकुलम् ॥ १४-१००-८४ (९५६३९)
वैवस्वतं च पश्यन्ति सुखचित्तं सुखस्थितम् ।
यमेन पूजिता यान्ति देवसालोक्यतां ततः ॥ १४-१००-८५ (९५६४०)
देवानुद्दिश्य लोकेषु प्रपासु करकोद्धृतम् ।
शीतलं सलिलं रम्यं तृषितेभ्यो दिशन्ति ये ।
ते तु तृप्तिं परां यान्ति प्राप्य सौख्यं महापथम् ॥ १४-१००-८६ (९५६४१)
काष्ठपादुकदा यान्ति तदध्वानं सुखं नराः ।
सौवर्णमणिपीठे तु पादं कृत्वा स्थोत्तमे ॥ १४-१००-८७ (९५६४२)
आरामान्वृक्षषण्डांश्च रोपयन्ति च ये नराः ।
संवर्धयन्ति चाव्यग्रं फलपुष्पोपशोभितम् ॥ १४-१००-८८ (९५६४३)
वृक्षच्छायासु रम्यासु शीतलासु स्वलङ्कृताः ।
यान्ति ते वाहनैर्दिव्यैः पूज्यमाना मुहुर्मुहुः। १४-१००-८९ (९५६४४)
सेव्यमानाः सुरूपाभिरुत्तमाभिः प्रयत्नतः ।
स्त्रीभिः कनकवर्णाभिर्यथाकामं यथासुखम् ॥ १४-१००-९० (९५६४५)
अश्वयानं तु गोयानं हस्तियानमथापि च ।

ये प्रयच्छन्ति विप्रेभ्यो विमानैः कनकोपमैः ॥१४-१००-९१ (९५६४६)
सुवर्णं रजतं वाऽपि विद्रुमं मौक्तिकं तथा ।
ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः ।
ते व्रजन्ति वरस्त्रीभिः सेव्यमाना यथासुखम् ॥ १४-१००-९२ (९५६४७)
भूमिदा यान्ति तं लोकं सर्वकामैः सुतर्पिताः ।
उदितादित्यसंकाशैर्विमानैर्वृषयोजितैः ॥१४-१००-९३ (९५६४८)
कन्यां ये च प्रयच्छन्ति विप्राय श्रोत्रियाय च ।
दिव्यकन्यावृता यान्ति विमानैस्ते यमालयम् ॥१४-१००-९४ (९५६४९)
सुगन्धान्गान्धसंयोगान्पुष्पाणि सुरभीणि च ।
प्रयच्छन्ति द्विजाग्रेभ्यो भक्तया परमया युताः ॥१४-१००-९५ (९५६५०)
सुगन्धाः धर्मपुरं यानैर्विचित्रैरप्यलङ्कृताः ॥
यान्ति धर्मपुरं यानैर्विचित्रैरप्यलङ्कृताः ॥१४-१००-९६ (९५६५१)
दीपया यान्ति यानैश्च द्योतयन्तो दिशो दश ।
आदित्यसदृशाकारैर्दीप्यमाना इवाग्नयः ॥१४-१००-९७ (९५६५२)
गृहावसथदातारो गृहैः काञ्चनवेदिकैः ।
व्रजन्ति बालसूर्याभैर्धर्मराजपुरं नराः ॥१४-१००-९८ (९५६५३)
जलभाजनदातारः कुण्डिकाकरकप्रदाः ।
पूज्यमाना वरस्त्रीभिर्यान्ति तृप्ता महागजैः ॥१४-१००-९९ (९५६५४)
पादाभ्यङ्गं शिरोभ्यह्गं पानं पादोदकं तथा ।
ये प्रयच्छन्ति विप्रेभ्यस्ते यान्त्यश्वैर्यमालयम् ॥१४-१००-१०० (९५६५५)
विश्रामायन्ति ये विप्राञ्श्रान्तानध्वनि कर्शितान् ।
चक्रवाकप्रयुक्तेन यान्ति यानेन तेऽपि च ॥१४-१००-१०१ (९५६५६)
स्वागतेन च यो विप्रान्पूजयेदासनेन च ।
स गच्छति तदध्वानं सुखं परमनिर्वृतः ॥१४-१००-१०२ (९५६५७)
नमो ब्रह्मण्यदेवेति यो मां दृष्ट्वाऽभिवादयेत् ।
व्रतीवं प्रयतो नित्यं स सुखं तत्पदं व्रजेत् ॥१४-१००-१०३ (९५६५८)
नमः सर्वसहाभ्यश्चेत्यभिख्याय दिनेदिने ।
नमस्करोति नित्यं गां स सुखं याति तत्पथं ॥१४-१००-१०४ (९५६५९)
नमोस्तु प्रियदत्तायेत्येववादी दिनेदिने ।
भूमिमाक्रमते प्रातः सयनादुत्थितश्च यः ॥१४-१००-१०५ (९५६६०)
सर्वकामैः स तृप्तात्मा सर्वभूषणभूषितः ।
याति यानेन दिव्येन सुकं वैवस्वतालयम् ॥१४-१००-१०६ (९५६६१)
अनत्तराशिनो ये तु डंभानृतविवर्जिताः ।
तेऽपि सारसयुक्तेन यान्ति यानेन वै सुखम् ॥१४-१००-१०७ (९५६६२)
ये चाप्येकेन भुक्तेन डंभानृतविवर्जिताः ।
हंसयुक्तैर्विमानैस्तु सुखं यान्ति यमालयम् ॥१४-१००-१०८ (९५६६३)

चतुर्थेन च भुक्तेन वर्तन्ते ये जितेन्द्रियाः ।
यान्ति ते धर्मनगरं यानैर्बर्हिणयोजितैः ॥१४-१००-१०९ (९५६६४)
तृतीयदिवसेनेह भुञ्जते ये जितेन्द्रियाः ।
तेऽपि हस्तिरथं यान्ति तत्पथं कनकोज्ज्वलैः ॥१४-१००-११० (९५६६५)
षष्ठान्नकालिको यस्तु वर्षमेकं तु वर्तते ।
कामक्रोधविनिर्मुक्तः शुचिर्नित्यं जितेन्द्रियः ।
स याति कुञ्जरस्थैस्तु जयशब्दरवैर्युतः ॥ १४-१००-१११ (९५६६६)
पक्षोपवासिनो यान्ति यानैः शार्दूलयोजितैः ।
धर्मराजपुरं रम्यं दिव्यस्त्रीगणसेवितम् ॥१४-१००-११२ (९५६६७)
ये च मासोपवासं वै कुर्वते संयतेन्द्रियाः ।
तेऽपि सूर्योदयप्रख्यैर्यान्ति यानैर्यमालयम् ॥१४-१००-११३ (९५६६८)
अग्निप्रवेशं यश्चापि कुरुते मद्गतात्मना ।
स यात्यग्निप्रकाशेन विमानेन यमालयम् ॥१४-१००-११४ (९५६६९)
गोकृते स्त्रीकृते चैव हत्वा विप्रकृतेऽपि च ।
ते यान्त्यमरकन्याभिः सेव्यमाना रविप्रभाः ॥१४-१००-११५ (९५६७०)
ये च कुर्वन्ति मद्भक्तास्तीर्थयात्रां जितेन्द्रियाः ।
ते पन्थानं महात्मानो यानैर्यान्ति सुनिर्वृताः ॥१४-१००-११६ (९५६७१)
ये यजन्ति द्विजश्रेष्ठाः क्रतुभिर्भूरिदक्षिणैः ।
हंससारससंयुक्तैर्यानैस्ते यान्ति तत्पथम् ॥१४-१००-११७ (९५६७२)
परपीडामकृत्वैव भृत्यान्बिभ्रति ये नराः ।
तत्पथं ससुखं यान्ति विमानैः काञ्चनोज्ज्वलैः ॥१४-१००-११८ (९५६७३)
ये समाः सर्वभूतेषु जीवानामभयप्रदाः ।
क्रोधलोभविनिर्मुक्ता निगृहीतेन्द्रियास्तथा। १४-१००-११९ (९५६७४)
पूर्णचन्द्रप्रतीकाशैर्विमानैस्ते महाप्रभाः ।
यान्ति वैवस्वतपुरं देवगन्धर्वसेविताः ॥१४-१००-१२० (९५६७५)
ये मामेकान्तभावेन देवं त्र्यंबकमेव वा ।
पूजयन्ति नमस्यन्ति स्तुवन्ति च दिनेदिने ।
धर्मराजपुरं यान्ति यानैस्तेऽर्कसमप्रभैः ॥ १४-१००-१२१ (९५६७६)
पूजितास्तत्र धर्मेण स्वयं माल्यादिभिः शुभैः ।
यान्त्येव धर्मलोकं वा रुद्रलोकमथापि वा ॥ ॥१४-१००-१२२ (९५६७७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
शततमोऽध्यायः ॥१०० ॥

आश्वमेधिकपर्व - अध्याय १०१
॥ श्रीः ॥

१४.१०१. अध्यायः १०१

Mahabharata - Ashvamedhika Parva - Chapter Topics

कृष्णेन युधिष्ठिरंप्रति जलदानान्नदानफलप्रशंसनम् ॥ १ ॥
तथाऽतिथिलक्षणकथनपूर्वकं तत्पूजाफलकथनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
श्रुत्वा यमपुराध्वानं जीवानां गमनं तथा ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥ १४-१०१-१ (९५६७८)
देवदेवेश दैत्यघ्न ऋषिसङ्घैरभिष्टुत ।
भगवन्भवहञ्श्रीमन्सहस्रादित्यसन्निभ ॥ १४-१०१-२ (९५६७९)
सर्वसंभव धर्मज्ञ सर्वधरमप्रवर्तक ।
सर्वदानफलं सौम्य कथयस्व ममाच्युत ॥ १४-१०१-३ (९५६८०)
दानं देयं कथं कृष्ण कीदृशाय द्विजाय वै ।
कीदृशं वा तपः कृत्वा तत्फलं कुत्र भुज्यते ॥ १४-१०१-४ (९५६८१)
एवमुक्तो हृषीकेशो धर्मपुत्रेण धीमता ।
उवाच धर्मपुत्राय पुण्यान्धर्मान्महोदयान् ॥ १४-१०१-५ (९५६८२)
शृणुष्वावहितो राजन्पूतं पापघ्नमुत्तमम् ।
सर्वदानफलं सौम्य न श्राव्यं पापकर्मणम् ॥ १४-१०१-६ (९५६८३)
यच्छ्रुत्वा पुरुषः स्त्री वा नष्टपापः समाहितः ।
तत्क्षणात्पूततां याति पापकर्मरतोपि वा ॥ १४-१०१-७ (९५६८४)
एकाहमपि कौन्तेय भूमावुत्पादितं जलम् ।
सप्त तारयते पूर्वान्वितृष्णा यत्र गौर्भवेत् ॥ १४-१०१-८ (९५६८५)
पानीयं परमं लोके जीवानां जीवनं स्मृतम् ।
पानीयस्य प्रदानेन तृप्तिर्भवति पाण्डव ।
पानीयस्य गुणा दिव्याः परलोके गुणावहाः ॥ १४-१०१-९ (९५६८६)
तत्र पुष्पोदकी नाम नदी परमपावनी ।
कामान्ददाति राजेन्द्र तोयदानां यमालये ॥ १४-१०१-१० (९५६८७)
शीतलं सलिलं ह्यत्र ह्यक्षय्यममृतोपमम् ।
शीततोयप्रदातॄणां भवेन्नित्यं सुखावहम् ॥ १४-१०१-११ (९५६८८)
ये चाप्यतोयदातारः पूयस्तेषां विधीयते। १४-१०१-१२ (९५६८९)
प्रणश्यत्यंबुपानेन बुभुक्षा च युधिष्ठिर ।
तृपीषस्य न चान्नेन पिपासाऽपि प्रणश्यति ।
तस्मात्तोयं सदा देयं तृषितेभ्यो विजानता। १४-१०१-१३ (९५६९०)

अग्नेर्मूर्तिः क्षितेर्योनिरमृतस्य स संभवः ।
अतोंभः सर्वभूतानां मूलमित्युच्यते बुधैः ॥१४-१०१-१४ (९५६९१)
अद्भिः सर्वाणि भूतानि जीवन्ति प्रभवन्ति च ।
तस्मात्सर्वेषु दानेषु तोयदानं विशिष्यते ॥१४-१०१-१५ (९५६९२)
सर्वदानतपोयज्ञैर्यत्प्राप्यं फलमुत्तमम् ।
तत्सर्वं तोयदानेन प्राप्यते नात्र संशयः ॥१४-१०१-१६ (९५६९३)
ये प्रयच्छन्ति विप्रेभ्यस्त्वन्नदातं सुसंस्कृतम् ।
तैस्तु दत्ताः स्वयं प्राणा भवन्ति भरतर्षभ ॥१४-१०१-१७ (९५६९४)
अन्नाद्रक्तं च शुक्लं च अन्ने जीवः प्रतिष्ठितः ।
इन्द्रियाणि च बुद्धिश्च पुष्णन्त्यन्नेन नित्यशः ।
अन्नहीनानि सीदन्ति सर्वभूतानि पाण्डव ॥ १४-१०१-१८ (९५६९५)
तेजो बलं च रूपं च सत्वं वीर्यं धृतिर्द्युतिः ।
ज्ञानं मेधा तथाऽऽयुश्च सर्वमन्ने प्रतिष्ठितम् ॥१४-१०१-१९ (९५६९६)
देवमानवतिर्यक्षु सर्वलोकेषु सर्वदा ।
सर्वकालं हि सर्वेषां सर्वमन्ने प्रतिष्ठितम् ॥१४-१०१-२० (९५६९७)
अन्नं प्रजापते रूपमन्नं प्रजननं स्मृतम् ।
सर्वभूतमयं चान्नं जीवश्चान्नमयः स्मृतः ॥१४-१०१-२१ (९५६९८)
अन्नेनाधिष्ठितः प्राण अपानो व्यान एव च ।
उदानश्च समानश्च धारयन्ति शरीरिणम् ॥१४-१०१-२२ (९५६९९)
शयनोत्थानगमनग्रहणाकर्षणानि च
सर्वसत्वकृतं क्रम चान्नादेव प्रवर्तते ॥ १४-१०१-२३ (९५७००)
चतुर्विधानि भूतानि जङ्गमानि स्थिराणि च ।
अन्नाद्भवन्ति राजेन्द्र सृष्टिरेषा प्रजापतेः ॥१४-१०१-२४ (९५७०१)
विद्यास्थानानि सर्वाणि सर्वयज्ञाश्च पावनाः ।
अन्नाद्यस्मात्प्रवर्तन्ते तस्मादन्नं परं स्मृतम् ॥१४-१०१-२५ (९५७०२)
देवा रुद्रादयः सर्वे पितरोऽप्यग्नयस्तथा ।
यस्मादन्नेन तुष्यन्ति तस्मादन्नं विशिष्यते ॥१४-१०१-२६ (९५७०३)
यस्मादन्नात्प्रजाः सर्वाः कल्पेकल्पेऽसृजत्प्रभुः ।
तस्मादन्नात्परं दानं न भूतं न भविष्यति ॥१४-१०१-२७ (९५७०४)
यस्मादन्नात्प्रवर्तन्ते धर्मार्थौ काम एव च ।
तस्मादन्नात्परं दानं नामुत्रेह च पाण्डव ॥१४-१०१-२८ (९५७०५)
यक्षरक्षोग्रहा नागा भूतान्यन्ते च दानवाः ।
तुष्यन्त्यन्नेन यस्मात्तु तस्मादन्नं परं भवेत् ॥१४-१०१-२९ (९५७०६)
परान्नमुपभुञ्जनो यत्कर्म कुरुते शुभम् ।
तच्छुभस्यैकभागस्तु कर्तुर्भवति भारत ॥१४-१०१-३० (९५७०७)
अन्नदस्य त्रयो भागा भन्ति पुरुषर्षभ ।

तस्यादन्नं प्रदातव्यं ब्राह्मणेभ्यो विशेषतः ॥१४-१०१-३१ (९५७०८)
ब्राह्मणाय दरिद्राय योऽन्नं संवत्सरं नृप ।
श्रोत्रियाय प्रयच्छेद्वै पाकभेदविवर्जितः ॥१४-१०१-३२ (९५७०९)
डंभानृतविमुक्तस्तु परां भक्तिमुपागतः ।
स्वधर्मेणार्जितफलं तस्य पुण्यफलं शृणु ॥१४-१०१-३३ (९५७१०)
शतवर्षसहस्राणि कामगः कामरूपधृत् ।
मोदतेऽमरलोकस्थः पूज्यमानोप्सरोगणैः ।
ततश्चापि च्युतः कालान्नरलोके द्विजो भवेत् ॥ १४-१०१-३४ (९५७११)
अग्नभिक्षां च यो दद्याद्दरिद्राय द्विजातये ।
षण्मासान्वार्षिकं श्राद्दं तस्य पुण्यफलं शृणु ॥१४-१०१-३५ (९५७१२)
गोसहस्रप्रदानेन यत्पुण्यं समुदाहृतम् ।
तत्प्रण्यफलमाप्नोति नरो वै नात्र संशयः ॥१४-१०१-३६ (९५७१३)
अथ संवत्सरं दद्यादग्रभिक्षामयाचते ।
प्रच्छद्यैव स्वयं नीत्वा तस्य पुण्यफलं शृणु ॥१४-१०१-३७ (९५७१४)
कपिलानां सहस्रैस्तु यद्देयं पुण्यमुच्यते ।
तत्सर्वमखिलं प्राप्य शक्रलोके महीयते ॥१४-१०१-३८ (९५७१५)
स शक्रभवने रम्ये र्षिकोटिशतं नृप ।
यथाकामं महातेजाः क्रीडत्यप्सरसांगणैः ॥१४-१०१-३९ (९५७१६)
अन्नं च यस्तु वै दद्याद्द्विजाय नियतव्रतः ।
दशवर्षामि राजेन्द्र तस्य पुण्यफलं शृणु ॥१४-१०१-४० (९५७१७)
कपिला शतसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्पुण्यफलमासाद्य पुरन्दरपुरं व्रजेत् ॥१४-१०१-४१ (९५७१८)
स शक्रभवने रम्ये कामरूपी यथासुखम् ।
शतकोटिसमा राजन्क्रीडतेऽमरपूजितः ॥१४-१०१-४२ (९५७१९)
शक्रलोकावतीर्णश्च इह लोके महाद्युतिः ।
चतुर्वेदी द्विजः श्रीमाञ्जायते राजपूजितः ॥१४-१०१-४३ (९५७२०)
अध्वश्रान्ताय विप्राय क्षुधितायान्नकाङ्क्षिणे ।
देशकालाभियाताय दीयते पाण्डुनन्दन ॥१४-१०१-४४ (९५७२१)
याचतेऽन्नं न दद्याद्यो विद्यमाने धनागमे ।
स लुब्धो नरकं याति कृमीणां कालसूत्रकम् ॥१४-१०१-४५ (९५७२२)
तत्र नरके घोरे लोभमोहविचेतनः ।
दशरव्षसहस्राणि क्लिश्यते वेदनार्दितः ॥१४-१०१-४६ (९५७२३)
तस्माच्च नरकान्मुक्तः कालेन महता हि सः ।
दरिद्रो मानुषे लोके चण्डालेष्वपि जायते। १४-१०१-४७ (९५७२४)
यस्तु पांसुलपादश्च दूराध्वश्रमकर्शितः ।
क्षुत्पिपासाश्रमश्रान्त आर्तः खिन्नगतिर्द्विजः ॥१४-१०१-४८ (९५७२५)

पृच्छन्वै ह्यन्नदातारं गृहमभ्येत्य याचयेत् ।
तं पूजयेत्तु यत्नेन सोऽतिथिः स्वर्गसंक्रमः ।
तस्मिंस्तुष्टे नरश्रेष्ठ तुष्टाः स्युः सर्वदेवताः ॥ १४-१०१-४९ (९५७२६)
न तथा हविषा होमैर्न पुष्पैर्नानुलेपनैः ।
अग्नयः पार्थ तुष्यन्ति यथा ह्यतिथिपूजनात् ॥ १४-१०१-५० (९५७२७)
कपिलायां तु दत्तायां विधिवज्ज्येष्ठपुष्करे ।
न तत्फलमवाप्नोति यत्फलं विप्रबोजनान्। १४-१०१-५१ (९५७२८)
द्विजपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत्पुष्करपत्रेण पिबन्ति पितरो जलम् ॥ १४-१०१-५२ (९५७२९)
देवमाल्यापनयनं द्विजोच्छिष्टापमार्जनम् ।
श्रान्तसंवाहनं चैव तथा पादावसेचनम् ॥ १४-१०१-५३ (९५७३०)
प्रतिश्रयप्रदानं च तथा शय्यासनस्य च ।
एकैकं पाण्डवश्रेष्ठ गोप्रदानाद्विशिष्यते ॥ १४-१०१-५४ (९५७३१)
पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम् ।
ये प्रयच्छन्ति विप्रेभ्यो नोपसर्पन्ति ते यमम् ॥ १४-१०१-५५ (९५७३२)
विप्रातिथ्ये कृते राजन्भक्त्या शुश्रूषितेऽपि च ।
देवाः शुश्रूषिताः सर्वे त्रयस्त्रिंशदरिन्दम ॥ १४-१०१-५६ (९५७३३)
अभ्यागतो ज्ञातपूर्वो ह्यज्ञातोऽतिथिरुच्यते ।
तयोः पूजां द्विजः कुर्यादिति पौराणिकी श्रुतिः ॥ १४-१०१-५७ (९५७३४)
पादाभ्यङ्गान्नपानैस्तु योऽतिथिं पूजयेन्नरः ।
पूजितस्तेन राजेन्द्र भवामीह न संशयः ॥ १४-१०१-५८ (९५७३५)
शीघ्रं पापाद्विनिर्मुक्तो मया चानुग्रहीकृतः ।
विमानेनेन्दुकल्पेन मम लोकं स गच्छति ॥ १४-१०१-५९ (९५७३६)
अभ्यागतं श्रान्तमनुव्रजन्ति
देवाश्च सर्वे पितरोऽग्नयश्च ।
तस्मिन्द्विजे पूजिते पूजिताः स्यु-
र्गते निराशाः पितरो व्रजन्ति ॥ १४-१०१-६० (९५७३७)
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च ॥ १४-१०१-६१ (९५७३८)
वर्जितः पितृभिर्लुब्धः स देवैरग्निभिः सह ।
निरयं रौरवं गत्वा दशवर्षाणि पञ्च च ।
ततश्चापि च्युतः कालादिह चोच्छिष्टभुग्भवेत् ॥ १४-१०१-६२ (९५७३९)
वैश्वदेवान्तिके प्राप्तमतिथिं यो न पूजयेत् ।
चण्डालत्वमवाप्नोति सद्य एव न संशयः ॥ १४-१०१-६३ (९५७४०)
निर्वासयति यो विप्रं देशकालगतं गृहात् ।
पतितस्तत्क्षणादेव जायते नात्र संशयः ॥ १४-१०१-६४ (९५७४१)

नरके रौरवे घोरे वर्षकोटिं स पच्यते ।
ततश्चापि च्युतः कालादिह लोके नराधमः ।
श्वा वै द्वादशजन्मानि जायते क्षुत्पिपासितः ॥ १४-१०१-६५ (९५७४२)
चण्डालोप्यतिथिः प्राप्तो देशकालेऽन्नकाङ्क्षयाः ।
अभ्युद्गम्यो गृहस्थेन पूजनीयश्च सर्वदा ॥१४-१०१-६६ (९५७४३)
अनर्चयित्वा योऽश्नाति लोभमोहविचेतनः ।
स चण्डालत्वमापन्नो दश जन्मानि पाण्डव ॥१४-१०१-६७ (९५७४४)
निराशमतिथिं कृत्वा भुञ्जनो यः प्रहृष्टवान् ।
न जानाति किलात्मानं विष्ठकूपे निपातितं ॥१४-१०१-६८ (९५७४५)
मोघं ध्रुवं प्रोर्णयति मोघमस्य तु पच्यते ।
मोघमन्नं सदाऽश्नाति योतिथिं न च पूजयेत् ॥१४-१०१-६९ (९५७४६)
साङ्गोपाङ्गांस्तु यो वेदान्पठतीह दिनेदिने ।
न चातिथिं पूजयति वृथा भवति स द्विजः ॥१४-१०१-७० (९५७४७)
पाकयज्ञमहायज्ञैः सोमसंस्थाभिरेव च ।
ये यजन्ति न चार्चन्ति गृहेष्वतिथिमागतम् ॥१४-१०१-७१ (९५७४८)
तेषां यशोभिकामानां दत्तमिष्टं च यद्भवेत् ।
वृथा भवति तत्सर्वमाशया हि तया हतम् ॥१४-१०१-७२ (९५७४९)
देशं कालं च पात्रं च स्वशक्तिं च निरीक्ष्य च ।
अल्पं समं महद्वापि कुर्यादातिथ्यमात्मवान् ॥१४-१०१-७३ (९५७५०)
सुमुखः सुप्रसन्नात्मा धीमानतिथिमागतम् ।
स्वागतेनासनेनाद्भिरन्नाद्येन च पूजयेत् ॥१४-१०१-७४ (९५७५१)
हितः प्रियो वा द्वेष्यो वा मूर्खः पण्डित एव वा ।
प्राप्तो यो वैश्वदेवान्ते सोतिथिः स्वर्गसंक्रमः ॥१४-१०१-७५ (९५७५२)
क्षुत्पिपासाश्रमार्ताय देशकालगताय च ।
सत्कृत्यान्नं प्रदातव्यं यज्ञस्य फलमिच्छता ॥१४-१०१-७६ (९५७५३)
भोजयेदात्मनः श्रेष्ठान्विधइवद्धव्यकव्ययोः ।
अन्नं प्राणो मनुष्यणामन्नदः प्राणदो भवेत् ।
तस्मादन्नं विशेषेण दातव्यं भूतिमिच्छता ॥ १४-१०१-७७ (९५७५४)
अन्नदः सर्वकामैस्तु सुतृप्तः सुष्टवलङ्कृतः ।
पूर्णचन्द्रप्रकाशेन विमानेन विराजते ॥१४-१०१-७८ (९५७५५)
सेव्यमानो वरस्त्रीभिर्मम लोकं स गच्छति ।
क्रीडित्वा तु ततस्तस्मिन्वर्षकोटिं यथाऽमरः ॥१४-१०१-७९ (९५७५६)
ततस्चापि च्युतः कालादिह लोके महायशाः ।
वेदशास्त्रार्थतत्वज्ञो भोगवान्ब्राह्मणो भवेत् ॥१४-१०१-८० (९५७५७)
यथाश्रद्धं तु यः कुर्यान्मनुष्येषु प्रजायते ।
महाधनपतिः श्रीमान्वेदवेदाङ्गपारगः ।

सर्वशास्त्रार्थतत्वज्ञो भोगवान्ब्राह्मणो भवेत् ॥ १४-१०१-८१ (९५७५८)
सर्वातिथ्यं तु यः कुर्याद्वर्षमेकमकल्मषः ।
धर्मार्जितधनो भूत्वा पाकभेदविवर्जितः ॥ १४-१०१-८२ (९५७५९)
देवानिव स्वयं विप्रानर्चयित्वा पितॄनपि ।
विप्रानग्राशनाशी यस्तस्य पुण्यफलं शृणु ॥ १४-१०१-८३ (९५७६०)
वर्षेणैकेन यावन्ति पिण्डान्यश्नन्ति ये द्विजाः ।
तावद्वर्षाणि राजेन्द्र मम लोके महीयते ॥ १४-१०१-८४ (९५७६१)
ततश्चापि च्युतः कालादिह लोके महायशाः ।
वेदसास्त्रार्थतत्वज्ञो भोगवान्ब्राह्मणो भवेत् ॥ १४-१०१-८५ (९५७६२)
सर्वातिथ्यं तु यः कुर्याद्यथाश्रद्धं नरेश्वर ।
अकालनियमेनापि सत्यवादी जितेन्द्रियः ॥ १४-१०१-८६ (९५७६३)
सत्यसन्धो चितक्रोधः शाखाधर्मविवर्जितः ।
अधर्मभीरुर्धर्मिष्ठो मायामात्सर्यवर्जितः ॥ १४-१०१-८७ (९५७६४)
श्रद्दधानः सुचिर्नित्यं पाकबेदविवर्जितः ।
स विमानेन दिव्येन दिव्यरूपी महायशाः ॥ १४-१०१-८८ (९५७६५)
पुरन्दरपुरं याति गीयमानोप्सरोगणैः ।
मन्वन्तरं तु तत्रैव क्रीडित्वा देवपूजितः ।
मानुष्यलोकमागम्य भोगवान्ब्राह्मणो भवेत् ॥ १४-१०१-८९ (९५७६६)
दशजन्मानि विप्रत्वमाप्नुयाद्राजपूजितः ।
जातिस्मरश्च भवति यत्रयत्रोपजायते ॥ ॥ १४-१०१-९० (९५७६७)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
एकाधिकशततमोऽध्यायः ॥ १०१ ॥

आश्वमेधिकपर्व - अध्याय १०२

॥ श्रीः ॥

१४.१०२. अध्यायः १०२

Mahabharata - Ashvamedhika Parva - Chapter Topics

कृष्णेन युधिष्ठिरंप्रति भूगोतिलकन्यादानफलप्रतिपादनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

भगवानुवाच ।
अतः परं प्रवक्ष्यामि भूमिदानमनुत्तमम् ॥ १४-१०२-१ (९५७६८)
यः प्रयच्छति विप्राय भूमिं रम्यां सदक्षिणाम् ।

श्रोत्रियाय दरिद्राय साग्निहोत्राय पाण्डव ॥१४-१०२-२ (९५७६९)
स सर्वकामतृप्तात्मा सर्वरत्नविभूषितः ।
सर्वपापविनिर्मुक्तो दीप्यमानोऽर्कवत्सदा ॥१४-१०२-३ (९५७७०)
बालसूर्यप्रकाशेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन मम लोकं महायशाः ॥१४-१०२-४ (९५७७१)
तत्र दिव्याङ्गनाभिस्तु सेव्यमानो यथासुखम् ।
कामगः कामरूपी च क्रीडत्यप्सरसांगणैः ॥१४-१०२-५ (९५७७२)
यावद्विभर्ति लोकान्वै भूमिः कुरुकुलोद्वह ।
तावद्भूमिप्रदः काले मम लोके महीयते ॥१४-१०२-६ (९५७७३)
न हि भूमिप्रदानाद्धि दानमन्यद्विशिष्यते ।
न चापि भूमिहरणात्पापमान्यद्विशिष्यते ॥१४-१०२-७ (९५७७४)
दानान्यन्यानि हीयन्ते कालेन कुरुपुङ्गव ।
भूमिदानस्य पुण्यस्य क्षयो नैवोपपद्यते ॥१४-१०२-८ (९५७७५)
ब्राह्मणाय दरिद्राय भूमिं दत्तां तु यो नरः ।
न हिंसति नरव्याघ्र तस्य पुण्यफलं शृणु ॥१४-१०२-९ (९५७७६)
सप्तद्वीपसमुद्रान्ता रत्नसंचयसंकुला ।
सशैलवनदुर्गाढ्या तेन दत्ता मही भवेत् ॥१४-१०२-१० (९५७७७)
भूमिं दृष्ट्वा दीयमानां श्रोत्रियायाग्निहोत्रिणे ।
सर्वभूतानि मन्यन्ते मां ददातीति हर्षवत् ॥१४-१०२-११ (९५७७८)
सुवर्णमणिरत्नानि धनानि च वसूनि च ।
सर्वदानानि वै राजन्ददाति वसुधां ददत् ॥१४-१०२-१२ (९५७७९)
सागरान्सरितः शैलान्समानि विषमाणि च ।
सर्वगन्धरसांश्चैव ददाति वसुधां ददत् ॥१४-१०२-१३ (९५७८०)
ओषधीः फलसंपन्ना नानापुष्पसमन्विताः ।
कमलोत्पलषण्डांश्च ददाति वसुधां ददत् ॥१४-१०२-१४ (९५७८१)
धर्मं कामं तथा चार्थं वेदान्यज्ञांस्तथैव च ।
स्वर्गमार्गगतिं चैव ददाति वसुधां ददत् ॥१४-१०२-१५ (९५७८२)
अग्निष्टोमादिभिर्यज्ञैर्ये यजन्ते सदक्षिणैः ।
न तत्फलं लभन्ते ते भूमिदानस्य यत्फलम् ॥१४-१०२-१६ (९५७८३)
श्रोत्रिया महीं दत्त्वा यो न हिंसति पाण्डव ।
तद्दानं कथयिष्यन्ति यावल्लोकाः प्रतिष्ठिताः ।
तावत्स्वर्गोपभोगानां भोक्तारः पाण्डुनन्दन ॥ १४-१०२-१७ (९५७८४)
सस्यपूर्णां महीं यस्तु श्रोत्रियाय प्रयच्छति ।
पितरस्तस्य तृप्यन्ति यावदाभूतसंप्लुवम् ॥१४-१०२-१८ (९५७८५)
मम रुद्रस्य सवितुस्त्रिदशानां तथैव च ।
प्रीतये विद्धि राजेन्द्र भूमिर्दत्ता द्विजाय वै ॥१४-१०२-१९ (९५७८६)

तेन पुण्येन पूतात्मा दाता भूमेर्युधिष्ठिर ।
मम सालोक्यमाप्नोति नात्र कार्या विचाराणा ॥ १४-१०२-२० (९५७८७)
यत्किंचित्कुरुते पापं पुरुषे वृत्तिकर्शितः ।
स च गोकर्णमात्रेण भूमिदानेन शुध्यति ॥ १४-१०२-२१ (९५७८८)
मासोपवासे यत्पुण्यं कृच्छ्रे चान्द्रायणेऽपि च ।
भूमिगोकर्णमात्रेण तत्पुण्यं तु विधीयते ॥ १४-१०२-२२ (९५७८९)
सर्वतीर्थाभिषेके च यत्पुण्यं समुदाहृतम् ।
भूमिगोकर्णमात्रेण तत्पुण्यं तु विधीयते ॥ १४-१०२-२३ (९५७९०)
युधिष्ठिर उवाच। १४-१०२-२४क्ष् (७९५३)
देवदेव नमस्तेऽस्तदु वासुदेव सुरेश्वर ।
गोकर्णस्य प्रमाणं वै वक्तुमर्हसि तत्वतः ॥ १४-१०२-२४ (९५७९१)
भगवानुवाच। १४-१०२-२५क्ष् (७९५४)
शृणु गोकर्णमात्रस्य प्रमाणं पाण्डुनन्दन ।
त्रिंशद्दण्डप्रमाणेन प्रमितं सर्वतो दिशम् ॥ १४-१०२-२५ (९५७९२)
प्रत्यक्प्रागपि राजेन्द्र तत्तथा दक्षिणोत्तरम् ।
गोकर्णं तद्विदः प्राहुः प्रमाणं धरणेर्नृप ॥ १४-१०२-२६ (९५७९३)
सवृषं गोशतं यत्र सुखं तिष्ठत्ययन्त्रितम् ।
सवत्सं कुरुशार्दूल तच्च गोकर्णमुच्यते ॥ १४-१०२-२७ (९५७९४)
किंकरा मृत्युदण्डाश्च कुंभीपाकाश्च दारुणाः ।
घोराश्च वारुणाः पाशा नोपसर्पन्ति भूमिदम् ॥ १४-१०२-२८ (९५७९५)
निरया रौरवाद्याश्च तथा वैतरणी नदी ।
तीव्राश्च यातनाः कृष्टा नोपसर्पन्ति भूमिदम् ॥ १४-१०२-२९ (९५७९६)
चित्रगुप्ताः कलिः कालः कृतान्तो मृत्युरेव च ।
यमश्च भगवान्साक्षात्पूजयन्ति महीप्रदम् ॥ १४-१०२-३० (९५७९७)
रुद्रः प्रजापतिः शक्रः सुरा ऋषिगणास्तथा ।
अहं च प्रीतिमान्राजन्पूजयामो महीप्रदम् ॥ १४-१०२-३१ (९५७९८)
कृशभृत्यस्य कृशगोः कृशाश्वस्य कृतातिथेः ।
भूमिर्देया नरश्रेष्ठ स निधइः पारलौकिकः ॥ १४-१०२-३२ (९५७९९)
सीदमानकुटुंबाय श्रोत्रियायाग्निहोत्रिणे ।
व्रस्थाय दरिद्राय भूमिर्देया नराधिप ॥ १४-१०२-३३ (९५८००)
यथा हि धात्री क्षीरेण पुत्रं वर्धयति स्वयम् ।
दातारमनुगृह्णाति दत्ता ह्येवं वसुंधरा ॥ १४-१०२-३४ (९५८०१)
यथा बिभर्ति गौर्वत्सं सृजन्ती क्षीरमात्मनः ।
तथा सर्वगुणोपेता भूमिर्वहति भूमिदम् ॥ १४-१०२-३५ (९५८०२)
यथा बीजनि रोहन्ति जलसिक्तानि भूपते ।
तथा कामाः प्ररोहन्ति भूमिदस्य दिनेदिने ॥ १४-१०२-३६ (९५८०३)

यथा तेजस्तु सूर्यस्य तमः सर्वं व्यपोहति ।
तथा पापं नरस्येह भूमिदानं व्यपोहति ॥१४-१०२-३७ (९५८०४)
दाता दशानुगृह्णाति यो हरेद्दश हन्ति च ।
अतीतान्यागतानीह कुलानि कुरुपुङ्गव ॥१४-१०२-३८ (९५८०५)
आश्रुत्य भूमिदानं तु दत्त्वा यो वा हरेत्पुनः ।
स बद्धो वारुणैः पाशैः क्षिप्यते पूयशोणिते ॥१४-१०२-३९ (९५८०६)
स्वदत्तां परदत्तां वा यो हरेत् वसुंधराम् ।
न तस्य नरकाद्धोराद्विद्यते निष्कृतिः क्वचित् ॥१४-१०२-४० (९५८०७)
ब्राह्मणस्य हृते क्षेत्रे हन्याद्द्वादश पूर्वजान् ।
स गच्छेत्कृमियोनिं च न च मुच्येत जातु सः ॥१४-१०२-४१ (९५८०८)
दत्त्वा भूमिं द्विजेन्द्राय यस्तामेवोपजीवति ।
गवां शतसहस्रस्य हन्तुः स लभते फलम् ॥१४-१०२-४२ (९५८०९)
सोधश्शिरास्तु पापात्मा कुंभीपाकेषु पच्यते ।
दिव्यैर्वर्षसहस्रैस्तु कुंभीपाकाद्विजनिस्सृतः ।
इह लोके भवेत्स श्वा रातजन्मनि पाण्डव ॥ १४-१०२-४३ (९५८१०)
दत्त्वा भूमि द्विजेन्द्राणां यस्तामेवोपजीवति ।
स मूढो याति दुष्टात्मा नरकानेकविंशतिम् ।
नरकेभ्यो विनिर्मुक्तः शुनां योनिं स गच्छति ॥ १४-१०२-४४ (९५८११)
हलकृष्टा मही देया सबीजा सस्यमालिनी ।
अथवा सोदका देया दरिद्राय द्विजातये ॥१४-१०२-४५ (९५८१२)
एवं दत्ता मही राजन्प्रहृष्टेनान्तरात्मना ।
सर्वान्कामानवाप्नोति मनसा चिन्तितानि च ॥१४-१०२-४६ (९५८१३)
बहुभिर्वसुधा दत्ता दीयते च नराधिपैः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥१४-१०२-४७ (९५८१४)
यः प्रयच्छति कन्यां वै सुरूपां श्रोत्रियाय वै ।
स ब्रह्मदेयो राजेन्द्र तस्य पुण्यफलं शृणु ॥१४-१०२-४८ (९५८१५)
बलीवर्दसहस्राणां दत्तानां धुर्यवाहिनाम् ।
यत्पुण्यं लभते राजन्कन्यादानेन तत्फलम् ॥१४-१०२-४९ (९५८१६)
गवां शतसहस्रस्य सम्यग्धत्तस्थ यत्फलम् ।
तत्फलं समवाप्नोतिः यः प्रयच्छति कन्यकाम् ॥१४-१०२-५० (९५८१७)
यावन्ति चैव रोमाणि कन्यायाः कुरुपुङ्गव ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥१४-१०२-५१ (९५८१८)
ततश्चापि च्युतः कालादिह लोके स जायते ।
षडङ्गविच्चतुर्वेदी सर्वलोकार्चितो द्विजः ॥१४-१०२-५२ (९५८१९)
यः सुवर्णं दरिद्राय ब्राह्मणाय प्रयच्छति ।
श्रोत्रियाय सुवृत्ताय बहुपुत्राय पाण्डव ॥१४-१०२-५३ (९५८२०)

स मुक्तः सर्वपापेभ्यो बालसूर्यसमप्रभः ।
विमानं दिव्यामारूढः कामगः कामभोगवान् ॥
वर्षकोटिं महातेजा मम लोके महीयते ॥ १४-१०२-५४ (९५८२१)
ततः कालावतीर्णश्च सोस्मिँल्लोके हि जायते ।
वेदवेदाङ्गविद्विप्रः कोटीधनपतिर्भवेत् ॥ १४-१०२-५५ (९५८२२)
यश्च रूप्यं प्रयच्छेद्वै दरिद्राय द्विजातये ।
कृशवृत्तेः कृशगवे स मुक्तः सर्वकिल्बिषैः ॥ १४-१०२-५६ (९५८२३)
पूर्णचन्द्रप्रकाशेन विमानेन विराजता ।
कामरूपि यथाकामं स्वर्गलोके महीयते ॥ १४-१०२-५७ (९५८२४)
ततोऽवतीर्णः कालेन लोके चास्मिन्महायशाः ।
सर्वलोकार्चितः श्रीमान्राजा भवति वीर्यवान् ॥ १४-१०२-५८ (९५८२५)
तिलपर्वतकं यस्तु श्रोत्रियाय प्रयच्छति ।
विशेषेण दरिद्राय तस्यापि शृणु यत्फलम् ॥ १४-१०२-५९ (९५८२६)
पुण्यं वृषायुतोत्सर्गे यत्प्रोक्तं पाण्डुनन्दन ।
तत्पुण्यं समनुप्राप्य तत्क्षणाद्विरजा भवेत् ॥ १४-१०२-६० (९५८२७)
यथा त्वचं भुजङ्गो वै त्यक्त्वा शुद्धतनुर्भवेत् ।
तता तिलप्रदानाद्वै पापं त्यक्त्वा विसुद्ध्यति ॥ १४-१०२-६१ (९५८२८)
तिलषण्डं प्रयुञ्जानो जांबूनदविभूषितम् ।
विमानं दिव्यमारूढः पितृलोके महीयते ॥ १४-१०२-६२ (९५८२९)
षष्टिं वर्षसहस्राणि कामरूपी महायशाः ।
तिलप्रदाता रमते पितृलोके यथासुखम् ॥ १४-१०२-६३ (९५८३०)
यः प्रयच्छति विप्राय तिलधेनुं नराधिप ।
श्रोत्रियाय दरिद्राय शृणु तस्यापि यत्फलम् ॥ १४-१०२-६४ (९५८३१)
गोसहस्रप्रदानेन यत्पुण्यं समुदाहृतम् ।
तत्पुण्यफलामाप्नोति तिलधेनुप्रदो नरः ॥ १४-१०२-६५ (९५८३२)
तिलानां कुडवैर्यस्तु तिलधेनुं प्रयच्छति ।
तावत्कोटिसमा राजन्स्वर्गलोके महीयते ॥ १४-१०२-६६ (९५८३३)
अष्टाढकतिलैः कृत्वा तिलधेनु नराधिप ।
द्वात्रिंशन्निष्कसंयुक्तं विषुवे यः प्रयच्छति ।
मद्भक्त्या मद्गतात्मा वै तस्य पुण्यफलं शृणु ॥ १४-१०२-६७ (९५८३४)
कन्यादानसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्पुण्यं समनुप्राप्तो मम लोके महीयते ॥ १४-१०२-६८ (९५८३५)
मम लोकावतीर्णश्च सोस्मिँल्लोकेऽभिजायते ।
ऋग्यजुस्सामवेदानां पारगो ब्राह्मणर्षभः ॥ १४-१०२-६९ (९५८३६)
गां तु यस्तु दरिद्राय श्रोत्रियाय प्रयच्छति ।
प्रसन्नां क्षीरिणीं पुण्यां सवत्सां कांस्यदोहिनीं ॥ १४-१०२-७० (९५८३७)

यत्किंचिद्दुष्कृतं कर्म तस्य पूर्वकृतं नृपः ।
तत्सर्वं तत्क्षणादेव विनश्यति न संशयः ॥१४-१०२-७१ (९५८३८)
यानं च वृषसंयुक्तं दीप्यमानं स्वलङ्कृतम् ।
आरूढः कामगं दिव्यं गोलोकमधिगच्छति ॥१४-१०२-७२ (९५८३९)
यावन्ति चैव रोमाणि तस्या गोस्तु नराधिप ।
तावद्वर्षसहस्राणि गवां लोके महीयते ॥१४-१०२-७३ (९५८४०)
गोलोकादवतीर्णस्तु लोकेऽस्मिन्ब्राह्मणो भवेत् ।
सत्रयाजी वदन्यश्च सर्वराजभिरर्चितः ॥१४-१०२-७४ (९५८४१)
तिलं गावः सुवर्णं चाप्यन्नं कन्या वसुंधरा ।
तारयन्तीह दत्तानि ब्राह्मणेभ्यो महाभुज ॥१४-१०२-७५ (९५८४२)
ब्राह्मणं वृत्तसंपन्नमाहिताग्निमलोलुपम् ।
तर्पयेद्विधिवद्राजन्स निधिः पारलौकिकः ॥१४-१०२-७६ (९५८४३)
आहिताग्निं दरिद्रं च श्रोत्रियं च जितेन्द्रियम् ।
शूद्रान्नवर्जितं चैव द्विजं यत्नेन पूजयेत् ॥१४-१०२-७७ (९५८४४)
आहिताग्निः सदा पात्रमग्निहोत्री च वेदवित् ।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे ॥१४-१०२-७८ (९५८४५)
यच्च वेदमयं पात्रं यच्च पात्रं तपोमयम् ।
असंकीर्णं च यत्पात्रं तत्पात्रं तारयिष्यति ॥१४-१०२-७९ (९५८४६)
नित्यस्वाध्यायनिरतास्त्वसंकीर्णेन्द्रियाश्च ये ।
पञ्चयज्ञपरा नित्यं पूजितास्तारयन्ति ते ॥१४-१०२-८० (९५८४७)
ये क्षान्तिदान्ताः श्रुतिपूर्णकर्णा
जितेन्द्रियाः प्राणिवधे निवृत्ताः ।
प्रतिग्रहे संकुचिता गृहस्था-
स्ते ब्राह्मणास्तारयितुं समर्थाः ॥ १४-१०२-८१ (९५८४८)
नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी वृषलान्नवर्जी ।
ऋतौ गच्छन्विधिवच्चापि जुह्व-
त्स ब्राह्मणस्तारयितुं समर्थः ॥ १४-१०२-८२ (९५८४९)
ब्राह्मणो यस्तु मद्भक्तो मद्भागी मत्परायणः ।
मयि संन्यस्तकर्मा च स विप्रस्तारयेद्ध्रुवम् ॥१४-१०२-८३ (९५८५०)
द्वादशाक्षरतत्वज्ञश्चतुर्व्यूहविभागवित् ।
अच्छिद्रपञ्चकालज्ञःक स विप्रस्तारयिष्यति ॥ ॥१४-१०२-८४ (९५८५१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
द्व्यधिकशततमोऽध्यायः ॥१०२ ॥

आश्वमेधिकपर्व - अध्याय १०३
॥ श्रीः ॥
१४.१०३. अध्यायः १०३

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति वृषभगृहशय्यादिदानप्रशंसनम् ॥ १ ॥
तथा गोब्राह्मणरक्षणादिनानाधर्मकथनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
वासुदेवेन दानेषु कथितेषु यथाक्रमम् ।
अवितृप्तश्च धर्मेषु केशवं पुनरब्रवीत् ॥ १४-१०३-१ (९५८५२)
देव धर्मामृतमिदं शृण्वतोपि परंतप ।
न विद्यते सुरश्रेष्ठ मम तृप्तिर्हि माधव ॥ १४-१०३-२ (९५८५३)
अनडुत्संप्रदानस्य यत्फलं तु विधीयते ।
तत्फलं कथयस्वेह तव भक्तस्य मेऽच्युत ॥ १४-१०३-३ (९५८५४)
यानिचान्यानिदानानित्वया नोक्तानि कानिचित् ॥
तान्याचक्ष्व सुरश्रेष्ठ तेषां चानुक्रमात्फलम् ॥ १४-१०३-४ (९५८५५)
भगवानुवाच। १४-१०३-५क्ष् (७९५५)
पवित्रत्वात्सुपुण्यत्वात्पावनत्वात्तथैव च ।
शृणु धर्मामृतं श्रेष्ठं दत्तस्यानडुहः फलम् ॥ १४-१०३-५ (९५८५६)
दशधेनुसमोऽनड्वानेकोपि कुरुपुङ्गव ।
मेदोमांसविपुष्टाङ्गो नीरोगः कोपवर्जितः ॥ १४-१०३-६ (९५८५७)
युवा भद्रः सुशीलश्च सर्वदोषविवर्जितः ।
धुरं धारयति क्षिप्रं दत्तो विप्राय पाण्डव ॥ १४-१०३-७ (९५८५८)
स तेन पुण्यदानेन वर्षकोटिं युधिष्ठिर ।
यथाकामं महादेजा गवां लोके महीयते ॥ १४-१०३-८ (९५८५९)
यश्च दद्यादनडुहौ द्वौ युक्तौ च धुरंधरौ ।
सुवृत्ताय दरिद्राय श्रोत्रियाय विशेषतः ।
तस्य यत्पुण्यमाख्यातं तच्छृणुष्व युधिष्ठिर ॥ १४-१०३-९ (९५८६०)
सहस्रगोप्रदानेन यत्प्रोक्तं फलमुत्तमम् ॥
तत्पुण्यफलमाप्नोति याति लोकान्स मामकान् ॥ १४-१०३-१० (९५८६१)
यावन्ति चैव रोमाणि तयोरनुडुहोर्नृप ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥ १४-१०३-११ (९५८६२)
दरिद्रायैव दातव्यं न समृद्धाय पाण्डव ।

वर्षाणां हि तटाकेषु फलं नैव पयोधिषु ॥ १४-१०३-१२ (९५८६३)
यस्तु दद्यादनडुहं दरिद्राय द्विजातये ।
स तेन पुण्यदानेन पुतात्मा कुरुपुङ्गव ॥ १४-१०३-१३ (९५८६४)
विमानं दिव्यमारूढो दिव्यरूपी यथासुखम् ।
मम लोकेषु रमते यावदाभूतसंप्लुवम् ॥ १४-१०३-१४ (९५८६५)
गृहं दीपप्रभायुक्तं शय्यासनविभूषितम् ।
भाजनोपस्करैर्युक्तं धनधान्यैरलङ्कृतम् ।
दासीगोभूमिसंयुक्तमन्यूनं सर्वसाधनैः ॥ १४-१०३-१५ (९५८६६)
ब्राह्मणाय दरिद्राय श्रोत्रियाय युधिष्ठिर ।
दद्यात्सदक्षिणं यस्तु तस्य पुण्यफलं शृणु ॥ १४-१०३-१६ (९५८६७)
देवाः पितृगणाश्चैव ह्यग्नयो ऋषयस्तथा ।
प्रयच्छन्ति प्रहृष्टा वै यानमादित्यसन्निभम् ॥ १४-१०३-१७ (९५८६८)
तेन गच्छेच्छ्रिया युक्तो ब्रह्मलोकमनुत्तमम् ।
स्त्रीसहस्रावृते रम्ये भवने तत्र काञ्चने ।
मोदते ब्रह्मलोकस्थो यावदाभूतसप्लवम् ॥ १४-१०३-१८ (९५८६९)
शय्यं प्रस्तरणोपेतां यः प्रयच्छति पाण्डव ।
अर्चयित्वा द्विजं भक्त्या वस्त्रमाल्यानुलेपनैः ।
भोजयित्वा विचित्रान्नं तस्य पुण्यफलं शृणु ॥ १४-१०३-१९ (९५८७०)
धेनुदानस्य यत्पुण्यं विधिदत्तस्य पाण्डव ।
तत्पुण्यं तमनुप्राप्य पितृलोके महीयते ॥ १४-१०३-२० (९५८७१)
शिल्पमध्ययनं वाऽपि विद्यां मन्त्रौषधानि च ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ॥ १४-१०३-२१ (९५८७२)
आहिताग्निसहस्रस्य पूजितस्यैव यत्फलम् ।
तत्पुण्यफलमाप्नोति यस्तु शय्यां प्रयच्चति ॥ १४-१०३-२२ (९५८७३)
छन्दोभिः संप्रयुक्तेन विमानेन विराजता ।
सप्तर्षिलोकान्व्रजति पूज्यते ब्रह्मवादिभिः ॥ १४-१०३-२३ (९५८७४)
चतुर्युगानि वै त्रिंशत्क्रीडित्वा तत्र देववत् ।
इह मानुष्यके लोके विप्रो भवति वेदवित् ॥ १४-१०३-२४ (९५८७५)
विश्रामयति यो विप्रं श्रान्तमध्वनि कर्शितम् ।
कविनश्यति तदा पापं तस्य वर्षकृतं नृप ॥ १४-१०३-२५ (९५८७६)
अथ प्रक्षालयेत्पादौ तस्य तोयेन भक्तिमान् ।
दशवर्षकृतं पापं व्यपोहति न संशयः ॥ १४-१०३-२६ (९५८७७)
घृतेन वाऽथ तैलेन पादौ तस्य तु पूजयेत् ।
तद्द्वादसमारूढं पापमाशु व्यपोहति ॥ १४-१०३-२७ (९५८७८)
धेनुकाञ्चनदत्तस्य यत्पुण्यं समुदाहृतम् ।
तत्पुण्यफलमाप्नोति यस्त्वेनं विप्रमर्चयेत् ॥ १४-१०३-२८ (९५८७९)

स्वागतेन तु यो विप्रं पूजयेदासनेन च ।
प्रत्युत्थानेन वा राजन्स देवानां प्रियो भवेत् ॥१४-१०३-२९ (९५८८०)
स्वागतेनाग्नयो राजन्नासनेन शतक्रतुः ।
प्रत्युत्थानेन पितरः प्रीति यान्त्यतिथिप्रियाः ॥१४-१०३-३० (९५८८१)
अग्निशक्रपितॄणां च तेषां प्रीत्या नराधिप ।
संवत्सरकृतं पापं तस्य सद्यो विनश्यति ॥१४-१०३-३१ (९५८८२)
यः प्रयच्छति विप्राय आसनं माल्यभूषितम् ।
स याति मणिचित्रेण रथेनेन्द्रनिकेतनम् ॥१४-१०३-३२ (९५८८३)
पुरन्दरासने तत्र दिव्यनारीविभूषितः ।
षष्टिं वर्षसहस्राणि क्रीडत्यप्सरसां गणैः ॥ १४-१०३-३३ (९५८८४)
वाहनं यः प्रयच्छेत ब्राह्मणाय युधिष्ठिर ।
स याति रत्नचित्रेण वाहनेन सुरालयम् ॥१४-१०३-३४ (९५८८५)
स तत्र कामं क्रीडित्वा सेव्यमानोप्सरोगणैः ।
इह राजा भवेद्राजन्नात्र कार्या विचारणा ॥१४-१०३-३५ (९५८८६)
पादपं पल्लवाकीर्णं पुष्पितं फलितं तथा ।
गन्धमाल्यैरथाभ्यर्च्य वस्त्राभरणभूषितम् ॥१४-१०३-३६ (९५८८७)
यः प्रयच्छति विप्राय श्रोत्रियाय सदक्षिणम् ।
भोजयित्वा यथाकामं तस्य पुण्यफलं शृणु ॥१४-१०३-३७ (९५८८८)
जांबूनदविचित्रेण विमानेन विराजता ।
पुरन्दरपुरं याति जयशब्दरवैर्युतः ॥१४-१०३-३८ (९५८८९)
ततः शक्रपुरे रम्ये तस्य कल्पकपादपः ।
ददाति चेप्सितं सर्वं मनसा यद्यदिच्छति ॥१४-१०३-३९ (९५८९०)
यावन्ति तस्य पत्राणि पुष्पाणि च फलानि च ।
तावद्वर्षसहस्राणि शक्रलोके महीयते ॥१४-१०३-४० (९५८९१)
शक्रलोकावतीर्णश्च मानुष्यं लोकमागतः ।
रथाश्वगजसंपूर्णं पुरं राज्यं च वक्ष्यति ॥१४-१०३-४१ (९५८९२)
स्थापयित्वा तु मद्भक्त्या यो मत्प्रतिकृतिं नरः ।
आलयं विधिवत्कृत्वा पूजाकर्म च कारयेत् ।
स्वयं वा पूजयेद्भक्त्या तस्य पुण्यफलं शृणु ॥ १४-१०३-४२ (९५८९३)
अश्वमेधसहस्रस्य यत्पुण्यं समुदाहृतम् ।
तत्फलं समवाप्नोति मत्सालोक्यं प्रपद्यते ।
न जाने निर्गमं तस्य मम लोकाद्युधिष्ठिर ॥ १४-१०३-४३ (९५८९४)
देवालये विप्रगृहे गोवाटे चत्वरेऽपि वा ।
प्रज्वालयति यो दीपं तस्य पुण्यफलं शृणु ॥१४-१०३-४४ (९५८९५)
आरुह्य काञ्चनं यानं द्योतयन्सर्वतो दिशम् ।
गच्छेदादित्यलोकं स सेव्यमानः सुरोत्तमैः ॥छ १४-१०३-४५ (९५८९६)

तत्र प्रकामं क्रीडित्वा वर्षकोटिं महातपाः ।
इह लोके भवेद्विप्रो वेदवेदाङ्गपारगः ॥१४-१०३-४६ (९५८९७)
देवालयेषु वा राजन्ब्राह्मणावसथेषु वा ।
चत्वरे वा चतुष्के वा रात्रौ वा यदि वा दिवा ॥१४-१०३-४७ (९५८९८)
नानागन्धर्ववाद्यानि धर्मश्रावणिकानि च ।
यस्तु कारयते भक्त्या मद्गतेनान्तरात्मना ॥१४-१०३-४८ (९५८९९)
तस्य देवा नरश्रेष्ठ पितरश्चापि हर्षिताः ।
सुप्रीताः संप्रयच्छन्ति विमानं कामगं सुखम् ॥१४-१०३-४९ (९५९००)
स च तेन पिमानेन याति देवपुरं नरः ।
तत्र दिव्याप्सरोभिस्तु सेव्यमानः प्रमोदते ॥१४-१०३-५० (९५९०१)
देवलोकावतीर्णस्तु सोस्मिँल्लोके नराधिप ।
वेदवेदाङ्गतत्वज्ञो भोगवान्ब्राह्मणो भवेत् ॥१४-१०३-५१ (९५९०२)
चत्वरे वा सभायां वा विस्तीर्णे वा सभाङ्गणे ।
कृत्वाऽग्निकुण्डं विपुलं स्थण्डिलं वा युधिष्ठिर ॥१४-१०३-५२ (९५९०३)
तत्राग्निं चतुरो मासाञ्ज्वालयेद्यस्तु भक्तिमाम् ।
समाप्तेषु च मासेषु पौष्यादिषु ततो द्विजान् ॥१४-१०३-५३ (९५९०४)
भोजयेत्पायसं मृष्टं मद्गतेनान्तरात्मना ।
दक्षिणां च यथाशक्ति ब्राह्मणेभ्यो निवेदयत् ॥१४-१०३-५४ (९५९०५)
एवमग्निं तु यः कुर्यान्नित्यमेवार्चयेत्तु माम् ।
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ॥१४-१०३-५५ (९५९०६)
तेनाहं शङ्करश्चैव पितरो ह्यग्नयस्तथा ।
यास्यामः परमां प्रीतिं नात्र कार्याविचारणा ॥१४-१०३-५६ (९५९०७)
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च ।
सोस्मत्प्रीतिकरः श्रीमान्मम लोके महीयते ॥१४-१०३-५७ (९५९०८)
मम लोकावतीर्णश्च अस्मिँल्लोके महायशाः ।
वेदवेदाङ्गविद्विप्रो जायते राजपूजितः ॥१४-१०३-५८ (९५९०९)
यः करोति नरश्रेष्ठ भरणं ब्राह्मणस्य तु ।
श्रोत्रियस्याभिजातस्य दरिद्रस्य विशेषतः ।
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ॥ १४-१०३-५९ (९५९१०)
गवां कोटिप्रदानेन यत्पुण्यं समुदाहृतम् ।
तत्सर्वफलमाप्नोति वर्षेणैकेन पाण्डव ॥१४-१०३-६० (९५९११)
काञ्चनेन विचित्रेण विमानेनार्कशोभिना ।
स याति मामकं लोकं दिव्यस्त्रीगणसेवितः ॥१४-१०३-६१ (९५९१२)
गीयमानो वरस्त्रीभिर्वर्षाणां कोटिविंशतिम् ।
क्रीडित्वा मामके तत्र सर्वदेवैरभिष्टुतः ।
मानुष्यमवतीर्णस्तु वेदविद्ब्राह्मणो भवेत् ॥ १४-१०३-६२ (९५९१३)

करकां कर्णिकां वाऽपि महद्वा जलभाजनम् ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ॥१४-१०३-६३ (९५९१४)
ब्रह्मकूर्चे तु यत्पीते फलं प्रोक्तं नरादिप ।
तत्पुण्यफलमाप्नोति जलभाजनदो नरः ।
सुतृप्तः सर्वसौगन्धः प्रहृष्टेन्द्रियमानसः ॥ १४-१०३-६४ (९५९१५)
हंससारसयुक्तेन विमानेन विराजता ।
स याति वारुणं लोकं दिव्यगन्धर्वसेवितम् ॥१४-१०३-६५ (९५९१६)
पानीयं यः प्रयच्छेद्वै जीवानां जीवनं परम् ।
ग्रीष्मे च त्रिषु मासेषु तस्य पुण्यफलं शृणु ॥१४-१०३-६६ (९५९१७)
कपिलाकोटिनानस्य यत्पुण्यं तु विधीयते ।
तत्पुण्यफलमाप्नोति पानीयं यः प्रयच्छति ॥१४-१०३-६७ (९५९१८)
पूर्णचन्द्रप्रकासेन विमानेन विराजता ।
स गच्छेच्चन्द्रभवनं सेव्यमानोप्सरोगणैः ॥१४-१०३-६८ (९५९१९)
त्रिंशत्कोटियुगं तत्र दिव्यगन्धर्वसेवितः ।
क्रीडित्वा मानुषे लोके चतुर्वेदी द्विजो भवेत् ॥१४-१०३-६९ (९५९२०)
शिरोभ्यङ्गप्रदानेन तेजस्वी प्रियदर्शनः ।
सुभगो रूपवाञ्शूरः पण्डितश्च भवेद्द्विजः ॥१४-१०३-७० (९५९२१)
वस्त्रदायी तु तेजस्वी सर्वत्र प्रियदर्शनः ।
सुभगो भवति श्रीमान्स्त्रीणां नित्यं मनोरमः ॥१४-१०३-७१ (९५९२२)
उपानहौ च च्छत्रं च यो ददाति नरोत्तमः ।
स याति रथमुख्येन काञ्चनेन विराजता ।
शक्रलोकं महातेजाः सेव्यमानोप्सरोगणैः ॥ १४-१०३-७२ (९५९२३)
काष्ठपादुकदा यान्ति विमानैर्वृक्षनिर्मितैः ।
धर्मराजपुरं रम्यं सेव्यमानाः सुरोत्तमैः ॥१४-१०३-७३ (९५९२४)
दन्तकाष्ठप्रादनेन प्रियवाक्यो भवेन्नरः ।
सुगन्धवदनः श्रीमान्मेदासौभाग्यसंयुतः ॥१४-१०३-७४ (९५९२५)
क्षीरं दधि घृतं वाऽपि गुडं मधुरसं तथा ।
ये प्रयच्छन्ति विप्रेभ्यः परां भक्तिमुपागताः ॥१४-१०३-७५ (९५९२६)
ते वृषैरश्वयानैश्च श्वेतस्रग्दामभूषिताः ।
उपगीयमाना गन्धर्वैर्यान्तीश्वरपुरं नराः ॥१४-१०३-७६ (९५९२७)
तत्र दिव्याप्सरोभिस्तु सेव्यमाना यथासुखम् ।
षष्टिवर्षसहस्राणि मोदन्ते देवसन्निभाः ॥१४-१०३-७७ (९५९२८)
ततः कालावतीर्णाश्च जायन्ते त्विह मानवाः ॥
प्रभूतधनधान्याश्च भोगवन्तो नरोत्तमाः ॥१४-१०३-७८ (९५९२९)
वैशाखे मासि वैशाखे दिवसे पाण्डुनन्दन ।
वैवस्वतं समुद्दिश्य परां भक्तिमुपागताः ॥१४-१०३-७९ (९५९३०)

अभ्यर्च्य विधिवद्विप्रांस्तिलान्गुडसमन्वितान् ।
ये प्रयच्छन्ति विप्रेभ्यस्तेषां पुण्यफलं शृणु ॥१४-१०३-८० (९५९३१)
गोप्रदानेन यत्पुण्यं विधिवत्पाण्डुनन्दन ।
तत्पुण्यं समनुप्राप्तो यमलोके महीयते ।
ततश्चापि च्युतः कालादिह राजा भविष्यति ॥ १४-१०३-८१ (९५९३२)
तस्मिन्नेव दिने विप्रान्भोजयित्वा सुदक्षिणम् ।
तोयपूर्णानि दिव्यानि भाजनानि दिशन्ति ये ॥१४-१०३-८२ (९५९३३)
ते यान्त्यादित्यवर्णाभैर्विमानैर्वरुणालयम् ।
तत्र दिव्याङ्गनाभिस्तु रमन्ते कामकामिनः ॥१४-१०३-८३ (९५९३४)
ततोऽवतीर्णाः कालेन ते चास्मिन्मानुषे पुनः ।
भोगवन्तो द्विजश्रेष्ठ भविष्यन्ति न संशयः ॥१४-१०३-८४ (९५९३५)
अनन्तराशी यश्चापि वर्तते व्रतवत्सदा ।
सत्यवाक्क्रोधरहितः शुचिः स्नानरतः सदा ।
स विमानेन दिव्येन याति शक्रपुरं नरः ॥ १४-१०३-८५ (९५९३६)
तत्र दिव्याप्सरोभिस्तु वर्षकोटिं महातपाः ।
क्रीडित्वा मानुषे लोके जायते वेदविद्द्विजः ॥१४-१०३-८६ (९५९३७)
एकभुक्तेन यश्चापि वर्षमेकं तु वर्तते ।
ब्रह्मचारी जितक्रोधः सत्यशौचसमन्वितः ।
स विमानेन दिव्येन याति शक्रपुरं नरः ॥ १४-१०३-८७ (९५९३८)
दशकोटिसहस्राणि क्रीडित्वाऽप्सरसां गणैः ।
इह मानुष्यके लोके वेदविद्ब्राह्मणो भवेत् ॥१४-१०३-८८ (९५९३९)
चतुर्थकाले यो भुङ्क्ते ब्रह्मचारी जितेन्द्रियः ।
वर्तते चैकवर्षं तु तस्य पुण्यफलं शृणु ॥१४-१०३-८९ (९५९४०)
चित्रबर्हिणयुक्तेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन स महेन्द्रपुरं नरः ॥१४-१०३-९० (९५९४१)
अकृशाभिर्वरस्त्रीभिः सेव्यमानो यथासुखम् ।
ततो द्वादशकोटिं स समाः सम्यक्प्रमोदते ॥१४-१०३-९१ (९५९४२)
शक्रलोकावतीर्णस्तु लोके चास्मिन्नराधिप ।
भवेद्वै ब्राह्मणो विद्वान्क्षमावान्वेदपारगः ॥१४-१०३-९२ (९५९४३)
षष्ठकाले तु योऽश्नाति वर्षमेकमकल्मषः ।
ब्रह्मचर्यव्रतैर्युक्तः शुचि क्रोधविवर्जितः ।
तपोयुक्तस्य तस्याथ शृणुष्व फलमुत्तमम् ॥ १४-१०३-९३ (९५९४४)
अत्यादित्यप्रकाशेन विमानेनार्कसंनिभः ।
स याति मम लोकान्वै दिव्यनारीनिषेवितः ॥१४-१०३-९४ (९५९४५)
तत्र साध्यैर्मरुद्भिस्तु पूज्यमानो यथासुखम् ।
पश्यन्नेव सदा मां तु क्रीडत्यप्सरसां गणैः ॥१४-१०३-९५ (९५९४६)

पक्षोपवासं यश्चापि कुरुते मद्गतात्मना ।
समाप्ते तु व्रते तस्मिंस्तर्पयेच्छ्रोत्रियान्द्विजान् ॥१४-१०३-९६ (९५९४७)
सोपि गच्छति दिव्येन विमानेन महातपाः ।
द्योतयनप्रभया व्योम मम लोकं प्रपद्यते ।
स तत्र मोदते कामं कामरूपी यथासुखम् ॥ १४-१०३-९७ (९५९४८)
त्रिंशत्कोटिसमा राजन्क्रीडित्वा तत्र देववत् ।
इह मानुष्यके लोके पूजनीयो द्विजो भवेत् ।
त्रयाणामपि वेदानां साङ्गानां पारगे भवेत् ॥ १४-१०३-९८ (९५९४९)
यश्च मासोपवासं वै कुरुते मद्गतात्मना ।
जितेन्द्रियो जितक्रोधोजितधीः स्नानतत्परः ॥१४-१०३-९९ (९५९५०)
समाप्ते नियमे तत्र भोजयित्वा द्विजोत्तमान् ।
दक्षिणां च ततो दद्यात्प्रहृष्टेनान्तरात्मना ॥१४-१०३-१०० (९५९५१)
स गच्छति महातेजा ब्रह्मलोकमनुक्कक्कक्कम् ।
सिंहयुक्तेन यानेन दिव्यस्त्रीगणसेवितः ॥१४-१०३-१०१ (९५९५२)
स तत्र ब्रह्मणो लोके दिव्यर्षिगणसेवितः ।
शतकोटिसमा राजन्यथाकामं प्रमोदते ॥१४-१०३-१०२ (९५९५३)
ततः कालावतीर्णश्च सोस्मिँल्लोके द्विजो भवेत् ।
षडङ्गविच्चतुर्वेदी त्रिंशज्जन्मान्यरोगवान् ॥१४-१०३-१०३ (९५९५४)
यस्त्यक्त्वा सर्वकर्माणि शुचिः क्रोधविवर्जितः ।
महाप्रस्तानमेकाग्नो याति मद्गतमानसः ॥१४-१०३-१०४ (९५९५५)
स गच्छेदिन्द्रसदनं विमानेन महातपाः ।
महामणिविचित्रेण सौवर्णन विराजता ॥१४-१०३-१०५ (९५९५६)
शतकोटिसमास्तत्र सुराधिपतिपूजितः ।
नाकपृष्ठे निवसति दिव्यस्त्रीगणसेवितः ॥१४-१०३-१०६ (९५९५७)
शक्रलोकावतीर्णश्च मानुषेषूपजायते ।
राज्ञां राजा महातेजाः सर्वलोकार्चितः प्रभुः ॥१४-१०३-१०७ (९५९५८)
प्रायोपवेशं यश्चापि कुरुते मद्गतात्मना ।
नमो ब्रह्मण्यदेवायेत्युक्त्वा मन्त्रं समाहितः ।
अन्तःस्वस्थो जितक्रोधस्तस्य पुण्यफलं शृणु ॥ १४-१०३-१०८ (९५९५९)
कामगः कामरूपी च बालसूर्यसमप्रभः ।
स विमानेन दिव्येन याति लोकाननामयान् ॥१४-१०३-१०९ (९५९६०)
स्वर्गत्स्वर्गं महातेजा गत्वा चैव यथासुखम् ।
मम लोकेषु रमते यावदाभूतसंप्लवम् ॥१४-१०३-११० (९५९६१)
अग्निप्रवेशं यश्चापि कुरुते मद्गतात्मना ।
सोपि यानेन दिव्येन मम लोकं प्रपद्यते ॥१४-१०३-१११ (९५९६२)
तत्र सर्वगुणोपेतः पश्यन्नेव स मां सदा ।

त्रिंशत्कोटिसमा राजन्मोदते मम संनिधौ ।
ततोऽवतीर्णः कालेन वेदविद्ब्राह्मणो भवेत् ॥ १४-१०३-११२ (९५९६३)
कर्षणं साधयन्यस्तु मां प्रपन्नः शुचिव्रतः ।
नमो ब्रह्मण्यदेवायेत्येतन्मन्त्रमुदाहरन् ॥ १४-१०३-११३ (९५९६४)
बालसूर्यप्रकाशेन विमानेन विराजता ।
मम लोकं समासाद्य वर्षकोटिं प्रमोदते ।
मम लोकावतीर्णश्च सोस्मिँल्लोके नृपो भवेत् ॥ १४-१०३-११४ (९५९६५)
निवेशयति मन्मूर्त्यामात्मानं मद्गतः शुचिः ।
रुद्रदक्षिणमूर्त्यां वा चतुर्दश्यां विशेषतः ॥ १४-१०३-११५ (९५९६६)
सिद्धैर्ब्रह्मर्षिभिश्चैव देवलोकैश्च पूजितः ।
गन्धर्वैर्भूतसङ्घैश्च गीयमानो महातपाः ॥ १४-१०३-११६ (९५९६७)
प्रविशेत्स महातेजा मां वा शङ्करमेव वा ।
न स्यात्पुनर्भवो राजन्नात्र कार्या विचारणा ॥ १४-१०३-११७ (९५९६८)
गोकृते स्त्रीकृते चैव गुरुविप्रकृतेऽपि वा ।
हन्यन्ते ये तु राजेन्द्र शक्रलोकं व्रजन्ति ते ॥ १४-१०३-११८ (९५९६९)
तत्र जांबूनदमये विमाने कामगामिनि ।
मन्वन्तरं प्रमोदन्ते दिव्यनारीनिषेविताः ॥ १४-१०३-११९ (९५९७०)
आश्रुतस्याप्रादनेन दत्तस्य हरणेन च ।
जन्मप्रभृति यद्दत्तं तत्सर्वं तु विनश्यति ॥ १४-१०३-१२० (९५९७१)
नाऽगोप्रदास्तत्र पयः पिबन्ति
नाभूमिदा भूमिमथाश्नुवन्ति ।
यान्यान्कामान्ब्राह्मणेभ्यो ददाति
तांस्तान्कामान्स्वर्गलोके च भुङ्क्ते ॥ १४-१०३-१२१ (९५९७२)
यद्यदिष्टतमं द्रव्यं न्यायनोपार्जितं च यत् ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ १४-१०३-१२२ (९५९७३)
अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा काञ्चनं गां दरिद्रो नाम जायते ॥ १४-१०३-१२३ (९५९७४)
दानं यत्तत्फलं नैव श्रोत्रियाय न दीयते ।
श्रोत्रिया यत्र नाश्नन्ति न देवास्तत्र भुञ्जते ॥ १४-१०३-१२४ (९५९७५)
श्रोत्रियेभ्यः परं नास्ति परमं दैवतं महत् ।
निधानं चापि राजेन्द्र नास्माच्छ्रोत्रियभोजनम् ॥ ॥ १४-१०३-१२५ (९५९७६)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
त्र्यधिकशततमोऽध्यायः ॥

Mahabharata - Ashvamedhika Parva - Chapter Footnotes

७-१०३-६४ अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः । पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चविधिः स्मृतः ॥
७-१०३-६६ ग्रीष्मे चतुर्षु मासेषु इति थ पाठः ॥

आश्वमेधिकपर्व - अध्याय १०४
॥ श्रीः ॥
१४.१०४. अध्यायः १०४

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति पञ्चमहायज्ञनिरूपणं,
स्नानविधिनिरूपणं, वैष्णवलक्षणाभिधानं
स्वपूजायोग्ययोग्यपुष्पविवेचनं च ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
विप्रयोगे शरीरस्य सेन्द्रियस्य विशेषतः ।
अन्तरा वर्तमानस्य गतिः प्राणस्य कीदृशी ॥ १४-१०४-१ (९५९७७)
भगवानुवाच । १४-१०४-२क्ष् (७९५६)
शुभाशुभकृतं सर्वं प्राप्नोतीह फलं नरः ।
न तु सर्वस्य भूतस्य पञ्चत्वं विद्यते नृप ॥ १४-१०४-२ (९५९७८)
पञ्चत्वं पाण्डवश्रेष्ठ भूरिभूतिकरं नृणाम् ।
तेषां पञ्च महायज्ञान्ये कुर्वन्ति द्विजोत्तम ॥ १४-१०४-३ (९५९७९)
पञ्चत्वं पञ्चभिर्भूतैर्वियोगं संप्रचक्षते ।
न जायते न म्रियते पुरुषः शाश्वतः सदा ॥ १४-१०४-४ (९५९८०)
प्रायेण मरणं नाम पापिनामेव पाण्डव ।
येषां तु न गतिः पुण्या तेषां मरणमुच्यते ॥ १४-१०४-५ (९५९८१)
प्रायेणाकृतकृत्यस्तु मृत्योरुद्विजते जनः ।
कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम् ॥ १४-१०४-६ (९५९८२)
युधिष्ठिर उवाच । १४-१०४-७क्ष् (७९५७)
पञ्च यज्ञाः कथं देव क्रियन्तेऽत्र द्विजातिभिः ।
तेषां नाम च देवेश वक्तुमर्हस्यशेषतः ॥ १४-१०४-७ (९५९८३)
श्रीभगवानुवाच । १४-१०४-८क्ष् (७९५८)
शृणु पञ्च महायज्ञान्कीर्त्यमानान्युधिष्ठिर ।
यैरेव ब्रह्मसालोक्यं लभ्यते गृहमेधिना ॥ १४-१०४-८ (९५९८४)
ऋभुजज्ञं ब्रह्मयज्ञं भूतयज्ञं च पाण्डव ।

नृयज्ञं पितृयज्ञं च पञ्च यज्ञान्प्रचक्षते ॥१४-१०४-९ (९५९८५)
तर्पणं ऋभुयज्ञः स्यात्स्वाध्यायो ब्रह्मयज्ञकः ।
भूतयज्ञो बलिर्यज्ञो नृयज्ञोऽतिथिपूजनम् ।
पितॄनुद्दिश्य यत्कर्म पितृयज्ञः प्रकीर्तितः ॥ १४-१०४-१० (९५९८६)
हुतं चाप्यहुतं चैव तथा प्रहुतमेव च ।
प्राशितं बलिदानं च पाकयज्ञान्प्रचक्षते ॥१४-१०४-११ (९५९८७)
वैश्वदेवादयो होमा हुतमित्युच्यते बुधैः ।
अहुतं च भवेद्दत्तं प्रहुतं ब्राह्मणाशितम् ॥१४-१०४-१२ (९५९८८)
प्राणाग्निहोत्रहोमं च प्राशितं विधिवद्विदुः ।
बलिकर्म च राजेन्द्र पाकयज्ञाः प्रकीर्तिताः ॥१४-१०४-१३ (९५९८९)
केचित्पञ्च महायज्ञान्पाकयज्ञान्प्रचक्षते ।
अपरे ब्रह्मयज्ञादीन्महायज्ञविदो विदुः ॥१४-१०४-१४ (९५९९०)
सर्व एते महायज्ञाः सर्वथा परिकीर्तिताः ।
बुभुक्षितान्ब्राह्मणांस्तु यथाशक्ति न हापयेत् ॥१४-१०४-१५ (९५९९१)
अहन्यहनि ये त्वेतानकृत्वा भुञ्जते स्वयम् ।
केवलं मलमश्नन्ति ते नार न च संशयः ॥१४-१०४-१६ (९५९९२)
तस्मात्स्नात्वा द्विजो विद्वान्कुर्यादेतान्दिनेदिने ।
अतोऽन्यथा तु भुञ्जन्वै प्रायश्चित्ती भवेद्द्विजः ॥१४-१०४-१७ (९५९९३)
युधिष्ठिर उवाच।१४-१०४-१८क्ष् (७९५९)
देवदेवेशक दैत्यघ्न त्वद्भक्तस्य जनार्दन ।
वक्तुमर्हसि देवेश स्नानस्य च विधिं मम ॥१४-१०४-१८ (९५९९४)
भगवानुवाच।१४-१०४-१९क्ष् (७९६०)
शृणु पाण्डव तत्सर्व पवित्रं पापनाशनम् ।
स्नात्वा येन विधानेन मुच्यन्ते किल्बिषाद्द्विजाः ॥१४-१०४-१९ (९५९९५)
मृदं च गोमयं चैव तिलं दर्भांस्तथैव च ।
पुष्पाण्यपि यथान्यायमादाय तु जलं व्रजेत् ॥१४-१०४-२० (९५९९६)
नद्यां स्नात्वा न च स्नायदन्यत्र द्विजसत्तम ।
सति प्रभूते पयसि नाल्पे स्नायात्कदाचन ॥१४-१०४-२१ (९५९९७)
गत्वोदकसमीपं तु शुचौ देशे मनोरमे ।
ततो मृद्गोमयादीनि तत्र विप्रो विनिक्षिपेत् ॥१४-१०४-२२ (९५९९८)
बहिः प्रक्षाल्य पादौ च द्विराचम्य प्रयत्नतः ।
प्रदक्षिणं समावृत्य नमस्कुर्यात्तु तज्जलम् ॥१४-१०४-२३ (९५९९९)
न च प्रक्षालयेद्विद्वांस्तीर्थमद्भिः कदाचन ।
न च पादेन वा हन्याद्धस्तेनान्येन तज्जलम् ॥१४-१०४-२४ (९६०००)
सर्वदेवमया ह्यापो मन्मयाः पाण्डुनन्दन ।
तस्मात्तास्तु न हन्तव्यास्त्वद्भिः प्रक्षालयेत्स्थलं ॥१४-१०४-२५ (९६००१)

केवलं प्रथमं मज्जेन्नाङ्गानि विमृशेद्बुधः ।
तत्तु तीर्थं समासाद्य कुर्यादाचमनं पुनः ॥१४-१०४-२६ (९६००२)
गोकर्णाकृतिवत्कृत्वा करं त्रिः प्रपिबेज्जलम् ।
द्विस्तत्परिमृजेद्वक्त्रं पादावभ्युक्ष्य चात्मनः ।
शीर्षण्यांस्तु ततः प्राणान्सकृदेवतु संस्पृशेन ॥ १४-१०४-२७ (९६००३)
बाहू द्वौ च ततः स्पृष्ट्वा हृदयं नाभिमेव च ।
प्रत्यङ्गमुदकं स्पृष्ट्वा मूर्धानं तु पुनः स्पृशेत् ॥१४-१०४-२८ (९६००४)
आपः पुनन्त्वित्युक्त्वा च पुनराचमनं चरेत् ।
सोङ्कारव्याहृतीर्वाऽपि सदसस्पतिमित्यृचम् ॥१४-१०४-२९ (९६००५)
आचम्य मृत्तिकाः पश्चात्त्रिधा कृत्वा समालभेत् ।
ऋचेदं विष्णुरित्यङ्गमुत्तमाधममध्यमम् ।
आलभ्य वारुणैः सूक्तैर्नमस्कृत्य जलं ततः ॥ १४-१०४-३० (९६००६)
स्रवन्ती चेत्प्रतिस्रोतः प्रत्यर्कं चान्यवारिषु ।
मज्जेदोमित्युदाहृत्य न च विक्षोभयेज्जलम् ॥१४-१०४-३१ (९६००७)
गोमयं च त्रिधा कृत्वा जले पूर्वं समालभेत् ।
सव्याहृतीकां सप्रणवां गायत्रीं च जपेत्पुनः ॥ १४-१०४-३२ (९६००८)
पुनराचमनं कृत्वा मद्गतेनान्तरात्मना ।
आपोहिष्ठेति तिसृभिर्ऋग्भिः पूतेन वारिणा ।
तथा तरत्समन्दीभिः सिञ्चेच्चतसृभिः क्रमात् ॥ १४-१०४-३३ (९६००९)
गोसूक्तेनाश्वसूक्तेन शुद्धवर्गेणि चात्मनः ।
वैष्णवैर्वारुणैः सूक्तैः सावित्रैरिन्द्रदेवतैः ॥१४-१०४-३४ (९६०१०)
वामदैव्येन चात्मानमन्यैर्मन्मयसामभिः ।
स्थित्वाऽन्तःसलिले सूक्तं जपेद्वाचाऽघमर्षणं ॥१४-१०४-३५ (९६०११)
सव्याहृतीकां सप्रणवां गायत्रीं वा ततो जपेत् ।
आश्वासमोक्षात्प्रणवं जपेद्वा मामनुस्मरन् ॥१४-१०४-३६ (९६०१२)
उत्प्लुत्य तीर्थमासाद्य धौते शुक्ले च वाससी ॥
शुद्धे चाच्छादयेत्कक्षे न कुर्यात्परिपाशके ॥१४-१०४-३७ (९६०१३)
पाशेन बद्धवा कक्षे यत्कुरुते कर्म वैदिकम् ।
राक्षसा दानवा दैत्यास्तद्विलुंपन्ति हर्षिताः ।
तस्मत्सर्वप्रयत्नेन कक्ष्यापाशं न धारयेत् ॥ १४-१०४-३८ (९६०१४)
ततः प्रक्षाल्य पादौ च हस्तौ चैव मृदा शनैः ।
आचम्य पुनराचामेत्पुनः सावित्रिया द्विजः ॥१४-१०४-३९ (९६०१५)
प्राङ्मुखोदङ्मुखो वाऽपि ध्यायन्वेदान्समाहितः ।
जले जलगतः शुद्धः स्थल एव स्थलस्थितः ।
उभयत्र स्थितस्तस्मादाचामेदात्मशुद्धये ॥ १४-१०४-४० (९६०१६)
दर्भेषु दर्भपाणिः सन्प्राङ्मुखः सुसमाहितः ।

प्राणायामांस्ततः कुर्यान्मद्गतेनान्तरात्मना ॥ १४-१०४-४१ (९६०१७)
सहस्रकृत्वः सावित्रीं शतकृत्वस्तु वा जपेत् ॥ १४-१०४-४२ (९६०१८)
समाहितो जपेत्तस्मात्सावित्र्या चाभिमन्त्र्य च ।
मन्देहानां विनाशाय रक्षसां विक्षिपेज्जलम् ॥ १४-१०४-४३ (९६०१९)
उद्वर्गोसीत्यथा चान्तःप्रायश्चित्तजलं क्षिपेत् ॥ १४-१०४-४४ (९६०२०)
अथादाय सुपुष्पाणि तोयमञ्जलिना द्विजः
प्रक्षिप्य प्रतिसूर्यं च व्योममुद्रां प्रकल्पयेत् ॥ १४-१०४-४५ (९६०२१)
ततो द्वादशकृत्वस्तु सूर्यस्येकाक्षरं जपेत् ।
ततः षडक्षरादीनि षड्कृत्वः परिवर्तयेत् ॥ १४-१०४-४६ (९६०२२)
प्रदक्षिणं परामृश्य मुद्रया स्वमुखान्तरे ।
ऊर्ध्वबाहुस्ततो भूत्वा सूर्यमीक्षेत्समाहितः ॥ १४-१०४-४७ (९६०२३)
तन्मण्डलस्थं मां ध्यायंस्तोजोमूर्तिं चतुर्भुजम् ।
उदुत्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि ॥ १४-१०४-४८ (९६०२४)
सावित्रीं च यथाशक्ति जप्त्वा सूक्तं च मामकम् ।
मन्मयानि च सामानि पुरुषव्रतमेव च ॥ १४-१०४-४९ (९६०२५)
ततश्चालोकयेदर्कं हंसः शुचिषदित्यपि ।
प्रदक्षिणं समावृत्य नमस्कृत्य दिवाकरम् ॥ १४-१०४-५० (९६०२६)
ततस्तु तर्पयेदद्भिर्ब्रह्मणां मां च शङ्करम् ।
प्रजापतिं च देवांश्च तथा देवमुनीनपि ॥ १४-१०४-५१ (९६०२७)
साङ्गानपि तथा वेदानितिहासान्क्रतूनपि ।
पुराणानि च सर्वाणि कुलान्यप्सरसां तथा ॥ १४-१०४-५२ (९६०२८)
ऋतून्संवत्सरं चैव कलाकाष्ठात्मकं तथा ।
भूतग्रामांश्च भूतानि सरितः सागरांस्तथा ।
शैलाञ्शैलस्थितान्देवानोषधीः सवनस्पतीः ॥ १४-१०४-५३ (९६०२९)
तर्पयेदुपवीती च प्रत्येकं तृप्यतामिति ।
अन्वारभ्य च सव्येन पाणिना दक्षिणेन तु ॥ १४-१०४-५४ (९६०३०)
निवीती तर्पयेद्विद्वानृषीन्मन्त्रकृतस्तथा ।
मरीच्यादीनृषींश्चैव नारदाद्यान्समाहितः ॥ १४-१०४-५५ (९६०३१)
प्राचीनावीत्यथैतास्तु तर्पयेद्देवताः पितॄत् ।
ततस्तु कव्यवाडग्निं सों वैवस्वतं तथा ॥ १४-१०४-५६ (९६०३२)
ततश्चार्यमणं चापि ह्यग्निष्वात्तांस्तथैव च ।
सोमपांश्चैव दर्भेषु सतिलैरेव वारिभिः ।
तृप्यतामिति पश्चात्तु स पितॄंस्तर्पयेत्ततः ॥ १४-१०४-५७ (९६०३३)
पितॄन्पितामहांश्चैव तथैव प्रपितामहान् ।
पितामहीस्तता चापि तथैव प्रपितामहीः ॥ १४-१०४-५८ (९६०३४)
मातरं चात्मनश्चैव गुरुमाचार्यमेव च ।

पितृमातृष्वसारौ च तथा मातामहीमपि ॥१४-१०४-५९ (९६०३५)
उपाध्यायान्सखीन्बन्धूञ्शिष्यर्त्विग्ज्ञातिबांधवान् ।
प्रमीतानानृशंस्यार्थं तर्पयेत्तानमत्सरः ॥१४-१०४-६० (९६०३६)
तर्पयित्वा तथाऽऽचम्य स्नानवस्त्रं प्रपीडयेत् ।
वृत्तिं भृत्यजनस्याहुः स्नानं पानं च तद्विदः ॥१४-१०४-६१ (९६०३७)
अतर्पयित्वा तान्पूर्वं स्नानवस्त्रं न पीडयेत् ।
पीडयेच्चेत्पुरा मोहाद्देवाः सर्षिगणास्तथा ।
पितरस्तु निराशास्ते शप्त्वा यान्ति यथागतं ॥ १४-१०४-६२ (९६०३८)
प्रक्षाल्य तु मृदा पादावाचम्य प्रयतः पुनः ।
दर्भेषु दर्भपाणिः सन्स्वाध्यायं तु समारभेत् ॥१४-१०४-६३ (९६०३९)
वेदमादौ समारभ्य ततोपर्युपरि क्रमात् ।
यदधीतेऽन्वहं शक्त्या तत्स्वाध्यायं प्रचक्षते ॥१४-१०४-६४ (९६०४०)
ऋचो वाऽपि यजुर्वाऽपि सामगायमथापि च ।
इतिहासपुराणानि यथाशक्ति न हापयेत् ॥१४-१०४-६५ (९६०४१)
उत्थाय तु नमस्कृत्य दिशो दिग्देवता अपि ।
ब्रह्मणं च ततश्चाग्निं पृथिवीमोषधीस्तथा ॥१४-१०४-६६ (९६०४२)
वाचं वाचस्पतिं चैव मां चैव सरितस्तथा ।
नमस्कृत्य तथाऽद्भिस्तु प्रणवादि च पूर्ववत् ॥१४-१०४-६७ (९६०४३)
ततो नमोऽद्भ्य इत्युक्त्वा नमस्कुर्यात्तु तज्जलम् ।
घृणिः सूर्यस्तथाऽऽदित्यस्तं प्रणम्य स्वमूर्धनि ॥१४-१०४-६८ (९६०४४)
ततस्त्वालोकयन्नर्कं प्रणवेन समाहितः ।
ततो मामर्चयेत्पुष्पैर्मत्प्रियैरेव नित्यशः ॥१४-१०४-६९ (९६०४५)
युधिष्ठिर उवाच।१४-१०४-७०क्ष् (७९६१)
त्वत्प्रियाणि प्रसूनानि त्वदधिष्ठानि माधव ।
सर्वाण्याचक्ष्व देवेश त्वद्भक्तस्य ममाच्युत ॥१४-१०४-७० (९६०४६)
भगवानुवाच।१४-१०४-७१क्ष् (७९६२)
शृणुष्वावहितो राजन्पुष्पाणि प्रियकृन्ति मे ।
कुमुदं करवीरं च चणकं चंपकं तथा ॥१४-१०४-७१ (९६०४७)
मल्लिकाजातिपुष्पं च नन्द्यावर्तं च नन्दिकम् ।
पलाशपुष्पपत्राणि दूर्वा भृङ्गकमेव च ॥१४-१०४-७२ (९६०४८)
वनमाला च राजेन्द्र मत्प्रियाणि विशेषतः ।
सर्वेषामपि पुष्पाणां सहस्रगुणमुत्पलम् ॥१४-१०४-७३ (९६०४९)
तस्मात्पद्मं तथा राजन्पद्मात्तु सतपत्रकम् ।
तस्मात्सहस्रपत्रं तु पुण्डरीकं ततः परम् ॥१४-१०४-७४ (९६०५०)
पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका ।
बकपुष्पं ततस्तस्मात्सौवर्णं तु ततोऽधिकम् ।

सौवर्णात्तु प्रसूनाच्च मत्प्रियं नास्ति पाण्डव ॥ १४-१०४-७५ (९६०५१)
पुष्पाभावे तुलस्यास्तु पत्रैर्मामर्चयेत्पुनः ।
पत्रालाभे तु शाखाभिः शाकालाभे शिफालवैः ।
शिफाभावे मृदा तत्र भक्तिमानर्चयेत माम् ॥ १४-१०४-७६ (९६०५२)
वर्जनीयानि पुष्पाणि शृणु राजन्समाहितः ।
किङ्किणी मुनिपुष्पं च धुर्धूरं पाटलं तथा ॥१४-१०४-७७ (९६०५३)
तथाऽतिमुक्तकं चैव पुन्नागं नक्तमालिकम् ।
यौधिकं क्षीरिकापुष्पं निर्गुण्डी लाङ्गुली जपा ॥१४-१०४-७८ (९६०५४)
कर्णिकारं तथाऽशोकं शल्मलीपुष्पमेव च ।
ककुभाः कोविदाराश्च वैभीतकमथापि च ॥१४-१०४-७९ (९६०५५)
कुरण्टकप्रसूनं च कल्पकं कालकं तथा ।
अङ्कोलं गिरिकर्णी च नीलान्येव च सर्वशः ।
एकपर्णानि चान्यानि सर्वाण्येव विवर्जयेत् ॥ १४-१०४-८० (९६०५६)
अर्कपुष्पाणि वर्ज्यानि अर्कपत्रस्तितानि च ।
व्याघृताः पिचुमन्दानि सर्वाण्येव विवर्जयेत् ॥१४-१०४-८१ (९६०५७)
अन्यैस्तु शुक्लपत्रैस्तु गन्धवद्भिर्नराधिप ।
अवर्ज्यैस्तैर्यथालाभं मद्भक्तो मां समर्चयेत् ॥१४-१०४-८२ (९६०५८)
युधिष्ठिर उवाच।१४-१०४-८३क्ष् (७९६३)
कथं त्वमर्चनीयोसि मूर्तयः कीदृशास्तु ते ।
वैखानसाः कथं ब्रुयूः कथं वा पाञ्चरात्रिकाः ॥१४-१०४-८३ (९६०५९)
भगवानुवाच।१४-१०४-८४क्ष् (७९६४)
शृणु पाण्डव तत्सर्वमर्चनाक्रममात्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥१४-१०४-८४ (९६०६०)
अष्टाक्षरविधानेन ह्यथवा द्वादशाक्षरैः ।
वैदिकैरथ मन्त्रैश्च मम सूक्तेन वा पुनः ॥१४-१०४-८५ (९६०६१)
स्थापितं मां ततस्तस्मिन्नर्ययित्वा विचक्षणः ।
पुरुषं च ततः सत्यमत्युतं च युधिष्ठिर ॥१४-१०४-८६ (९६०६२)
अनिरुद्धं च मां प्राहुर्वैखानसविदो जनाः ।
अन्ये त्वेवं विजानन्ति मां राजन्पाञ्चरात्रिकाः। १४-१०४-८७ (९६०६३)
वासुदेवं च राजेन्द्र संकर्षणमथापि वा ।
प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते ॥१४-१०४-८८ (९६०६४)
एताश्चान्याश्च राजेन्द्र संज्ञाभेदेन मूर्तयः ।
विद्ध्यार्थान्तरा एवं मामेवं चार्चयेद्बुधः ॥१४-१०४-८९ (९६०६५)
युधिष्ठिर उवाच।१४-१०४-९०क्ष् (७९६५)
त्वद्भक्ताः कीदृसा देव कानि तेषं व्रतानि च ।
एतत्कथय देवेश त्वद्भक्तस्य ममाच्युत ॥१४-१०४-९० (९६०६६)

भगवानुवाच। १४-१०४-९१क्ष् (७९६६)
अनन्यदेवताभक्ता चे मद्भक्तजनप्रियाः ।
मामेव शरणं प्राप्ता मद्भक्तास्ते प्रकीर्तिताः ॥ १४-१०४-९१ (९६०६७)
स्वर्ग्याण्यपि यशस्यानि मत्प्रियाणि विशेषतः ।
मद्भक्तः पाण्डवश्रेष्ठ व्रतानीमानि धारयेत् ॥ १४-१०४-९२ (९६०६८)
नान्यदाच्छादयेद्वस्त्रं मद्भक्तो जलतारणे ।
स्वस्थस्तु न दिवा स्वप्येन्मधुमांसानि वर्जयेत् ॥ १४-१०४-९३ (९६०६९)
प्रदक्षिणं व्रजेद्विप्रान्गामश्वत्थं हुताशनम् ।
न धावेत्पतिते वर्षे नाग्नभिक्षां च लोपयेत् ॥ १४-१०४-९४ (९६०७०)
प्रत्यक्षलवणं नाद्यत्सौभाञ्जनकरञ्जनौ ।
ग्रासमुष्टिं गवपे दद्याद्धान्याम्लं चैव वर्जयेत् ॥ १४-१०४-९५ (९६०७१)
तथा पर्युषितं चापि पक्वं परगृहागतम् ।
अनिवेदितं च यद्द्रव्यं तत्प्रयत्नेन वर्जयेत् ॥ १४-१०४-९६ (९६०७२)
विभितककरञ्जानां छायां दूरे विवर्जयेत् ।
पिप्रदेवपरीवादान्न वदेत्पीडितोपि सन् ॥ १४-१०४-९७ (९६०७३)
सात्विका राजसाश्चापि तामसाश्चापि पाण्डव ।
मामर्चयन्ति मद्भक्तास्तेषामीदृग्विदा गतिः ॥ १४-१०४-९८ (९६०७४)
तामसास्तिमिरं यान्ति राजसा रज एव तत् ।
सात्विकाः सत्वसंपन्नाः सत्वमेव प्रयान्ति ते ॥ १४-१०४-९९ (९६०७५)
ये सिद्धाः सन्ति साङ्ख्येन योगसत्वबलेन च ।
नभस्यादित्यचन्द्राभ्यां पश्यन्ति पदविस्तरम् ॥ १४-१०४-१०० (९६०७६)
एकस्तंभे नवद्वारे त्रिस्थूणे पञ्चसाक्षिके ।
एतस्मिन्देहनगरे राजसस्तु सदा भवेत् ॥ १४-१०४-१०१ (९६०७७)
उदिते सवितर्याप्य क्रियायुक्तस्य धीमतः ।
चतुर्वेदविदश्चापि देहे षड्वृषलाः स्मृताः ॥ १४-१०४-१०२ (९६०७८)
क्षत्रियाः सप्त विज्ञेया वैश्यास्त्वष्टौ प्रकीर्तिताः ।
नियताः पाण्डवश्रेष्ठ शूद्राणामेकविंशतिः ॥ १४-१०४-१०३ (९६०७९)
कामः क्रोधश्च लोभश्च मोहश्च मद एव च ।
महामोहश्च इत्येते देहे षड्वृषलाः स्मृताः ॥ १४-१०४-१०४ (९६०८०)
गर्वः स्तंभो ह्यहङ्कार ईर्ष्या च द्रोह एव च ।
पारुष्यं क्रूरता चैव सप्तैत क्षत्रियाः स्मृताः ॥ १४-१०४-१०५ (९६०८१)
तीक्ष्णता निकृतिर्माया शाठ्यं डंभो ह्यनार्जवम् ।
पैशुन्यमनृतं चैव वेश्यास्त्वष्टौ प्रकीर्तिताः ॥ १४-१०४-१०६ (९६०८२)
तृष्णा बुभुक्षा निद्रा च ह्यालस्यं चाघृणादयः ।
आधिश्चापि विषादश्च प्रमादो हीनसत्वता ॥ १४-१०४-१०७ (९६०८३)
भयं विक्लबता जाड्यं पापकं मन्युरेव च ।

आशा चाश्रद्दधानत्वमनवस्थाप्यमन्त्रणम् ॥१४-१०४-१०८ (९६०८४)
आशौचं मलिनत्वं च शूद्रा ह्येते प्रकीर्तिताः ।
यस्मिन्नेते न दृश्यन्ते स वै ब्राह्मण उच्यते ॥१४-१०४-१०९ (९६०८५)
येषुयेषु हि भावेषु यत्कालं वर्तते द्विजः ।
तत्कालं वै स विज्ञेयो ब्राह्मणो ज्ञानदुर्बलः ॥१४-१०४-११० (९६०८६)
प्राणानायम्य यत्कालं येन मां चापि चिन्तयेत् ।
तत्कालो वै द्विजो ज्ञेयः शेषकालो ह्यथेतरः ॥१४-१०४-१११ (९६०८७)
तस्मात्तु सात्विको भूत्वा शुचिः क्रोधविवर्जितः ।
मामर्चयेत्तु सततं मत्प्रियत्वं यदीच्छति ॥१४-१०४-११२ (९६०८८)
अलोलजिह्वः समुपस्थितो धृतिं
निधाय चक्षुर्युगमात्रमेव तत ।
मनश्च वाचं च निगृह्य चञ्चलं
भयान्निवृत्तो मम भक्त उच्यते ॥ १४-१०४-११३ (९६०८९)
ईदृशाध्यात्मिनो ये तु ब्राह्मणा नियतेन्द्रियाः ।
तेषां श्राद्धेषु तृप्यन्ति तेन तृप्ताः पितामहाः ॥ १४-१०४-११४ (९६०९०)
धर्मो जयति नाधर्मः सत्यं जयति नानृतम् ।
क्षमा जयति न क्रोधः क्षमावान्ब्राह्मणो भवेत् ॥ ॥१४-१०४-११५ (९६०९१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
चतुरधिकशततमोऽध्यायः ॥१०४ ॥

आश्वमेधिकपर्व - अध्याय १०५
॥ श्रीः ॥
१४.१०५. अध्यायः १०५

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति दशधा कपिलाविभागकथनपूर्वकं
तद्दानप्रशंसनम् ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
दानपुण्यफलं श्रुत्वा तपःपुण्यफलानि च ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥१४-१०५-१ (९६०९२)
या चैषा कपिला देव पूर्वमुत्पादिता विभो ।
होमधेनुः सदा पुण्या चतुर्वक्त्रेण माधव ॥१४-१०५-२ (९६०९३)

सा कथं ब्राह्मणेभ्यो हि देया कस्मिन्दिनेऽपि वा ।
कीदृशाय च विप्राय दातव्या पुण्यलक्षणा ॥ १४-१०५-३ (९६०९४)
कथिता कपिला प्रोक्ता स्वयमेव स्वयंभुवा ।
कैर्वा देयाश्च ता देव श्रोतुमिच्छामि तत्वतः ॥ १४-१०५-४ (९६०९५)
वैशम्पायन उवाच। १४-१०५-५क्ष् (७९६७)
एवमुक्तो हृषीकेशो धर्मपुत्रेण संसदि ।
अब्रवीत्कपिलासङ्ख्यां तासां माहात्म्यमेव च ॥ १४-१०५-५ (९६०९६)
शृणु पाण्डव तत्वेन पवित्रं पावनं परम् ।
यच्छ्रुत्वा पापकर्मा पि नरः पापात्प्रमुच्यते ॥ १४-१०५-६ (९६०९७)
अग्निमद्योद्भवां दिव्यामग्निज्वालासमप्रभाम् ।
अग्निज्वालोज्ज्वलच्छृङ्गीं प्रदीप्ताङ्गारलोचनाम् ॥ १४-१०५-७ (९६०९८)
अग्निपुच्छामग्निखुरामग्निरोमप्रभान्विताम् ।
तामग्नेयीमग्निजिह्वामग्निग्रीवां ज्वलत्प्रभाम् ॥ १४-१०५-८ (९६०९९)
भुञ्जते कपिलां ये तु शूद्रा लोभेन मोहिताः ।
पतितांस्तान्विजानीयाच्चण्डालसदृशा हि ते ॥ १४-१०५-९ (९६१००)
न तेषां ब्राह्मणः कश्चिद्गृहे कुर्यात्प्रतिग्रहम् ।
दूराच्च परिहर्तव्या महापातकिनोपि ते ॥ १४-१०५-१० (९६१०१)
सार्वकालं हि ते सर्वैर्वर्जिताः पितृदैवतैः ।
ते सदा ह्यप्रतिग्राह्या ह्यसंभाष्याश्च पापिनः ॥ १४-१०५-११ (९६१०२)
पिबन्ति कपिलां यावत्तावत्तेषां पितामहाः ।
अमेध्यमुपभुञ्जन्ति भूम्यां वै श्वसृगालवत् ॥ १४-१०५-१२ (९६१०३)
कपिलाया दधि क्षीरं घृतं तक्रमथापि वा ।
ये शूद्रा उपभुञ्जन्ति तेषां गतिमिमां शृणु ॥ १४-१०५-१३ (९६१०४)
कपिलोपजीवी शूद्रस्तु मृतो गच्छति रौरवम् ।
क्लिश्यते रौरवे घोरे वर्षकोटिशतं वसन् ॥ १४-१०५-१४ (९६१०५)
ततश्चापि च्युतः कालाच्छ्वानयोनिं स गच्छति ।
श्वयोन्याश्च परिभ्रष्टो विष्ठायां जायते क्रिमिः ॥ १४-१०५-१५ (९६१०६)
विष्ठाकूपेषु पापिष्ठो दुर्गन्धेषु सहस्रशः ।
तत्रतत्रोपजायेत नोत्तारं तत्रथ विन्दति ॥ १४-१०५-१६ (९६१०७)
ब्राह्मणश्चैव यस्तेषां गृहे कुर्यात्प्रतिग्रहम् ।
ततः प्रभृति तस्यापि पितरः स्युरमेध्यपाः ॥ १४-१०५-१७ (९६१०८)
न तेन सार्धं सम्भाषेन्न चाप्येकासनं व्रजेत् ।
स नित्यं वर्जनीयो हि दूरात्तु ब्राह्मणाधमः ॥ १४-१०५-१८ (९६१०९)
यस्तेन सह सम्भाषेदेकशय्यां व्रजेत् वा ।
प्राजापत्यं चरेत्कृच्छ्रं स च तेन विसुद्ध्यति ॥ १४-१०५-१९ (९६११०)
कपिलोपजीविनः शूद्राद्यः करोति प्रतिग्रहम् ।

प्रायश्चित्तं भवेत्तस्य विप्रस्यैतन्न संशयः ॥१४-१०५-२० (९६१११)
ब्रह्मकूर्चं प्रकुर्वीति चान्द्रायणमथापि वा ।
मुच्यते किल्बिषात्तस्मादेतेन ब्राह्मणो हि सः ॥१४-१०५-२१ (९६११२)
कपिला ह्यग्निहोत्रार्थे विप्रार्थे वा स्वयंभुवा ।
सर्वं तेजः समुद्धृत्य निर्मिता ब्रह्मणा पुरा ॥१४-१०५-२२ (९६११३)
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला पाण्डुनन्दन ॥१४-१०५-२३ (९६११४)
तपसा तप एवाग्र्यं व्रातनामुत्तमं व्रतम् ।
दानानां परमं दानं निदानं ह्येतदक्षयम् ॥१४-१०५-२४ (९६११५)
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
पवित्राणि च रम्याणि सर्वलोकेषु पाण्डव ॥१४-१०५-२५ (९६११६)
एभ्यस्तेजः समुद्धृत्य ब्रह्मणा लोककर्तृणा ॥
लोकनिस्तरणायैव निर्मिताः कपिलाः स्वयम् ॥१४-१०५-२६ (९६११७)
सर्वतेजोमयी ह्येषां कपिला पाण्डुनन्दन ।
सदाऽमृतमयी मेध्या शुचिः पावनमुत्तमम् ॥१४-१०५-२७ (९६११८)
क्षीरेण कपिलायास्तु दध्ना वा सघृतेन वा ।
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ॥१४-१०५-२८ (९६११९)
कपिलाया घृतेनापि दध्ना क्षीरेण वा पुनः ।
जुह्वते योऽग्निहोत्राणि ब्राह्मणा विधिवत्प्रभो ॥१४-१०५-२९ (९६१२०)
पूजयन्त्यतिथींश्चैव परां भक्तिमुपागताः ।
शूद्रान्नाद्विरता नित्यं डंभानृतविवर्जिताः ॥१४-१०५-३० (९६१२१)
ते यान्त्यादित्यसङ्काशैर्विमानैर्द्विजसत्तमाः ।
सूर्यमण्डलमध्येन ब्रह्मलोकमनुत्तमम् ॥१४-१०५-३१ (९६१२२)
ब्रह्मणो भवने दिव्ये कामगाः कामरूपिणः ।
ब्रह्मणा पूज्यमानास्तु मोदन्ते कल्पमक्षयम् ॥१४-१०५-३२ (९६१२३)
एवं हि कपिला राजन्पुण्या मन्त्रामृतारणिः ।
आदावेवाग्निमध्ये तु मैत्रेयी ब्रह्मनिर्मिता ॥१४-१०५-३३ (९६१२४)
शृङ्गाग्रे कपिलायास्तु सर्वतीर्थानि पाण्डव ।
ब्रह्मणो हि नियोगेन निवसन्ति दिनेदिने ॥१४-१०५-३४ (९६१२५)
प्रातरुत्थाय यो मर्त्यः कपिलाशृङ्गमस्तकात् ।
यश्च्युतामंबुधारां वै शिरसा प्रयतः शुचिः ॥१४-१०५-३५ (९६१२६)
स तेन पुण्यतीर्थेन सहसा हतकिल्विषः ।
जन्मत्रयकृतं पापं प्रदहत्यग्निवत्तृणम् ॥१४-१०५-३६ (९६१२७)
मूत्रेण कपिलायास्तु यश्च प्राणानुपस्पृशेत् ॥
स्नानेन तेन पुण्येन नष्टपापः स मानवः ।
त्रिंशद्वर्षकृतात्पापान्मुच्यते नात्र संशयः ॥ १४-१०५-३७ (९६१२८)

प्रातरुत्थाय यो भक्तया प्रयच्छेत्तृणमुष्टिकम् ।
तस्य नश्यति तत्पापं त्रिंशद्रात्रकृतं नृप ॥१४-१०५-३८ (९६१२९)
प्रातरूत्थाय यद्भक्त्या कुर्याद्यस्मात्प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी नात्र संशयः ॥ १४-१०५-३९ (९६१३०)
प्रदक्षिणेन चैकेन श्रद्धायुक्तेन पाण्डव ।
दशरात्रकृतं पापं तस्य तन्नश्यति ध्रुवम् ॥१४-१०५-४० (९६१३१)
कपिलापञ्चगव्येन यः स्नायात्तु शुचिर्नरः ।
स गङ्गाद्येषु तीर्थेषु स्नातो भवति पाण्डव ॥१४-१०५-४१ (९६१३२)
तेन स्नानेन तस्यापि श्रद्दायुक्तस्य पार्थिव ।
दशरात्रकृतं पापं तत्क्षणादेव नश्यति ॥१४-१०५-४२ (९६१३३)
दृष्टवा तु कपिलां भक्त्या श्रुत्वा हुङ्कारनिस्वनम् ।
व्यपोहति नरः पापमहोरात्रकृतं नृप ॥१४-१०५-४३ (९६१३४)
यत्र वा तत्र वा चाङ्गे कपिलां यः स्पृशेच्छुचिः ।
संवत्सरकृतं पापं विनाशयति पाण्डव ॥१४-१०५-४४ (९६१३५)
गोसहस्रं तु यो दद्यादेकां च कपिलां नरः ।
समं तस्य फलं प्राह ब्रह्मा लोकपितामहः ॥१४-१०५-४५ (९६१३६)
यस्त्वेवं कपिलां हन्यान्नरः कश्चित्प्रमादतः ।
गोसहस्रं हतं तेन भवेन्नात्र विचारणा ॥१४-१०५-४६ (९६१३७)
यश्चैकां कपिलां दद्याच्छ्रोत्रियायाहिताग्नये ।
गवां शतसहस्रं तु दत्तं भवति पाण्डव ॥१४-१०५-४७ (९६१३८)
दश वै कपिलाः प्रोक्ताः स्वयमेव स्वयंभुवा ।
यो दद्याच्छ्रोत्रियेभ्यो वै स्वर्गं गच्छति तच्छृणु ॥१४-१०५-४८ (९६१३९)
प्रथमा स्वर्णकपिला द्वितीया गौरपिङ्गला ।
तृतीया रक्तपिङ्गाक्षी चतुर्थी गलपिङ्गला ॥१४-१०५-४९ (९६१४०)
पञ्चमी बभ्रुवर्णाभा षष्ठी च श्वेतपिङ्गला ।
सप्तमी रङ्गपिङ्गाक्षी त्वष्टमी खुरपिङ्गला ॥१४-१०५-५० (९६१४१)
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।
दशैताः कपिलाः प्रोक्तास्तारयन्ति नरान्सदा ॥१४-१०५-५१ (९६१४२)
मङ्गल्याश्च पवित्राश्च सर्वपापप्रणाशनाः ।
एवमेव ह्यनड्वाहो दश प्रोक्ता नरेश्वर ॥१४-१०५-५२ (९६१४३)
ब्राह्मणो वाहयेत्तांस्तु नान्यो वर्णः कथंचन ।
न वाहयेच्च कपिलां क्षेत्रे वाऽध्वनि वा द्विजः ॥१४-१०५-५३ (९६१४४)
वाहयेद्धुङ्कृतेनैव शाखया वा सपत्रया ।
न दण्डेन न वा यष्ट्या न पाशेन न वा पुनः ॥१४-१०५-५४ (९६१४५)
न क्षुत्तृष्णाश्रमश्रान्तान्वाहयेद्विकलेन्द्रियान् ।
अतृप्तेषु न भुञ्जीयात्पिबेत्पीतेषु चोदकम् ॥१४-१०५-५५ (९६१४६)

शुश्रूषोर्मातरश्चैताः पितरस्ते प्रकीर्तिताः ।
अह्नां पूर्वत्र भागे च धुर्याणां वाहनं स्मृतम् ॥ १४-१०५-५६ (९६१४७)
विश्रामेन्मध्यमे भागे भागे चान्ते यथासुखम् ।
यत्र च त्वरया कृत्यं संशयो यत्र वाऽध्वनि। १४-१०५-५७ (९६१४८)
वाहयेत्तत्र धुर्यांस्तु न स पापेन लिप्यते ॥
भ्रूणहत्यासमं पापं तस्य स्यात्पाण्डुनन्दन। १४-१०५-५८ (९६१४९)
अन्यथा वाहयन्राजन्निरयं याति रौरवम् ॥
रुधिरं पातयेत्तेषां यस्तु मोहान्नराधिप। १४-१०५-५९ (९६१५०)
तेन पापेन पापात्मा नरकं यात्यसंशयम् ॥
नरकेषु च सर्वेषु समाः स्थित्वा शतंशतम्। १४-१०५-६० (९६१५१)
इह मानुष्यके लोके बलीवर्दो भविष्यति ॥
तस्मात्तु मुक्तिमन्विच्छन्दद्यात्तु कपिलां नरः ॥ १४-१०५-६१ (९६१५२)
कपिलां वाहयेद्यस्तु वृषलो लोभमोहितः ।
तेन देवास्त्रयस्त्रिंशत्पितरश्चापि वाहिताः ॥ १४-१०५-६२ (९६१५३)
स देवैः पितृभिर्नित्यं वध्यमानस्तु दुर्मतिः ।
नरकान्नरकं घोरं गच्छेदाप्रलयं नृप ॥ १४-१०५-६३ (९६१५४)
ब्रह्मा रुद्रस्तथाऽग्निश्च कपिलानां गतिं गताः ।
तस्मात्ते न निहन्तव्याः पूज्याश्चैव न संशयः ।
निःश्वसन्ति यदा श्रान्तास्तदा हन्युस्च तत्कुलं ॥ १४-१०५-६४ (९६१५५)
यावन्ति तेषां रोमाणि तावद्वर्षशतं नृप ।
नरकेषूपपच्यन्ते तत्र तद्वाहका नराः ॥ १४-१०५-६५ (९६१५६)
कपिला सर्वयज्ञेषु दक्षिणार्थं विधीयते ।
तस्मात्तद्दक्षिणा देया यज्ञेष्वेव द्विजातिभिः ॥ १४-१०५-६६ (९६१५७)
होमार्तं चाग्निहोत्रस्य यां प्रयच्छेत्प्रयत्नतः ।
श्रोत्रियाय दरिद्राय श्रान्तायामिततेजसे ।
तेन दानेन पूतात्मा मम लोके महीयते ॥ १४-१०५-६७ (९६१५८)
यावन्ति चैव रोमाणि कपिलाङ्गे युधिष्ठिर ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १४-१०५-६८ (९६१५९)
सुवर्णखुरशृङ्गीं च कपिलां यः प्रयच्छति ।
विषुवे चायने चापि सोऽश्वमेधफलं लभेत् ।
तेनाश्वमेधतुल्येन मम लोकं स गच्छति ॥ १४-१०५-६९ (९६१६०)
स्वर्णशृङ्गीं रूप्यखुरां सवत्सां कांस्यदोहिनीम् ।
वस्त्रैरलङ्कृतां पुष्टां गन्धैर्माल्यैश्च शोभिताम् ॥ १४-१०५-७०
(९६१६१)
पवित्रं हि पवित्राणां सुरव्णमिति मे मतिः ।
तस्मात्सुवर्णाभरणा दातव्या साऽग्निहोत्रिणे ॥ १४-१०५-७१ (९६१६२)

एवं दत्त्वा तु राजेन्द्र सप्तपूर्वान्परानपि ।
तारयिष्यति राजेन्द्र नात्र कार्या विचारणा ॥१४-१०५-७२ (९६१६३)
अग्निष्टोमसहस्रस्य वाजपेयं च तत्समम् ।
वाजपेयसहस्रस्य अश्वमेधं च तत्समम् ।
अश्वमेधसहस्रस्य राजसूयं च तत्समम् ॥ १४-१०५-७३ (९६१६४)
कपिलानां सहस्रेण विदिदत्तेन पाण्डव ।
राजसूयफलं प्राप्य मम लोके महीयते ।
न तस्य पुनरावृत्तिर्विद्यते कुरुपुङ्गव ॥ १४-१०५-७४ (९६१६५)
प्रयच्छते यः कपिलां सवत्सां कांस्यदोहिनीम् ।
सुवर्णकुरशृङ्गाङ्गीं सर्वालङ्कारशोभिताम् ॥१४-१०५-७५ (९६१६६)
तैस्तैर्गुणैः कामदुघा च भूत्वा
नरं प्रदातारमुपैति सा गौः ।
स्वकर्मभिश्चाप्यनुबध्यमानं
तीव्रान्धकारे नरके पतन्तम् ।
महार्णवे नौरिव वायुनीता
दत्ता हि गौस्तारयते मनुष्यम् ॥ १४-१०५-७६ (९६१६७)
पुत्रांश्च पौत्रांश्च कुलं च सर्व-
मासप्तमं तारयते यथावत् ।
यावन्मनुष्यान्पृथिवी बिभर्ति
तावत्प्रदातारमृतं परत्र ॥ १४-१०५-७७ (९६१६८)
यथौषधं मन्त्रकृतं नरस्य
प्रयुक्तमात्रं विनिहन्ति रोगान् ।
तथैव दत्ता कपिला सुपात्रे
पापं नरस्याशु निहन्ति सर्वम् ॥ १४-१०५-७८ (९६१६९)
यथैव दृष्ट्वा भुजगाः सुपर्णं
नश्यन्ति दूराद्विवशा भयार्ताः ।
तथैव दृष्ट्वा कपिलाप्रदाना-
न्नस्यन्ति पापानि नरस्य शीघ्रम् ॥ १४-१०५-७९ (९६१७०)
यथा त्वचं वै भुजगो विहाय
पुनर्नवं रूपमुपैति पुण्यम् ।
तथैव मुक्तः पुरुषः स्वपापै-
र्विरज्यते वै कपिलाप्रदानात् ॥ १४-१०५-८० (९६१७१)
यथाऽन्धकारं भवने विलग्नं
दीप्तो हि निर्यातयति प्रदीपः ।
तथा नरः पापमपि प्रलीनं
निष्क्रामयेद्वै कपिलाप्रदानात् ॥ १४-१०५-८१ (९६१७२)

यावन्ति रोमाणि भवन्ति तस्या
वत्सान्वितायाश्च शरीरजानि ।
तावत्प्रदाता युगवर्षकोटिं
स ब्रह्मलोके रमते मनुष्यः ॥ १४-१०५-८२ (९६१७३)
यस्याहिताग्नेरतिथिप्रियस्य
शूद्रान्नदूरस्य जितेन्द्रियस्य ।
सत्यव्रतस्याध्ययनान्वितस्य
दत्ता हि गौस्तारयते परत्र ॥ ॥ १४-१०५-८३ (९६१७४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥१०५ ॥

आश्वमेधिकपर्व - अध्याय १०६
॥ श्रीः ॥
१४.१०६. अध्यायः १०६

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति कपिलादानप्रशंसनम् ॥१ ॥
ब्रह्मणाऽग्निकुण्डमध्यात्कपिलासर्जनम् । तथा रुद्रादिदेवैः कपिलायै
सर्वपूज्यत्वादिरूपवरदानम् ॥ २ ॥
देवर्ष्यादिभिः स्वनिवासाय कपिलावयवसमाश्रयणम् ॥ ३ ॥
कृष्णेन हव्यकव्यदानकालकथनम् । तथा
श्राद्धार्हानर्हब्राह्मणविवेचनम्। तथा
स्वर्गनरकप्रापकसुकृतदुष्कृतकथनम् ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
एवं श्रुत्वा परं पुण्यं कपिलादानमुत्तमम् ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥१४-१०६-१ (९६१७५)
देवदेवश कपिला यदा विप्राय दीयते ।
कथं सर्वेषु चाङ्गेषु तस्यास्तिष्ठन्ति देवताः ॥१४-१०६-२ (९६१७६)
याश्चैताः कपिलाः प्रोक्ता दश चैव त्वया मम ।
तासां कति सुरश्रेष्ठ कपिलाः पुण्यलक्षणाः ॥१४-१०६-३ (९६१७७)
कथं वाऽनुगृहीतास्ताः सुरैः पितृगणैरपि ।
केन युक्ताश्च वर्णेन श्रोतुं कौतूहलं मे ॥१४-१०६-४ (९६१७८)

वैशम्पायन उवाच।१४-१०६-५क्ष् (७९६८)
युधिष्ठिरेणैवमुक्तः केशवः सत्यवाक्तदा ।
गुह्यानां परमं गुह्यं वक्तुमेवोपचक्रमे ॥१४-१०६-५ (९६१७९)
शृणु राजन्पवित्रं वै रहस्यं धर्ममुत्तमम् ॥
ग्रहणीयं सत्यमिदं न श्राव्यं हेतुवादिभिः ॥१४-१०६-६ (९६१८०)
यदा वत्सस्य पादौ द्वौ प्रसवे शिरसा सह ।
दृश्येते दानकालं तत्तमाहुर्मुनिसत्तमाः ॥१४-१०६-७ (९६१८१)
अन्तरिक्षगतो वत्सो यावद्भूमिं न यास्यति ।
गौस्तावत्पृथिवी ज्ञेया तस्माद्देया तु तादृशी ॥१४-१०६-८ (९६१८२)
यावन्ति धेन्वा रोमाणि सवत्साया युधिष्ठिर ।
यावत्यः सिकताश्चापि गर्भोदकपरिप्लुताः ।
तावद्वर्षसहस्राणि दाता स्वर्गे महीयते ॥ १४-१०६-९ (९६१८३)
सुवर्णाभरणां कृत्वा सव्तसां कपिलां तिलैः ।
प्रच्छाद्य तां तु दद्याद्वै सर्वरत्नैरलङ्कृताम् ॥१४-१०६-१० (९६१८४)
ससमुद्रा नदी तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता नात्र कार्या विचारणा ॥१४-१०६-११ (९६१८५)
पृथिवीदानतुल्येन तेन दानेन मानवः ।
संसारसागरात्तीर्णो याति लोकं प्रजापतेः ॥१४-१०६-१२ (९६१८६)
ब्रह्महा भ्रूणहा गोघ्नो यदि वा गुरुतल्पगः ।
महापातकयुक्तोपि एतद्दानेन शुद्ध्यति ॥१४-१०६-१३ (९६१८७)
इदं पठति यः पुण्यं कपिलादानमुत्तमम् ।
प्रातरुत्थाय मद्भक्त्या तस्य पुण्यफलं शृणु ॥१४-१०६-१४ (९६१८८)
मनसा कर्मणा वाचा मतिपूर्वं युधिष्ठिर ।
पापं रात्रिकृतं हन्यादस्याध्यायस्य पाठकः ॥१४-१०६-१५ (९६१८९)
इदमावर्तमानस्तु श्राद्धे यस्तर्पयेद्द्विजान् ।
तस्याप्यमृतमश्नन्ति पितरोऽत्यन्तहर्षिताः ॥१४-१०६-१६ (९६१९०)
यश्चेदं शृणुयाद्भक्त्या मद्गतेनान्तरात्मना ।
तस्य रात्रिकृतं सर्वुं पापमाशु प्रणश्यति ॥१४-१०६-१७ (९६१९१)
अतः परं विशेषं तु कपिलानां ब्रवीमि ते ।
याश्चैताः कपिलाः प्रोक्ता दश राजन्मया तव ।
तासां चतस्रः प्रवराः पुण्याः पापप्रणाशनाः ॥ १४-१०६-१८ (९६१९२)
सुवर्णकपिला पुण्या तथा रक्ताक्षिपिङ्गला ।
पिङ्गलाक्षी च या गौश्च या स्यात्पिङ्गलपिङ्गला ॥१४-१०६-१९ (९६१९३)
एताश्चतस्रः प्रवराः पवित्राः पापनाशनाः ।
नमस्कृता वा दृष्टा वा घ्नन्ति पापं नरस्य तु ॥ १४-१०६-२० (९६१९४)
यस्यैताः कपिलाः सन्ति गृहे पापप्रणाशनाः ।

तत्र श्रीर्विजयः कीर्तिः स्फीता नित्यं युधिष्ठिर ॥ १४-१०६-२१ (९६१९५)
एतासां प्रीतिमायाति क्षीरेण तु वृषध्वजः ।
दध्ना च त्रिदशाः सर्वे घृतेन तु हुताशनः ॥ १४-१०६-२२ (९६१९६)
पितरः पितामहाश्चैव तथैव प्रपितामहाः ।
सकृद्दत्तेन तुष्यन्ति वर्षकोटिं युधिष्ठिर ॥ १४-१०६-२३ (९६१९७)
कपिलाया घृतं क्षीरं दधि पायसमेव वा ।
श्रोत्रियेभ्यः सकृद्दत्वा नरः पापैः प्रमुच्यते ॥ १४-१०६-२४ (९६१९८)
उपवासं तु यः कृत्वाऽप्यहोरात्रं जितेन्द्रियः ।
कपिलापञ्चगव्यं तु पीत्वा चान्द्रायणात्परम् ॥ १४-१०६-२५ (९६१९९)
सौम्ये मुहूर्ते तत्प्रशय शुद्धात्मा शुद्धमानसः ।
क्रोधानृतविनिर्मुक्तो मद्गतेनान्तरात्मना ॥ १४-१०६-२६ (९६२००)
कपिलापञ्चगव्येन सुमन्त्रेण पृथक्पथक् ।
यो मत्प्रतिकृतिं वाऽपि शङ्कराकृतिमेव वा ।
स्नापयेद्विषुवे यस्तु सोऽश्वमेधफलं लभेत् ॥ १४-१०६-२७ (९६२०१)
स मुक्तपापः शुद्धात्मा यानेनांबरशोभिना ।
मम लोकं व्रजेन्मुक्तो रुद्रलोकमथापि वा ॥ १४-१०६-२८ (९६२०२)
ब्रह्मणा तु पुरा सृष्टा कपिला काञ्चनप्रभा ।
अग्निकुण्डात्परैर्मन्त्रैर्होमधेनुर्महाप्रभा ॥ १४-१०६-२९ (९६२०३)
सृष्टमात्रां तु तां दृष्ट्वा देवा रुद्रादयो दिवि ।
सिद्धा ब्रह्मर्षयश्चैव वेदाः साङ्गाः सहाध्वरैः ॥ १४-१०६-३० (९६२०४)
सागराः सरितश्चैव पर्वताः सबलाहकाः ।
गन्धर्वाप्सरसो यक्षाः पन्नगाश्चाप्युपस्थिताः ॥ १४-१०६-३१ (९६२०५)
सर्वे विस्मयमापन्नाः शिखिमध्ये महाप्रभाम् ।
मन्त्रैशाच विविधैस्तां तु तुष्टुवुस्तामनेकशः ॥ १४-१०६-३२ (९६२०६)
कृताञ्जलिपुटाः सर्वे नातिशृङ्गीं त्रिलोचनाम् ।
मूर्ध्ना प्रणम्य तां भूमौ सवत्साममृतारणिम् ॥ १४-१०६-३३ (९६२०७)
ऊचुः प्राञ्जलयः सर्वे चतुर्वक्त्रं पितामहम् ।
आज्ञापय महादेव किं ते कुर्मः कथं विभो ॥ १४-१०६-३४ (९६२०८)
एवमुक्तः सुरैः सर्वैर्ब्रह्मा वचनमब्रवीत् ।
भवन्तोप्यनुगृह्णन्तु दोग्ध्रीमेनां पयस्विनीम् ॥ १४-१०६-३५ (९६२०९)
होमधेनुरियं ज्ञेया ह्यग्नीन्संतर्पयिष्यति ।
अतोऽग्निस्तर्पितः सर्वान्भवतस्तर्पयिष्यति ॥ १४-१०६-३६ (९६२१०)
प्रीताः क्षीरामृतेनास्या जातवीर्यपराक्रमाः ।
जयिष्यथ यथाकामं दानवान्सर्व एव तु ॥ १४-१०६-३७ (९६२११)
जातवीर्यबलैर्युक्ताः सत्ववन्तो जितेन्द्रियाः ।
असङ्ख्येयबलाः सर्वे पालयिष्यथ वै प्रजाः ॥ १४-१०६-३८ (९६२१२)

पालिताश्च प्रजाः सर्वा भवद्भिरिह धर्मतः ।
पूजयिष्यन्ति वा नित्यं यज्ञैर्विविधदक्षिणैः ॥१४-१०६-३९ (९६२१३)
एवमुक्ताः सुराः सर्वे ब्रह्मणा परमेष्ठिना ।
ततः संहृष्टवदनाः कपिलायै वरं ददुः ॥१४-१०६-४० (९६२१४)
देवता ऊचुः।१४-१०६-४१क्ष् (७९६९)
यस्माल्लोकहितायाद्य ब्रह्मणा त्वं विनिर्मिता ।
तस्मात्पूता पवित्रा च भव पापव्यपोहिनी ॥१४-१०६-४१ (९६२१५)
ये त्वां दृष्ट्वा नमस्यन्ति स्पृष्ट्वा चापि करैर्नराः ।
तेषां वर्षकृतं पापं त्वद्भक्तानां प्रणश्यति ॥१४-१०६-४२ (९६२१६)
अकामकृतमज्ञानमदृष्टं यच्च पातकम् ।
त्वां दृष्ट्वा ये नमस्यन्ति नराः सर्वसहेति च ।
तेषां तद्विलयं याति तमः सूर्योदये यथा ॥ १४-१०६-४३ (९६२१७)
भगवानुवाच।१४-१०६-४४क्ष् (७९७०)
इत्युक्त्वाऽस्यै वरं दत्त्वा प्रययुस्ते यथागतम् ।
लोकनिस्तरणार्थाय सा च लोकांश्चचार ह ॥१४-१०६-४४ (९६२१८)
तस्यामेव समुद्भूता ह्येताश्च कपिला नव ।
विचरन्ति महीमेनां लोकानुग्रहकारणात् ।
तस्मात्तु कपिला देया परत्र हितमिच्छता ॥ १४-१०६-४५ (९६२१९)
यदा च दीयते राजन्कपिला ह्यग्निहोत्रिणे ।
तदा च शृङ्गयोस्तस्या विष्णुरिन्द्रश्च तिष्ठति ॥१४-१०६-४६ (९६२२०)
चन्द्रवज्रधरौ चापि तिष्ठतः शृङ्गमूलयोः ।
शृङ्गमध्ये तथा ब्रह्मा ललाटे गोवृषध्वजः ॥१४-१०६-४७ (९६२२१)
कर्णयोरश्विनौ देवौ चक्षुषी शशिभास्करौ ।
दन्तेषु मरुतो देवा जिह्वायां वाक्सरलस्वती ॥१४-१०६-४८ (९६२२२)
रोमकूपेषु मुनयश्चर्मण्येव प्रजापतिः ।
निश्श्वासेषु स्थिता वेदाः सषडङ्गपदक्रमाः ॥१४-१०६-४९ (९६२२३)
नासापुटे स्थिता गन्धाः पुष्पाणि सुरभीणि च ।
अधरे वसवः सर्वे मुखे चाग्निः प्रतिष्ठितः ॥१४-१०६-५० (९६२२४)
साध्या देवाः स्थिताः कक्षे ग्रीवायां पार्वती स्थिता ।
पृष्ठे च नक्षत्रगणाः ककुद्देशे नभस्स्थलम् ॥१४-१०६-५१ (९६२२५)
अपाने सर्वतीर्थानि गोमूत्रे जाह्नवी स्वयम् ।
इष्टतुष्टमया लक्ष्मीर्गोमये वसती तदा ॥१४-१०६-५२ (९६२२६)
नासिकायां सदा देवी ज्येष्ठा वसति भामिनी ।
श्रोणीतटस्थाः पितरो रमा लाङ्गूलमाश्रिता ॥१४-१०६-५३ (९६२२७)
पार्श्वयोरुभयोः सर्वे विश्वेदेवाः प्रतिष्ठिताः ।
तिष्ठत्युरसि तासां तु प्रीतः शक्तिधरो गुहः ॥१४-१०६-५४ (९६२२८)

जानजङ्घोरुदेशेषु पञ्च तिष्ठन्ति वायवः ।
खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥१४-१०६-५५ (९६२२९)
चत्वारः सागराः पूर्णास्तस्या एव पयोधराः ।
रतिर्मेधा क्षमा स्वाहा श्रद्धा शान्तिर्धृतिः स्मृतिः। १४-१०६-५६ (९६२३०)
कीर्तिर्दीप्तिः क्रिया कान्तिस्तुष्टिः पुष्टिस्च सन्ततिः ।
दिशश्च प्रदिशश्चैव सेवन्ते कपिलां सदा ॥१४-१०६-५७ (९६२३१)
देवा पितृगणाश्चापि गन्धर्वाप्सरसां गणाः ।
लोका द्वीपार्णवाश्चैव गङ्गाद्याः सरितस्तथा ॥१४-१०६-५८ (९६२३२)
देवाः पितृगणाश्चापि वेदाः साङ्गाः सहाध्वरैः ।
वेदोक्तैर्विविधैर्मन्त्रैः स्तुवन्ति हृषितास्तथा ॥१४-१०६-५९ (९६२३३)
विद्याधराश्च ये सिद्धा भूतास्तारागणास्तथा ।
पुष्पवृष्टिं च वर्षन्ति प्रनृत्यन्ति च हर्षिताः ॥१४-१०६-६० (९६२३४)
ब्रह्मणोत्पादिता देवी वह्निकुण्डान्महाप्रभा ।
नमस्ते कपिले पुण्ये सर्वदेवैर्नमस्कृते ॥१४-१०६-६१ (९६२३५)
कपिलेऽथ महासत्वे सर्वतीर्थमये शुभे ।
दातारं स्वजनोपेतं ब्रह्मलोकं नय स्वयम् ॥१४-१०६-६२ (९६२३६)
अहो रत्नमिदं पुण्यं सर्वदुःखघ्नमुत्तमम् ।
अहो धर्मार्जितं शुद्धमिदमग्र्यं महाधनम् ।
इत्याकाशस्थितस्ते तु सर्वदेवा जपन्ति च ॥ १४-१०६-६३ (९६२३७)
तस्याः प्रतिग्रहीता च भुङ्क्ते यावद्द्विजोत्तमः ।
तावद्देवगणाः सर्वे कपिलामर्चयन्ति च ।
स्वर्णशृङ्गीं रूप्यखुरां गन्धैः पुष्पैः सुपूजिताम् ॥ १४-१०६-६४ (९६२३८)
वस्त्राभ्यामहताभ्यां तु यावत्तिष्ठत्यलङ्कृता ।
तावद्यदिच्छेत्कपिला मन्त्रपूता सुसंस्कृता ।
भूलोकवासिनः सर्वान्ब्रह्मलोकं नयेत्स्वयम् ॥ १४-१०६-६५ (९६२३९)
भूरश्वः कनकं गावो रूप्यमश्वं तिला यवाः ।
दीयमानानि विप्राय प्रहृष्यन्ति दिनेदिने ॥१४-१०६-६६ (९६२४०)
अथ त्वश्रोत्रियेभ्यो वै तानि दत्तानि पाण्डव ।
तथा निन्दन्त्यथात्मानमशुभं किंनु नः कृतं ॥१४-१०६-६७ (९६२४१)
अहो रक्षःपिशाचैश्च लुप्यमानाः समन्ततः ।
यास्यामो निरयं शीघ्रमिति शोचन्ति तानि वै ॥१४-१०६-६८ (९६२४२)
एतान्यपि द्विजेभ्यो वै श्रोत्रियेभ्यो विशेषतः ।
दीयमानानि वर्धन्ते दातारं तारयन्ति च ॥१४-१०६-६९ (९६२४३)
युधिष्ठिर उवाच।१४-१०६-७०क्ष् (७९७१)
देवदेवेश दैत्यघ्न कालः को हव्यकव्ययोः ।
के तत्रि पूजामर्हन्ति वर्जनीयाश्च के द्विजाः ॥१४-१०६-७० (९६२४४)

भगवानुवाच। १४-१०६-७१क्ष् (७९७२)
दैवं पूर्वाह्णिकं ज्ञेयं पैतृकं चापराह्णिकम् ।
कालहीनं च यद्दानं तद्दानं राजसं विदुः ॥ १४-१०६-७१ (९६२४५)
अवघुष्टं च यद्भुक्तमनृतेन च भारत ।
परामृष्टं शुना वाऽपि तद्भागं राक्षसं विदुः ॥ १४-१०६-७२ (९६२४६)
यावन्तः पतिता विप्रा जडोन्मत्तादयोपि च ।
दैवे च पित्र्ये ते विप्रा राजन्नार्हन्ति सत्क्रियां ॥ १४-१०६-७३ (९६२४७)
क्लीबः प्लङ्गी च कृष्ठी च राजयक्ष्मान्वितश्च यः ।
अपस्मारी च यश्चापि पित्र्ये नार्हति सत्कृतिम् ॥ १४-१०६-७४ (९६२४८)
चिकित्सका देवलका मिथ्यानियमधारिणः ।
सोमविक्रयिणश्चापि श्राद्धे नार्हन्ति सत्कृतिम् ॥ १४-१०६-७५ (९६२४९)
एकोद्दिष्टे च ये चान्नं भुञ्जते विधिवद्द्विजाः ।
चान्द्रायणमकृत्वा ते पुनर्नार्हन्ति सत्कृतिम् ॥ १४-१०६-७६ (९६२५०)
गायका नर्तकाश्चैव प्लवका वादकास्तथा ।
कथका यौधिकाश्चैव श्राद्धे नार्हन्ति सत्कृतिम् ॥ १४-१०६-७७ (९६२५१)
अनग्नयश्च ये विप्राः शवनिर्यातकाश्च ये ।
स्तेनाश्चापि विकर्मस्था राजन्नार्हन्ति सत्कृतिम् ॥ १४-१०६-७८ (९६२५२)
अपरिज्ञातपूर्वाश्च गणपुत्राश्च ये द्विजाः ।
पुत्रिकापुत्रकाश्चापि श्राद्धे नार्हन्ति सत्कृतिम् ॥ १४-१०६-७९ (९६२५३)
रणकर्ता च यो विप्रो यश्च वाणिज्यको द्विजः ।
प्राणिविक्रयवृत्तिश्च श्राद्धे नार्हन्ति सत्कृतिम् ॥ १४-१०६-८० (९६२५४)
चीर्णव्रतगुणैर्युक्ता नित्यं स्वाध्यायतत्पराः ।
सावित्रीज्ञाः क्रियावन्तस्ते श्राद्धे सत्कृतिक्षमाः ॥ १४-१०६-८१ (९६२५५)
श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा ।
दर्भाः सुमनसः क्षेत्रं तत्काले श्राद्धदो भवेत् ॥ १४-१०६-८२ (९६२५६)
चारित्रनिरता राजन्कृशा ये कृशवृत्तयः ।
अर्थिनश्चोपगच्छन्ति तेभ्यो दत्तं महत्फलम् ॥ १४-१०६-८३ (९६२५७)
तपस्विनश्च ये विप्रास्तथा भैक्षचराश्च ये ।
अर्थिनः केचिदिच्छन्ति तेषां दत्तं महत्फलम् ॥ १४-१०६-८४ (९६२५८)
एवं धर्मभूतां श्रेष्ठ ज्ञात्वा सर्वात्मना तदा ।
श्रोत्रियाय दरिद्राय प्रयच्छानुपकारिणे ॥ १४-१०६-८५ (९६२५९)
दानं यत्ते प्रियं किंचिच्छ्रोत्रियाणां च यत्प्रियम् ।
तत्प्रयच्छस्व धर्मज्ञ यदीच्छसि तदक्षयम् ॥ १४-१०६-८६ (९६२६०)
निरयं ये च गच्छन्ति तच्छृणुष्व युधिष्ठिर ॥ १४-१०६-८७ (९६२६१)
गुर्वर्थं वा भयार्थं वा नोचेदन्यत्र पाण्डव ।
वदन्ति येऽनृतं विप्रास्ते वै निरयगामिनः ॥ १४-१०६-८८ (९६२६२)

परदारापहर्तारः परदाराभिमर्शकाः ।
परारप्रयोक्तारस्तें वै निरयगामिनः ॥१४-१०६-८९ (९६२६३)
सूचकाः संधिभेत्तारः परद्रव्योपजीविनः ।
अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ॥१४-१०६-९० (९६२६४)
वर्णाश्रमाणां ये बाह्याः पाषण्डाश्चैव पापिनः ।
उपासते च तानेव ते सर्वे नरकालयाः ॥१४-१०६-९१ (९६२६५)
वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥१४-१०६-९२ (९६२६६)
रसविक्रयिणो राजन्विषविक्रयिणश्च ये ।
क्षीरविक्रयिणश्चापि ते वै निरयगामिनः ॥१४-१०६-९३ (९६२६७)
चण्डालेभ्यश्च ये क्षीरं प्रयच्छन्ति नराधमाः ।
अर्थार्थमथवा स्नेहात्ते वै निरयगामिनः ॥१४-१०६-९४ (९६२६८)
पशूनां दमकक्कयैव तथा नासानुवेधकाः
पुंस्त्वहिंसाकरस्चैव ते वै निरयगामिनः ॥ १४-१०६-९५ (९६२६९)
अदातारः समर्था ये द्रव्याणां लोभकारणात् ।
दीनानन्धान्न पश्यन्ति ते वै निरयगामिनः ॥१४-१०६-९६ (९६२७०)
क्षान्तान्दान्तान्कृशान्प्राज्ञान्दीर्घकालं सहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वा निरयगामिनः ॥१४-१०६-९७ (९६२७१)
बालानामपि वृद्धानां श्रान्तानां चापि ये नराः ।
अदत्त्वाऽश्नान्ति मृष्टान्नं ते वै निरयगामिनः ॥१४-१०६-९८ (९६२७२)
एते पूर्वर्षिभिः प्रोक्ता नरा निरयगामिनः ।
ये स्वर्गं समनुप्राप्तास्ताञ्शृणुष्व युधिष्ठिर ॥१४-१०६-९९ (९६२७३)
दानेन तपसा चैव सत्येन च दमेन च ।
ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिनः ॥१४-१०६-१०० (९६२७४)
शुश्रूषयाऽप्युपाध्यायाच्छ्रुतमादाय पाण्डव ।
ये प्रतिग्रहनिस्स्नेहास्ते नराः स्वर्गगामिनः ॥१४-१०६-१०१ (९६२७५)
मधुमांसासवेभ्यस्तु निवृत्ता व्रतवत्तु ये ।
परदारनिवृत्ता ये ते नराः स्वर्गगामिनः ॥१४-१०६-१०२ (९६२७६)
मातरं पितरं चैव शुश्रूषन्ति च ये नराः ।
भ्रहातॄणामपि सस्नेहास्ते नराः स्वर्गगामिनः ॥१४-१०६-१०३ (९६२७७)
ये तु भोजनकाले तु निर्याताश्चातिथिप्रियाः ।
द्वाररोधं न कुर्वन्ति ते नराः स्वर्गगामिनः ॥१४-१०६-१०४ (९६२७८)
वैवाहिकं तु कन्यानां दरिद्राणां च ये नराः ।
कारयन्ति च कुर्वन्ति ते नराः स्वर्गगामिनः ॥१४-१०६-१०५ (९६२७९)
रसानामथ बीजानामोषधीनां तथैव च ।
दातारः श्रद्धयोपेतास्ते नराः स्वर्गगामिनः ॥१४-१०६-१०६ (९६२८०)

क्षेमाक्षेमं च मार्गेषु समानि विषमाणि च ।
अर्थिनां ये च वक्ष्यन्ति ते नराः स्वर्गगामिनः ॥१४-१०६-१०७ (९६२८१)
पर्वद्वये चतुर्दश्यामष्टम्यां संध्ययोर्द्वयोः ।
आर्द्रायां जन्मनक्षत्रे विषुवे श्रवणेऽथवा ।
ये ग्राम्यधर्मविरतास्ते नराः स्वर्गगाप्तिनः ॥ १४-१०६-१०८ (९६२८२)
हव्यकव्यविधानं च नरकस्वर्गगामिनौ ।
धर्माधर्मौ च कथितौ किं भूयः श्रोतुमिच्छसि ॥ ॥१४-१०६-१०९ (९६२८३)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
षडधिकशततमोऽध्यायः ॥१०६ ॥

आश्वमेधिकपर्व - अध्याय १०७
॥श्रीः ॥
१४.१०७. अध्यायः १०७

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति साक्षाद्ब्रह्महत्याया अकरणेपि
तत्तुल्यफलकदुष्कृतकथनम्।१ ।।
तथा अभोज्यान्नानां पापिनां लक्षणकथनम् ॥ २ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
इदं मे तत्वतो देव वक्तुमर्हस्यशेषतः ।
हिंसामकृत्वा यो मर्त्यो ब्रह्महत्यामवाप्नुयात् ॥१४-१०७-१ (९६२८४)
भगवानुवाच।१४-१०७-२क्ष् (७९७३)
ब्राह्मणं स्वयमाहूय भिक्षार्थं वृत्तिकर्शितम् ।
ब्रूयान्नास्तीति यः पश्चात्तमाहुर्ब्रह्मघातकम् ॥१४-१०७-२ (९६२८५)
मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धइस्तमाहुर्ब्रह्मघातकम् ॥१४-१०७-३ (९६२८६)
आश्रमे वाऽऽलये वाऽपि ग्रामे वा नगरेऽपि वा ।
अग्निं यः प्रक्षिपेत्क्रुद्धस्तमाहुर्ब्रह्मघातकम् ॥१४-१०७-४ (९६२८७)
गोकुलस्य तृषार्तस्य जलान्ते वसुधाधिप ।
उत्पादयति यो विघ्नं तमाहुर्ब्रह्मघातकम् ॥१४-१०७-५ (९६२८८)
यः प्रवृत्तां श्रुतिं सम्यक्छास्त्रं वा मुनिभिः कृतम् ।
दूषयत्यनभिज्ञाय तमाहुर्ब्रह्मघातकम् ॥१४-१०७-६ (९६२८९)

चक्षुषा वाऽपि हीनस्य पङ्गोर्वाऽपि जडस्य वा ।
हरेद्वै यस्तु सर्वस्वं तमाहुर्ब्रह्मघातकम् ॥१४-१०७-७ (९६२९०)
गुरुं त्वंकृत्यं हुंकृत्य अतिक्रम्य च शासनम् ।
वर्तते यस्तु मूढात्मा तमाहुर्ब्रह्मघातकम् ॥१४-१०७-८ (९६२९१)
क्रोधाद्वा यदि वा द्वेषादाक्रुष्टस्तर्जितोपि वा ।
ऋतौ स्त्रियं वा नोपेयात्तमाहुर्ब्रह्मघातकम् ॥१४-१०७-९ (९६२९२)
यावत्सारो भवेद्दीनस्तन्नाशे यस्य दुःस्थितिः ।
तत्सर्वस्वं हरेद्यो वै तमाहुर्ब्रह्मघातकम् ॥१४-१०७-१० (९६२९३)
युधिष्ठिर उवाच।१४-१०७-११क्ष् (७९७४)
सप्वेषामपि दानानां यत्तु दानं विशिष्यते ।
अभोज्यान्नाश्च ये विप्रास्तान्ब्रवीहि सुरोत्तम ॥१४-१०७-११ (९६२९४)
भगवानुवाच।१४-१०७-१२क्ष् (७९७५)
अन्नमेव प्रशंसन्ति देवा ब्रह्मपुरस्सराः ।
अन्नेन सदृशं दानं न भूतं न भविष्यति ॥१४-१०७-१२ (९६२९५)
अन्नमूर्जस्करं लोके ह्यन्नात्प्राणाः प्रतिष्ठिताः ।
अबोज्यान्नान्मया राजन्वक्ष्यमाणान्निबोध मे ॥१४-१०७-१३ (९६२९६)
दीक्षितस्य कदर्यस्य क्रुद्धस्य निकृतस्य च ।
अभिशप्तस्य षण्डस्य पाकभेदकरस्य च ॥१४-१०७-१४ (९६२९७)
चिकित्सकस्य दूतस्य तथा चोच्छिष्टभोजिनः ।
उग्रान्नं सूतकान्नं च शूद्रोच्छेषणमेव च ॥१४-१०७-१५ (९६२९८)
द्विषदन्नं न भोक्तव्यं पतितान्नं च यच्छ्रुतम् ।
तथा च पिशुनस्यान्नं यज्ञविक्रयिणस्तथा ॥१४-१०७-१६ (९६२९९)
शैलूषं तन्तुवायान्नं कृतघ्नस्यान्नमेव च ।
अंबष्ठकनिषादानां रङ्गावतरकस्य च ॥१४-१०७-१७ (९६३००)
सुवर्णकर्तुर्वैणस्यि शस्त्रविक्रयिणस्तथा ।
सूताना शौण्डिकानां च वैद्यस्य रजकस्य च ॥१४-१०७-१८ (९६३०१)
स्त्रीजितस्य नृशंसस्य तथा माहिषिकस्य च ।
अनिर्दशानां प्रेतानां गणिकानां तथैव च ॥१४-१०७-१९ (९६३०२)
बन्दिनो द्यूतकर्तुश्च तथा द्यूतविदामपि ।
परिवित्तस्य यच्चान्नं परिवेत्तुस्तथैव च ॥१४-१०७-२० (९६३०३)
यश्चाग्रदिधिषुर्विप्रो दिधिषूपपिस्तथा ।
तयोरप्युभयोरन्नं राज्ञां चापि विवर्जयेत् ॥१४-१०७-२१ (९६३०४)
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चार्मावकृन्तिनः ॥१४-१०७-२२ (९६३०५)
गणान्नं गणिकान्नं च लोकेभ्यः परिकीर्तितम् ।
पूयं चिकित्सकस्यान्नं शुक्लं तु वृषलीपतेः ॥१४-१०७-२३ (९६३०६)

विष्ठा वार्धुषिकस्यान्नं तस्मात्तत्परिवर्जयेत् ।
तेषां त्वगस्थिरोमाणि भुङ्क्ते योऽन्नं तु भक्षयेत् ॥ १४-१०७-२४ (९६३०७)
अमात्यान्नमथैतेषां भुक्त्वा तु त्रियहं क्षिपेत् ।
मत्या भुक्त्वा सकृद्वाऽपि प्राजापत्यं चरेद्द्विजः ॥ १४-१०७-२५ (९६३०८)
दानानां च फलं यद्वै शृणु पाण्डव तत्वतः ।
जलदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः ॥ १४-१०७-२६ (९६३०९)
तिलदश्च प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
भूमदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ॥ १४-१०७-२७ (९६३१०)
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥ १४-१०७-२८ (९६३११)
अनडुहः श्रियं जुष्टां गोदो गोलोकमश्नुते ।
यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ॥ १४-१०७-२९ (९६३१२)
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसाम्यताम् ।
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ॥ १४-१०७-३० (९६३१३)
हिरण्यभूगवाश्वाजवस्त्रशय्यासनादिषु ।
योर्चितः प्रतिगृह्णाति दद्यादुचितमेव च ।
तावुभौ गच्छतः स्वर्गं नरकं च विपर्यये ॥ १४-१०७-३१ (९६३१४)
अनृतं न वदेद्विद्वांस्तपस्तप्त्वा न विस्मयेत् ।
नार्तोप्यभिभवेद्विप्रान्न दत्त्वा परिकीर्तयेत् ॥ १४-१०७-३२ (९६३१५)
यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ।
आयुर्विप्रावमानेन दानं तु परिकीर्तनात् ॥ १४-१०७-३३ (९६३१६)
एकः प्रजायते जन्तुरेक एव प्रमीयते ।
अकोऽनुभुङ्क्ते सुकृतमेकश्चाप्नोति दुष्कृतम् ॥ १४-१०७-३४ (९६३१७)
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुवर्तते ॥ १४-१०७-३५ (९६३१८)
अनागतानि कार्याणि कर्तुं गणयते मनः ।
शरीरकं समुद्दिश्य स्मयते नूनमन्तकः ॥ १४-१०७-३६ (९६३१९)
तस्माद्धर्मसहासस्तु धर्मं संचिनुयात्सदा ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ १४-१०७-३७ (९६३२०)
येषां तटाकानि बहूदकानि
सभाश्च कूपाश्च शुभाः प्रपाश्च ।
अन्नप्रदानं मधुरा च वाणी
यमस्य ते निर्विषया भवन्ति ॥ ॥ १४-१०७-३८ (९६३२१)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

आश्वमेधिकपर्व - अध्याय १०८
॥ श्रीः ॥
१४.१०८. अध्यायः १०८

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति यत्यग्निमहिमानुवर्णनम् ॥ १ ॥
दानपात्रब्राह्मणलक्षणकथनम् ॥ २ ॥
तथाऽन्नदानप्रशंसनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
अनेकान्तं बहुद्वारं धर्ममाहुर्मनीपिणः ।
किंलक्षणोसौ भति तन्मे ब्रूहि जनार्दन ॥ १४-१०८-१ (९६३२२)
भगवानुवाच। १४-१०८-२क्ष् (७९७६)
शृणु राजन्समासेन धर्मशौचविधिक्रमम् ।
अहिंसा शौचमक्रोधमानृशंस्यं दमः शमः ।
आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् ॥ १४-१०८-२ (९६३२३)
ब्रह्मचर्यं तपः क्षान्तिर्मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितिश्चैव शमः शौचस्य लक्षणम् ॥ १४-१०८-३ (९६३२४)
बाल्ये विद्यां निषेवेत यौवने दारसंग्रहम् ।
वार्धके मौनमातिष्ठेत्सर्वदा धर्ममाचरेत् ॥ १४-१०८-४ (९६३२५)
ब्राह्मणान्नावमन्येत गुरुन्परिवदेन्न च ।
यतीनामनुकूलः स्यादेष धर्मः सनातनः ॥ १४-१०८-५ (९६३२६)
यतिर्गुरुर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेव गुरुः स्त्रीणां सर्वेषां पार्थिवो गुरुः ॥ १४-१०८-६ (९६३२७)
यद्गृहस्तार्जितं पापं ज्ञानतोऽज्ञानतोपि वा ।
निर्दहिष्यति तत्सर्वमेकरात्रोषितो यतिः ॥ १४-१०८-७ (९६३२८)
दुर्वृत्ता वा सुवृत्ता वा ज्ञानिनोऽज्ञानिनोपि वा ।
गृहस्थैर्यतयः पूज्याः परत्र हितकाङ्क्षिभिः ॥ १४-१०८-८ (९६३२९)
एकदण्डी त्रिदण्डी वा शिखी वा मुण्डितोपि वा ।
काषायदण्डधारोपि यतिः पूज्यो न संशयः ॥ १४-१०८-९ (९६३३०)
अपूजितो गृहस्थैर्वा तथा चाप्यवमानितः ।
यतिर्वाऽप्यतिथिर्वाऽपि नरके पातयिष्यतः ॥ १४-१०८-१० (९६३३१)
तस्मात्तु यत्नतः पूज्या मद्भक्ता मत्परायणाः ।

मयि संन्यस्तकर्माणः परत्र हितकाङ्क्षिभिः ॥१४-१०८-११ (९६३३२)
प्रहरेन्न द्विजान्विप्रो गां न हन्यात्कदाचन ।
भ्रूणहत्यासमं चैव उभयं यो निषेवते ॥१४-१०८-१२ (९६३३३)
नाग्निं मुखेनोपधमेन्न च पादौ प्रतापयेत् ।
नाधः कुर्यात्कदाचित्तु न पृष्ठं परितापयेत् ॥१४-१०८-१३ (९६३३४)
नान्तरा गमनं कुर्यान्न चामेध्यं विनिक्षिपेत् ।
उच्छिष्टो न स्पृशेदग्निमाशौचस्थो न जातुचित् ॥१४-१०८-१४ (९६३३५)
श्वचण्डालादिभिः स्पृष्टो नाङ्गमग्नौ प्रतापयेत् ।
सर्वदेवमयो वह्निस्तस्माच्छुद्धः सदा स्पृशेत् ॥१४-१०८-१५ (९६३३६)
प्राप्तमूत्रपुरीषस्तु न स्पृशेद्वह्निमात्मवान् ।
यावत्तु धारयेद्वेगं तावदप्रयतो भवेत् ॥१४-१०८-१६ (९६३३७)
पचनाग्निं न गृह्णीयात्परवेश्मनि जातुचित् ।
तस्मिन्पक्वेन चान्नेन यत्कर्म कुरुते शुभम् ॥१४-१०८-१७ (९६३३८)
तस्यैव तच्छुभस्यार्धमग्निदस्य भवेन्नृप ।
तस्माद्गृहगतं वह्निं प्रकुर्यादविनाशितम् ॥१४-१०८-१८ (९६३३९)
प्रमादाद्यदि वाऽज्ञानात्तस्य नाशो भविष्यति ।
गृह्णीयात्तु मथित्वा वा श्रोत्रियागारतोपि वा ॥१४-१०८-१९ (९६३४०)
युधिष्ठिर उवाच।१४-१०८-२०क्ष् (७९७७)
कीदृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम् ।
कीदृशेभ्यो हि दातव्यं तन्मे ब्रूहि जनार्दन ॥१४-१०८-२० (९६३४१)
भगवानुवाच।१४-१०८-२१क्ष् (७९७८)
अक्रोधनाः सत्यपरा धर्मनित्या जितेन्द्रियाः ।
तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम् ॥१४-१०८-२१ (९६३४२)
अमानिनः सर्वसहा दृष्टार्था विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम् ॥१४-१०८-२२ (९६३४३)
अलुब्धाः शुचयो वैद्या ह्रीमन्तः सत्यवादिनः ।
स्वधर्मनिरता ये तु तेभ्यो दत्तं महाफलम् ॥१४-१०८-२३ (९६३४४)
साङ्गांश्च चतुरो वेदान्योऽधीयेत दिनेदिने ।
शूद्रान्नं यस्य नो देहे तत्पात्रमृषयो विदुः ॥१४-१०८-२४ (९६३४५)
प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत्तत्कुलं सर्वमेकोपीह युधिष्ठिर ॥१४-१०८-२५ (९६३४६)
गामश्वमन्नं वित्तं वा तद्विधे प्रतिपादयेत् ।
निशम्य तु गुणोपेतं ब्राह्मणं साधुसंमतम् ।
दूरादाहृत्य सत्कृत्य तं प्रयत्नेन पूजयेत् ॥ १४-१०८-२६ (९६३४७)
युधिष्ठिर उवाच।१४-१०८-२७क्ष् (७९७९)
धर्माधर्मविधिस्त्वेवं भीमं भीष्मेण भाषितम् ।

भीष्मवाक्यात्सारभूतं वद धर्मं सुरेश्वर ॥ १४-१०८-२७ (९६३४८)
भगवानुवाच । १४-१०८-२८क्ष् (७९८०)
अन्नेन धार्यते सर्वं जगदेतच्चराचरम् ।
अन्नात्प्रभवति प्राणः प्रत्यक्षं नास्ति संशयः ॥ १४-१०८-२८ (९६३४९)
कलत्रं पीडयित्वा तु देशे काले च शक्तितः ।
दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता ॥ १४-१०८-२९ (९६३५०)
विप्रमध्वपरिश्रान्तं बालं वृद्धमथापि वा ।
अर्चयेद्गुरुवत्प्रीतो गृहस्थो गृहमागतम् ॥ १४-१०८-३० (९६३५१)
क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अर्चयेदतिथिं प्रीतः परत्र हितभूतये ॥ १४-१०८-३१ (९६३५२)
अतिथिं नावमन्येत नानृतां गिरमीरयेत् ।
न पृच्छेद्गोत्रचरणं नाधीतं वा कदाचन ॥ १४-१०८-३२ (९६३५३)
चण्डालो वा श्वपाको वा काले यः कश्चिदागतः ।
अन्नेन पूजनीयः स्यात्परत्र हितमिच्छता ॥ १४-१०८-३३ (९६३५४)
पिधाय तु गृहद्वारं भुक्ते योऽन्नं प्रहृष्टवान् ।
स्वर्गद्वारपिधानं वै कृतं तेन युधिष्ठिर ॥ १४-१०८-३४ (९६३५५)
पितॄन्देवानृषीन्विप्रानतिथींश्च निराश्रयान् ।
यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् ॥ १४-१०८-३५ (९६३५६)
कृत्वा तु पापं बहुशो यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण सर्वपापैः प्रमुच्यते ॥ १४-१०८-३६ (९६३५७)
अन्नदः प्राणदो लोके प्राणदः सर्वदो भवेत् ।
तस्मादन्नं विशेषेण दातव्यं भूतिमिच्छता ॥ १४-१०८-३७ (९६३५८)
अन्नं ह्यमृतमित्याहुरन्नं प्रजननं स्मृतम् ।
अन्नप्रणाशो सीदन्ति शरीरे पञ्च धातवः ॥ १४-१०८-३८ (९६३५९)
बलं बलवतो नश्येदन्नहीनस्य देहिनः ।
तस्मादन्नं विशेषेण श्रद्धयाऽश्रद्धयापि वा ॥ १४-१०८-३९ (९६३६०)
आदत्ते हि रसं सर्वमादित्यः स्वगभस्तिभिः ।
वायुस्तस्मात्समादाय रसं मेधेषु धारयेत् ॥ १४-१०८-४० (९६३६१)
तत्तु मेघगतं भूमौ शक्रो वर्षति तादृशम् ।
तेन दिग्धा भवेद्देवी मही प्रीता च क़क़क़क़ १४-१०८-४१ (९६३६२)
तस्यां सस्यानि रोहन्ति यैर्जीवन्त्यखिलाः प्रजाः ।
मांसमेदोस्थिमज्जानां सम्भवस्तेभ्य एव हि ॥ १४-१०८-४२ (९६३६३)
एवं सूर्यश्च पवनो मेघः शक्रस्तथैव च ।
एक एव स्थितो राशिर्यतो भूतानि जज्ञिरे ॥ १४-१०८-४३ (९६३६४)
भवनानि च दिव्यानि दिवि तेषां महात्मनाम् ।
नानासंस्थानि भूतानि नानाभूमिगतानि च ॥ १४-१०८-४४ (९६३६५)

चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ॥ १४-१०८-४५ (९६३६६)
अनेकशतसङ्ख्यानि सान्तर्जलवनानि च ।
तत्र पुष्पफलोपेताः कामदाः सुरपादपाः ॥ १४-१०८-४६ (९६३६७)
वाप्यो बद्धसभाः कूपा दीर्घिकाश्च सहस्रशः ।
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च ॥ १४-१०८-४७ (९६३६८)
क्षीरस्रवन्त्यः सरितस्तथा चैवान्नपर्वताः ।
घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ॥ १४-१०८-४८ (९६३६९)
प्रासादप्रवराः शुभ्राः शय्याश्च कनकोज्ज्वलाः ।
अन्नदास्तत्र तिष्ठन्ति तस्मादन्नप्रदो भवेत् ॥ ॥ १४-१०८-४९ (९६३७०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
अष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥

आश्वमेधिकपर्व - अध्याय १०९
॥ श्रीः ॥
१४.१०९. अध्यायः १०९

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति भोजनविधिकथनम् ॥ १ ॥
तथा गोग्रासदानप्रकारकथनम् ॥ २ ॥
तथा तिलप्रशंसनपूर्वकं तेषां मिक्षूणां च ब्राह्मणेन स्वयं
यन्त्रे निपीडनप्रतिषेधनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
अन्नदानफलं श्रुत्वा प्रीतोस्मि मधुसूदन ।
भोजनस्य विधिं वक्तुं देवदेव त्वमर्हसि ॥ १४-१०९-१ (९६३७१)
भगवानुवाच। १४-१०९-२क्ष् (७९८१)
बोजनस्य द्विजातीनां विधानं शृणु पाण्डव ।
स्नातः शुचिः शुचौ देशे निर्जने हुतपावकः ॥ १४-१०९-२ (९६३७२)
मण्डलं कारयित्वा च चतुरश्रं द्विजोत्तमः ।
क्षत्रियश्चेत्ततो वृत्तं वैश्योऽर्धेन्दुसमाकृतिम् ॥ १४-१०९-३ (९६३७३)
आर्द्रपादस्तु भुञ्जीयात्प्राङ्मुखश्चासने शुचौ ।
पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः ॥ १४-१०९-४ (९६३७४)

नैकवासास्तु भुञ्जीयान्न चान्तर्धाय वा द्विजः ।
न भिन्नपात्रे भुञ्जीत पर्णपृष्ठे तथैव च ॥ १४-१०९-५ (९६३७५)
अन्नं पूर्वं नमस्कुर्यात्प्रहृष्टेनान्तरात्मना ।
नान्यदालोकयेदन्नान्न जुगुप्सेन तत्परः ॥ १४-१०९-६ (९६३७६)
जुगुप्सितं च यच्चान्नं राक्षसा एव भुञ्जते ।
पाणिना जलमुद्धृत्य कुर्यादन्नं प्रदक्षिणम् ॥ १४-१०९-७ (९६३७७)
अपेयं तद्विजानीयात्पीत्वा चान्द्रायणं चरेत् ।
परिवेषजलादन्यत्पेयमेव तु मन्त्रवत् ॥ १४-१०९-८ (९६३७८)
पञ्च प्राणाहुतीः कुर्यात्समन्त्रं तु पृथक्पृथक् ॥ १४-१०९-९ (९६३७९)
यथा रसं न जानाति जिह्वा प्रामाहुतौ नृप ।
तथा समाहितः कुर्यात्प्राणाहुतिमतन्द्रिकतः ॥ १४-१०९-१० (९६३८०)
विदित्वाऽन्नमथान्नादं पञ्च प्राणांश्च पाण्डव ।
यः कुर्यादाहुतीः पञ्च तेनेष्टाः पञ्चवायवः ॥ १४-१०९-११ (९६३८१)
अतोऽन्यथा तु भुञ्जानो ब्राह्मणो ज्ञानदुर्बलः ।
तेनान्नेनासुरान्प्रेतान्राक्षसांस्तर्पयिष्यति ॥ १४-१०९-१२ (९६३८२)
वक्त्रप्रमाणान्पिण्डांश्च ग्रसेदेकैकशः पुनः ।
वक्त्राधिकं तु यत्पिण्डमात्मोच्छिष्टं तदुच्यते ॥ १४-१०९-१३ (९६३८३)
पिण्डावशिष्टमन्यच्च वक्त्रान्निस्सृतमेव च ।
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ॥ १४-१०९-१४ (९६३८४)
स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभोजनम् ।
चान्द्रायणं चरेन्कृच्छ्रं प्राजापत्यमथापि वा ॥ १४-१०९-१५ (९६३८५)
स्त्रीपात्रभुङ्नरः पापः स्त्रीणामुच्छिष्टभुक्तथा ।
तया सह च यो भुङ्क्ते स भुङ्क्ते मद्यमेव हि ।
न तस्य निष्कृतिर्दृष्टा मुनिभिस्तत्वदर्शिभिः ॥ १४-१०९-१६ (९६३८६)
पिबतः पतिते तोये भोजने मुखनिस्सृते ।
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ॥ १४-१०९-१७ (९६३८७)
पीतशेषं तु तन्नाम न पेयं पाण्डुनन्दन ।
पिबेद्यदि हि तन्मोहाद्द्विजश्चान्द्रायणं चरेत् ॥ १४-१०९-१८ (९६३८८)
पानीयानि पिबेद्यते तत्पात्रं द्विजसत्तमः ।
अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेत् ॥ १४-१०९-१९ (९६३८९)
मौनी वाऽप्यथवा भूमौ नावलोक्य दिशस्तथा ।
भुञ्जीत विधिवद्विप्रो न चोच्छिष्टं प्रदापयेत् ॥ १४-१०९-२० (९६३९०)
सदा चात्यशनं नाद्यान्नातिहीनं च कर्हिचित् ।
यथाऽन्नेन व्यथा न स्यात्तथा भुञ्जीत नित्यशः ॥ १४-१०९-२१ (९६३९१)
उदक्यामपि चण्डालं श्वानं सूकरमेव वा ।
भुञ्जानो यदि वा पश्येत्तदन्नं च परित्यजेत् ।

भुञ्जानो ह्यत्यजन्मोहादि्द्वजश्चान्द्रायणं चरेत् ॥ १४-१०९-२२ (९६३९२)
केशकीटोपपन्नं च मुखमारुतवीजितम् ।
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ॥१४-१०९-२३ (९६३९३)
उत्थाय च पुनः स्पृष्टं पादस्पृष्टं च लङ्घितम् ।
अन्नं तद्राक्षसं विद्यात्तस्मात्तत्परिवर्जयेत् ॥१४-१०९-२४ (९६३९४)
राक्षसोच्छिष्टभुग्विप्रः सप्त पूर्वान्परानपि ।
नरके रौरवे घोर स पितॄन्पातयिष्यति ॥१४-१०९-२५ (९६३९५)
तस्मिन्नाचमनं कुर्याद्यस्मिन्पात्रे स भुक्तवान् ।
यद्युत्तिष्ठत्यनाचान्तो भुक्तवानासनात्ततः ।
स्नानं सद्यः प्रकुर्वीत सोन्यथाऽप्रयतो भवेत् ॥ १४-१०९-२६ (९६३९६)
युधिष्ठिर उवाच।१४-१०९-२७क्ष् (७९८२)
तृणमुष्टिविधानं च तृणमाहात्म्यमेव च ।
इक्षोः सोमसमुद्भूतिं वक्तुमर्हसि मानदः ॥१४-१०९-२७ (९६३९७)
भगवानुवाच।१४-१०९-२८क्ष् (७९८३)
पितरो वृषभा ज्ञेयो गावो लोकस्य मातरः ।
तासां तु पूजया राजन्पूजिताः पितृदेवताः ॥१४-१०९-२८ (९६३९८)
सभा प्रपा गृहाश्चापि देवतायतनानि च ।
शुद्ध्यन्ति शकृता यासांकिं भूतमधिकं ततः ॥१४-१०९-२९ (९६३९९)
ग्रासमुष्टिं परगवे दद्यात्संवत्सरं तु यः ।
अकृत्वा स्वयमाहारं प्राप्तस्तत्सार्वकालिकम् ॥१४-१०९-३० (९६४००)
गावो मे मातरः सर्वाः पितरश्चैव गोवृषाः ।
ग्रासमुष्टिं मया दत्तं प्रतिगृह्णीत मातरः ॥१४-१०९-३१ (९६४०१)
इत्युक्त्वाऽनेन मन्त्रेण गायत्र्या वा समाहितः ।
अभिमन्त्र्य ग्रासमुष्टिं तस्य पुण्यफलं शृणु ॥१४-१०९-३२ (९६४०२)
यत्कृतं दुष्कृतं तेन ज्ञानतोऽज्ञानतोपि वा ।
तस्य नश्यति तत्सर्वं दुःखप्नं च विनश्यति ॥१४-१०९-३३ (९६४०३)
तिलाः पिवित्राः पापघ्ना नारायणसमुद्भवाः ।
तिलाञ्श्राद्धे प्रशंसनति दानमेतदनुत्तमम् ॥१४-१०९-३४ (९६४०४)
तिलान्दद्यात्तिलान्भक्ष्यात्तिलानप्रातरुपस्पृशेत् ।
तिलंतिलमिति ब्रूयात्तिलाः पापहरा हि ते ॥१४-१०९-३५ (९६४०५)
क्रीत्वा प्रतिगृहीत्वा वा न विक्रेया द्विजातिभिः ।
भोजनाभ्यञ्जनाद्दानाद्योन्यत्तु कुरुते तिलैः ।
कृमिर्भूत्वा श्वविष्ठायां पितृभिः सह मज्जति ॥ १४-१०९-३६ (९६४०६)
तिलान्नपीडयेद्विप्रो यन्त्रचक्रे स्वयं नृप ।
पीडयन्हि द्विजो मोहान्नरकं याति रौरवम् ॥१४-१०९-३७ (९६४०७)
इक्षुवंशोद्भवः सोमः सोमवंशोद्भवा द्विजाः ।

इक्षुं न पीडयेत्तस्मादिक्षुघात्यात्मघातकः ॥ १४-१०९-३८ (९६४०८)
इक्षुदण्डसहस्राणामेकैकेन युधिष्ठिर ।
ब्रह्महत्यामवाप्नोति द्विजश्चेद्यन्त्रपीडकः ।
तस्मान्न पीडयेदिक्षुं यन्त्रचक्रे द्विजोत्तमः ॥ ॥ १४-१०९-३९ (९६४०९)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥

आश्वमेधिकपर्व - अध्याय ११०
॥ श्रीः ॥
१४.११०. अध्यायः ११०

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रत्यापद्धर्मकथनम् ॥ १ ॥
तथा प्रशस्ताप्रशस्तब्राह्मणलक्षणकथनम् ॥ २ ॥
तथा सामान्यतो नानाधर्मकथनपूर्वकं ब्राह्मण्यसिद्धिपरंकारकथनम्
॥ ३ ॥
तथा गुर्वाचार्योपाध्यायलक्षणकथनम् ॥ ४ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
समुच्चयं च धर्माणां भोज्याभोज्यं तथैव च ।
श्रुतं मया त्वत्प्रसादादापद्धर्मं ब्रवीहि मे ॥ १४-११०-१ (९६४१०)
भगवानुवाच। १४-११०-२क्ष् (७९८४)
दुर्भिक्षे राष्ट्रसंबाधेऽप्याशौचे मृतसूतके ।
धर्मकालेऽध्वनि तथा नियमो येन लुप्यते ॥ १४-११०-२ (९६४११)
दूराध्वगमनात्खिन्नो द्विजालाभेऽथ शूद्रतः ।
अकृतन्नं तु यत्किंचिद्गृह्णीयादात्मवृत्तये ॥ १४-११०-३ (९६४१२)
आतुरो दुःखितो वाऽपि तथाऽऽर्तो वा बुभुक्षितः ।
भुञ्जन्नविधिना विप्रः प्रायश्चित्तीयते न च ॥ १४-११०-४ (९६४१३)
निमन्त्रितस्तु यो विप्रो विदिवद्धव्यकव्ययोः ।
मांसादीन्यपि भुञ्जानः प्रायश्चित्तीयते न च ॥ १४-११०-५ (९६४१४)
अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ १४-११०-६ (९६४१५)
अशक्तो विधिवत्कर्तुं प्रायश्चित्तानि यो नरः ।

विदुषां वचनेनापि दानेनापि विशुद्ध्यति ॥ १४-११०-७ (९६४१६)
अनृतावृतुकाले वा दिवा रात्रौ तथाऽपि वा ।
प्रोषितस्तु स्त्रियं गच्छेत्प्रायश्चित्तीयते न च ॥ १४-११०-८ (९६४१७)
युधिष्ठिर उवाच। १४-११०-९क्ष् (७९८५)
प्रशस्याः कीदृशा विप्रा निन्द्याश्चापि सुरेश्वर ।
अष्टकायाश्च कः कालस्तन्मे कथय सुव्रत ॥ १४-११०-९ (९६४१८)
भगवानुवाच। १४-११०-१०क्ष् (७९८६)
सत्यसन्धं द्विजं दृष्ट्वा स्थानाद्वेपति भास्करः ।
एष मे मण्डलं भित्त्वा याति ब्रह्म सनातनम् ॥ १४-११०-१० (९६४१९)
कुलीनः कर्मकृद्वैद्यस्तथा चाप्यानृशंस्यवान् ।
श्रीमानृजउः सत्यवादी पात्रं सर्व इमे द्विजाः ॥ १४-११०-११ (९६४२०)
एते चाग्रासनस्थास्ते भुञ्जानाः प्रथमं द्विजाः ।
तस्यां पङ्क्त्यां तु ये वान्ये तान्पुनत्येव दर्शनात् ॥ १४-११०-१२ (९६४२१)
मद्भक्ता ये द्विजश्रेष्ठा मद्भक्ता मत्परायणाः ।
तान्पङ्क्तिपावनान्विद्धि पूज्यांश्चैव विशेषतः ॥ १४-११०-१३ (९६४२२)
निन्द्याञ्शृणु द्विजान्राजन्नपि वा वेदपारगान् ।
ब्राह्मणच्छद्मना लोके चरतः पापकारिणः ॥ १४-११०-१४ (९६४२३)
अनग्निरनधीयानः प्रतिग्रहरुचिस्तु यः ।
यतस्ततस्तु भुञ्जानस्तं विद्याद्ब्रह्मदूषकम् ॥ १४-११०-१५ (९६४२४)
मृतसूतकपुष्टाङ्गो यश्च शूद्रान्नभुग्द्विजः ।
अहं चापि न जानामि गतिं तस्य नराधिप ॥ १४-११०-१६ (९६४२५)
शूद्रान्नरसपुष्टाङ्गोऽप्यधीयानो हि नित्यशः ।
जपतो जुह्वतो वाऽपि गतिरूर्ध्वं न विद्यते ॥ १४-११०-१७ (९६४२६)
आहिताग्निश्च यो विप्रः शूद्रान्नान्न निवर्तते ।
पञ्च तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः ॥ १४-११०-१८ (९६४२७)
शूद्रप्रेषणकर्तुश्च ब्राह्मणस्य विशेषतः ।
भूमावन्नं प्रदातव्यं श्वसृगालसमो हि सः ॥ १४-११०-१९ (९६४२८)
प्रेतभूतं तु यः शूद्रं ब्राह्ममो ज्ञानदुर्बलः ॥
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥ १४-११०-२० (९६४२९)
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति ॥ १४-११०-२१ (९६४३०)
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजोत्तमाः ।
पदेपदेऽश्वमेधस्य फलं ते प्राप्नुवन्ति हि ॥ १४-११०-२२ (९६४३१)
न तेषामशुभं किंचित्पापं वा शुभकर्मणाम् ।
जलावगाहनादेव सद्यः शौचं विधीयते ॥ १४-११०-२३ (९६४३२)
शूद्रवेश्मनि विप्रेणि क्षीरं वा यदि वा दधि ।

निवृत्तेन न भोक्तव्यं विद्धि शूद्रान्नमेव तत ॥१४-११०-२४ (९६४३३)
विप्राणां भोक्तुकामानामत्यन्तं चान्नकाङ्क्षिणाम् ।
यो विघ्नं कुरुते मर्त्यस्ततो नान्योस्ति पापकृत् ॥१४-११०-२५ (९६४३४)
सर्वे च वेदाः सहषड्भिरङ्गैः
साङ्ख्यं पुराणं च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नृप द्विजस्य ॥ १४-११०-२६ (९६४३५)
ग्रहोपरागे विषुवेऽयनान्ते
पित्र्ये मघासु स्वसुते च जाते ।
गयेषु पिण्डेषु च पाण्डुपुत्र
दत्तं भवेन्निष्कसहस्रतुल्यम् ॥ १४-११०-२७ (९६४३६)
वैशाखमासस्य तु या तृतीयाऽ-
नवद्याऽसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे
त्रयोदशी पञ्चदशी न माघे ॥ १४-११०-२८ (९६४३७)
उपप्लवे चन्द्रमसो रवेश्च
श्राद्धस्य कालो ह्ययनद्वये च ।
पानीयमप्यत्रि तिलैर्विमिश्रं
दद्यात्पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समासहस्रं
रहस्यमेतत्पितरो वदन्ति ॥ १४-११०-२९ (९६४३८)
यस्त्वेकपङ्क्त्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः ।
क्रूरं दुराचारमनात्मवन्तं
ब्रह्मघ्नमेनं कवयो वदन्ति ॥ १४-११०-३० (९६४३९)
धनानि येषां विपुलानि सन्ति
नित्यं रमन्ते परलोकमूढाः ।
तेषामयं शत्रुवरघ्नलोको
नान्यत्सुखं देहसुखे रतानाम् ॥ १४-११०-३१ (९६४४०)
ये चैव मुक्तास्तपसि प्रयुक्ताः
स्वाध्यायशीला जरयन्ति देहम् ।
जितेन्द्रिया भूतहिते निविष्ट-
स्तेषामसौ चापि परश्च लोकः ॥ १४-११०-३२ (९६४४१)
ये चैव विद्यां न तपो न दानं
न चापि मूढाः प्रजने यतन्ते ।
न चापि गच्छन्ति सुखानि भोगां-

स्तेषामयंक चापि परश्च नास्ति ॥ १४-११०-३३ (९६४४२)
युधिष्ठिर उवाच। १४-११०-३४क्ष् (७९८७)
नारायण पुराणेश लोकावास नमोस्तु ते ।
श्रोतुमिच्छामि कात्स्न्येन धर्मसारसमुच्चयम् ॥ १४-११०-३४ (९६४४३)
भगवानुवाच। १४-११०-३५क्ष् (७९८८)
धर्मसारं महाप्राज्ञि मनुना प्रोक्तमादितः ।
प्रवक्ष्यामि मनुप्रोक्तं पौराणां श्रुतिसंहितम् ॥ १४-११०-३५ (९६४४४)
अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः ।
दृष्टमात्रात्पुनत्येते तस्मात्पश्येत तान्सदा ॥ १४-११०-३६ (९६४४५)
गौरकस्यैव दातव्या न बहूनां युधिष्ठिर ।
सा गौर्विक्रयमापन्ना दहत्यासप्तमं कुलम् ॥ १४-११०-३७ (९६४४६)
बहूनां न प्रदातव्या गौर्वस्त्रं शयनं स्त्रियः ।
तादृग्भूतं तु तद्दानं दातारं नोपतिष्ठति ॥ १४-११०-३८ (९६४४७)
आक्रम्य ब्राह्मणैर्भुक्तमनार्याणां च वेश्मनि ।
गोभिश्च पुण्यं तत्तेषां राजसूयाद्विशिष्यते ॥ १४-११०-३९ (९६४४८)
मा ददात्विति यो ब्रूयाद्ब्राह्मणेषु च गोषु च ।
तिर्यग्योनिशतं गत्वा चण्डालेषूपजायते ॥ १४-११०-४० (९६४४९)
ब्राह्मणस्वं च यद्दैवं दरिद्रस्यैव यद्धनम् ।
गुरोश्चापि हृतं राजन्स्वर्गस्थानपि पातयेत् ॥ १४-११०-४१ (९६४५०)
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।
द्वितायं धर्मशास्त्राणि तृतीयं लोकसंग्रहः ॥ १४-११०-४२ (९६४५१)
आसमुद्राच्च यत्पूर्वादासमुद्राच्च पश्चिमात् ।
हिमाद्रिविन्ध्ययोर्मध्यमार्यावर्तं प्रचक्षते ॥ १४-११०-४३ (९६४५२)
सरावतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्मितं देशं ब्रह्मवर्तं प्रचक्षते ॥ १४-११०-४४ (९६४५३)
यस्मिन्देशे य आचारः पारंपर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥ १४-११०-४५ (९६४५४)
कुरुक्षेत्रं च मत्स्याश्च पाञ्चालाः शूरसेनयः ।
एते ब्रह्मर्षिदेशास्तु ब्रह्मावर्तादनन्तराः ॥ १४-११०-४६ (९६४५५)
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं चारित्रं च गृह्णीयुः पृथिव्यां सर्वमानवाः ॥ १४-११०-४७ (९६४५६)
हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विशसनादपि ।
प्रत्यगेव प्रयागात्तु मध्यदेशः प्रकीर्तितः ॥ १४-११०-४८ (९६४५७)
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो याज्ञिको देशो म्लेच्छदेशस्ततः परम् ॥ १४-११०-४९ (९६४५८)
एतान्विज्ञाय देशांस्तु संश्रयेरन्द्विजातयः ।

शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः ॥ १४-११०-५० (९६४५९)
आचारः प्रथमो धर्मो ह्यहिंसा सत्यमेव च ।
दानं चैव यथाशक्ति नियमाश्च यमैः सह ॥ १४-११०-५१ (९६४६०)
वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥ १४-११०-५२ (९६४६१)
गर्भहोमैर्जातकर्मनामचौलोपनायनैः ।
स्वाध्यायैस्तद्व्रतैश्चैव विवाहस्नातकव्रतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ १४-११०-५३ (९६४६२)
धर्मार्थौ यदि न स्यातां शुश्रुषा वाऽपि तद्विधा ।
विद्या तस्मिन्नवप्तव्या शुभं बीजमिवोषरे ॥ १४-११०-५४ (९६४६३)
लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव वा ।
यस्माज्ज्ञानमिदं प्राप्तं तं पूर्वमभिवादयेत् ॥ १४-११०-५५ (९६४६४)
सव्येन सव्यं संगृह्य दक्षिणेन तु दक्षिणम् ।
न कुर्यादेकहस्तेन गुरोः पादाभिवादनम् ॥ १४-११०-५६ (९६४६५)
निषेकादीनि कर्माणि यः करोति यथाविधि ।
अध्यापयति चैवेनं स विप्रो गुरुरुच्यते ॥ १४-११०-५७ (९६४६६)
कृत्वोपनयनं वेदान्योध्यापयति नित्यशः ।
सकल्पान्सरहस्यांश्च स चोपाध्याय उच्यते ॥ १४-११०-५८ (९६४६७)
साङ्गांश्च वेदानध्याप्य शिक्षयित्वा व्रतानि च ।
विवृणोति च मन्त्रार्थानाचार्यः सोभिधीयते ॥ १४-११०-५९ (९६४६८)
उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
पितुः शतगुणं माता गौरवेणातिरिच्यते ॥ १४-११०-६० (९६४६९)
एतेषामपि सर्वेषां गरीयाञ्ज्ञानदो गुरुः ।
गुरोः परतरं किंचिन्न भूतं न भविष्यति ॥ १४-११०-६१ (९६४७०)
तस्मात्तेषां वशे तिष्ठिच्छुश्रूषापरमो भवेत् ।
अवमानाद्धि तेषां तु नरकं स्यान्न संशयः ॥ १४-११०-६२ (९६४७१)
हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोधिकान् ।
रूपद्रविणहीनांश्च जातिहीनांस्च नाक्षिपेत् ॥ १४-११०-६३ (९६४७२)
शपता यत्कृतं पुण्यं शप्यमानं तु गच्छति ।
शप्यमानस्य यत्पापं शपन्तमनुगच्छति ॥ १४-११०-६४ (९६४७३)
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ।
द्वेषं डंभं च मानं च क्रोधं तैक्ष्ण्यं विवर्जयेत्
॥ ॥ १४-११०-६५ (९६४७४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

आश्वमेधिकपर्व - अध्याय १११
॥ श्रीः ॥
१४.१११. अध्यायः १११

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रत्यग्निसृष्टिप्रकारकथनम् ॥ १ ॥
आहवनीयादित्वेन तद्विभागकथनपूर्वकं तत्तन्नामनिर्वचनम् ॥ २ ॥
तथा यज्ञाग्निहोत्रप्रशंसनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
स्वभक्तस्य हृषीकेश धर्माधर्ममजानतः ।
धर्मं पुण्यतमं देव पृच्छतः कथयस्व मे ॥ १४-१११-१ (९६४७५)
भगवानुवाच। १४-१११-२क्ष् (७९८९)
यदेतदग्निहोत्रं वै सृष्टं वर्णत्रयस्य तु ।
मन्त्रवद्यद्धुतं सम्यग्विधिना चाप्युपासितम् ।
आहिताग्निं नयत्यूर्ध्वं सपत्नीकं सबान्धवम् ॥ १४-१११-२ (९६४७६)
युधिष्ठिर उवाच। १४-१११-३क्ष् (७९९०)
कथं तद्ब्राह्मणैर्देव होतव्यं क्षत्रियैः कथम् ।
वैश्यैर्वा देवदेवेश कथं वा सुहुतं भवेत् ॥ १४-१११-३ (९६४७७)
कस्मिन्काले कतं कस्य आधेयोऽग्निः सुरोत्तम ।
आहितस्य कथं वाऽपि सम्यगाचरणं भवेत् ॥ १४-१११-४ (९६४७८)
कत्यग्नयः किमात्मानः स्थानं किं कस्य वा विभो ।
कतरस्मिन्हुते स्थाने कं व्रजेदाग्निहोत्रिकः ॥ १४-१११-५ (९६४७९)
अग्निहोत्रनिमित्तं च किमुत्पन्नं पुराऽनघ ।
कथमेवाथ हूयन्ते प्रीयन्ते च सुराः कथम् ॥ १४-१११-६ (९६४८०)
विधिवन्मन्त्रवत्कृत्वा पूजितास्त्वग्नयः कथम् ।
कां गतिं वदतांश्रेष्ठ नयन्ति ह्यग्निहोत्रिणः ॥ १४-१११-७ (९६४८१)
दुर्हुताश्चापि भगवन्नविज्ञातास्त्रयोऽग्नयः ।
किमाहिताग्नेः कुर्वन्ति दुश्चीर्णा वाऽपि केशव ॥ १४-१११-८ (९६४८२)
उत्सन्नाग्निस्तु पापात्मा कां योनिं देव गच्छति ।
एतत्सर्वं समासेन भक्त्या ह्युपगतस्य मे ।
वक्तुमर्हसि सर्वज्ञ सर्वाधिकं नमोस्तु ते ॥ १४-१११-९ (९६४८३)
भगवानुवाच। १४-१११-१०क्ष् (७९९१)

शृणु राजन्महापुण्यमिदं धर्मामृतं परम् ।
यत्तु तारयते युक्तान्ब्राह्मणानग्निहोत्रिणः ॥ १४-१११-१० (९६४८४)
ब्रह्मित्वेनासृजं लोकानहमादौ महाद्युते ।
सृष्टोऽग्निर्मुखतः पूर्वं लोकानां हितकाम्यया ॥ १४-१११-११ (९६४८५)
यस्मादग्रे स भूतानां सर्वेषां निर्मितो मया ।
तस्मादग्नीत्यभिहितः पुराणज्ञैर्मनीषिभिः ॥ १४-१११-१२ (९६४८६)
यस्मात्तु सर्वकृत्येषु पूर्वमस्मै प्रदीयते ।
आहुतिर्दीप्यमानाय तस्मादग्नीति कथ्यते ॥ १४-१११-१३ (९६४८७)
यस्माच्च तु नयत्यग्रां गतिं विप्रान्सुपूजितः ।
यस्माच्च नयनाद्राजन्देवेष्वग्नीति कथ्यते ॥ १४-१११-१४ (९६४८८)
तस्माच्च दुर्हुतः सोयमलं भक्षयितुं क्षणात् ।
यजमानं नरश्रेष्ठ क्रव्यादोऽग्निस्ततः स्मृतः ॥ १४-१११-१५ (९६४८९)
सर्वभूतात्मको राजन्देवानामेष वै मुखम् ।
प्रथमं मन्मुखात्सृष्टो लोकार्थे पचनः प्रभुः ॥ १४-१११-१६ (९६४९०)
सृष्टमात्रो जगत्सर्वमत्तुमैच्छत्पुरा खलु ।
ततः प्रशमितः सोग्निरूपास्यैव मया पुरा ॥ १४-१११-१७ (९६४९१)
सततोपासनात्सोयमौपासन इति स्मृतः ॥ १४-१११-१८ (९६४९२)
आहुतिः सर्वमाख्याति तस्मिन्वसति सोनलः ।
आवसथ्य इति ख्यातस्तेनासौ ब्रह्मवादिभिः ॥ १४-१११-१९ (९६४९३)
तस्मात्पञ्च महायज्ञा वर्तन्ते यस्य धर्मतः ।
सोममण्डलमध्येन गतिस्तस्य द्विजन्मनः ॥ १४-१११-२० (९६४९४)
ते च सप्तर्षयः सिद्धाः संयतेन्द्रियबुद्धयः ।
गता ह्यमरसायुज्यं ते ह्यग्न्यर्चनतत्पराः ॥ १४-१११-२१ (९६४९५)
अपरे चावसथ्यं च पचनाग्निं प्रचक्षते ।
तस्मिन्पञ्च महायज्ञा वैश्वदेवश्च वर्तते ॥ १४-१११-२२ (९६४९६)
स्थलीपाकं च गार्हं च सर्वे चास्मिन्प्रतिष्ठिताः ।
गृह्यकर्मवहो यस्मात्तस्माद्गृहपतिस्तु सः ॥ १४-१११-२३ (९६४९७)
औपासनं चावसथ्यं सभ्यं पचनपावकम् ।
आहुर्ब्रह्मविदः केचिन्मतमेतन्ममापि च ॥ १४-१११-२४ (९६४९८)
अग्निहोत्रप्रकारं च शृणु राजन्समाहितः ।
त्रयाणां गुणनामानां वह्नीनामुच्यते मया ॥ १४-१११-२५ (९६४९९)
गृहाणां हि पतित्वं हि गृहपत्यमिति स्मृतम् ।
गृहपत्यं तु यस्यासीत्तत्तस्माद्गार्हपत्यता ॥ १४-१११-२६ (९६५००)
यजमानं तु यस्मात्तु दक्षिणां तु गतिं नयेत् ।
दक्षिणाग्निं तमाहुस्ते दक्षिणायतनं द्विजाः ॥ १४-१११-२७ (९६५०१)
आहुतिः सर्वमाख्याति हव्यं वै वहनं स्मृतम् ।

सर्वहव्यवहो वह्निर्गतश्चाहवनीयताम् ॥१४-१११-२८ (९६५०२)
यं चाक्सथ्यं जुहुयान्मूलाग्निं विधिवद्द्विजः ।
आवसथ्यं तु तं चाग्निं पचनाग्निं प्रचक्षते ॥१४-१११-२९ (९६५०३)
तेषां स भागतो वह्निः सभ्य इत्यभिधीयते ।
आवतथ्यस्तु यो वह्निः प्रथमः स प्रजापतिः ॥१४-१११-३० (९६५०४)
ब्रह्मा च गार्हपत्योऽग्निस्तस्मिन्नेव हि सोभवत् ।
दक्षिणाग्निस्त्वयं रुद्रः क्रोधात्मा चण्ड एव सः ॥१४-१११-३१ (९६५०५)
अहमाहवनीयोऽग्निराहोमाद्यस्य वै मुखे ।
सभ्योऽग्निः पञ्चमो यस्तु स्कन्द एव नराधिप ॥१४-१११-३२ (९६५०६)
पृथिवी गार्हपत्योऽग्निरन्तरिक्षं च दक्षिणः ।
स्वर्गमाहवनीयोऽग्निरेवमग्नित्रयं स्मृतम् ॥१४-१११-३३ (९६५०७)
वृत्तश्च गार्हपत्योऽग्निर्यस्माद्वृत्ता च मेदिनी ।
अर्धचन्द्राकृतिस्तं वै दक्षिणाग्निस्तथा भवेत् ॥१४-१११-३४ (९६५०८)
चतुरश्रं ततः स्वर्गं निर्मलं तु निरामयम् ।
तस्मादाहवनीयोऽग्निश्चतुरश्रो भवेन्नृप ॥१४-१११-३५ (९६५०९)
जुहुयाद्गार्हपत्यं यो भुवं जयति स द्विजः ।
जुहोति दक्षिणं यस्तु स जयत्यन्तरिक्षकम् ॥१४-१११-३६ (९६५१०)
पृथिवीमन्तरिक्षं च दिवं ऋषिगणैः सह ।
जयत्याहवनीयं यो जुहुयाद्भक्तिमान्नरः ॥१४-१११-३७ (९६५११)
आभिमुख्येन होमस्तु यस्य यज्ञेषु वर्तते ।
तेनाप्याहवनीयत्वं गतो वह्निर्महाद्युतिः ॥१४-१११-३८ (९६५१२)
आहोमादग्निहोत्रेषु यज्ञैर्वा यत्र सर्वशः ।
यस्मात्तस्मात्प्रवर्तन्ते ततो ह्याहवनीयता ॥१४-१११-३९ (९६५१३)
यस्त्वावसथ्यं जुहुयान्मूलाग्निं विधिवद्द्विजः ।
स तु सप्तर्षिलोकेषु सपत्नीकः प्रमोदते ॥१४-१११-४० (९६५१४)
इष्टो भवति सर्वाग्नेरग्निहोत्रं च तद्भवेत् ।
त्राणाद्धि यजमानस्य ह्यग्निहोत्रमिति स्मृतम् ॥१४-१११-४१ (९६५१५)
होइज्येषु विषादो वै विषादो दुःखमुच्यते ।
दुःखं तापत्रयं प्रोक्तं तापं हि नरकं विदुः ॥१४-१११-४२ (९६५१६)
आध्यात्मिकं चाधिदैवमाधिभौतिकमेव च ।
एतत्तापत्रयं प्रोक्तमात्मविद्भिर्नराधिप ॥१४-१११-४३ (९६५१७)
यस्माद्धि त्रायते दुःखाद्यजमानं हुतोऽनलः ।
तस्मात्तु विधिवत्प्रोक्तमग्निहोत्रमिति श्रुतौ ॥१४-१११-४४ (९६५१८)
तदग्निहोत्रं सृष्टं वै ब्रह्मणा लोककर्तृणा ।
वेदाश्चाप्यग्निहोत्रं तु जज्ञिरे स्वयमेव तु ॥१४-१११-४५ (९६५१९)
अग्निहोत्रफला दारा दत्तभुक्तफलं धनम् ॥

रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ १४-१११-४६ (९६५२०)
त्रिवेदमन्त्रसंयोगादग्निहोत्रं प्रवर्तते ।
ऋग्यजुःसामभिः पुण्यैः स्थाप्यते सूत्रसंयुतैः ॥१४-१११-४७ (९६५२१)
वसन्ते ब्राह्मणस्य स्यादाधेयोऽग्निर्नराधिप ।
वसन्तो ब्राह्मणो ज्ञेयो वेदयोनिः स उच्यते ॥१४-१११-४८ (९६५२२)
अग्न्याधेयं तु येनाथ वसन्ते क्रियतेऽनघ ।
तस्य श्रीर्ब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्धते ॥१४-१११-४९ (९६५२३)
क्षत्रियस्याग्निराधेयो ग्रीष्मे श्रेष्ठः स वै नृप ।
येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्धते ।
श्रीः प्रजाःक पशवश्चैव वित्तं तेजो बलं यशः ॥ १४-१११-५० (९६५२४)
शरदृतौ तु वैश्यस्य ह्याधानीयो हुताशनः ।
शरद्रात्रं स्वयं वैश्यो वैश्ययोनिः स उच्यते ॥१४-१११-५१ (९६५२५)
शरद्याधानमेवं वै क्रियते येन पाण्डव ।
तस्यापि श्रीः प्रजाऽऽयुश्च पशवोऽर्थश्च वर्धते ॥१४-१११-५२
(९६५२६)
पशवः सर्व एवैते त्रिभिः सर्वैरलङ्कृताः ।
अग्निहोत्रा ह्यवर्तन्ते तैरेव ध्रियते जगत् ॥१४-१११-५३ (९६५२७)
ग्राम्यारण्याश्च पशवो पृक्षाश्चैव तृणानि च ।
फलान्योषधयश्चापि अग्निहोत्रकृते हविः ॥१४-१११-५४ (९६५२८)
रसाः स्नेहास्तथा गन्धा रत्नानि मणयस्तथा ।
काञ्चनानि च लोहानि ह्यग्निहोत्रकृतेऽभवन् ॥१४-१११-५५ (९६५२९)
आयुर्वेदो धनुर्वेदो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं च तत्सर्वमग्निहोत्रकृते कृतम् ॥१४-१११-५६ (९६५३०)
छन्दः शिक्षा च कल्पश्च तथा व्याकरणानि च ।
शास्त्रं ज्योतिर्निरुक्तं चाप्यग्निहोत्रकृते कृतम् ॥१४-१११-५७ (९६५३१)
इतिहासपुराणं च गाथाश्चोपनिषत्तथा ।
आथर्वणानि कर्माणि चाग्निहोत्रकृते कृतम् ॥१४-१११-५८ (९६५३२)
यच्चैतस्यां पृथिव्यां वै किंचिदस्ति चराचरम् ।
तत्सर्वमग्निहोत्रस्य कृते सृष्टं स्वयंभुवा ॥१४-१११-५९ (९६५३३)
अग्निहोत्रस्य दर्शस्य पूर्णमासस्य चाप्यथ ।
युपेष्टिपशुबन्धानां सोमपानक्रियावताम् ॥१४-१११-६० (९६५३४)
तिथिनक्षत्रयोगानां मुहूर्तकरणात्मकम् ।
कालस्य वेदनार्थं तु ज्योतिर्ज्ञानं पुराऽनघ ॥१४-१११-६१ (९६५३५)
ऋग्यजुः साममन्त्राणां श्लोकतत्वार्थचिन्तनात् ।
प्रत्यापत्तिविकल्पानां छन्दोज्ञानं प्रल्पितम् ॥१४-१११-६२ (९६५३६)
वर्णाक्षरपदार्थानां सन्धिलिङ्गं प्रकीर्तितम् ।

नामधातुविवेकार्थं पुरा व्याकरणं स्मृतम् ॥१४-१११-६३ (९६५३७)
यूपवेद्यध्वरार्थं तु प्रोक्षणश्रवणाय तु ।
यज्ञदैवतयोगार्थं शिक्षाज्ञानं प्रकल्पितम् ॥१४-१११-६४ (९६५३८)
यज्ञपात्रपवित्रार्थं द्रव्यसंभारणाय च ।
सर्वयज्ञविकल्पाय पुराकल्पं प्रकल्पितम् ॥१४-१११-६५ (९६५३९)
नामधातुविकल्पानां तत्वार्थनियमाय च ।
सर्ववेदनिरुक्तानां निरुक्तमृषिभिः कृतम् ॥१४-१११-६६ (९६५४०)
वेद्यर्थं पृथिवी सृष्टा संभारार्थं तथैव च ।
इध्मार्थमथ यूपार्थं ब्रह्मा चक्रे वनस्पतिम् ॥१४-१११-६७ (९६५४१)
ग्राम्यारण्याश्च पशवो जायन्ते यज्ञकारणात् ।
मन्त्राणां विनियोगं च प्रोक्षितं श्रपणं तथा ॥१४-१११-६८ (९६५४२)
अनुयाजप्रयाजाश्च मरुतां शंसिनस्तथा ।
औद्गात्रं चैव साम्नां वै प्रतिप्रस्थानमेव च ॥१४-१११-६९ (९६५४३)
विष्णुक्रमाणां क्रमणं दक्षिणावभृथं तथा ।
त्रिकासमर्चनं चैव स्यानेषूपहृतं तथा ॥१४-१११-७० (९६५४४)
देवताग्रहणं मोक्षं हविषां श्रपणं तथा ।
नावबुद्धयन्ति ये विप्रा निन्दन्ति च पशोर्वधम् ।
ते यान्ति नरकं घोरं रौरवं तमसाऽऽवृतम् ॥ १४-१११-७१ (९६५४५)
शतवर्षसहस्राणि तत्र स्थित्वा नराधमाः ।
कृमिर्भिर्भक्ष्यमाणाश्च तिष्ठेयुः पूयशोणिते ॥१४-१११-७२ (९६५४६)
वृक्षा यूपत्वमिच्छन्ति पशुत्वं पशवस्तथा ।
तृणानीच्छन्ति बर्हिष्ट्वमोषध्यश्च हविष्यताम् ।
सोमत्वं च लताः सर्वा वेदित्वं च वसुंधर ॥ १४-१११-७३ (९६५४७)
यस्मात्पशुत्वमिच्छन्ति पशवः स्वर्गलिप्सया ।
तस्मात्पशुवधे हिंसा नास्ति यज्ञेषु पाण्डव ॥१४-१११-७४ (९६५४८)
यूपास्तन्मन्त्रसंस्कारैर्दर्भाश्च पशवस्तथा ।
यजमानेन सहिताः स्वर्गं यान्ति नरेश्वर ॥१४-१११-७५ (९६५४९)
यावत्कालं हि यज्वा वै स्वर्गलोके महीयते ।
तावत्कालं प्रमोदन्ते पशवो ह्यध्वरे हताः ॥१४-१११-७६ (९६५५०)
अहिंसा वैदिकं कर्म ब्रह्मकर्मेति तत्कृतम् ।
वेदोक्तं ये न कुर्वन्ति हिंसाबुद्ध्या क्रतून्द्विजाः ।
सद्यः शूद्रत्वामायान्ति प्रेत्य चण्डालतामपि ॥ १४-१११-७७ (९६५५१)
गावो यज्ञार्थमुत्पन्ना दक्षिणार्थं तथैव च ।
सुवर्णं रजतं चैव पात्रकुभार्थमेव च ॥१४-१११-७८ (९६५५२)
दर्भाः संस्तरणार्तं तु रक्षसां रक्षणाय च ।
पजनार्थं द्विजाः सृष्टास्तारका दिवि देवताः ॥१४-१११-७९ (९६५५३)

क्षत्रिया रक्षणार्थं तु वैश्या वार्तानिमित्ततः ।
शुश्रूषार्थं त्रयाणां वै शूद्राः सृष्टाः स्वयंभुवा ॥ १४-१११-८०
(९६५५४)
एवमेतज्जगत्सर्वमग्निहोत्रकृते कृतम् ।
नावबुध्यन्ति ये चैव नरास्तु तमसा वृताः ॥ १४-१११-८१ (९६५५५)
ते यान्ति नरकं घोरं रौरवं नाम विश्रुतम् ।
रौरवाद्विप्रयुक्तास्तु कृमियोनिं व्रजन्ति ते ॥ १४-१११-८२ (९६५५६)
यथोक्तमग्निहोत्राणां शुश्रूषन्ति च ये द्विजाः ।
तैर्दत्तं सहुतं चेष्टं दत्तमध्यापितं भवेत् ॥ १४-१११-८३ (९६५५७)
एवमिष्टं च पूर्तं च यद्विप्रैः क्रियते नृप ।
तत्सर्वं सम्यगाहृत्य चादित्ये स्थापयाम्यहम् ॥ १४-१११-८४ (९६५५८)
मया स्थापितमादित्ये लोकस्य सुकृतं हि तत् ।
धारयेद्यत्सहस्रांशुः सुकृतं ह्यग्निहोत्रिणाम् ॥ १४-१११-८५ (९६५५९)
यावत्कालं तु तिष्ठन्ति लोके चाप्यग्निहोत्रिणः ।
तावदेव हि पुण्येन दीप्यते रविणाऽम्बरे ॥ १४-१११-८६ (९६५६०)
स्वर्गे स्वर्गं गतानां तु वीर्याद्भवति वीर्यवान् ।
तत्र ते ह्युपभुञ्जन्ति ह्यग्निहोत्रस्य तत्फलम् ।
समानरूपा देवानां तिष्ठन्त्याबूतसंप्लवम् ॥ १४-१११-८७ (९६५६१)
वृथाऽग्निना च ये केचिद्दह्यन्ते ह्यग्निहोत्रिणः ।
न तेऽग्निहोत्रिणां लोके मानसाऽपि व्रजन्ति ते ॥ १४-१११-८८ (९६५६२)
वीरघ्नास्तु दुराचारा दरिद्रास्तु नराधमाः ।
विकला व्याधिताश्चापि जायन्ते शूद्रयोनिषु ॥ १४-१११-८९ (९६५६३)
तस्मादप्रोषितैर्नित्यमग्निहोत्रं द्विजातिभिः ।
होतव्यं विधिवद्राजन्नूर्ध्वामिच्छन्ति ये गतिम् ॥ १४-१११-९० (९६५६४)
आत्मवन्नावमन्तव्यमग्निहोत्रं युधिष्ठिर ।
न त्याज्यं क्षणिमप्येतदग्निहोत्रं युधिष्ठिर ॥ १४-१११-९१ (९६५६५)
वृद्धत्वेऽप्यग्निहोत्रं ये गृह्णन्ति विधिवद्द्विजाः ।
शूद्रान्नाद्विरता दान्ताः संयतेन्द्रियबुद्धयः ॥ १४-१११-९२ (९६५६६)
पञ्चयज्ञपरा नित्यं लोभक्रोधविवर्जिताः ।
द्विकालमतिथींश्चैव पूजयन्ति च भक्तितः ॥ १४-१११-९३ (९६५६७)
तेऽपि सूर्योदयप्रख्यैर्विमानैर्वायुवेगिभिः ।
मम लोके प्रमोदन्ते दृष्ट्वा मां च युधिष्ठिर ॥ १४-१११-९४ (९६५६८)
मन्वन्तरं च तत्रैकं मोदिता द्विजसत्तमाः ।
इह मानुष्यके लोके जायन्ते द्विजसत्तमाः ॥ १४-१११-९५ (९६५६९)
बालाहिताग्नयो ये च शूद्रान्नाद्विरताः सदा ।
क्रोधलोभविनिर्मुक्ताः प्रातस्स्नानपरायणाः ।

यथोक्तमग्निहोत्रं वै जुह्वते विजितेन्द्रियाः ॥ १४-१११-९६ (९६५७०)
आतिथेयाः सदा सौम्या द्विकालं मत्परायणाः ।
ते यान्त्यपुनरावृत्तिं भित्त्वा चादित्यमण्डलम् ॥ १४-१११-९७ (९६५७१)
मम लोकं सपत्नीका यानैः सूर्योदयप्रभैः ।
तत्र बालार्कसङ्काशाः कामगाः कामरूपिणः ॥ १४-१११-९८ (९६५७२)
ऐश्वर्यगुणसंपन्नाः क्रीडन्ति च यथासुखम् ।
इत्येषामाहिताग्नीनां विभूतिः पाण्डुनन्दन ॥ १४-१११-९९ (९६५७३)
श्रुतिं केचिन्निन्दमानाः श्रुतिं दूष्यन्त्यबुद्धयः ।
प्रमाणं न च कुर्वन्ति ये यान्तीहापि दुर्गतिम्। १४-१११-१०० (९६५७४)
प्रमाणमितिहासं च वेदान्कुर्वति ये द्विजाः ।
ते यान्त्यमरसायुज्यं नित्यमास्तिक्यबुद्धयः ॥ ॥ १४-१११-१०१ (९६५७५)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
एकादशाधिकशततमोऽध्यायः ॥

आश्वमेधिकपर्व - अध्याय ११२
॥ श्रीः ॥
१४.११२. अध्यायः ११२

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति चान्द्रायणविधिनिरूपणपूर्वकं
तदाचरणफलकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
चक्रायुध नमस्तेऽस्तु देवेश गरुडध्वज ।
चान्द्रायणविधिं पुण्यमाख्याहि भगवन्मम ॥ १४-११२-१ (९६५७६)
भगवानुवाच। १४-११२-२क्ष् (७९९२)
शृणु पाण्डव तत्वेन सर्वपापप्रणाशनम् ।
पापिनो येन शुद्धयन्ति तत्ते वक्ष्यामि सर्वशः ॥ १४-११२-२ (९६५७७)
ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा चरितव्रतः ।
यथावत्कर्तुकामो वै तस्यैवं प्रथमा क्रिया ॥ १४-११२-३ (९६५७८)
शोधयेत्तु शरीरं स्वं पञ्चगव्येन यन्त्रितः ।
सशिरः कृष्णपक्षस्य ततः कुर्वीत वापनम् ॥ १४-११२-४ (९६५७९)
शुक्लवासाः शुचिर्भूत्वा मौञ्जीं बध्नीत मेखलाम् ।

पालाशदण्डमादाय ब्रह्मचारिव्रते स्थितः ॥१४-११२-५ (९६५८०)
कृतोपलासः पूर्वं तु शुक्लप्रतिपदि द्विजः ।
नदीसंगमतीर्थेषु शुचौ देशे गृहेऽपि वा ।
गोमयेनोपलिप्रेऽथ स्थण्डिलेऽग्निं निधापयन् ॥ १४-११२-६ (९६५८१)
आघारावाज्यभागौ च प्रणवं व्याहृतीस्तथा ।
वारुणं चैव पञ्चैव हुत्वा सर्वान्यथाक्रमम् ॥१४-११२-७ (९६५८२)
सत्याय विष्णवे चेति ब्रह्मर्षिभ्योऽथ ब्रह्मणे ।
विश्वेभ्यो हि च देवेभ्यः सप्रजापतये तथा ॥१४-११२-८ (९६५८३)
षडुक्त्वा जुहुयात्पश्चात्प्रायश्चित्ताहुतिं द्विजः ।
अतः समापयेदग्निं शान्तिं कृत्वाऽथ पौष्टिकिम् ॥१४-११२-९ (९६५८४)
प्रणम्य् चाग्निं सोमं च भस्म दिग्ध्वा यथाविधि ।
नदीं गत्वा विशुद्धात्मा सोमाय वरुणाय च ।
आदित्याय नमस्कृत्वा ततः स्नायात्समाहितः ॥ १४-११२-१० (९६५८५)
उत्तीर्योदकमाचम्य चासीनः पूर्वतोमुखः ।
प्राणायामं ततः कृत्वा पवित्रैरभिषेचनम् ॥१४-११२-११ (९६५८६)
आचान्तस्त्वमिवीक्षेत ऊर्ध्वबाहुर्दिवाकरम् ।
कृताञ्जलिपुटः स्थित्वा कुर्याच्चैव प्रदक्षिणम् ॥१४-११२-१२ (९६५८७)
नारायणं वा रुद्रं वा ब्रह्मणमथवाऽपि च ।
वारुणं मन्त्रमूक्तं वा प्राग्भोजनमथापि वा ॥१४-११२-१३ (९६५८८)
वीरघ्नमृषभकं वाऽपि तथा चाप्यघमर्षणम् ।
गायत्रीं मम देवीं वा सावित्रीं वा जपेत्ततः ।
शतं वाऽष्टशतं वाऽपि सहस्रमथवा परम् ॥ १४-११२-१४ (९६५८९)
ततो मध्याह्नकाले वै पायसं यावकं हि वा ।
पाचयित्वा प्रयत्नेन प्रयतः सुसमाहितः ॥१४-११२-१५ (९६५९०)
पात्रं तु सुसमादाय सौवर्णं राजतं तु वा ।
ताम्रं वा मृन्मयं वापि औदुंबरमथापि वा। १४-११२-१६ (९६५९१)
वृक्षाणां याज्ञियानं तु पर्णैरार्द्रैरकुत्सितैः ।
पुटकेन तु गुप्तेनि चरेद्भैक्षं समाहितः ॥१४-११२-१७ (९६५९२)
ब्राह्मणानां गृहाणां तु सप्तानां नापरं व्रजेत् ।
गोदोहमात्रं तिष्ठित्तु वाग्यतः संयतेन्द्रियः ॥१४-११२-१८ (९६५९३)
न हसेन्न च वीक्षेत नाभिभाषेत वा स्त्रियम् ॥ १४-११२-१९ (९६५९४)
दृष्ट्वा मूत्रं पुरीषं वा चण्डालं वा रजस्वलाम् ।
पतितं च तथा श्वानमादित्यमवलोकयेत् ॥१४-११२-२० (९६५९५)
यो हि पादुकमारुह्य सर्वदा प्रचरेद्द्विजः ।
तं दृष्ट्वा पापकर्माणमादित्यमवलोकयेत् ॥१४-११२-२१ (९६५९६)
ततस्त्वावसथं प्राप्तो भिक्षां निक्षिप्य भूतले ।

प्रक्षाल्य पादावाजान्वोर्हस्तावाकूर्परं पुनः ।
आचम्य वारिणा तेन वह्निं विप्रांश्च पूययेत् ॥ १४-११२-२२ (९६५९७)
पञ्च सप्ताथवा कुर्याद्भागान्भैक्षस्य तस्य वै ।
तेषामन्यतमं पिण्डमादित्याय निवेदयेत् ॥१४-११२-२३ (९६५९८)
ब्रह्मणे चाग्नये चैव सोमाय वरुणाय च ।
विश्वेभ्यश्चैव देवेभ्यो दद्यादन्नं यथाक्रमम् ॥१४-११२-२४ (९६५९९)
अवशिष्टमथैकं तु वक्त्रमात्रं प्रकल्पयेत् ॥ १४-११२-२५ (९६६००)
अङ्गुल्यग्रे स्थितं पिण्डं गायत्र्या चाभिमन्त्रयेत् ।
अङ्गुलीभिस्त्रिभिः पिण्डं प्राश्नीयात्प्राङ्मुखःक शुचिः। १४-११२-२६ (९६६०१)
यथा च वर्धते सोमो ह्रसते च यथा पुनः ।
तथा पिण्डाश्च वर्धन्ते ह्रसन्ते च दिनेदिने ॥१४-११२-२७ (९६६०२)
त्रिकालं स्नानमस्योक्तं द्विकालमथवा सकृत् ।
ब्रह्मचारी सदा वाऽपि न च वस्त्रं प्रपीडयेत् ॥१४-११२-२८ (९६६०३)
स्थान न दिवसं तिष्ठेद्रात्रौ वीरासनं व्रजेत् ।
भवेत्स्थण्डिलशायी वाऽप्यथा वृक्षमूलिकः ॥१४-११२-२९ (९६६०४)
वल्कलं यदि वा क्षौमं शाणं कार्पासकं तथा ।
आच्छादनं भवेत्तस्य वस्त्रार्थं पाण्डुनन्दन ॥१४-११२-३० (९६६०५)
एवं चान्द्रायणे पूर्णे मासस्यान्ते प्रयत्नवान् ।
ब्राह्मणान्भोजयेद्भक्त्या दद्याच्चैव च दक्षिणाम् ॥१४-११२-३१ (९६६०६)
चान्द्रायणेन चीर्णेन यत्कृतं तेन दुष्कृतम् ।
तत्सर्वं तत्क्षणादेव भस्मीभवति काष्ठवत् ॥१४-११२-३२ (९६६०७)
ब्रह्महत्या च गोहत्या सुवर्णस्तैन्यमेव च ।
भ्रूणहत्या सुरापानं गुरोर्दारव्यतिक्रमः ॥१४-११२-३३ (९६६०८)
एवमन्यानि पापानि पातकीयानि यानि च ।
चान्द्रायणेन नश्यन्ति वायुना पांसवो यथा ॥१४-११२-३४ (९६६०९)
अनिर्दशाया गोः क्षीरमौष्ट्रमाविकमेव च ।
मृतसूतकयोश्चान्नं भुक्त्वा चान्द्रायणं चरेत् ॥१४-११२-३५ (९६६१०)
उपपातकिनश्चान्नं पतितान्नं तथैव च ।
शूद्रस्योच्छेषणं चैव भुक्त्वा चान्द्रायणं चरेत् ॥१४-११२-३६ (९६६११)
आकाशस्थं तु हस्तस्थमधः स्रस्तं तथैव च ।
परहस्तस्थितं चैव भुक्त्वा चान्द्रायणं चरेत् ॥१४-११२-३७ (९६६१२)
अथाग्रेधिषोरन्नं दिधिषूपपतेस्तता ।
परिवेत्तुस्तथा चान्नं परिवित्तान्नमेव च ॥१४-११२-३८ (९६६१३)
कुण्डान्नं गोलकान्नं च देवलान्नं तथैव च ।
तथा पुरोहितस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥१४-११२-३९ (९६६१४)
सुराऽऽसवं विषं सर्पिर्लाक्षा लवणमेव च ।

तैलं चापि च विक्रीणन्द्विजश्चान्द्रायणं चरेत् ॥१४-११२-४० (९६६१५)
एकोद्दिष्टं तु यो भुङ्क्ते जनमध्यगतोऽपि यः ।
भिन्नभाण्डेषु यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ॥१४-११२-४१ (९६६१६)
यो भुङ्क्तेऽनुपनीतेन यो भुङ्क्ते च स्त्रिया सह ।
कन्यया सह यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ॥१४-११२-४२ (९६६१७)
उच्छिष्टं स्थापयेद्विप्रो यो मोहाद्भोजनान्तरे ।
दद्याद्वा यदि वा मोहाद्द्विजश्चान्द्रायणं चरेत् ॥१४-११२-४३ (९६६१८)
तुम्बकोशातकं चैव पलाण्डुं गृञ्जनं तथा ।
छत्राकं लशुनं चैव भुक्त्वा चान्द्रायणं चरेत् ॥१४-११२-४४ (९६६१९)
द्विजः पर्युषितं चान्नं पक्वं परगृहागतम् ।
विपक्वं च तथा मांसं भुक्त्वा चान्द्रायणं चरेत् ॥१४-११२-४५ (९६६२०)
उदक्यया शुना वाऽपि चण्डालैर्वा द्विजोत्तमः ।
दृष्टमन्नं तु भुञ्जानो द्विजश्चान्द्रायणं चरेत् ॥१४-११२-४६ (९६६२१)
क़क़क़क़तत्पुरा विशुद्ध्यर्थमृषिभिश्चरितं व्रतम् ।
पावनं सर्वभूतानां पुण्यं पाण्डवचोदितम् ॥१४-११२-४७ (९६६२२)
एतेन वसवो रुद्राश्चादित्याश्च दिवं गताः ।
एतदद्य परं गुह्यं पवित्रं पापनाशनम् ॥१४-११२-४८ (९६६२३)
यथोक्तमेतद्यः कुर्याद्द्विजः पापप्रणाशनम् ॥
स दिवं याति पूतात्मा निर्मलादित्यसंनिभः ॥ ॥१४-११२-४९ (९६६२४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥११२ ॥

आश्वमेधिकपर्व - अध्याय ११३
॥ श्रीः ॥
१४.११३. अध्यायः ११३

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति कार्तिकादिद्वादशमासेषु
एकभुक्तव्रताचरणप्रकारनिरूपणपूर्वकं तत्फलकथनम् ॥१ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
केशवेनैवमुक्ते तु चान्द्रायणविधिक्रमे ।
अपृच्छत्पुनरन्यांश्च धर्मान्धर्मात्मजो नृप ॥१४-११३-१ (९६६२५)

युधिष्ठिर उवाच। १४-११३-२क्ष् (७९९३)
सर्वभूतपते श्रीमन्सर्वभूतनमस्कृत ।
सर्वभूतहितं धर्मं सर्वज्ञ कथयस्व नः ॥ १४-११३-२ (९६६२६)
भगवानुवाच। १४-११३-३क्ष् (७९९४)
यद्दरिद्रजनस्यापि स्वर्ग्यं सुखकरं भवेत् ।
सर्वपापप्रशमनं तच्छृणुष्व युधिष्ठिर ॥ १४-११३-३ (९६६२७)
कार्तिकाद्यास्तु ये मासा द्वादशैव प्रकीर्तिताः ।
तेष्वेकबुक्तनिमः सर्वेषामुच्यते मया ॥ १४-११३-४ (९६६२८)
कार्तिके यस्तु वै मासे नन्दायां संयतेन्द्रियः ।
एकभुक्तेन मद्भक्तो मासमेकं तु वर्तते ॥ १४-११३-५ (९६६२९)
जलं वा न पिबेन्मासे नान्तरं भोजनात्परम् ।
आदित्यरूपं मां नित्यमर्चयन्सुसमाहितः ॥ १४-११३-६ (९६६३०)
व्रतान्ते भोजयेद्विप्रान्दक्षिणां सम्प्रदाय च ।
क्रोधलोभविनिर्मुक्तस्तस्य पुण्यफलं शृणु ॥ १४-११३-७ (९६६३१)
विधिवत्कपिलादाने यत्पुण्यं समुदाहृतम् ।
तत्पुण्यं समनुप्राप्य सूर्यकलोके महीयते ।
ततश्चापि च्युतः कालात्पुरुषेषूपजायते ॥ १४-११३-८ (९६६३२)
मार्गशीर्षं तु यो मासमेकभुक्तेन वर्तते ।
कामं क्रोधं च लोभं च परित्यज्य यथाविधि ॥ १४-११३-९ (९६६३३)
स्नात्वा चादित्यरूपं मामर्ययेन्नियतेन्द्रियः ।
जपेच्चैव च गायत्रीं मामिकां वाग्यतेन्द्रियः ॥ १४-११३-१० (९६६३४)
मासे परिसमाप्ते तु भोजयित्वा द्विजाञ्शुचिः ।
तानर्चयति मद्भक्त्या तस्य पुण्यफलं शृणु ॥ १४-११३-११ (९६६३५)
अग्निहोत्रे कृते पुण्यमाहिताग्नेस्तु यद्भवेत् ।
तत्पुण्यं फलमासाद्य योनेनांऽबरशोभिना ।
सह सप्तर्षिलोकेषु यथाकामं यथासुखम् ॥ १४-११३-१२ (९६६३६)
ततश्चापि च्युतः कालाद्धरिवर्षेषु जायते ।
तत्र प्रकामं क्रीडित्वा राजा पश्चाद्भविष्यति ॥ १४-११३-१३ (९६६३७)
क़क़क़क़क़क़क़क़ क्षिपेदेवमेकभुक्तेन यो नरः ।
अर्चयन्नेव मां नित्यं मद्गतेनान्तरात्मना ॥ १४-११३-१४ (९६६३८)
अहिंसासत्यसहितः क्रोधहर्षविवर्जितः ।
एवं युक्तस्य राजेन्द्र शृणु यत्फलमुत्तमम् ॥ १४-११३-१५ (९६६३९)
विप्रातिथ्यसहस्रेषु यत्पुण्यं समुदाहृतम् ।
तत्पुण्यं समनुप्राप्य शक्रलोके महीयते ॥ १४-११३-१६ (९६६४०)
अवतीर्णस्ततः कालादिलावर्षेषु जायते ।
तत्र स्थित्वा चिरं कालमस्मिन्विप्रो भविष्यति ॥ १४-११३-१७ (९६६४१)

माघमासं सदा यस्तु वर्तते चैकभुक्ततः ।
मदर्चनपरो भूत्वा डंभक्तोधविवर्जितः ।
मामिकामपि सावित्रीं सन्ध्यायां तु जपेद्बुधः ॥ १४-११३-१८ (९६६४२)
दत्त्वा दु दक्षिणामन्ते भोजयित्वा द्विजानपि ।
नमिस्करोति तान्भक्त्या मद्गतेनान्तरात्मना ।
त्रिकालस्नानयुक्तस्य तस्य पुण्यफलं शृणु ॥ १४-११३-१९ (९६६४३)
नीलकण्ठप्रयुक्तेन योनेनांऽबरशोभिना ।
पितृलोकं व्रजेच्छ्रीमान्सेव्यमानोप्सरोणैः ॥ १४-११३-२० (९६६४४)
तत्र प्रकामं क्रीडित्वा भद्राश्वेषूपजायते ।
ततश्च्युतश्चतुर्वेदी विप्रो भवति भूतले ॥ १४-११३-२१ (९६६४५)
यश्चरेत्फाल्गुनं मासमेकभुक्तो जितेन्द्रियः ।
नमो ब्रह्मण्यदेवायेत्येतन्मन्त्रं जपेत्सदा ॥ १४-११३-२२ (९६६४६)
पायसं भोजयेद्विप्रान्व्रतान्ते संयतेन्द्रियः ।
मदर्चनपरोऽक्रोधस्तस्य पुण्यफलं शृणु ॥ १४-११३-२३ (९६६४७)
विमानं सारसैर्युक्तमारूढः कामगामि च ।
नक्षत्रलोके रमते नक्षत्रसदृशाकृतिः ॥ १४-११३-२४ (९६६४८)
ततश्चापि च्युतः कालात्केतुमालेषु जायते ।
तत्र प्रकामं क्रीडित्वा मानुषेषु मुनिर्भवेत् ॥ १४-११३-२५ (९६६४९)
चैत्रमासं तु यो राजन्नेकभुक्तेन वर्तते ।
ब्रह्मचारी च मद्भक्त्या तस्य पुण्यफलं शृणु ॥ १४-११३-२६ (९६६५०)
यदग्निहोत्रिणः पुण्यं यथोक्तं व्रतचारिणः ।
तत्पुण्यफकलमासाद्य चन्द्रलोके महीयते ॥ १४-११३-२७ (९६६५१)
ततोऽवतीर्णो जायेत वर्षे रमणके पुनः ।
भुक्त्वा कामांस्ततस्तस्मिन्निह राजा भविष्यति ॥ १४-११३-२८ (९६६५२)
वैशाखे यस्तु मासे वै ह्येकभुक्तेन वर्तते ।
द्विजमग्रासने कृत्वा भुञ्जन्भूमौ च वाग्यतः ॥ १४-११३-२९ (९६६५३)
नमो ब्रह्मण्यदेवायेत्यर्चयित्वा दिवाकरम् ।
व्रतान्ते भोजयेद्विप्रांस्तस्य पुण्यफलं शृणु ॥ १४-११३-३० (९६६५४)
फलं यद्विधिवत्प्रोक्तमग्निष्टोमातिरात्रयोः ।
तत्पुण्यफलमासाद्य देवलोके महीयते ॥ १४-११३-३१ (९६६५५)
ततो हैमवते वर्षे जायते कालपर्ययात् ।
तत्र प्रकामं क्रीडित्वा विप्रः पश्चाद्भविष्यति ॥ १४-११३-३२ (९६६५६)
ज्येष्ठमासं तु यो विप्रो ह्येकभुक्तेन वर्तते ।
विप्रमग्रासने कृत्वा भूमौ भुञ्जन्यथाविधि ॥ १४-११३-३३ (९६६५७)
नमो ब्रह्मण्यदेवायेत्युच्चरन्मां समाहितः ।
डंभानृतविनिर्मुक्तस्तस्य पुण्यफलं शृणु ॥ १४-११३-३४ (९६६५८)

चीर्णे चान्द्रायणे सम्यग्यत्पुण्यं समुदाहृतम् ।
तत्पुण्यफलमासाद्य देवलोके महीयते ॥ १४-११३-३५ (९६६५९)
अथोत्तरकुरौ वर्षे जायते निर्गतस्ततः ।
ततश्चापि च्युतः कालादिह लोके द्विजो भवेत् ॥ १४-११३-३६ (९६६६०)
आषाढमासं यो राजन्नेकभुक्तेन वर्तते ।
ब्रह्मचारी जितक्रोधो मदर्चनपरायणः ॥ १४-११३-३७ (९६६६१)
विप्रमग्रासने कृत्वा भूमौ भुञ्जञ्जितेन्द्रियः ।
कृत्वा त्रिषवणं स्नानमष्टाक्षरविधानतः ॥ १४-११३-३८ (९६६६२)
व्रतान्ते भोजयेद्विद्वान्पायसेन युधिष्ठिर ।
गुडोदनेन राजेन्द्र तस्य पुण्यफलं शृणु ॥ १४-११३-३९ (९६६६३)
कपिलाशतदानस्य यत्पुण्यं पाण्डुनन्दन ।
तत्पुण्यफलमासाद्य देवलोके महीयते ॥ १४-११३-४० (९६६६४)
ततोऽवतीर्णः काले तु शाकद्वीपे तु जायते ।
ततश्चापि च्युतः कालादिह विप्रो भविष्यति ॥ १४-११३-४१ (९६६६५)
श्रावणं यः क्षिपेन्मासमेकभुक्तेन वर्तते ।
नमो ब्रह्मण्यदेवायेत्युक्त्वा मामर्चयेत्सदा ।
विप्रमाग्रासने कृत्वा भूमौ भुञ्जन्यथाविधि ॥ १४-११३-४२ (९६६६६)
पायसेनार्चयन्विप्राञ्जितक्रोधो जितेन्द्रियः ।
लोभमोहविनिर्मुक्तस्तस्य पुण्यफलं शृणु ॥ १४-११३-४३ (९६६६७)
कपिलादानस्य यत्पुण्यं विधिदत्तस्य पाण्डव ।
तत्पुण्यं समक्रक्रक्रप्राप्य शक्रलोके महीयते ॥ १४-११३-४४ (९६६६८)
ततश्चापि च्युत कालात्कुशद्वीपे प्रजायते ।
तत्रि प्रकामं क्रीडित्वा विप्रो भवति मानुषे ॥ १४-११३-४५ (९६६६९)
यस्तु भाद्रपदं मासमेकभुक्तेन वर्तते ।
ब्रह्मचारी जितक्रोधः सत्यसन्धो जितेन्द्रियः ॥ १४-११३-४६ (९६६७०)
विप्रमग्रासने कृत्वा पाकभेदविवर्जितः ।
नमो ब्रह्मण्यदेवायेत्युक्त्वाऽस्य चरणौ स्पृशेत् ॥ १४-११३-४७ (९६६७१)
तिलानपि घृतं वाऽपि व्रतान्ते दक्षिमां ददत् ।
मद्भक्तस्य नरश्रेष्ठ तस्य पुण्यफलं शृणु ॥ १४-११३-४८ (९६६७२)
यत्फलं विधिवत्प्रोक्तं राजसूयाश्वमेधयोः ।
तत्पुण्यफलमासाद्य शक्रलोके महीयते ॥ १४-११३-४९ (९६६७३)
ततश्चापि च्युतः कालाज्जायते धनदालये ।
तत्र प्रकामं क्रीकडित्वा राजा भवति मानुषे ॥ १४-११३-५० (९६६७४)
यश्चाप्याश्वयुजं मासमेकभुक्तेन वर्तते ।
मद्गायत्रीं जपेद्भक्त्या मद्गतेनान्तरात्मना ।
द्विसन्ध्यं वा त्रिसन्ध्यं वा शतमष्टोत्तरं तु वा ॥ १४-११३-५१ (९६६७५)

विप्रमग्रासने कृत्वा संयतेन्द्रियमानसः ।
व्रतान्ते भोजयेद्विप्रांस्तस्य पुण्यफलं शृणु ॥ १४-११३-५२ (९६६७६)
अश्वमेधस्य यत्पुण्यं विधिवत्पाण्डुनन्दन ।
तत्पुण्यफलमासाद्य मम लोके महीयते ॥ १४-११३-५३ (९६६७७)
ततश्चापि च्युतः कालाच्छ्वेतद्वीपे प्रजायते ।
तत्र भुक्त्वा च भोगांश्च ततो विप्रवरो भवेत् ॥ ॥ १४-११३-५४ (९६६७८)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

आश्वमेधिकपर्व - अध्याय ११४
॥ श्रीः ॥
१४.११४. अध्यायः ११४

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति केशवादिभगवन्मूर्त्युपास्तिपूर्वकं
मार्गशीर्षादिद्वादशद्वादशीव्रताचरणफलकथनम् ॥ १ ॥
युधिष्ठिरेण विस्तरेण कृष्णस्तवनम् ॥ २ ॥
पुनः कृष्णेन युधिष्ठिराय एकादश्युपवासपूर्वकं द्वादश्यां
भगवत्पूजायाः फलकथनम् ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
एवं संवत्सरं पूर्णमेकभुक्तेन यः क्षिपेत् ।
तस्य पुण्यफलं यद्वै तन्ममाचक्ष्व केशव ॥ १४-११४-१ (९६६७९)
भगवानुवाच। १४-११४-२क्ष् (७९९५)
शृणु पाण्डव तत्त्वं मे वचनं पुण्यमुत्तमम् ।
यदकृत्वाऽथवा कृत्वा नरः पापैः प्रमुच्यते ॥ १४-११४-२ (९६६८०)
एकभुक्तेन वर्तेत नरः संवत्सरं तु यः ।
ब्रह्मचारी जितक्रोधो ह्यधश्शायी जितेन्द्रियः ॥ १४-११४-३ (९६६८१)
शुचिश्चि स्नानतो व्यग्रः सत्यवागनसूयकः ।
अर्चन्नेव तु मां नित्यं मद्गतेनान्तरात्मना ।
सन्ध्ययोस्तु जपेन्नित्यं मद्गायत्रीं समाहितः ॥ १४-११४-४ (९६६८२)
नमो ब्रह्मण्यदेवायेत्यसकृन्मां प्रणम्य च ।
विप्रमग्रासने कृत्वा यावकं भैक्षमेव वा ॥ १४-११४-५ (९६६८३)

भुक्त्वा तु वाग्यतो भूमावाचान्तस्य द्विजन्मनः ।
नमोऽस्तु वासुदेवायेत्युक्त्वा तु चरणौ स्पृशेत् ॥ १४-११४-६ (९६६८४)
मासेमासे समाप्ते तु भोजयित्वा द्विजाञ्शुचीन् ।
संवत्सरे ततः पूर्णे दद्यात्तु व्रतदक्षिणाम् ॥ १४-११४-७ (९६६८५)
नवनीतमयीं गां वा तिलधेनुमथापि वा ।
विप्रहस्तच्युतैस्तोयैः सहिरण्यैः समुक्षितः ।
तस्य पुण्यफलं राजन्कथ्यमानं मया शृणु ॥ १४-११४-८ (९६६८६)
दशजन्मकृतं पापं ज्ञानतोऽज्ञानतोपि वा ।
तद्विनश्यति तस्याशु नात्र कार्या विचारणा ॥ १४-११४-९ (९६६८७)
युधिष्ठिर उवाच। १४-११४-१०क्ष् (७९९६)
सर्वेषामुपवासानां यच्छ्रेयः सुमहत्फलम् ।
यच्च निःश्रेयसं लोके तद्भवान्वक्तुमर्हति ॥ १४-११४-१० (९६६८८)
भगवानुवाच। १४-११४-११क्ष् (७९९७)
शृणु राजन्यथापूर्वं मयाऽभीष्टं तु मोदते ।
तथा ते कथयिष्यामि मद्भक्ताय युधिषठिर ॥ १४-११४-११ (९६६८९)
यस्तु भक्त्या शुचिर्भूत्वा पञ्चम्यां मे नराधिप ।
उपवासव्रतं कुर्यात्त्रिकालं चार्चयंस्तु माम् ।
सर्वक्रतुफलं लब्ध्वा मम लोके महीयते ॥ १४-११४-१२ (९६६९०)
युधिष्ठिर उवाच। १४-११४-१३क्ष् (७९९८)
भगवन्देवदेवेश पञ्चमी नाम का तव ।
तामहं श्रोतुमिच्छामि कथयस्व ममानघ ॥ १४-११४-१३ (९६६९१)
भगवानुवाच। १४-११४-१४क्ष् (७९९९)
पर्वद्वयं च द्वादश्यां श्रवणं च नराधिप ।
मत्पञ्चमीति विख्यातां मत्प्रिया च विशेषतः ॥ १४-११४-१४ (९६६९२)
तस्मात्तु ब्राह्मणश्रेष्ठैर्मन्निवेशितबुद्धिभिः ।
उपवासस्तु कर्तव्यो मत्प्रियार्तं विशेषतः ॥ १४-११४-१५ (९६६९३)
द्वादश्यामेव वा कुर्यादुपवासमशक्नुवन् ।
तेनाहं परमां प्रीति यास्यामि नरपुङ्गव ॥ १४-११४-१६ (९६६९४)
अहोरात्रेण द्वादश्यां मार्गशीर्षेण केशवम् ।
उपोष्य पूजयेद्यो मां सोऽस्वमेधफलं लभेत् ॥ १४-११४-१७ (९६६९५)
द्वादश्यां पुष्यमासे तु नाम्ना नारायणं तु माम् ।
उपोष्य पूजयेद्यो मां वाजिमेधफलं लभेत् ॥ १४-११४-१८ (९६६९६)
द्वादश्यां माघमासे तु मामुपोष्य तु माधवम् ।
पूजयेद्यः समाप्नोति राजसूयफलं नृप ॥ १४-११४-१९ (९६६९७)
द्वादश्यां फाल्गुने मासि गोविन्दाख्यमुपोष्य माम् ॥
पूजयेद्यः समाप्नोति ह्यतिरात्रफलं नृप ॥ १४-११४-२० (९६६९८)

द्वादश्यां मासि चैत्रे तु मां विष्णुं समुपोष्य यः ।
पूजयंस्तदवाप्नोति पौण्डरीकस्य यत्फलम् ॥१४-११४-२१ (९६६९९)
द्वादश्यां मासि वैशाखे मधुसूदनसंज्ञितम् ।
उपोष्य पूजयेद्यो मां सोग्निष्टोमस्य पाण्डव ॥१४-११४-२२ (९६७००)
द्वादश्यां ज्येष्ठमासे तु मामुपोष्य त्रिविक्रमम् ।
अर्ययेद्यः समाप्नोति गवां मेधफलं नृप ॥१४-११४-२३ (९६७०१)
आषाढे वामनाख्यं मां द्वादश्यां समुपोष्य यः ।
नरमेधस्य स फलं प्राप्नोति भरतर्षभ ॥१४-११४-२४ (९६७०२)
द्वादश्यां श्रावणे मासि श्रीधराख्यमुपोष्य माम् ।
पूजयेद्य समाप्नोति पञ्चयज्ञफलं नृप ॥१४-११४-२५ (९६७०३)
मासे भाद्रपदे यो मां हृषीकेशाख्यमर्चयेत् ।
उपोष्य स समाप्नोति सौत्रामणिफलं नृप ॥१४-११४-२६ (९६७०४)
द्वादश्यामाश्वयुङ्मासे पद्मनाभमुपोष्य माम् ।
अर्चयेद्यः समाप्नोति गोसहस्रफलं नृप ॥१४-११४-२७ (९६७०५)
द्वादश्यां कार्तिके मासि मां दामोदरसंज्ञितम् ।
उपोष्य पूजयेद्यस्तु सर्वक्रतुफलं नृप ॥१४-११४-२८ (९६७०६)
केवलेनोपवासेन द्वादश्यां पाण्डुनन्दन ।
यत्फलं पूर्वमुद्दिष्टं तस्यार्धं लभते नृप ॥१४-११४-२९ (९६७०७)
श्रावणेऽप्येवमेवं मामर्चयेद्भक्तिमान्नरः ।
मम सालोक्यमाप्नोति नात्र कार्या विचारणा ॥१४-११४-३० (९६७०८)
मासेमासे समभ्यर्च्य क्रमशो मामतन्द्रितः ।
पूर्मे संवत्सरे कुर्यात्पुनः संवत्सरं तु माम् ॥१४-११४-३१ (९६७०९)
अविघ्नमर्चयानस्तु यो मद्भक्तो मत्परायणः ।
अविघ्नमर्चयानस्तु मम सायुज्यमाप्नुयात् ॥१४-११४-३२ (९६७१०)
अर्चयेत्प्रीतिमान्यो मां द्वादस्यां वेदसंहिताम् ।
स पूर्वोक्तफलं राजँल्लभते नात्र संशयः ॥१४-११४-३३ (९६७११)
गन्धं पुष्पं फलं तोयं पत्रं वा मूलमेव वा ।
द्वादश्यां मम यो दद्यात्तत्समो नास्ति मत्प्रियः ॥१४-११४-३४ (९६७१२)
एतेन विधिना सर्वे देवाः शक्रपुरोगमाः ।
मद्भक्ता नरशार्दूल स्वर्गलोकं तु भुञ्जते ॥१४-११४-३५ (९६७१३)
वैशम्पायन उवाच।१४-११४-३६क्ष् (८०००)
एवं वदति देवेशे केशवे पाडुनन्दनः ।
कृताञ्जलिः स्तोत्रमिदं भक्तया धर्मात्मजोऽब्रवीत् ॥१४-११४-३६ (९६७१४)
सर्वलोकेश देवेश हृषीकेशक नमोस्तु ते ।
सहस्रशिरसे नित्यं सहस्राक्ष नमोस्तु ते ॥१४-११४-३७ (९६७१५)
त्रयीमय त्रयीनाथ त्रयीस्तुत नमोनमः ।

यज्ञात्मन्यज्ञसंभूत यज्ञनाथ नमोनमः ॥ १४-११४-३८ (९६७१६)
चतुर्मूर्ते चतुर्बाहो चतुर्व्यूह नमोनमः ।
लोकात्मँल्लोककृन्नाथ लोकावास नमोनमः ॥ १४-११४-३९ (९६७१७)
सृष्टिसंहारकर्त्रे तु नरसिंह नमोनमः ।
भक्तप्रिय नमस्तेऽस्तु कृष्ण नाथ नमोनमः ॥ १४-११४-४० (९६७१८)
लोकप्रिय नमस्तेऽस्तु भक्तवत्सल ते नमः ।
ब्रह्मवास नमस्तेऽस्तु ब्रह्मनाथ नमोनमः ॥ १४-११४-४१ (९६७१९)
रुद्ररूप नमस्तेऽस्तु रुद्रकर्मिरताय ते ।
पञ्चयज्ञ नमस्तेऽस्तु सर्वयज्ञ नमोनमः ॥ १४-११४-४२ (९६७२०)
कृष्णप्रिय नमस्तेऽस्तु कृष्णनाथ नमोनमः ।
योगिप्रिय नमस्तेऽस्तु योगिनाथ नमोनमः ॥ १४-११४-४३ (९६७२१)
हयवक्त्र नमस्तेऽस्तु चक्रपाणे नमोनमः ।
पञ्चभूत नमस्तेऽस्तु पञ्चायुध नमोनमः ॥ १४-११४-४४ (९६७२२)
वैशम्पायन उवाच। १४-११४-४५क्ष् (८००१)
भक्तिगद्गदया वाचा स्तुवत्येवं युधिष्ठिरे ।
गृहीत्वा केशवो हस्ते प्रीतात्मा तं न्यवारयत् ॥ १४-११४-४५ (९६७२३)
निवार्य च पुनर्वाचा भक्तिनम्रं युधिष्ठिरम् ।
वक्तुमेव नरश्रेषठ धर्मपूत्रं प्रचक्रमे ॥ १४-११४-४६ (९६७२४)
भगवानुवाच। १४-११४-४७क्ष् (८००२)
अन्यवत्किमिदं राजन्मां स्तौषि नरपुङ्गव ।
तिष्ठ पृच्छ यथापूर्वं धर्मपूत्र युधिष्ठिर ॥ १४-११४-४७ (९६७२५)
युधिष्ठिर उवाच। १४-११४-४८क्ष् (८००३)
भगवंस्त्वत्प्रसादात्तु धर्मं स्मृत्वा पुनःपुनः ।
न शान्तिरस्ति मे देव नृत्यतीव च मे मनः ॥ १४-११४-४८ (९६७२६)
इदं च धर्मसंपन्नं वक्तुमर्हसि माधव ।
कृष्णपक्षेषु द्वादश्यामर्चनीयः कथं भवेत् ॥ १४-११४-४९ (९६७२७)
भगवानुवाच। १४-११४-५०क्ष् (८००४)
शृणु राजन्यथापूर्वं तत्सर्वं कथयामि ते ।
परमं कृष्णद्वादश्यामर्चनायां फलं मम ॥ १४-११४-५० (९६७२८)
एकादश्यामुपोष्याथ द्वादश्यामर्चयेत्तु माम् ।
विप्रानपि यथालाभं पूजयेद्भक्तिमान्नरः ॥ १४-११४-५१ (९६७२९)
स गच्छेद्दक्षिणामूर्तिं मां वा नात्र विचारणा ।
चन्द्रसालोक्यमथवा ग्रहनक्षत्रपूजितः ॥ ॥ १४-११४-५२ (९६७३०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

आश्वमेधिकपर्व - अध्याय ११५
॥ श्रीः ॥
१४.११५. अध्यायः ११५

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति विषुवाख्यपुण्यकालस्य
महिमानुवर्णनपूर्वकं तत्र दानादिप्रशंसनम् ॥ १ ॥
तथा गायत्रीजपमाहात्म्यकथनम्, अश्वत्थमाहात्म्यकथनं च ॥ २ ॥
तथा नानाधर्मकथनपूर्वकं शिंशुमाराकृतिनिरूपणम्,
पञ्चगव्यविधानकथनं च ॥ ३ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

वैशम्पायन उवाच ।
केशवेनैवमाख्याते धर्मपुत्रः पुनःपुनः ।
पप्रच्छ दानकालस्य विशेषं च विधिं नृप ॥ १४-११५-१ (९६७३१)
युधिष्ठिर उवाच। १४-११५-२क्ष् (८००५)
देव किं फलमाख्यातं विषुवेष्मवरेश्वर ।
सूर्येन्दूपप्लवे चैव वस्तुमर्हति तत्फलम् ॥ १४-११५-२ (९६७३२)
भगवानुवाच। १४-११५-३क्ष् (८००६)
शृणुष्व राजन्विषुवे सोमार्कग्रहणेषु च ।
व्यतीपातेऽयने चैव दानं स्यादक्षयं फलम् ॥ १४-११५-३ (९६७३३)
राजन्नयनयोर्मध्ये विषुवं सम्प्रचक्षते ।
समे रात्रिदिने तत्र सन्ध्यायां विषुवे नृप ॥ १४-११५-४ (९६७३४)
ब्रह्माऽहं शङ्करश्चापि तिष्ठामः सहिताः सकृत् ।
क्रियाकरणकार्याणामेकीभावत्वकारणात् ॥ १४-११५-५ (९६७३५)
अस्माकमेकीभूतानां निष्कलं परमं पदम् ।
तन्मुहूर्तं परं पुण्यं राजन्विषुवसंज्ञितम् ॥ १४-११५-६ (९६७३६)
तदेवाद्यक्षरं ब्रह्म परं ब्रह्मेति कीर्तितम् ।
तस्मिन्मुहूर्ते सर्वे तु चिन्तयन्ति परं पदम् ॥ १४-११५-७ (९६७३७)
देवाश्च वसवो रुद्राः पितरश्चाश्विनौ तथा ।
साध्याश्च विश्वे गन्धर्वाः सिद्धा ब्रह्मर्षयस्तथा ॥ १४-११५-८ (९६७३८)
सोमादयो ग्रहाश्चैव सरितः सागरास्तथा ।
मरुतोत्सरसो नागा यक्षराक्षसगुह्यकाः ॥ १४-११५-९ (९६७३९)
एते चान्ये च राजेन्द्र विषुवे संयतेन्द्रियाः ।

सोपवासाः प्रयत्नेन भवन्ति ध्यानतत्पराः ॥१४-११५-१० (९६७४०)
अन्नं गावस्तिलान्भूमिं कन्यादानं तथैव च ।
गृहमायतनं धान्यं वाहनं शयनं तथा। १४-११५-११ (९६७४१)
यच्चान्यच्च मया प्रोक्तं तत्प्रयच्छ युधिष्ठिर ।
दीयते विषुवेष्वेवं श्रोत्रियेभ्यो विशेषतः ॥१४-११५-१२ (९६७४२)
तस्य दानस्य कौन्तेय क्षयं नैवोपपद्यते ।
वर्धतेऽहरहः पुण्यं तद्दानं कोटिसंमितम् ॥१४-११५-१३ (९६७४३)
विषुवे स्नपनं यस्तु मम कुर्याद्धरस्य वा ।
अर्चनां च यतान्यायं तस्य पुण्यफलं शृणु ॥१४-११५-१४ (९६७४४)
दशजन्मकृतं पापं तस्य सद्यो विनश्यति ।
दशानामश्वमेधानामिष्टानां लभते फलम् ॥१४-११५-१५ (९६७४५)
विमानं दिव्यमारूढः कामरूपी यथासुखम् ।
स याति मामकं लोकं रुद्रलोकमथापि वा ॥१४-११५-१६ (९६७४६)
तत्रस्थैर्देवगन्धर्वैर्गीयमानो यथासुखम् ।
दिव्यवर्षसहस्राणि कोटिमेकं तु मोदते ॥१४-११५-१७ (९६७४७)
ततश्चापि च्युतः कालादिह लोके द्विजोत्तमः ।
चतुर्णामपि वेदानां पारगो ब्रह्मिविद्भवेत् ॥१४-११५-१८ (९६७४८)
चन्द्रसूर्यग्रहे व्योम्नि मम वा शङ्करस्य वा ।
गायत्रीं मामिकां वाऽपि जपेद्यः शङ्करस्य वा ॥१४-११५-१९ (९६७४९)
शङ्खतूर्यस्वनैश्चैव कांस्यघण्टास्वनैरपि ।
कारयेत्तु ध्वनिं भक्त्या तस्य पुण्यफलं शृणु ॥१४-११५-२० (९६७५०)
गान्धर्वैर्होमजप्यैश्च जप्तैरुत्कृष्टनामभिः ।
दुर्बलोपि भवेद्राहुः सोमश्च बलवान्भवेत् ॥१४-११५-२१ (९६७५१)
सूर्येन्दूपप्लवे चैव श्रोत्रियेभ्यः प्रदीयते ।
तत्सहस्रगुणं भूत्वा दातारमुपतिष्ठति ॥१४-११५-२२ (९६७५२)
महापातकयुक्तोपि यद्यपि स्यान्नरोत्तम ।
निष्पापस्तत्क्षणादेव तेन दानेन जायते ॥१४-११५-२३ (९६७५३)
चन्द्रसूर्यप्रकाशेन विमानेन विराजता ।
याति सोमपुरं रम्यं सेव्यमानोप्सरोगणैः ॥१४-११५-२४ (९६७५४)
यावदृक्षाणि तिष्ठन्ति गगने शशिना सह ।
तावत्कालं स रजेन्द्र सोमलोके महीयते ॥१४-११५-२५ (९६७५५)
ततश्चापि च्युतः कालादिह लोके युधिष्ठिर ।
वेदवेदाङ्गविद्विप्रः कोटीधनपतिर्भवेत् ॥१४-११५-२६ (९६७५६)
युधिष्ठिर उवाच। १४-११५-२७क्ष् (८००७)
भगवंस्तव गायत्री जप्यते च कथं विभो ।
किं वा तस्य फळं देव ममाचक्ष्व सुरेश्वर ॥१४-११५-२७ (९६७५७)

भगवानुवाच।१४-११५-२८क्ष् (८००८)
द्वादश्यां विषुवे चैव चन्द्रसूर्यग्रहे तथा ।
अयने श्रवणे चैव व्यतीपाते तथैव च ॥१४-११५-२८ (९६७५८)
अश्वत्तदर्शने चैव तथा मद्दर्शनेऽपि च ।
जप्या तु मम गायत्री चाथवाऽष्टाक्षरं नृप ।
आर्जितं दुष्कृतं तस्य नाशयेन्नात्र संशयः ॥ १४-११५-२९ (९६७५९)
युधिष्ठिर उवाच।१४-११५-३०क्ष् (८००९)
अश्वत्थदर्शनं चैव किं त्वद्दर्शनसंमितम् ।
एतत्कथय मे देव परं कौतूहलं हि मे ॥१४-११५-३० (९६७६०)
भगवानुवाच।१४-११५-३१क्ष् (८०१०)
अहमश्वत्थरूपेण पालयामि जगत्त्रयम् ।
अस्वत्थो न स्थितो यत्र नाहं तत्र प्रतिष्ठितः ॥१४-११५-३१ (९६७६१)
यत्राहं संस्थितो राजन्नस्वत्थश्चापि तिष्ठति ।
यस्त्वेनमर्चयेद्भक्त्या स मां साक्षात्समर्चति ॥१४-११५-३२ (९६७६२)
यस्त्वेनं प्रहरेत्कोपान्मामेव प्रहरेत्तु सः ।
तस्मात्प्रदक्षिणं कुर्यान्न चिन्द्यादेनमन्वहम् ॥१४-११५-३३ (९६७६३)
व्रतस्य पारणं तीर्थमार्जवं तीर्थमुच्यते ।
देवशुश्रूषणं तीर्तचं गुरुशुश्रूषणं तथा ॥१४-११५-३४ (९६७६४)
पितृशुश्रूषणं तीर्थं मातृशुश्रूषणं तथा ।
दाराणां तोषणं तीर्तं गार्हस्थ्यं तीर्थमुच्यते ॥१४-११५-३५ (९६७६५)
आतिथेयः परं तीर्थं ब्रह्मतीर्थं सनातनम् ।
ब्रह्मिचर्यं परं तीर्तं त्रेताग्निस्तीर्थमुच्यते ॥१४-११५-३६ (९६७६६)
मूलं धर्मं तु विज्ञाय मनस्तत्रावधार्यताम् ॥
गच्छ तीर्थानि कौन्तेय धर्मो धर्मेण वर्धते ॥१४-११५-३७ (९६७६७)
द्विविधं तीर्थमित्याहुः स्थावरं जङ्गमं तथा ।
स्तावराज्जङ्गमं तीर्थं ततो ज्ञानपरिग्रहः ॥१४-११५-३८ (९६७६८)
कर्म्णाऽपि विशुद्धस्य पुरुषस्येह भारत ।
हृदये सर्वतीर्थानि तीर्थभूतः स उच्यते ॥१४-११५-३९ (९६७६९)
गुरुतीर्थं परं ज्ञानमतस्तीर्तं न विद्यते ।
ज्ञानतीर्तं परं तीर्तं ब्रह्मतीर्तं सनातनम् ॥१४-११५-४० (९६७७०)
क्षमा तु परमं तीर्तं सर्वतीर्थेषु पाण्डव ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥१४-११५-४१ (९६७७१)
मानितोऽमानितो वाऽपि पूजितोऽपूजितोपि वा ।
आक्रुष्टस्तर्जितो वाऽपि क्षमावांस्तीर्थमुच्यते ॥१४-११५-४२ (९६७७२)
क्षमा यशः क्षमा दानं क्षमा यज्ञः क्षमा दमः ।
क्षमाऽहिंसा क्षमा धर्मः क्षमा चेन्द्रियनिग्रहः ॥१४-११५-४३ (९६७७३)

क्षमा दया क्षमा यज्ञः क्षमयैव धृतं जगत् ।
क्षमावान्ब्राह्मणो देवः क्षमावान्ब्राह्मणो वरः ॥१४-११५-४४ (९६७७४)
क्षमावानाप्नुयात्स्वर्गं क्षमावानाप्नुयाद्यशः ।
क्षमावान्प्राप्नुयान्मोक्षं तस्मात्साधुः स उच्यते ॥१४-११५-४५ (९६७७५)
आत्मा नदी भारतपुण्यतीर्थ-
मात्मा तीर्थं सर्वतीर्थप्रधानम् ।
आत्मा यज्ञः सततं मन्यते वै
स्वर्गो मोक्षः सर्वमात्मन्यधीनम् ॥ १४-११५-४६ (९६७७६)
आचारनैर्मल्यमुपागतेन
सत्यक्षमानिस्तुलशीतलेन ।
ज्ञानांबुना स्नाति हि नित्यमेवं
किं तस्य भूयः सलिलेन तीर्थम् ॥ १४-११५-४७ (९६७७७)
युधिष्ठिर उवाच।१४-११५-४८क्ष् (८०११)
भगवन्सर्वपापघ्नं प्रायश्चित्तमदुष्करम् ।
त्वद्भक्तस्य सुरश्रेष्ठ मम त्वं वक्तुमर्हसि ॥१४-११५-४८ (९६७७८)
भगवानुवाच।१४-११५-४९क्ष् (८०१२)
रहलस्यमिदमत्यर्थमश्राव्यं पापकर्मणाम् ।
अधार्मिकाणामश्राव्यं प्रायश्चित्तं ब्रवीमि ते ॥१४-११५-४९ (९६७७९)
पावनं ब्राह्ममं दृष्ट्वा मद्गतेनान्तरात्मना ।
नमो ब्रह्मण्यदेवायेत्यभिवादनमाचरेत् ॥१४-११५-५० (९६७८०)
प्रदक्षिणं च यः कुर्यात्पुनरष्टाक्षरेण तु ।
तेन तुष्टेन विप्रेणि तत्पापं क्षपयाम्यहम् ॥१४-११५-५१ (९६७८१)
पोत्रकृष्टां वराहस्य मृत्तिकां शिरसा वहन् ।
प्राणायामशतं कृत्वा नरः पापैः प्रमुच्यते ॥१४-११५-५२ (९६७८२)
दक्षिणावर्तशङ्खाद्वा कपिलाशृङ्गतोपि वा ।
प्राक्स्रोतसं नदीं गत्वा ममायतनसंनिधौ ॥१४-११५-५३ (९६७८३)
सलिलेन तु यः स्नायात्सकृदेव रविग्रहे ।
तस्य यत्संचितं पापं तत्क्षणादेव नश्यति ॥१४-११५-५४ (९६७८४)
मस्तकान्निस्सृतैस्तोयैः कपिलाया युधिष्ठिर ।
गोमूत्रेणापि यः स्नायाद्रोहिण्यां मम वा दिने ।
विप्रपादच्युतैर्वाऽपि तोयैः पापं प्रणश्यति ॥ १४-११५-५५ (९६७८५)
नमस्येद्यस्तु मद्भक्त्या शिंशुमारं प्रजापतिम् ।
चतुर्दशाङ्गसंयुक्तं तस्य पापं प्रणस्यति ॥१४-११५-५६ (९६७८६)
ततश्चतुर्दशाङ्गानि शृणु तस्य युधिष्ठिर ।
शिरो धर्मो हनुर्ब्रह्मा वृषावुत्तरदक्षिणौ ॥१४-११५-५७ (९६७८७)
हृदयं तु भवेद्विष्णुरंसौ स्यातां तथाऽश्विनौ ।

अत्रिर्मध्यं भवेद्राजँल्लिङ्गं संवत्सरं भवेत् ॥ १४-११५-५८ (९६७८८)
मित्रावरुणकौ पादावूरुद्वन्द्वं हुताशनः ।
ततः पश्चाद्भवेदिन्द्रस्ततः पश्चात्प्रजापतिः ॥ १४-११५-५९ (९६७८९)
अभयं च ततः पश्चात्स एव ध्रुवसंज्ञिकः ।
एतान्यङ्गानि सर्वाणि शिंशुमारप्रजापतेः ॥ १४-११५-६० (९६७९०)
विबेत्तु पञ्चगव्यं यः पौर्णमास्यामुपोष्य तु ।
तस्य नश्यति यत्पापं तत्पापं पूर्वसंचितम् ॥
तथैव ब्रह्मकूर्चं तु समन्त्रं तु पृथक्पृथक्। १४-११५-६१ (९६७९१)
मासिमासि विबेद्यस्तु तस्य पापं प्रणश्यति ॥
पात्रं च ब्रह्मकूर्चे च शृणु तत्र च भारत। १४-११५-६२ (९६७९२)
पालाशं पद्मपत्रं च ताम्रं वाऽथ हिरण्ययम् ।
सादयित्वा तु गृह्णीयात्तत्तु पात्रमुदाहृतम् ॥ १४-११५-६३ (९६७९३)
गायत्र्या गृह्णते मूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राण्वेति वै दधि ॥ १४-११५-६४ (९६७९४)
तेजोसिशुक्लमित्याज्यं देवस्यत्वेति कुशोदकम् ।
आपोहिष्ठेत्यृचा गृह्यि यवचूर्णं यथाविधि ॥ १४-११५-६५ (९६७९५)
ब्रह्मणे च यथा हुत्वा समिद्धे च हुताशने ।
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ॥ १४-११५-६६ (९६७९६)
उद्धृत्य प्रणवेनैव पिबेतु प्रणवेन तु ।
महताऽपि स पापेन त्वचेवाहिर्विमुच्यते ॥ १४-११५-६७ (९६७९७)
भद्रं न हति यः पादं पठन्नृक्संहितां तदा ।
अन्तर्जले वाऽभ्यादित्ये तस्य पापं प्रणश्यति ॥ १४-११५-६८ (९६७९८)
मम सूक्तं जपेद्यस्तु नित्यं मद्गतमानसः ।
न पापेन स लिप्येत पद्मपत्रमिवांभसा ॥ ॥ १४-११५-६९ (९६७९९)

इति श्रीमन्महाभारते आश्वमेधिकप्रर्वणि वैष्णवधर्मपर्वणि
पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

आश्वमेधिकपर्व - अध्याय ११६
॥ श्रीः ॥
१४.११६. अध्यायः ११६

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति भकगवद्भक्तिसौशील्याद्यभावे
ब्राह्मणानामपि अग्निहोत्रस्वाध्यायाध्ययनादिसत्कर्मणामपि वैफल्यस्य
शूद्राणामपि भक्त्यादिमतां स्वोचितकिंचित्कर्मणामपि साफल्यस्य च

कथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
कीदृशा ब्राह्मणाः पुण्या भावशुद्धाः सुरेश्वर ।
यत्कर्म सफलं नेति कथयस्य ममानघ ॥ १४-११६-१ (९६८००)
भगवानुवाच। १४-११६-२क्ष् (८०१३)
शृणु पाण्डव तत्सर्वं ब्राह्मणानां यथाक्रमम् ।
सफलं निष्फलं चैव तेषां कर्म ब्रवीमि ते ॥ १४-११६-२ (९६८०१)
त्रिदण्डधारणं मौनं जटाधारणमुण्डनम् ।
वल्कलाजिनसंवासो व्रतचर्याऽभिषेचनम् ॥ १४-११६-३ (९६८०२)
अग्निहोत्रं गृहे वासः स्वाध्यायं दारसत्क्रिया ।
सर्वाण्येतानि वै मिथ्या यदि भावो न निर्मलः ॥ १४-११६-४ (९६८०३)
अग्निहोत्रं वृथा राजन्वृथा वेदास्तथैव च ।
शीलेन देवास्तुष्यन्ति श्रुतयस्तत्र कारणम् ॥ १४-११६-५ (९६८०४)
क्षान्तः दान्तं जितक्रोधं जितात्मानं जितेन्द्रियम् ।
तमग्र्यं ब्राह्मणं मन्ये शेषाः शूद्रा इति स्मृताः ॥ १४-११६-६ (९६८०५)
अग्निहोत्रव्रतपरान्स्वाध्यायनिरताञ्शुचीन् ।
उपवासरतान्दान्तांस्तादेवा ब्राह्मणान्विदुः ॥ १४-११६-७ (९६८०६)
न जात्या पुजीतो राजन्गुणाः कल्याणकारणाः ।
चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः ॥ १४-११६-८ (९६८०७)
मनश्शौचं कर्मशौचं कुलशौचं च भारत ।
शरीरशौचं वाक्छौचं शौचं पञ्चविधं स्मृतम् ॥ १४-११६-९
(९६८०८)
पञ्चस्वेतेषु शौचेषु हृदिं शौचं विशिष्यते ।
हृदयस्य च शौचेन स्वर्गं गच्छन्ति मानवाः ॥ १४-११६-१० (९६८०९)
अग्निहोत्रपरिभ्रष्टः प्रसक्तः क्रयविक्रयैः ।
वर्णसङ्करकर्ता च ब्राह्मणो वृषलैः समः ॥ १४-११६-११ (९६८१०)
यस्य वेदश्रुतिर्नष्टा कर्षकश्चापि यो द्विजः ।
विकर्मसेवी कौन्तेय स वै वृषल उच्यते ॥ १४-११६-१२ (९६८११)
वृषो हि धर्मो विज्ञेयस्तस्य यः कुरुते लयम् ।
वृषलं तं विदुर्देवा निकृष्टं श्वपचादपि ॥ १४-११६-१३ (९६८१२)
स्तुतिभिर्ब्रह्मगीताभिर्यः शूद्रं स्तौति मानवः ।
न तु मां स्तौति पापात्मा स तु चण्डालतः समः ॥ १४-११६-१४ (९६८१३)
श्वदृतौ तु यथा क्षीरं ब्रह्म वै वृषले तथा ।

दुष्टतामेति तत्सर्वं शुना लीढं हविर्यथा ॥१४-११६-१५ (९६८१४)
अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥१४-११६-१६ (९६८१५)
यान्युक्तानि मया सम्यग्विद्यास्थानानि भारत ।
उत्पन्नानि पवित्राणि भुवनार्थं तथैव च ॥१४-११६-१७ (९६८१६)
तस्मात्तानि न शूद्रस्य स्प्रष्टव्यानि युधिष्ठिर ।
सर्वं त्रीण्यपवित्राणि पञ्चामेध्यानि भारत। १४-११६-१८ (९६८१७)
श्वा च शूद्रः श्वपाकश्च अपवित्राणि पाण्डव ॥
गायकः कुक्कुटो यूपो ह्युदक्या वृषलीपतिः। १४-११६-१९ (९६८१८)
पञ्चैते स्युरमेध्याश्च स्प्रष्टव्या न कदातन ।
स्पृष्ट्वैतानष्ट वै विप्रः सचेलो जलमाविशेत् ॥१४-११६-२० (९६८१९)
मद्भक्ताञ्शूद्रसामान्यादवमन्यन्ति ये नराः ।
नरकेष्वेव तिष्ठन्ति वर्षकोटिं नराधमाः ॥१४-११६-२१ (९६८२०)
चण्डालमपि मद्भक्तं नावमन्येत बुद्धिमान् ।
अवमानात्पतन्त्येव नरके रौरवे नराः ॥१४-११६-२२ (९६८२१)
मम भक्तस्य भक्तेषु प्रीतिरभ्यधिका मम ।
तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषतः ॥१४-११६-२३ (९६८२२)
कीटपक्षिमृगाणां च मयि संन्यस्तचेतसाम् ।
ऊर्ध्वामेव गतिं विद्धि किं पुनर्ज्ञानिनां नृणाम् ॥१४-११६-२४ (९६८२३)
पत्रं वाऽप्यथवा पुष्पंक फलं वाऽप्यप एव वा ।
ददाति मम शूद्रो यच्छिरसा धारयामि तत् ॥१४-११६-२५ (९६८२४)
विप्रानेवार्चयेद्भक्त्या शूद्रप्रायांश्च मत्प्रियान् ।
तेषां तेनैव रूपेण पूजां गृह्णामि भारत ॥१४-११६-२६ (९६८२५)
वेदोत्तेनैव मार्गेण सर्वभूतहृदि स्थितम् ।
मामर्चयन्ति ये पिप्रा मत्सायुज्यं व्रजन्ति ते ॥१४-११६-२७ (९६८२६)
मद्भक्तानां हितायैव प्रादुर्भावः कृतो मया ।
प्रदुर्भावकृता काचिदर्चनीया युधिष्ठिर ॥१४-११६-२८ (९६८२७)
आसामन्यतमां मूर्तिं यो मद्भक्त्या समर्चति ।
तेनैव परितुष्टोऽहं भविष्यामि न संशयः ॥१४-११६-२९ (९६८२८)
मृदा च मणिरत्नैश्च ताम्रेण रजतेन च ।
कृत्वा प्रतिकृतिं कुर्यादर्चनां काञ्चनेन वा ।
पुण्यं दशगुणं विद्यादेतेषामुत्तरोत्तरम् ॥ १४-११६-३० (९६८२९)
जपकामो भवेद्राजा विद्याकामो द्विजोत्तमः ।
वैश्यो वा धनकामस्तु शूद्रः सुखफलप्रियः ।
सर्वकामाः स्त्रियो वाऽपि सर्वान्कामानवाप्नुयुः ॥ ॥ १४-११६-३१ (९६८३०)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

आश्वमेधिकपर्व - अध्याय ११७
॥ श्रीः ॥
१४.११७. अध्यायः ११७

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रत्यश्वत्थगोब्राह्मणमहिमप्रशंसनपूर्वकं
ब्राह्मणभ्रंशकदुष्कर्मकथनम् ॥ १ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
कीदृशानां तु शूद्राणां नानुगृह्णासि चार्चनम् ।
उद्वेगस्तव कस्माद्धि तन्मे ब्रूहि सुरेश्वर ॥ १४-११७-१ (९६८३१)
भगवानुवाच। १४-११७-२क्ष् (८०१४)
अव्रतेनाप्यभक्तेन स्पृष्टां शूद्रेण चार्चनाम् ।
तां वर्जयामि राजेन्द्र श्वपाकविहितामिव ॥ १४-११७-२ (९६८३२)
नन्वहं शङ्करश्चापि गावो विप्रास्तथैव च ।
अश्वत्थोऽमररूपं हि त्रयमेतद्युधिष्ठिर ॥ १४-११७-३ (९६८३३)
एतत्त्रयं हि मद्भक्तो नावमन्येत कर्हिचित् ।
अवमानितमेतत्तु दहत्यासप्तमं कुलम् ॥ १४-११७-४ (९६८३४)
अश्वत्थो ब्राह्मणा गावो मन्मयास्तारयन्ति हि ।
तस्मादेतत्प्रयत्नेन त्रयं पूजय पाण्डव ॥ १४-११७-५ (९६८३५)
युधिष्ठिर उवाच। १४-११७-६क्ष् (८०१५)
ब्राह्मणेनैव देहेन कथं शूद्रत्वमाप्नुयात् ।
ब्रह्म वा नश्यति कथं वक्तुं देव त्वमर्हसि ॥ १४-११७-६ (९६८३६)
भगवानुवाच। १४-११७-७क्ष् (८०१६)
कूपस्नानं तु यो विप्रः कुर्याद्द्वादशवार्षिकम् ।
स तेनैव शरीरेण शूद्रत्वं यात्यसंशयम् ॥ १४-११७-७ (९६८३७)
यस्तु राजाश्रयेणैव जीवेद्द्वादशवार्षिकम् ।
स शूद्रत्वं व्रजेद्विप्रो वेदानां पारगोपि सन् ॥ १४-११७-८ (९६८३८)
पत्तने नगरे वाऽपि यो द्वादशसमा वसेत् ।
स शूद्रत्वं व्रजेद्विप्रो नात्र कार्या विचारणा ॥ १४-११७-९ (९६८३९)
उत्पादयति यः पुत्रं शूद्रायां काममोहितः ।

तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ १४-११७-१० (९६८४०)
यः सोमलतिकां विप्रः केवलं भक्षयेद्वृथा ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ १४-११७-११ (९६८४१)
मैथुनं कुरुते यस्तु जिह्वायां ब्राह्मणो नृप ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ १४-११७-१२ (९६८४२)
विप्रत्वं दुर्लभं प्राप्य दुर्मर्गैरेवमादिभिः ।
विनाशयन्ति ये तत्तु ताञ्शोचामि युधिष्ठिर ॥ १४-११७-१३ (९६८४३)
तस्मात्सर्वप्रत्नेन मत्प्रियो यो युधिष्ठिर ।
जातिभ्रंशकरं कर्म न कुर्यादीदृशं द्विजः ॥ ॥ १४-११७-१४ (९६८४४)

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

आश्वमेधिकपर्व - अध्याय ११८
॥ श्रीः ॥
१४.११८. अध्यायः ११८

Mahabharata - Ashvamedhika Parva - Chapter Topics
कृष्णेन युधिष्ठिरंप्रति पालाशविधिप्रकारकथनम् ॥ १ ॥
तथा तीर्थाटनासमर्थानां तत्प्रतिनिधितीर्थानुवर्णनम् ॥ २ ॥
तथा भगवद्भक्तलक्षणकथनपूर्वकं तत्प्रशंसनम् ॥ ३ ॥
तता स्वस्य सर्वोत्तमत्वकथनपूर्वकं स्वोक्तधर्मश्रवणस्य
फलकथनम् ॥ ४ ॥
ततो युधिष्ठिराद्यामन्त्रपूर्वकं दारुकोपनीतरथारोहणेन द्वारकांप्रति
गमनम् ॥ ५ ॥

Mahabharata - Ashvamedhika Parva - Chapter Text

युधिष्ठिर उवाच ।
देशान्तरगते विप्रे संयुक्ते कालधर्मणा ।
शरीरनाशे संप्राप्ते कथं प्रेतत्वकल्पना ॥ १४-११८-१ (९६८४५)
भगवानुवाच। १४-११८-२क्ष् (८०१७)
श्रूयतामाहिताग्नेस्तु तथाभूतस्य संस्क्रिया ।
पालाशबृन्दैः प्रतिमा कर्तव्या कल्पचोदिता ॥ १४-११८-२ (९६८४६)
त्रीणि षष्टिशतान्याहुरस्थीन्यस्य युधिष्ठिर ।
तेषां विकल्पना कार्या यथाशास्त्रं विनिश्चितम् ॥ १४-११८-३ (९६८४७)

अशीत्यर्धं शिरसि च ग्रीवायां दश एव च ।
बाह्वोश्चापि शतं दद्यादङ्गुलीषु पुनर्दश ॥१४-११८-४ (९६८४८)
उरसि त्रिंशतं दद्याज्जठरे वाऽपि विंशतिम् ।
वृषणे द्वादशार्धं तु शिश्ने चाष्टार्धमेव च ॥१४-११८-५ (९६८४९)
दद्यात्तु शतमूर्वोस्तु षष्ट्यर्थं जानुजङ्घयोः ।
दश दद्याच्चरणयोरेषा प्रेतस्य निष्कृतिः ॥१४-११८-६ (९६८५०)
युधिष्ठिर उवाच।१४-११८-७क्ष् (८०१८)
विशेषतीर्थं सर्वेषामशक्तानामनुग्रहात् ।
भक्तानां तारणार्तं तु वक्तुमर्हसि धर्मतः ॥१४-११८-७ (९६८५१)
भगवानुवाच।१४-११८-८क्ष् (८०१९)
पावनं सर्वतीर्थानां सत्यं गायन्ति सामगाः ।
सत्यस्य वचनं तीर्थमहिंसा तीर्थमुच्यते ॥१४-११८-८ (९६८५२)
तपस्तीर्थं दया तीर्थं शीलं तीर्थं युधिष्ठिर ।
अल्पसंतोषकं तीर्थं नारी तीर्थं पतिव्रता ॥१४-११८-९ (९६८५३)
संतुष्टो ब्राह्मणस्तीर्थं ज्ञानं वा तीर्थमुच्यते ।
मद्भक्तः सततं तीर्थं शङ्करस्य विशेषतः ॥१४-११८-१० (९६८५४)
यतयस्तीर्थमित्येवं विद्वांसस्तीर्थमुच्यते ।
शरण्यपुरुषस्तीर्थमभयं तीर्थमुच्यते ॥१४-११८-११ (९६८५५)
त्रैलोक्येऽस्मिन्निरुद्विग्नो न बिभेमि कुतश्चन ।
न दिवा यदि वा रात्रावुद्वेगः शूद्रलङ्घनात् ॥१४-११८-१२ (९६८५६)
न भयं देवदैत्येभ्यो रक्षोभ्यश्चैव मे नृप ।
शूद्रवक्त्राच्च्युतं ब्रह्म भयं तु मम सर्वदा ॥१४-११८-१३ (९६८५७)
तस्मात्सप्रणवं शूद्रो मन्नामापि न कीर्तयेत् ।
प्रणवं हि परं लोके ब्रह्म ब्रह्मविदो विदुः ॥१४-११८-१४ (९६८५८)
द्विजशुश्रूषणं धर्मः शूद्राणां भक्तितो मयि ।
तेन गच्छन्ति ते स्वर्गं चिन्तयन्तो हि मां सदा ॥१४-११८-१५ (९६८५९)
द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छति ।
द्विजशुश्रूषणादन्यन्नास्ति शूद्रस्य निष्कृतिः ॥१४-११८-१६ (९६८६०)
रागो द्वेषश्च मोहश्च पारुष्यं चानृशंसता ।
शाठ्यं च दीर्घवैरित्वमतिमानमनार्जवम् ॥१४-११८-१७ (९६८६१)
अनृतं चापवादं च पैशुन्यमतिलोभता ।
हिंसा स्तेयो मृषावादो वञ्चना रोषलोभता ॥१४-११८-१८ (९६८६२)
अबुद्धिता च नास्तिक्यं भयमालस्यमेव च ।
अशौचं चाकृतज्ञत्वं डंभता स्तंभ एव च ।
निकृतिश्चाप्यविज्ञानं जातके शूद्रमाविशेत् ॥ १४-११८-१९ (९६८६३)
सृष्ट्वा पितामहः शूद्रमभिभूतं तु तामसैः ।

द्विजशुश्रूषणं धर्मं शूद्राणां तु प्रयुक्तवान् ।
नश्यन्ति तामसा भावाः शूद्रस्य द्विजभक्तितः ॥ १४-११८-२० (९६८६४)
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतं मूर्ध्ना गृह्णामि शूद्रतः ॥ १४-११८-२१ (९६८६५)
अग्रजो वाऽपि यः कश्चित्सर्वपापसमन्वितः ।
यदि मां सततं ध्यायेत्सर्वपापैः प्रमुच्यते ॥ १४-११८-२२ (९६८६६)
विद्याविनयसंपन्ना ब्राह्मणा वेदपारगाः ।
मयि भक्ति न कुर्वन्ति चण्डालसदृशा हि ते ॥ १४-११८-२३ (९६८६७)
वृथा दानं वृथा तप्तं वृथा चेष्टं वृथा हुतम् ।
वृथाऽऽतिथ्यं च तत्तस्य यो न भक्तो मम द्विजः ॥ १४-११८-२४ (९६८६८)
यत्कृतं च हुतं चापि यदिष्टं दत्तमेव च ।
अभक्तिमत्कृतं सर्वं राक्षसा एव भुञ्जते ॥ १४-११८-२५ (९६८६९)
स्थावरे जङ्गमे वाऽपि सर्वभूतेषु पाण्डव ।
समत्वेन यदा कुर्यान्मद्भक्तो मित्रशत्रुषु ॥ १४-११८-२६ (९६८७०)
आनृशंस्यमहिंसा च यथा सत्यं तथाऽऽर्जवम् ।
अद्रोहश्चैव भूतानां मद्व्रतानां व्रतं नृप ॥ १४-११८-२७ (९६८७१)
नम इत्येव यो ब्रूयान्मद्भक्तं श्रुद्धयाऽन्वितः ।
तस्याक्षयाऽभवँल्लोकाः श्वपाकस्यापि पार्थिव ॥ १४-११८-२८ (९६८७२)
किं पुनर्ये यजन्ते मां सदारं विधिपूर्वकम् ।
मद्भक्ता मद्गतप्राणाः कथयन्तश्च मां सदा ॥ १४-११८-२९ (९६८७३)
बहुवर्षसहस्राणि तपस्तप्यति यो नरः ।
नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते ॥ १४-११८-३० (९६८७४)
मामेव तस्माद्राजेन्द्र ध्यायन्नित्यमतन्द्रितः ।
अवाप्स्यति ततः सिद्धिं द्रक्ष्यत्येव परं पदम् ॥ १४-११८-३१ (९६८७५)
अपार्थकं प्रभाषन्तः शूद्रा भागवता इति ।
न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः ॥ १४-११८-३२ (९६८७६)
द्वादशाक्षरतत्वज्ञश्चतुर्व्यूहविभागवित् ।
अच्छिद्रपञ्चकालज्ञः स वै भागवतः स्मृतः ॥ १४-११८-३३ (९६८७७)
ऋग्वेदेनैव होता च यजुषाऽध्वर्युरेव च ।
सामवेदेन चोद्गाता पुण्येनाभिष्टुवन्ति माम् ॥ १४-११८-३४ (९६८७८)
अथर्वशिरसा चैव नित्यमाथर्वाणा द्विजाः ।
स्तुवन्ति सततं ये मां ते वै भागवताः स्मृताः ॥ १४-११८-३५ (९६८७९)
वेदाधीनाः सदा यज्ञा यज्ञाधीनास्तु देवताः ।
देवता ब्राह्मणाधीनास्तस्माद्विप्रास्तु देवताः ॥ १४-११८-३६ (९६८८०)
अनाश्रित्योच्छ्रयं नास्ति मुख्यमानश्रयमाश्रयेत् ।
रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः ॥ १४-११८-३७ (९६८८१)

ब्रह्मा मामाश्रितो राजन्नाहं कंचिदुपाश्रितः ।
ममाश्रयो न कश्चित्तु सर्वेषामाश्रयो ह्यहम् ॥ १४-११८-३८ (९६८८२)
एवमेतन्मया प्रोक्तं रहस्यमिदमुत्तमम् ।
धर्मप्रियस्य ते नित्यं राजन्नेवं समाचर ॥ १४-११८-३९ (९६८८३)
इदं पवित्रमाख्यानं पुण्यं वेदेन संमितम् ।
यः पठेन्मामकं धर्ममहन्यहनि पाण्डव ॥ १४-११८-४० (९६८८४)
धर्मोति वर्धते तस्य बुद्धिश्चापि प्रसीदति ।
पापक्षयमुपेत्यैवं कल्याणं च विवर्धते ॥ १४-११८-४१ (९६८८५)
एतत्पुण्यं पवित्रं च पामनाशनमुत्तमम् ।
श्रोतव्यं श्रद्धया युक्तैः श्रोत्रियैश्च विशेषतः ॥ १४-११८-४२ (९६८८६)
श्रावयेद्यस्त्विदं भक्त्या प्रयतोथ शृणोति वा ।
स गच्छेन्मम सायुज्यं नात्र कार्या विचारणा ॥ १४-११८-४३ (९६८८७)
यश्चेमं श्रावयेच्छ्राद्धे मद्भक्तो मत्परायणः ।
पितरस्तस्य तृप्यन्ति यावदाभूतसंप्लवम् ॥ १४-११८-४४ (९६८८८)
वैशम्पायन उवाच। १४-११८-४५क्ष् (८०२०)
श्रुत्वा भागवतान्धर्मान्साक्षाद्विष्णोर्जगद्गुरोः ।
प्रहृष्टमनसो भूत्वा चिन्तयन्तोद्भुताः कथाः ॥ १४-११८-४५ (९६८८९)
ऋषय पाण्डवाश्चैव प्रणेमुस्तं जनार्दनम् ।
पूजयामास गोविन्दं धर्मपुत्रः पुनः पुनः ॥ १४-११८-४६ (९६८९०)
देवा ब्रह्मर्षयः सिद्धा गन्धर्वाप्सरसस्तथा ।
ऋषयस्च महात्मानो गुह्यका भुजगास्तता ॥ १४-११८-४७ (९६८९१)
वालखिल्या महात्मानो योगिनस्तत्वदर्शिनः ।
तथा भागवताश्चापि पञ्चकालमुपासकाः ॥ १४-११८-४८ (९६८९२)
कौतूहलसमायुक्ता भगवद्भक्तिमागताः ।
श्रुत्वा तु परमं पुण्यं वैष्णवं धर्मशासनम् ॥ १४-११८-४९ (९६८९३)
विमुक्तपापाः पूतास्ते संवृत्तास्तत्क्षणेन् तु ।
प्रणम्य शिरसा विष्णु प्रतिनन्द्य च ताः कथाः ॥ १४-११८-५० (९६८९४)
द्रष्टारो द्वारकायां वै वयं सर्वे जगद्गुरुम् ।
इति प्रहृष्टमनसो ययुर्देवगणैः सह ।
सर्वे ऋषिगणा राजन्ययुः स्वंस्वं निवेशनम् ॥ १४-११८-५१ (९६८९५)
गतेषु तेषु सर्वेषु केशवः केशिहा हरिः ।
सस्मार दारुकं राजन्स च सात्यकिना सह ।
समीपस्थोऽभवत्सूतो याहि देवेति चाब्रवीत् ॥ १४-११८-५२ (९६८९६)
ततो विषण्णवदनाः पाण्डवाः पुरुषोत्तमम् ।
अञ्जलिं मूर्ध्नि संधाय नेत्रैरश्रुपरिप्लुतैः ।
पिबन्तः सततं कृष्णं नोचुरार्ततरास्तदा ॥ १४-११८-५३ (९६८९७)

कृष्णोपि भगवान्देवः पृथामामन्त्र्य चार्तवत् ।
धृतराष्ट्रं च गान्धारीं विगदुरं द्रौपदीं तथा ॥१४-११८-५४ (९६८९८)
कृष्णद्वैपायनं व्यासमृषीनन्यांस्च मन्त्रिणः ।
सुभद्रामात्मजयुतामुत्तरां स्पृश्य पाणिना ।
निर्गत्य वेश्मनस्तस्मादारुरोह तदा रथम् ॥ १४-११८-५५ (९६८९९)
वाजिभिः शैव्यसुग्रीवमेघपुष्पबलाहकैः ।
युक्तं तु ध्वजभूतेन पतगेन्द्रेण धीमता ॥१४-११८-५६ (९६९००)
अन्वारुरोह चाप्येन प्रेम्या राजा युधिष्ठिरः ।
अपास्य चाशु यन्तारं दारुकं सूतसत्तमम् ।
अभीशून्प्रतिजग्राह स्वयं कुरुपतिस्तदा ॥ १४-११८-५७ (९६९०१)
उपारुह्यार्जुनश्चापि चामरव्यजनं शुभम् ।
रुक्मदण्डं बृहन्मूर्ध्नि दुधावाभिप्रदक्षिणम् ॥१४-११८-५८ (९६९०२)
तथैव भीमसेनोपि रथमारुह्य वीर्यवान् ।
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ॥१४-११८-५९ (९६९०३)
वैडूर्यमणिदण्डं च चामीकरविभूषितम् ।
दधार तरसा भीमश्छत्रं तच्छार्ङ्गधन्वनः ॥१४-११८-६० (९६९०४)
उपारुह्य रथं शीघ्रं चामरव्यजने सिते ।
नकुलः सहदेवश्च धूयमानौ जनार्दनम् ॥१४-११८-६१ (९६९०५)
भीमसेनोऽर्जुनश्चैव यमावप्यरिसूदनौ ।
पृष्ठतोऽनुययुः कृष्णं माशब्द इति हर्षिताः ॥१४-११८-६२ (९६९०६)
त्रियोजने व्यतीते तु परिष्वज्य च पाण्डवान् ।
विसृज्य कृष्णस्तान्सर्वान्प्रणतान्द्वारका ययौ ॥१४-११८-६३ (९६९०७)
तथा प्रणम्य गोविन्दं तदाप्रभृति पाण्डवाः ।
कपिलाद्यानि दानानि ददुर्धर्मपरायणाः ॥१४-११८-६४ (९६९०८)
मधुसूदनवाक्यानि स्मृत्वास्मृत्वा पुनःपुनः ।
मनसा पूजयामासुर्हृदयस्थानि पाण्डवाः ॥१४-११८-६५ (९६९०९)
युधिष्ठिरस्तु धर्मात्मा हृदि कृत्वा जनार्दनम् ।
तद्भक्तस्तन्मना युक्तस्तद्याजी तत्परोऽभवत् ॥१४-११८-६६ (९६९१०)
एवमुक्तं पुरावृत्तं वैष्णवं धर्मशासनम् ।
मया ते कथितं राजन्पिवित्रं पापनाशनम् ॥१४-११८-६७ (९६९११)
तच्छृणुष्व महाराज विष्णुप्रोक्तं कुरूद्वह ।
तेन गच्छसि नान्येन तद्विष्णोः परमं पदम् ॥ ॥१४-११८-६८ (९६९१२)

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां
वैयासिक्यां आश्वमेधिकपर्वणि वैष्णवधर्मपर्वणि
अष्टादशाधिकशततमोऽध्यायः ॥११८ ॥

। इत्याश्वमेधिकपर्व समाप्तम् ॥

इतः परमाश्रमवासिकपर्व भविष्यति । तस्यायमाद्यः श्लोकः। जनमेजय उवाच। प्राप्य पैतामहं राज्यं मम पूर्वपितामहाः। कथमासन्महाराजे धृतराष्ट्रे महात्मनि ॥ १ ॥ इत्याश्वमेधिकपर्व कुंभघोणस्येन TI.Ar कृष्णाचार्येण TI.Ar व्यासाचार्येण च मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम्। शकाब्दाः १८३२ सन १९१०.

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org